विष्णुसहस्रनाम-स्तोत्रम्

(सत्यभाष्याऽऽर्यभाषानुवादसहितम्)

द्वितीयो भागः

(नाम-संख्या २५१-५००)

सत्यदेवो वासिष्ठः

दिल्ली-विश्वविद्यालयीय-
संस्कृत-विभागाय
शोधपत्र-समीक्षार्थं
प्रदीयते.

सत्यदेवो वासिष्ठः
१०-४-७२ ई.

द्वितीय भाग के श्लोकों का शुद्धिपत्र

पृ०	
७०	तज्ज्ञस्य कामान् स निराकरोति ६४
७७	कस्तं विनाग्नि ज्वलयेच्च काये ६३
१०१	— — — —जीव इवाभ्युपैति
१२७	स सातसक्लेशयुगं दधानो १२६
१६७	अरिष्टलक्षणः श्लोकः—अस्मत्
१७६	जगद्वचनक्त्येव सहं सनात् तम् १८६
१६०	मंत्रलिंगानि —ऋक्परिशिष्टे
२१३	घृतेन त्वा मनुरद्या समिन्धे

...स्य शुद्धिपत्रम्

अशुद्धम्	शुद्धम्
...ान्	भूतृणां
...न	जातक
...नो	वर्धमानौ
...न	वर्धमान
...ा	विघातं
	स्वस्थं
	स
...ीभावना	कुटिलीभावन
...ीवानां	जन्तुर्जीवानां
	दुर्धरः
	भेदं
...ते	वाचस्पति
	इन्धी
...ान्	निबध्नन्
	नैकरूप
	६
...ङ्गर्थौ	ज्ञापनलिङ्गार्थौ
	विश्वं

पृ०	पं०	अशुद्ध	शुद्ध
[illegible]	[illegible]	...त्वधा	...त्वधा
१२	७	श्रद्धसूक्ते	श्रद्धासूक्ते
१३	५	भूत्वातरिक्षेण	भूत्वान्तरिक्षेण
१३	१०	प्रत्येकस्म त	प्रत्येकस्मात्
१३	१०	सूर्यः स्त्रिभिः	सूर्यस्त्रिभिः
१३	११	विष्णु	विष्णुः
१३	१८	विभाव पन्न	त्रिभावापन्न
१७	६	वर्धयतेण्यन्तात्	वर्धयतेर्ण्यन्तात्
१७	७	रोचिस्य	रोचिष्यो
१७	११	वस्तुजात	वस्तुजातं
१७	२७	देखते	देखने

पृ०	पं०	अशुद्ध	शुद्ध
३८	५	तौदादि	तौदादिकः
३८	२३	पटित	पठित
४२	११	यावदायुष्प्रमाए	यावदायुष्प्रमाण
४५	२	रम्वावर्तस्व	रम्यावर्तस्व
४५	१८	। है	है ।
४६	१३	त्वेव	त्वेवं
४७	१	जघे	जंघे
४९	९	आत्म	आत्मा
४९	२९	जसे	जैसे
५०	१२	अमुमैव	अमुयैव
५७	१०	जहन्निव	जहद्विव

विष्णुसहस्रनामसत्यभाष्ये द्वितीयभागस्य शुद्धिपत्रम्

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
१	२२	पवित्रीकारण	पवित्रीकरण
२	१२	क ले	काले
२	२६	भौकि	भौतिक
३	४	पृथगंयं	पृथगङ्ग
३	६	फलपरिकान्तं	फलपरिपाकान्तं
३	१२	च त:	चैत्रत:
४	६	यथाक्रम	यथाक्रमं
४	१०	सिद्धर्थं	सिद्धार्थं
४	२१	व्रह्मणादि	व्राह्मणादि
४	२३	आषढ	आषाढ
४	२८	शकल	सकल
५	१९	न म से	नाम से
६	१२	साकल्य	साकल्यं
८	२५	प्रकर	प्रकार
८	२७	रीर	शरीर
९	३०	वृष हः	वृषाहः
१०	१६	नामनि	नामानि
११	११	बह्वर्यो	बह्वर्थो
१२	७	श्रद्धसूक्ते	श्रद्धासूक्ते
१३	५	भूत्वातरिक्षेण	भूत्वान्तरिक्षेण
१३	१०	प्रत्येकस्म त्	प्रत्येकस्मात्
१३	१०	सूर्य: स्त्रिभि:	सूर्यस्त्रिभि:
१३	११	विष्णु	विष्णुः
१३	१८	विभाव पन्न	त्रिभावापन्न
१७	६	वर्वयतेण्यन्तात्	वर्धयतेर्ण्यन्तात्
१७	७	रोचिभ्य	रोचिभ्यो
१७	११	वस्तुजात	वस्तुजातं
१७	२७	देखते	देखने
१८	३	भूतृणान्	भूतृणं
१८	१३	जातक	जातक
१८	१४	वध्रमानौ	वर्धमानौ
१८	१५	वध्रमान	वर्धमान
२०	१३	विधान	विधानं
२०	१३	स्वस्थ	स्वस्थं
२१	२०	सः	स
२२	२	कुटिलीभावना	कुटिलीभावन
२२	३	वगुर्जीवानां	जनुर्जीवानां
२६	१	दुर्धर	दुर्धरः
२८	८	भेद	भेदं
२८	११	वचस्पति	वाचस्पति
२८	३१	इधी	इन्धी
३२	७	निवन्ध्नन्	निवध्नन्
३२	३१	नकरूप	नैकरूप
३३	१९	९	६
३४	७	ज्ञापनलिङ्गर्थौ	ज्ञापनलिङ्गार्थौ
३४	२	विश्व	विश्वं
३८	५	तौदादि	तौदादिकः
३८	२३	पटित	पठित
४२	११	यावदायुष्प्रमाण	यावदायुष्प्रमाण
४५	२	रम्भावर्तस्व	रम्यावर्तस्व
४५	१८	। है	है ।
४६	१३	त्वेव	त्वेवं
४७	१	जघे	जंघे
४९	९	आत्म	आत्मा
४९	२९	जसे	जैसे
५०	१२	अमुमैव	अमुमेव
५७	१०	जहन्निव	जहद्दिव

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
५८	१	ओषघस्य	औषघस्य
५९	९	प्रष्ठवंशो	पृष्ठवंशो
५९	१२	अष्टाविंशतिभवन्ति	अष्टाविंशति-भंवन्ति
६०	२३	सुषम्णा	सुषुम्णा
६३	८	शतान्यस्थनां	शतान्यस्थ्नां
६४	१३	सर्वेणु	सर्वेषु
६५	६	वर्तमानद्	वर्तमानाद्
६६	८	पुनतु	पुनातु
६७	५	विकार	विकारं
७१	१७	बढः	बढा
७०	७	अथव	अथर्वं
७०	९	समान	समानं
७०	११	कामान् निराकरोति	कामान् स निराकरोति
७३	१९	जवाधिष्ठानं	बीजाधिष्ठानं
७४	३०	अश	अंश
७५	४	कामेनेव	कामेनैव
७५	५	यन्त्राणमा	यन्त्राणामा
७५	११	सप्तविंशति	सप्तविंशति
८१	३	सूत्रण	सूत्रेण
८२	१३	भिन्न	भिन्नं
८२	१७	निपत	निपात
८८	२६	सङ्गतिकण	सङ्गतिकरण
९१	४	सवह	संवह
९२	२	विष्णुक्तः	विष्णुरुक्तः
१९२	३१	अकाश	आकाश
१००	९	उक्त	उक्तं
१०१	५	प्रस्कुवते	प्रसुवते
१०१	९	इव उदेति	इवाभ्युदेति
१०५	७	स मूमि	स भूमि
१०७	१८	पंचूभत	पंचभूत
१११	१४	यथाविघ	यथाविधं
११३	६	प्राणदा:	प्राणद:
११३	१६	लोक	लोकं
११७	१	सर्वयालम्	सर्वंकालम्
१२२	१०	नियागात्	नियोगात्
१२२	१०	तत्रव च	तत्रैव च
१२२	१२	पवतानामुद्गमो	पर्वतानामुद्गमो
१२२	१३	शरीरेऽप	शरीरेऽपि
१२३	१४	लाके	लोके
१२३	१४	पुराण	पुराणं
१२६	४	कतरि	कर्तरि
१२६	११	सवामदं	सर्वमिदं
१२६	१२	प्रवत्यते	प्रवर्त्यते
१२६	१४	ग्रृष्टिमिश्र	वृष्टिमिश्रं
१२६	१६	शुभमशुभ	शुभमशुभ
१२७	४	कूदन्ते	कूर्दन्ते
१२७	८	वात	वातं
१२८	२	घातो वस	घातो वंस
१२८	२०	क्रीडा करत	क्रीडा करता है
१२८	२२	स्तृत्य	स्तुत्य
१४५	९	भौतके	भौतिके
१४५	११	ग्रहचक्र	ग्रहचक्रं
१४५	११	राशिचक्र	राशिचक्रं
१४६	५	श्रुतिभाष्यमानं	श्रुतिभाष्यमाणं
१४७	१	पद्म	पद्मं
१४७	२	रेत: वरूप:	रेतोरूप:
१५०	१२	दृश्यादृश्यकर्यं	दृश्यादृश्यकार्यं
१५१	३३	अकाश	आकाश
१५४	५	युञन्	युंजन्
१६०	१	ज्ञयेम्	ज्ञेयम्

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
१६१	११	भीघातोपादाने	भीघातोरपादाने
१६१	२६	शरणत	शरण्य
१६२	२९	आप आप	आप
१३०	१३	उपादानोर्णा	उपादानेनोर्णा
१३८	९	स्वजन्मान्तरभव	स्वजन्मान्तरभवं
१३८	२२	प्तवन	प्लवन
१३९	१२	विक्रमणांम्	विक्रमणम्
१४०	३२	ह ता	होता
१४१	६	चास्माकम्	चात्रास्माकम्
१४२	१२	सवत्र	सर्वत्र
१४३	८	ओत प्रोतश्च	ओतं प्रोतश्च
१४३	९	ज्ञनमिदं	ज्ञानमिदं
१४३	१२	गतिशील	गतिशीलं
१४४	२	छावापृथिव्यो	द्यावापृथिव्यो
१४४	१६	सुख	सुखं
१४४	३४	भगवन्	भगव न्
१६९	१२	मपरा	मपरो
१७२	२०	अदि	आदि
१७२	२१	भगवन्	भगवान्
१७४	२	विष्णु	विष्णुः
१७४	२१	जकर	जाकर
१७४	२३	अदिकारण	आदिकारण
१७५	६	एवमिद	एवमिदं
१७५	२०	कह जाता है	कहा जाता है
१७६	२०	भगवन्	भमवान्
१७७	९	ज्योतिर्विदाश्वष	ज्योतिर्विदाञ्चैष
१७७	१२	वेदवागीशाप्यु-च्यते	वेदवागीशोऽप्यु-च्यते
१७९	२	पञ्चघात्मान	पञ्चघात्मानं
१७९	३	व्याप्त	व्याप्तः
१७९	११	अह	अहं
१७९	१४	अह	अहं
१७९	१५	अह	अहं
१८०	१२	वाताग्निसयो-गल्पा	वाताग्निसंयोगकल्पा
१८०	१८	क	का
१८१	३	निर्जेयमर्यम्	निर्जेयमर्यम्
१८१	११	शरीराणमपि	शरीराणामपि
१८२	१०	सवण	सर्वेण
१८-	११	भावितव्ययश्च	भावितव्ययंश्च
१८२	१३	भगवताद्भाव्यते	भगवतोद्भाव्यते
१८३	१३	प्रत्यक्षिकमिव	प्रात्यक्षिकमिव
१८४	१२	बाहलकात्	बाहुलकात्
१८४	३२	सूर्य आत्म	सूर्य आत्मा
१८५	१५	सः	स
१८६	८	सर्वान्तर्यामिनो	सर्वान्तर्यामिणो
१८६	१४	श्री	श्रीः
१८७	१४	वाप्य	वाप्यथ
१८९	१३	धातेः	धातोः
१८९	२७	क	को
१९०	५	वक्तु	वक्तुं
१९०	१०	व्यात	व्याप्तं
१९१	२१	करण	कारण
१९१	२५	भगवन्	भगवान्
१९२	४	पचनन्येन	पचन्नन्येन
१९२	१३	सङ्कल्पविकल्पा-त्मक	सङ्कल्पविकल्पा-त्मकं
१९२	२२	प्रककार	प्रकार
१९२	२४	ग्रारा	द्वारा
१९३	२६	भवादि	भ्वादि
१९३	३१	यिलोडन	विलोडन
१९६	२४	रता है	करता है

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
१९७	९	एव	एवं
१९७	९	मन्वान	मन्वानं
१९७	२०	प्रकर	प्रकार
१९७	२३	वे	के
१९७	२५	वन्घ	वन्धा
१९८	२	पूर्वात्तिष्ठते	पूर्वात्तिष्ठते
१९८	५	स्थानदनाम्न	स्थानदनाम्नि
१९८	६	सन्थान:	संस्था:
१९८	१०	स्थापन	स्थापनं
१९८	१०	यत्कर्तृक	यत्कर्तृकं
१९९	१०	राशिवर्त्मान	राशिवर्त्मनि
१९९	३०	स्थ न	स्थान
२००	१	स्थान	स्थान
२००	४	परिवर्त्यमान	परिवर्त्यमानं
२००	६	परिरक्षित शरीर	परिरक्षित शरीर
२००		पृथवीव	पृथिवीव
२००	७	स्थान	स्थानं
२००	१२	सवथा	सर्वथा
२००	१५	स्थान	स्थानं
२००	२६	प्ररित	प्रेरित
२०१	१	रप्येव	रप्येवं
२०२	५	व्यष्टिरूप	व्यष्टिरूप
२०४	८	सूत्रेणेऽभाव	सूत्रेणेऽभाव
२०६	३	तद्भक्ष्य	तद्भक्ष्यं
२०८	७	सहित	सहितं
२०८	११	इद्धात्तपसा	इद्धात्तपसो
२०८	१६	रूप ने	रूप से
२०८	३०	विरम है	विराम है
२०९	३४	गुण स	गुण से
२११	१२	सर्वमिद	सर्वमिद
२१३	९	मनुरधा	मनुरद्य
२१३	२०	अनूदित	अनूदितं
२१६	४	शक्तिमता	शक्तिमतां
२२०	९	वेद जानाति	वेद=जानाति
२२०	२६	होनवले है	होनेवाले हैं
२२१	२	वरेप्य:	वरेण्य:
२२१	६	ससुखं निवसति	स सुखं निवसति भवितुमर्हति
२२३	१९	कुण्ठतत्व	कुण्ठितत्व
२२७	१६	कसी	किसी
२३०	२:	विरट्	विराट्
२३९	३	द्रष्टमव्म्	द्रष्टव्यम्
२४२	४	पश्यन्तान्नप्युभौ	पश्यन्नप्युभौ
२४३	९	स्वभाकरमेव	स्वमाकरमेवं
२४५	९	सन्दावति	सन्दधाति
२४९	१२	र्ये	सूर्ये
२४७	३०	विप्रणु	विष्णु
२४८	११	वर्णात्मिका	वर्णात्मिका
२६१	११	तदिथं	तदित्थं
.६७	३३	र्थं	अर्थं
२७२	२७	महाखमता	महामखता
२८४	१३	स्वति	स्वस्ति
२९५	१०	लाके	लोके
३००		वीरयते	वीरयतेश्
३३९		गावो घृतस्य मातर:	गावो विश्वस्य मातर:

—:o:—

ओ३म्

महाभारतानुशासनपर्वान्तर्गतं (१४९ अ०)

विष्णुसहस्रनाम-स्तोत्रम्

(सत्यभाष्याऽऽर्यभाषानुवादसहितम्)

द्वितीयो भागः

भाष्यकर्ता—

श्री १०८ पं० सत्यदेवो वासिष्ठः साङ्गवेद-वेदचतुष्टयी

भूतपूर्व-लवपुर-दिल्ली-भिवानीस्थ-सनातनधर्मायुर्वेद-महाविद्यालयीय-प्रधानाध्यापकः, गुरुकुलभज्जरस्यायुर्वेदविभागाध्यक्षश्च, सामस्वर-भास्करः, वेद-व्याकरण-निरुक्त-छन्दः-साहित्य-ज्योतिषायुर्वेदाद्यनेक—शास्त्रपारावारीणः

सत्याग्रहनीतिकाव्यस्य नाडीतत्त्वदर्शनस्य च प्रणेता

अनुवादकः—

श्री पं० मुन्शीरामः शास्त्री

प्रकाशक :—

श्री १०८ पण्डितसत्यदेवो वासिष्ठः
देवसदनम्, महममार्ग, भिवानी
जि० हिसार (हरयाणा)

मूल्यम्—१२-५०
प्रथमं संस्करणम् १०००
२०२८ वैक्रमाब्दे
१९७१ खिस्ताब्दे

मुद्रक:—
वेदव्रतः शास्त्री विद्याभास्करः
आचार्य प्रिंटिंग प्रेस, दयानन्दमठ
गोहानामार्ग, रोहतक (हरयाणा)
दूरभाष : ५७४

विष्णुसहस्रनामस्तोत्रस्य

द्वितीयभागस्थ-नाम-वर्णानुक्रमणिका

❋

अवशिष्टा मन्त्रलिङ्गप्रत्ययाः

नाम	क्रमाङ्कः	पृष्ठाङ्कः	मन्त्रलिङ्गं प्रत्ययश्च
देवः	३७५	१८६	शन्नो अज एकपाद्देवः । ऋग्० ७।३५।१३
श्रीगर्भः	३७६	१८६	शरीरं ब्रह्म प्राविशत् । अथर्व० ११।८।३०
,,	,,	,,	सूर्य आत्मा जगतस्तस्थुषश्च । यजु० १३।४६
,,	,,	१८७	हिरण्यगर्भः समवर्तताग्रे । यजु० १३।१४
परमेश्वरः	३७७	१८९	इन्द्रो राजा जगतश्चर्षणीनाम् । ऋग्० ७।२७।३
करणम्	३७८	१९०	नान्य इन्द्रात् करणं भूय इन्वति । ऋग्० ८।१५।११
कारणम्	३७९	१९१	याथातथ्यतोऽर्थान् । यजु० ४०।८
कर्ता	३८०	१९२	कर्तेमु लोकमुशते वयोधाः । ऋग्० ४।१७।१७
विकर्ता	३८१	१९३	व्यकृणोत चमसं चतुर्धा। ऋग्० ४।३५।३
,,	,,	,,	यः कृन्तदिद् वि योन्यः । ऋग्० ८।४५।३०
,,	,,	,,	करेणेव वि चकर्ता रवेण । ऋग्० १०।६७।६

पं० अनन्तराम सहजपाल

इदं श्रीवसिष्ठगोत्रोद्भवानां सहजपालोपाह्वानां श्रीकृष्णात्मजानां पं० 'अनन्तरामशर्मणां' विष्णुसहस्रनाम्नां सत्यभाष्यकर्तुः पितृणां चित्रं येषां सर्वं जीवनं श्रीविष्णुसहस्रनाम-स्तोत्रस्य पठने श्रवणे मनने च व्यतीतम्। येषां च श्रीमुरारीलाल-सत्यदेवनामानौ द्वौ पुत्रौ तिस्रश्च कन्याः समभूवन्।

प्रादुर्भावः—विक्रमसम्वत् १९३८ आषाढ़ कृष्णा १४ चतुर्दशी, शनिः।
निर्वाणम्—विक्रमसम्वत् १९९७ मार्गशीर्षकृष्णा ४ चतुर्थी, मंगलम्।

प्रस्तोता—

सत्यदेवो वासिष्ठः

फाल्गुन प्रविष्टः १५ वि० सं० २०२७ ई० सन् २६ फरवरी १९७१

शुचिः—२५१

ईशुचिर् पूतीभावे, दैवादिकः। शुच्यतीति शुचिः। इगुपधात् कित् (उणा० ४-१२०) इत्यनेन इन् प्रत्ययः, कित्वात् गुणाभावः। शुचिः=शुद्धः।

मन्त्रलिंगं च—

राज्ञो नु ते वरुणस्य व्रतानि बृहद् गभीरं तव सोम धाम।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षय्यो अर्यमेवासि सोम॥
(ऋग् १।९१।३)

लोकेऽपि च पश्यामः—भगवान् सर्वव्यापको विष्णुः शुचिः सन् सर्वं विश्वं वर्षाणां वर्षणव्यवस्थापितनियमेन पृथिवीं शुच्यति पवित्रीभावं नयति। भगवतः शौचं कर्मान्वाख्यानमात्रमेव मनुष्यादीनां जलेन देहशोधनं च ज्ञातव्यं भवति। लोकसम्मितः पुरुष इति कृत्वा। यथा मेघजलं पार्थिवं मलं शोधयति, जीव-जन्तूंश्च जलप्रवाहेणापनयति, तथैव स्नानं कर्म मनः प्रसादयति, इन्द्रियाणि चौजसा योजयति, शारीरक्रिमींश्चापनयति। वानस्पत्यं चौजसा युज्यते शुध्यति च। तत्र भागवतं शुचिधर्ममन्वाख्यायन्तः पशवः पक्षिणश्चापि स्नानं कृत्वा स्वकमात्मानं शोचयन्ति। एवं जगति सर्व व्यश्नुवानस्य विष्णोः शुचिस्वरूपं सर्वत्र दृश्यत इति कृत्वा शुचिर्विष्णुरुक्तो भवति।

शुचिः – २५१

शुचिः— इस शब्द में पवित्र करने अर्थ में वर्तमान दिवादि गण की 'ईशुचिर' धातु है। शुचिः शुद्ध पवित्र का नाम है। शुच् से उणादि इगुपधात् कित् सूत्र से 'इन्' प्रत्यय होता है, और वह कित् होता है। कित् के कारण गुण नहीं होता है।

मन्त्र—राज्ञो नु ते वरुणस्य व्रतानि इत्यादि।ऋम्।

लोक में भी देखते हैं कि सर्वत्र व्यापक भगवान् विष्णु स्वयं शुचि स्वरूप होता हुआ सारे विश्व को वर्षा कर्म से पवित्र करता है।। भगवान् के इस पवित्रीकारण कर्म का अनुकरण मात्र ही मनुष्य आदि प्राणियों का जल से देह शोधन (स्नान) समझना चाहिये। यतः पुरुष लोक के समान ही है। जिस प्रकार से मेघ का जल पृथिवी को मल रहित करता है जीव जन्तुओं को जल प्रवाह के द्वारा परे निराकरण करता है। ऐसे ही स्नान कर्म मन को प्रसन्न करता है। इन्द्रियों को ओज देता है शरीर क्रिमियों को दूर करता है।

वर्षा से वनस्पति वर्ग ओज से युक्त होता है, तथा शुद्ध होता है, भगवान् के शुचि धर्म का अनुकरण करते हुए पशु पक्षी भी स्नान के द्वारा अपने आप को शुद्ध करते हैं। इस प्रकार जगत् में शुचिरूप से वर्त्तमान भगवान् विष्णु, शुचि नाम से कहा जाता है।

भवति चात्रास्माकम्—

> शुचिर्हि विष्णुः शुचिमद् विधत्ते जगत् सदा वारिधरप्रपातैः ।
> आमर्त्यकीटान्तमिदं समस्तं स्नात्वा वपुः शुच्यति, याति चौजः ॥१॥

वारिधर-प्रपातैः=मेघानां जलधारापातैरिति ।

सिद्धार्थः—२५२

सिद्धः=सत्यश्चासावर्थः सिद्धार्थः सिद्धनामार्थ इति । तद्यथा यत् पदार्थजातं यदोत्पद्यते तदा यो हि रसोदयः पृथिव्यां भवति, स्व-स्व-ऋतुकृतः स तस्य मूले भवति । सर्वप्रथमं बीजं मूलरूपेण परिणमते, ततोऽनु यथाकालं तद्बीजं स्तम्भरूपेण परिवर्धते, यावता कालेन स्तम्भरूपेण वर्धते तावत्कालजो यो रसोदय ऋतुकृतः स स्तम्भस्तेन गुणेन युज्यतेऽतः स गुणस्तस्मिन् स्तम्भ उपचितो भवति, तस्मात् मूलगुणाद् भिन्नगुणस्तम्भ इत्युपपन्नः, ततोऽनु यदा क्षुपे बीजोदय आरभते स तस्मात् क्षीरोदयाः दारभ्य फलपरिपाककालं यावत् यावन्तं कालमुपादत्ते तावत्के काले य ऋतुकृतो रसोदयस्तं गुणं स निष्पद्यमानो बीजात्मको फलोदय आददान आस्ते, तमेव च गुणं

शुचिर्हि विष्णुः शुचिमद्० इत्यादि ।

शुचि नाम का भगवान् विष्णु मेघों के द्वारा सदा से जगत् को शुद्ध करता है, मनुष्य से लेकर कीट पतंग पर्यन्त सारा प्राणी जगत् स्नान करके अपने शरीर को शुद्ध करता है । और ओज को प्राप्त होता है । इस श्लोक में "वारिधरप्रपात" का अर्थ वर्षा है । याति का अर्थ प्राप्तकर्ता है ।

सिद्धार्थः—२५२

सर्वदा विद्यमान रूप जो नामार्थ सिद्ध=सत्य सर्वदा विद्यमान जो नामार्थ=वाच्यार्थ रूप उसका नाम है सिद्धार्थ । प्रत्येक नाम का अर्थ अर्थात् वाच्यार्थ सिद्ध=सर्वदा स्थायी अर्थात् सदा विद्यमान होता है, उसका कभी विनाश नहीं होता तथा वह पूर्व से ही विद्यमान होता है, इसलिये उसका नाम सिद्धार्थ है । उदाहरणरूप में जैसे एक रस है, वह रस अपने बीजरूप कारण में सर्वदा विद्यमान है, किन्तु जिस जिस रूप में बीज का परिणाम होता जायेगा, उसी उस रूप में काल=ऋतुभेद से रस में भी परिणाम होता रहेगा किन्तु वह मूलरूप में सिद्धार्थ है । इसी भाव को स्पष्ट रूप से इस प्रकार समझा जा सकता है,—स्थूल रूप से सब भौकि पदार्थों का उपादान कारण पृथिवी है, तथा सर्व प्रथम अंकुरादि रूप में परिणत होता हुआ पार्थिव बीज, तत्कालोद्भव पृथिवी के रस को ग्रहण करता है इसके बाद जब वह अंकुरादि स्तम्भ रूप में परिणत होकर बढता है, तब वह अपने वर्धन काल में जो जो ऋतुकृत रस होता है, उसे ग्रहण करता है, अर्थात् वह सब कालभेदकृत रस उस स्तम्भ में सञ्चित होता है । इस प्रकार ऋतुभेद के प्रभाव से मूल में जो गुण धर्म होता है, उससे भिन्न गुण धर्म स्तम्भ में होता है,

तन्निष्पन्नं फलं व्यनक्ति, एष वै प्रकारः क्षुपेषु ज्ञानस्य। चिरस्थायिषु वृक्षेषु तु यदा नूतनपल्लवोदयस्तदारभ्य तत् फलपाकान्तं यः कालः, तन्मध्यपातीनामृतूनां यावतीनामतिक्रमणं तत्र तं तमृतुकृतं रसोदयमनुपश्यता विपश्चिताध्यवसेयं यदेतत् मूले, पत्रे, त्वचि, पुष्पे, फले च पृथक् पृथग् गुणोदयं रक्षति, यद्रसप्रधानं पंचागे पृथक् पृथगंगं भवति तद्रसानुसंपृक्तं वातपित्तकफानां वृद्धि-कोपप्रशमनं व्यनक्ति, स अर्थे पदार्थे सिद्धः सत्यत्वेन निष्ठः सन् स्वकं रूपं सदैव व्यनक्ति, एष च क्रमः सर्वत्र सदातोऽव्याहत आयातोति कृत्वा तस्यैव भगवतो व्यवस्थां व्यनक्तीति कृत्वा स सर्वत्र व्यश्नुवानो भगवान् 'सिद्धार्थ' उक्तो भवति। एवं स सिद्धार्थः प्रभुः चतुर्विधयोनिं सिद्धार्थत्वेन व्याप्य तिष्ठति। यो वृक्षो नवोत्तरं दशमं मासमुपादत्ते पुष्पोदयात् फलपरिकान्तं यावत् स ब्राह्मणो वृक्षो रसायनो वा रसायनवृक्षो वा। तद्यथा—आमलको वृक्षो रसायनवृक्षः, चतुरंगुलवृक्षो रसायनवृक्षः। क्षुपेषु च यथा—गोधूम-क्षुपः कार्तिके मास्युप्यते, चैत्रान्ते परिपाकमेति। भूगोलमपेक्षीकृत्य यत्र पूर्वं गोधूमा उप्यन्ते तत्र च तः पूर्वं शीघ्रं वा लूयन्ते। तत्र षट्सु मासेषु यो योंऽशस्तस्य क्षुपस्य बहिरुद्याति स तत् तत् कालकृतं गुणं जीवात्मन्यधितिष्ठति। प्रकृतिभूतं गुणं स न त्यजति स्वभावस्य

इसी प्रकार जब उस स्तम्भ या गोधूम यवादिरूप क्षुप (पौधे) में बीज का आरम्भ होता है, तब उस बीज की क्षीरावस्था से लेकर बीज की सिद्धावस्था तक जितना समय बीतता है, उतने समय के रस या धर्म को वह बीज ग्रहण कर लेता है, तथा वह बीज उस ही गुणधर्म को प्रकट करता है, इस प्रकार कालकृत भेद या परिणाम से भिन्न होता हुआ भी वह रस आद्यन्त अवस्था में सिद्ध होने से सिद्धार्थ है।

यह अल्पकाल में ही समाप्त होनेवाले क्षुपों (पौधों) के विषय का ज्ञानक्रम है।

चिरस्थायी वृक्षों में नवीन पल्लवोत्पत्ति से लेकर फलों के परिपाक तक जितना समय व्यतीत होता है, उस समय में जितनी ऋतुओं का अतिक्रमण होता है, उन सब भिन्न भिन्न ऋतुओं के भिन्न भिन्न गुणों को वृक्ष के मूल पत्र पुष्प फल तथा त्वक् अपने में रखते हैं। वृक्ष का जो अङ्ग जिस गुण की प्रधानता लिये होता है, उस गुण के सम्बन्ध से ही वात पित्त कफों की वृद्धि कोप या प्रशमन करता है, तथा अपने रूप में सिद्ध होने से अपनी सिद्धार्थता को प्रकट करता है जो कि सर्वव्यापक सिद्धार्थनामा भगवान् विष्णु की व्याप्ति से सिद्ध है। इस प्रकार भगवान् सिद्धार्थ अपनी सिद्धार्थता से इस चतुर्विध योनि भेद भिन्न विश्व को व्याप्त करके स्थित है। जो वृक्ष पुष्पोत्पत्ति से फलपाक पर्यन्त नवोत्तर दशवें महिने को ले लेता है, उसको ब्राह्मण या रसायन वृक्ष कहते हैं, जैसे आमलक या अमलतास रसायन वृक्ष कहे जाते हैं। गोधूमादि क्षुप कार्तिक मास में बोये जाते हैं, तथा चैत्र में पक जाते हैं, भूगोल की अपेक्षा या भेद से जहां कार्तिक से पूर्व ही बोये जाते हैं, वहां वे चैत से प्रथम ही पक जाते हैं, तथा कट जाते हैं। वहां उन छह महिनों में क्षुपों का जो जो अंश जिस जिस समय में उत्पन्न होता है, वह उस उस काल के गुण को ग्रहण कर लेता है, किन्तु अपने मूलभूत स्वतः सिद्ध गुण को नहीं

सिद्धत्वात्। कुतः स्वयंजातेन स्वयंभुवा वा तस्य व्यवस्थापनात्, तद्यथा समान एव काले गोधूमा यवा वोप्यन्ते तत्र यवा रूक्षाः शीता लघवो मलवर्धकाश्च, परन्तु न तथा गोधूमाः। शरीरप्रभावमधिकृत्यार्षायुर्वेदसंहितासु द्रव्याणां गुणनिर्देशः कृत आस्ते, तं 'निघण्टुः' इति चाचक्षते पुराणाः। तत्र मासेषु १-५-९ इति ब्राह्मणमासाः, ते च यथाक्रमं--वैशाख भाद्रपद-पौषा इति। २-६-१० क्षत्रियाः, ते च यथाक्रमं ज्येष्ठाश्विन-माघाः। ३-७-११ वैश्याः, ते च यथाक्रम--आषाढकार्तिकफाल्गुना इति। ४-८-१२ शूद्राः, ते च यथाक्रमं—श्रावण-मार्गशीर्षचैत्रा इति। विशदं च व्याख्यातं 'आदित्य'-नाम्नो व्याख्याने। वेदे चतुर्धा जगतो विक्लृप्तेरुक्तत्वात्। तत्र भूगोलमधिकृत्य शीतो-ष्णयोर्न्यूनाधिक्यं दृश्यते तत्र जातानां पदार्थानां समानजातीयत्वेन सतामपि रूप-रस-गुण-वीर्य-विपाकादिषु भेदो दृश्यते। एवं स भगवान् सिद्धार्थ उक्तो भवति। स्वयं प्रकाशस्य सतस्तस्य ब्रह्मणस्तत् कृतमपि सर्वं स्वयमेवात्मना स्वकमर्थं च व्यनक्तीति कृत्वा स भगवानेव सिद्धार्थत्वेन विश्वं व्यश्नुवानः सिद्धार्थ उक्तो भवति इति दिङ्मात्रमुक्तम्। लोकं शास्त्रं च दृष्ट्वा विविधमुदाहरणानामूहनीयं भवति।

भवति चात्रास्माकम्—

सिद्धस्य तस्याखिलशब्दवाच्यस्यात्मप्रकाशस्य महाविभूतेः।
सिद्धार्थता भाति तथैव यद्वत् सिद्धः स्वयं भाति च सूर्य एकः ॥२॥

छोड़ता, क्योंकि वह सिद्धार्थ से व्याप्त तथा व्यवस्थित होने से स्वयं सिद्धार्थ है, जैसे कि गोधूम और यव समान काल में ही बोये जाते हैं, तथा समान काल में ही कटते हैं, किन्तु यव जैसे रूक्ष शीत लघु तथा मल वर्धक होते हैं, वैसे गोधूम नहीं होते। आर्ष आयुर्वेदसंहिताओं में शरीर के प्रभाव की अपेक्षा से गुणों का वर्णन किया है, उसको पुरातन आचार्य निघण्टु नाम से कहते हैं। मासों में भी ब्रह्मणादि चतुर्वर्ण से व्यवहार होता है, वह इस प्रकार है—१-५-९ अर्थात् वैशाख भाद्रपद पौष ये ब्राह्मण मास हैं, २-६-१० ज्येष्ठ आश्विन माघ क्षत्रिय मास हैं। ३-७-११ आषढ कार्तिक फाल्गुन वैश्य मास हैं ४-८-१२-श्रावण मार्गशीर्ष चैत्र ये शूद्र मास हैं इस विषय का विषद व्याख्यान आदित्यनाम के व्याख्यान में किया है। वेद में सृष्टि की कल्पना ४ प्रकार से कही है। भूगोल के भेद से, एक देश से दूसरे स्थान में शीत और उष्मा की न्यूनाधिकता भी देखने में आती है, वहां शीत या उष्ण देश में उत्पन्न हुए समान जातीय पदार्थों के भी रस गुण वीर्य विपाकादि में भेद होता है। इस प्रकार स्वयंप्रकाश परब्रह्म से बना हुआ यह शकल विश्व अपने आप ही अपने में स्थित अभीष्ट अर्थ को प्रकट कर रहा है। इस से भगवान् की विश्व में व्याप्त सिद्धार्थता प्रकट होती है, इसलिये भगवान् का सिद्धार्थ नाम अर्थानुगत है। इस प्रकार से हमने केवल मार्ग मात्र दिखलाया है, और अधिक कल्पनायें शास्त्र या लोकानुसार स्वयं कर लेनी चाहियें।

भाष्यकार का संक्षेप से अपने पद्य द्वारा भाव प्रकाशन इस प्रकार है—

सिद्धार्थरूप भगवान् विष्णु की सिद्धार्थता विश्व में उसी प्रकार प्रकाशमान हो रही है, जैसे स्वयं सिद्धार्थरूप सूर्य केवल एक ही समस्त विश्व या आकाश में प्रकाशमान हो रहा है।

सूर्य इत्युपलक्षणम्, सर्वं एव ग्रहा स्वकीयां सिद्धार्थतां व्यंजन्तश्चरन्ति। सूर्य एक इति यदुक्तं तत्र मन्त्रलिंगं च—

सूर्य एकाकी चरति चन्द्रमा जायते पुनः

यजुः-३।१०, ४६।

अर्थः=नाम्ना व्यवहर्त्तुमर्हं पिण्डभूतम्। तद्यथा—दात्रं शब्दः, सकाष्ठमुष्टीको कृतदन्तलोहो दात्रम्, लोहमात्रेण वा निर्मितं दात्रमुच्यते, लावनकर्मणि साधनीभूतम्।

सिद्धसङ्कल्पः—२५३

सिद्धः=अनायासनित्यप्राप्तः सङ्कल्पः=शक्तिः कामो वा यस्य स सिद्धसङ्कल्पः। सम्पूर्वात् कल्पतेर्भावे घञ् प्रत्ययः "कृपो रो लः" इति रेफस्य लत्वञ्च। न हि भगवता स्वसङ्कल्पितार्थसाधने प्रयत्यते, स्वतः सिद्धसर्वार्थो ह्यसौ सर्वथा समर्थश्च। स च सिद्धसङ्कल्पो भगवान् स्वेन सिद्धसंकल्पनामानुगतगुणेन विश्वं व्यश्नुवानश्चतुर्भेद-विभक्तमिदं चतुर्विधयोनिसंक्लृप्तं विश्वं स्वतः सिद्धेनेच्छारूपेण सङ्कल्पेन निष्पाद्य प्राणिहितं कुरुते सर्वं वा पदार्थजातं स्वमूलभूतभगवत आयातं स्वसामर्थ्यं प्रकटयति, तदेतत्सर्वं भगवतः सिद्धसंकल्पस्यानुकरणमात्रम्। तथा च लोकेऽपि दृश्यते, ज्ञानवतां विविधा आविष्कारा: स्वतोऽन्तरात्मन एव प्रादुर्भवन्ति। अनन्तसामर्थ्यकेन भगवता

सूर्य शब्द चन्द्रभौमादि सब ही ग्रहों का उपलक्षण है। सब ही ग्रह अपनी सिद्धार्थता को प्रकट करते हुये विचरण कर रहे हैं। पद्य में जो 'सूर्य एकः' ऐसा कहा है, इस में "सूर्य एकाकी चरति चन्द्रमा जायते पुनः" यह ३२।१० तथा ४६ यजुर्वेद मन्त्र प्रमाण है। अर्थः=नाम्ना व्यवहर्तुं योग्यः' अर्थात् अर्थ वह चीज या वस्तु है जिसका किसी नाम से निर्देश किया जाता है।

जैसे दात्र यह एक ऐसी वस्तु का नाम है जो लोह की बनी हुई होती है काष्ठ की या लोह की मूठ (मुष्टि) होती है, तथा इसके किसी वस्तु को काटने के लिये दन्त "दान्ते" किये हुये होते हैं।

सिद्धसङ्कल्पः—२५३

स्वयंसिद्ध शक्तिमान् सम् पूर्वक सामर्थ्यार्थक क्लृपू धातु से पचाद्यच् प्रत्यय करने से सङ्कल्प शब्द सिद्ध होता है। स्वतः सिद्ध है सङ्कल्प=शक्ति या काम जिसका उसका नाम सिद्धसङ्कल्प है, यद्वा सिद्ध=प्रकाशित किया है अपना जगत् रूप संकल्प जिसने, उसका नाम सिद्धसङ्कल्प है।

वह सिद्धसंकल्प प्रभु अपने सिद्ध संकल्प रूप गुण को विश्व में व्याप्त करता हुआ स्वतः सिद्ध अपनी कामरूप इच्छा शक्ति से इस विश्व की सिद्धि=निर्माण करता है, अर्थात् प्राणियों के उपभोग योग्य बनाता है। यद्वा सब दृश्य वर्ग ही भगवान् से प्राप्त अपनी शक्ति को प्रकट करता है, तथा जगत् के द्वारा शक्ति का प्रकट करना उस सिद्ध सङ्कल्प प्रभु का व्याख्यान मात्र है। जैसे हम इस लोक में देखते हैं, चतुर वैज्ञानिक पुरुष अपने अन्तरात्मा से विविध प्रकार के कार्यकारी आविष्कार करते हैं। अनन्त सामर्थ्य युक्त प्रभु ने अपने स्वभावानुसार

जगदप्यनन्तसामर्थ्यवद्विहितमत एव जगदवलोकनेन सद्यो भगवान् सिद्धसङ्कल्पः ज्ञानमार्गमारोहति । भवन्ति चात्रास्माकम्—

स सिद्धसङ्कल्प इदं विधत्ते गुणेन सामर्थ्यं इतोरितेन ।
ऋतश्च सत्यश्च विमिश्रितश्च नपुंसकस्त्रीपुम्भेदभिन्नम् ॥३॥
तं सत्यसन्धं कवयो हृदिस्थं पश्यन्ति नित्यं भुवने त्रिनेत्रम् ।
तं सिद्धिदं स्तोत्रशतैरनेकैः सिद्धाः स्तुवन्त्यात्मरजोविमृष्ट्यै ॥४॥
आस्थावरं तारकितं नभो यत् स्वं सिद्धसंकल्प[1]कितं व्यनक्ति ।
रूपं स्वभावो गुणवीर्यवत्त्वं न सिद्धसंकल्पमतीत्य किञ्चित् ॥५॥

[1] सिद्धसंकल्पकित इत्यत्र स्वार्थे कः प्रत्ययः सिद्धसंकल्पकः, स संजातोऽस्येति तारकादीतच् प्रत्ययः ।

सिद्धिदः—२५४

सिद्धिः=साफल्यं मङ्गलक्रिया च, सा च साधनाधीना । अतो जागतप्राणिनां यथार्हभोगभोगाय, शारीरक्रियासाधनाय च साधनानीन्द्रियाणि ददातीति सिद्धिदः सर्वव्यापको विष्णुः । साधनभूतग्रहोपग्रहैर्दृश्यजगतो व्यवस्थापकत्वाच्चापि सिद्धिदः ।

इस जगत् को भी अनन्त सामर्थ्य युक्त ही बनाया है, इसीलिये जगत् को देखने से तत्काल भगवान् सिद्धसङ्कल्प स्मृति में आजाते हैं ।

भाष्यकार का अपने पद्य द्वारा भाव प्रकाशन इस प्रकार है—वह भगवान् सिद्ध सङ्कल्प अपने स्वतः सिद्ध सामर्थ्य तथा तप से इस ऋत और सत्य तथा इन दोनों से मिश्रित जगत् को स्त्री, पुरुष, नपुंसक, रूप में विभक्त करता है । उस सब के अन्तरात्मा में स्थित भगवान् सत्यसंकल्प की कवि तथा सिद्ध पुरुष अपने दोषों की शुद्धि के लिये अनेक प्रकार के स्तोत्रों से स्तुति करते हैं, तथा उसका अपने हृदय में ही दर्शन करते हैं ।

यह स्थावर जङ्गम रूप जगत् तथा तारामण्डलसहित खगोल, अपने में व्यापक रूप से स्थित इस सिद्ध संकल्प नाम भगवान् को व्यक्त कर रहा है, भगवान् सिद्ध संकल्प ही स्वभाव रूप गुण वीर्य आदि के रूप में सर्वत्र विद्यमान है, सिद्ध संकल्प के विना इनकी कोई सत्ता ही नहीं है ।

सिद्ध संकल्प शब्द से स्वार्थ में क प्रत्यय करने तथा सिद्ध संकल्पक, प्रकाशित है जिसमें, इस अर्थ को प्रकट करने के लिये सिद्धसंकल्पकित शब्द का प्रयोग किया है ।

सिद्धिद—२५४

सिद्धि=सफलता या मङ्गल क्रिया का नाम है, बिना साधनों के सिद्धि असम्भव है, क्योंकि, सिद्धि का प्राप्त होना साधनों पर निर्भर है । इसलिए जगत् के प्राणियों के यथा योग्य भोग भोगने तथा शरीर की क्रिया सिद्धि के लिये साधनभूत इन्द्रियों का प्रदान करने वाला प्रभु सिद्धिद नाम से कहा जाता है, तथा जगत् को व्यवस्थाबद्ध नियमपूर्वक चलाने के लिये साधनभूत ग्रह उपग्रह आदि तथा जगत् का व्यवस्थापक होने से भी वह सिद्धिद है ।

सेधतेर्भावे स्त्रियां क्तिन् सिद्धिः । तथा च दृश्यते लोके, कलाकारः कर्माणि साधयितुमपेक्षते साधनानि । कर्मणां कारयिता चापि कर्मकरेभ्यो ददाति साधनानि । तथैव भगवान् विष्णुर्हरि स्वकृतकर्मफलोपभोगाय, स्वेष्टसाधनाय वा प्रतिप्राणि नानाविधानीन्द्रियाणि ददाति—इति सिद्धिदः स उच्यते । अत एवायमात्मा जीवः स्वेन्द्रियस्थैर्यं प्रार्थयते भगवन्तम् । तथा च—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥
यजुः २५।२१

भवन्ति चात्रास्माकम् —

स सिद्धिदः साधनदोऽथ गीतः स साधनैः सिद्धमिदं तनोति ।
यथा स युक्त्वा समनोभिरक्षैर्जन्तुं प्रचाराय करोति शक्तम् ॥६॥
तथैव साध्यैः स उ देवसिद्धैः सिद्धैः प्रवाहेण सदास्तिमद्भिः ।
करोति विश्वं विविधं वितन्वन् स सिद्धिदो विष्णुरिहास्ति गीतः ॥७॥
तं सिद्धिदं सर्वमनोभिरामं रामं विरामं च नमन्ति देवाः ।
तस्यानुकृत्या मनुजः स्वसृष्टिं तन्तन्यमानस्तनुते सहायान् ॥८॥

लोक में प्रत्येक कलाकार आदि किसी भी कर्म को करने के लिये पहले साधनों का संग्रह करता है, तथा कार्य करवाने वाला भी, अपने कर्मकर=भृत्य आदि को साधन देकर ही तत्तद् कर्म करवाता है । इसी प्रकार भगवान् विष्णु, प्रत्येक प्राणी को अपने शुभाशुभ कर्मों के फल भोग तथा अपने इष्ट सिद्ध करने के लिये नानाविध इन्द्रियां प्रदान करता है, जो कि प्रत्येक कर्म के साधन हैं । यह शारीरात्मा भी भगवान् की "भद्रं कर्णेभिः" इत्यादि मन्त्रों से इन्द्रियों के स्थैर्य तथा स्वास्थ्य के लिये प्रार्थना करता है । इस भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार प्रकट करता है—

भगवान् विष्णु का ही विद्वान् पुरुष सिद्धिद, अथवा साधनद, नाम से गान करते हैं, क्योंकि वह इस समस्त चराचर रूप विश्व को साधनों के द्वारा ही सिद्ध करता है, जैसे—मन सहित इन्द्रियों से युक्त करके प्रत्येक प्राणी को व्यवहार के लिये समर्थ बनाता है । इसी प्रकार अनादि प्रवाह रूप से सदा सत्तावाले अर्थात् सदा रहने वाले साध्य देवसिद्ध तथा सिद्ध आदि जातिविशेषों के द्वारा इस विविध प्रकार के विश्व का निर्माण करता हुआ वह विष्णु सिद्धिद नाम से स्तुत होता है ।

उस अशेष जगत् के मनों का रमणस्थान, प्रवृत्तिस्थान तथा स्थिति=लयस्थान, राम—विराम नामक भगवान् को देवगण सदा नमस्कार करता है ।

और उस ही का अनुकरण करता हुआ मनुष्य अपनी सन्तति रूप सृष्टि का निर्माण करने के लिये साधनों का संग्रह करता है ।

प्रचारः—व्यवहारो भ्रमणं वा। राम-विरामे विष्णोर्नाम्नी। रमते=क्रियां करोति जगद् यस्मिन् रामः। तस्मिन्नेव विरामं यात्यतो विरामः। सहायः=साधनम्। यथा कुम्भकारो घटनिर्माणाय दण्डचक्रसूत्रादीनि साधनान्युपादत्ते।

सिद्धिसाधनः—२५५

सिद्धिशब्दो व्युत्पादितस्तासां सिद्धीनां साधनः। साध संसिद्धाविति सौवादिकण्यन्तधातो"र्नन्दिवाशिमदिदूषिसाधिवर्द्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्" इति नन्द्यादिगणसूत्रेण 'ल्यु'प्रत्यये योरनि च साधयतीति साधनः कर्तृवाचो शब्दो निष्पद्यते। साध्यतेऽनेनेति करणे ल्युट्यपि साधनं, एवञ्च यः सर्वासां सिद्धीनां कर्तृभूतः करणभूतश्च, न ततोऽन्यः कश्चित् सिद्धीनां, साफल्यानां, मङ्गलक्रियाणां वा साधनः साधनं वा, न तदनुग्रहं विना कश्चिज्जगति साफल्यमेतीति भावः।

सत्यञ्चैतद्यथा लोकेऽपि, सदप्येतत्सर्वाङ्गसमुदितं शरीरं सति जीवापाये सद्यः कार्यक्षमतां जहाति, न किञ्चित्कर्तुं क्षमत इत्यर्थः। एतेन प्रतीयते जीवात्मैव शरीरे करणं कर्ता चेन्द्रियादिरूपेणेति सिद्धसाधन उच्यते।

एवं सर्वेषामादिकारणत्वेन सर्वेषां सिद्धिदो मङ्गलदश्च भगवान् विष्णुः सिद्धिसाधन उच्यते। इदमिह स्थविष्ठमुदाहरणम्—"सूर्य आत्मा जगतस्तस्थुषश्चेत्यादि मन्त्रलिङ्गात् सूर्यः सर्वस्यात्मा किन्तु सूर्यस्य-आतयिता प्रवर्तयिता क इति प्रश्ने

प्रचार=व्यवहार अथवा भ्रमण का नाम है। राम और विराम ये भगवान् के नाम हैं। सहाय नाम साधन का है। उदाहरण रूप में जैसे—कुम्हार घड़ा बनाने के लिये दण्ड चक्र सूत्र आदि साधनों का ग्रहण करता है।

सिद्धिसाधन—२५५

सिद्धि शब्द का साधन स्त्रीविशिष्ट भाव में, क्तिन् प्रत्यय करके किया जा चुका है। साधन शब्द, स्वादिगण पठित साध संसिद्धौ ण्यन्त धातु से, नन्द्यादि ल्यु तथा करण अर्थ में ल्युट् प्रत्यय करने से बनता है। कर्ता तथा करण दोनों ही अर्थों को साधन शब्द कहता है, आशय यह है कि, सब सिद्धियों=क्रियासिद्धियों या मङ्गलक्रियाओं का साधन=कर्ता वा करण रूप से वह ही एक है, उस के अनुग्रह बिना किसी भी प्रकार की सिद्धि हो ही नहीं सकती। यह सत्य तथा युक्तियुक्त भी है, जैसे लोक में, सब अवयवभूत हस्तपादादि अङ्गों से युक्त होता हुआ भी यह शरीर, जीवात्मा के निकल जाने पर कार्य करने में अशक्त हो जाता है, कुछ भी कर ही नहीं सकता। इस से मालूम होता है कि, इस शरीर में यह जीवात्मा ही इन्द्रियादि रूप से करण तथा कर्ता है। इस प्रकार से, सब का आदि कारण होने से सब को सिद्धि तथा मङ्गल का देने वाला भगवान् विष्णु सिद्धि साधन नाम से कहा जाता है। यहां पर यह स्थूल उदाहरण है, सूर्य सब स्थावर जङ्गम का आत्मा है, जैसा कि "सूर्य आत्मा जगतस्तस्थुषश्चेति मन्त्र से सिद्ध है, किन्तु सूर्य को प्रवर्तन कराने वाला कौन है, इस प्रश्न

भगवान् विष्णुरेव तस्यात्मेति सिद्धिसाधनः स उच्यते । भवति चात्रास्माकम्—

स साधनः साधनवर्गमुख्यो न तं विना साधनमत्र किञ्चित् ।
सूर्यो यथात्मा सकलस्य लोके तस्यात्मभूतः स उ विष्णुरेकः ॥९॥

तस्यात्मभूतः=सूर्यस्यात्मभूतः । सिद्धिसाधनः=साधनानां प्राणभूतः । यथैक-रूपमप्यन्नं पृथक् पृथगवयवेषु गतं पृथक् पृथक् परिपाकं विधत्ते, तत्र प्राणस्यैव प्राधान्यम् । एवं पृथक् पृथक् साधनभूतं जगत् स एकः साधयतीति सर्वसाधनः स सिद्धिसाधन उच्यते । भवति चात्रास्माकम्—

सिद्धिसाधन आख्यातो विष्णुः प्राणेन सम्मितः ।
भुक्तं प्रत्यङ्गव्याप्तं च सर्वं पुष्णाति वर्ष्म तत् ॥ १० ॥

वृषाही-२५६

वृषोऽग्निः "वृषो अग्निः समिध्यते" इति-ऋङ्मन्त्रलिङ्गात् । अहः=प्रकाशः । वृषस्याग्नेरहो=प्रकाशो, वृषाह इति तत्पुरुषसमासे "राजाहः सखिभ्यष्टच्" पा० ५।४।९१। सूत्रेण टच् प्रत्ययः तस्य ताद्धितत्वात् नस्तद्धितेति सूत्रेण टिलोपः । वृषशब्दोऽत्राग्नि-

---

का उत्तर यह ही है कि, भगवान् विष्णु ही सूर्य का प्रवर्तयिता आत्मा है, अतः भगवान् का नाम सिद्धिसाधन है इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार स्पष्ट करता है—

भगवान् विष्णु ही सब साधन वर्ग में मुख्य साधन होने से तथा उस के बिना किसी प्रकार की सिद्धि न होने से सिद्धि साधन नाम से कहा जाता है । जैसे इस सकल लोकान्तर्गत स्थावर जङ्गम का आत्मा सूर्य है किन्तु सूर्य का भी आत्मा भगवान् विष्णु है, इसलिये वह सकल लोक का सिद्धिसाधन है । सिद्धियों तथा साधनों का साधन=प्राण, जैसे एक ही प्रकार का अन्न भिन्न भिन्न अवयवों को प्राप्त होकर भिन्न भिन्न पाक का निर्माण करता है, वहां प्राधान्य केवल प्राण का ही होता है। इसी प्रकार से भिन्न भिन्न सिद्धियों के साधनभूत विविधरूप जगत् का वह एक ही साधन है, इसलिये उसका नाम सिद्धिसाधन है।

इस ही भाव को भाष्यकार अपने पद्य द्वारा अन्य प्रकार से स्पष्ट करता है—

भगवान् विष्णु प्राण के समान सिद्धि साधन है, जैसे खाया हुआ "भक्षण किया हुआ" अन्न, प्राण के बल से सकल शरीर को पुष्ट करता है, इसी प्रकार भगवान् विष्णु प्राण रूप से सकल जीव लोक में व्याप्त होकर सम्पूर्ण जगत् को पुष्ट=कार्य करने में समर्थ करता है। वर्ष्म=शरीर का नाम है।

वृषाही—२५६

वृष नाम 'वृषो अग्निः समिध्यते' इस मन्त्र प्रमाण से अग्नि का है। अह नाम प्रकाश का है, वृष नाम अग्नि का जो प्रकाश उसका नाम है वृष हः, षष्ठी तत्पुरुष समास में समासान्त टच् प्रत्यय होने से तथा उसके ताद्धित होने से नस्तद्धितेति सूत्र से टि-भाग अन् का लोप हो जाता है। वृष शब्द यहां अग्नि का वाचक होता हुआ भी सब ज्योतिष्मान् पदार्थों का उप-

वाचकः सन् सर्वाञ्ज्योतिष्मत उपलक्षयति-एवञ्च सर्वेषां ज्योतिष्मतां ज्योतिरस्यास्ति, अर्थाद्यः सर्वेषां ज्योतिष्मतां=प्रकाशवतां द्योतयिता=प्रकाशयिता स वृषाहीत्युच्यते। सर्वत्र प्रकाशमानेषु सूर्याग्न्यादिषु यः प्रकाशः स तस्यैव भगवतो ज्योतिःस्वरूपस्य वृषाहिणः। स एव स्वप्रकाशेन सर्वं व्याप्नुवन् विविधनामभिरभिधीयमानो "बृहद्भानु"रित्युक्तो भवति। यथा ज्ञानप्रकाशरूपो जीवात्मा सर्वाणीन्द्रियाणि प्रकाशवन्ति विधत्ते, तथायं सर्वगतः परमात्मा सर्वं जडचेतनवर्गं प्रचिकाशयिषुरग्निरूपतामापद्य व्यवतिष्ठमानः, समुद्रगो वडवानलाख्यां, वनकाष्ठगतो दावानलाख्यां, तथा प्राणिगतो वैश्वानराख्याञ्च धत्ते। दृश्यते च लोकेऽपि, जीवो यावच्छरीरं चेतयति,तावदेव देहस्थः पञ्चविधोऽग्निः प्रकाशते स्वलक्षणलक्षितः। व्यपगते च जीवे शाम्यति सोऽपि सद्यः। अग्निकृतश्चायं सार्वत्रिकः समविषमरूपस्वभावभेदो रूपभेदश्च। तथा हि विविधेषु प्राणिषु या नानाविधा विकृतयो दृश्यन्ते, ता जलसहकृतविषमभावरूपविषरूपापन्नाग्निकृता एव सर्वाः। तथा चोक्तं विषशब्दं निर्ब्रुवता महर्षिणा चरकेण—

"जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः" चरकसं० अ० २३। श्लोक ५।

भवतश्चात्रास्माकम्

> वैश्वानरः प्राणिगतोऽभिधीयते, तथाब्धिगो वाडवनामवाच्यः।
> दावानलः काष्ठगतस्तथेति, धत्ते स नामानि तदाप्तिभेदात् ॥११॥

लक्षण है। इस प्रकार से सब ज्योति वाले पदार्थों में जिस की ज्योति है, अर्थात् जो सूर्यादि ज्योतिष्मान् पदार्थों को अपनी ज्योति से प्रकाशित करता है, उसका नाम वृषाही है।

सब प्रकाशमान सूर्य अग्नि आदि पदार्थों में जो प्रकाश है वह उन्हें भगवान् वृषाही से ही प्राप्त हुआ है। वह ही अपने प्रकाश रूप गुण से सब का व्यापन करता हुआ विविध प्रकार के नामों को धारण करता हुआ "बृहद्भानु" नाम से बोला जाता है। जैसे ज्ञान तथा प्रकाश रूप जीवात्मा सब इन्द्रिय वर्ग को प्रकाशित करता है।

इसी प्रकार सर्वव्यापक परमात्मा, सब जड़ चेतन वर्ग को प्रकाश देने की इच्छा से अग्नि रूपता को प्राप्त होकर, समुद्र में "वडवानल" बन में "दावानल" तथा प्राणियों में विद्यमान होकर वैश्वानर नाम धारण करता है।

लोक में भी देखा जाता है, शरीर में विद्यमान जीवात्मा जब तक शरीर को चैतन्य प्रदान करता है, तब तक देह में स्थित पञ्चप्रकार का अग्नि अपने अपने स्वरूप में प्रदीप्त रहता है। जीवात्मा के निकल जाने पर वह अग्नि भी तत्काल शान्त हो जाता है। इस विश्व में सर्वत्र जो सम विषम स्वभाव तथा रूपों का भेद देखने में आता है यह सब अग्नि के कारण से ही है।

भाष्यकार इस भाव को अपने पद्य द्वारा इस प्रकार प्रकट करता है—

सर्वव्यापक भगवान् विष्णु, प्राणी, समुद्र, तथा काष्ठ आदि के सम्बन्ध से, वैश्वानर, वडवानल तथा दावानल आदि नाना नाम धारण करता है।

विभाति भानुप्रभया विभावसुर्विभावसुर्नास्ति निजप्रभासी ।
१स्वयम्प्रभासाद्रविरेति भासं, विष्णुर्वृषाहीति निगद्यतेऽतः ॥१२॥
१ स्वयम्प्रभासो=विष्णुः ।

वृषभः—२५७

वृषभोऽग्निः। स हि सूर्यस्थानीयः सन् वर्षति, तेन वर्षणेन भाति प्रकाशितो भवति, स वृषभः सूर्यः। स हि वृषभाणामपि वृषभो विष्णुः सर्वत्र स्वशक्त्या जगद् व्यश्नुवान आस्ते ।

मन्त्रलिंगं च—

त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः ।
आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि ॥
ऋग् १-३१-५

बह्वर्थोऽयं वृषभशब्दः। तद्यथा—"त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आ विवेश"। (ऋग् ४-५८-३, यजुः १७।९१) वृषभः पदनामसु निघण्टौ संगृहीतः। अनेक-विभक्त्यन्तो वृषभ-शब्दो वेदेषु प्रयुक्तो नानार्थत्वं व्यनक्ति, तत्र सुधीभिः सर्वव्यापके विष्णौ यथामति संगमनीयम् ।

भवति चात्रास्माकम्—

वृषत्वधर्मेण जगन्निबद्धं विभाति चाकल्पत अद्य यावत् ।
तं सर्ववन्द्यं विविधार्थयुक्तं नमन्ति देवा वृषभाख्यविष्णुम् ॥१३॥

अग्निदेव सूर्य से प्रकाश लेकर प्रकाशित होता है, अग्नि स्वयम्प्रकाशमान नहीं है, तथा सूर्य भी भगवान् स्वयम्प्रभ प्रभु से प्रकाश लेता है, इसलिये उसे वृषाही नाम से कहते हैं। स्वयम्प्रभास नाम विष्णु का है।

वृषभः—२५७

वृषभ नाम अग्नि का है, वृष नाम सिञ्चन या वृष्टि का है, अग्नि ही सूर्य रूप से वर्षा करता है, इसलिये वर्षा के द्वारा जिसका प्रकाश होता है, इस वाच्यार्थ से वृषभ नाम विष्णु का है, जो सकल जगत् को व्याप्त करके स्थित है।

इस नाम व्याख्या में "त्वमग्ने वृषभः पुष्टिवर्धनः" इत्यादि ऋक्-१-३१-५ प्रमाण है। यह वृषभ शब्द नानाविध अर्थों में प्रयुक्त होता है, जैसे "त्रिधा बद्धो वृषभो रोरवीति" इत्यादि ऋक्-४-५८।३। तथा यजुः १७।९१। में। निघण्टु में वृषभ शब्द का पदनामों में संग्रह किया है। यह वृषभ शब्द वेद में, विविधविभक्त्यन्त होकर विविध अर्थों में आता है। विद्वान् पुरुष अपनी बुद्धि के अनुसार इसे संगत करलें।

इसके संक्षिप्त भाव को भाष्यकार, अपने पद्य से इस प्रकार स्पष्ट करता है—

सबके वन्दनीय, विविधार्थयुक्त उस वृषभाख्य=वृषभ नाम विष्णु को सब देवगण नमस्कार करते हैं, जिसने अपने वृष रूप धर्म से इस सकल जगत् को सर्गारम्भ से अब तक नियन्त्रित=धारण कर रक्खा है।

विष्णुः—२५८

सर्वत्र विष्टः सर्वं वेवेष्टि वा स्वकया विभूत्या, न हि तत्कं स्थानं यत्र भगवतः सत्ता न स्यात् यदि चेदुच्यते, सर्वत्रास्तीति चेत् कथन्नावाप्यते । तत्राह तत्प्राप्तिसाधनं श्रद्धाख्यो मानसिकः सात्त्विको भावस्तया श्रद्धया सोऽवाप्यते । तथा च वेदः—

श्रद्धयाग्निः समिध्यते श्रद्धया हूयतेः हविः ।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥

ऋग्-१०१५१-१

अस्मिन्नेव श्रद्धा सूक्ते—

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥ १०-१५१-५

यो हि भगवन्तं सर्वत्र व्यापकं पश्यत्यनुभवति वा स सत्यया बुद्धया युक्तः सन् सुखमश्नुते । उक्तं तत्रैव— 'श्रद्धया विन्दते वसुः' ऋग् १०-१५१-४

भवति चात्रास्माकम्—

निष्पापबुद्ध्या य उ विश्वमात्रे भर्गस्य देवस्य कृतेर्बहुत्वम् ।
पुनः पुनः पश्यति तत्त्वदर्शी स सर्वविष्टं मनुते ह विष्णुम् ॥१४॥

विष्णोस्त्रिधा विक्रमणस्वरूपं यथास्मत्पद्यं—

विष्णुः—२५८

जो अपने ऐश्वर्य से सबमें प्रविष्ट अथवा सबका व्यापन किये हुये है, यह विष्णु शब्द का वाच्यार्थ है । जगत् में ऐसा कोई भी स्थान नहीं है, जहां भगवान् का अस्तित्व न होवे, अर्थात् वह सब जगह है । यदि कोई पूछे कि वह सर्वत्र है तो प्राप्त क्यों नहीं होता ? इसका समाधान इस प्रकार है, उसकी प्राप्ति का साधन श्रद्धा है, जो कि एक सात्विक मनोभाव है, श्रद्धा के बिना उस सत्यस्वरूप की प्राप्ति नहीं होती । श्रद्धा से ही प्राप्य है, इस अर्थ को "श्रद्धयाग्निः समिध्यते............" ऋक्-१०-१५१-१ । "श्रद्धां प्रातर्हवामहे. श्रद्धां मध्यंदिनं परि............" ऋक्-१०-१५१-५ । तथा "श्रद्धया विन्दते वसु" "श्रद्धया सत्यमाप्यते" इत्यादि वेद वचन पुष्ट करते हैं । जो सर्वव्यापक भगवान् विष्णु को सर्वत्र देखता या अनुभव करता है, वह श्रद्धा से युक्त मनुष्य श्रेयः—कल्याण का भागी होता है ।

भाष्यकार का पद्य द्वारा भाव प्रकाशन इस प्रकार है—

जो शुद्ध सात्विक बुद्धि से युक्त श्रद्धालु पुरुष, इस सम्पूर्ण विश्व में भगवान् भर्गाख्य विष्णु की, नानाविध कृतियों का दर्शन करता है, वह वस्तुतः तत्त्वदर्शी पुरुष उन नानाविध कृति रूप जगत् में व्याप्त भगवान् विष्णु को पुनः पुनः देखता रहता है ।

विष्णु की सर्वत्र व्याप्ति दिखाने के लिये भाष्यकार अपने पद्य द्वारा भगवान् के त्रिधा विक्रमण को इस प्रकार व्यक्त करते हैं—

विष्णुर्हि सूर्यः स हि त्रैधमित्वा त्रिभिः पदैः क्रामति कृत्स्नविश्वम् ।
सोऽग्निः स मित्रः स उ इन्द्र एको न चास्ति विष्णोः परमत्र किंचित् ॥१५॥

मन्त्रलिंगं च यथा—

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन् ।
स सविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम् ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद् वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ॥

अथर्व १३-३-१३

स वरितुमर्हः सूर्यः प्रातरुद्यन् 'मित्र'संज्ञां लभते, स सूर्योऽन्तरिक्षेण गच्छन् सवितेति संज्ञां लभते, स सूर्यो मध्येऽह्नि 'इन्द्र' इति संज्ञां लभते, स सूर्योऽस्त-समयेऽग्निसंज्ञां लभते, एवं प्रत्येकस्मात् स्थानात् सूर्यस्त्रिभिः पदैर्विश्वं स्वस्मिन्नात्मनि वेशयति, प्रवेशयतीति कृत्वा विष्णु सूर्यः सन् भगवांश्च तस्मिन्नपि व्यस्थितः सन् विशति वेशयतीति वा कृत्वा विष्णुरुक्तो भवति । 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पद'मित्यादि मन्त्रं च व्याख्यातं भवति ।

वृषपर्वा—२५९

पर्वं सन्धिरुच्यते । प्रीणाति पूर्वात् परमिति पर्वं, मन्त्रलिंगं च यथा—

भगवान् विष्णु ही, सूर्य रूप से त्रैतभाव को प्राप्त होकर, अपने तीन पदों से इस सकल जगत् का क्रमण या भ्रमण करता है, तथा वह ही कालरूप उपाधि भेद से अग्नि-मित्र तथा इन्द्र संज्ञाओं को धारण करता है. इस त्रिभाव पन्न विष्णु से अतिरिक्त जगत् में कुछ भी नहीं है ।

इसी अर्थ का प्रतिपादन "स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन् । स सविता भूत्वान्तरिक्षेण याति, स इन्द्रो भूत्वा तपति मध्यतो दिवमित्यादि अथर्व १३।३।१३ करता है । अर्थात् वह वरुण=वरण करने योग्य सबका प्रार्थनीय सूर्यदेव प्रातःकाल उदय होता हुआ, अन्तरिक्ष से जाता हुआ, द्युलोक के मध्य भाग को प्राप्त हुआ, तथा अस्त होता हुआ क्रम से मित्र, सविता, इन्द्र तथा अग्नि इन नामों को धारण करता है, और प्रत्येक स्थान से इस पदत्रय के द्वारा इस सकल विश्व को अपने में प्रविष्ट=समाविष्ट कर लेता है, तथा भगवान् विष्णु अपने निज भूमा रूप से उस सूर्य में भी अवस्थित है, इसलिये वह इस जगत् में प्रविष्ट या इस जगत् को अपने में समावेशित किये हुये है, इस अन्वर्थता से विष्णु कहा जाता है । इसी प्रसंग में 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पद'मित्यादि मन्त्र की व्याख्या की जा चुकी है ।

वृषपर्वा—२५९

वृषपर्वा—पर्व सन्धि को कहते हैं । पूर्व से पर को पुष्ट करता है, इसलिये पर्व—सन्धि का नाम है ।

अंगादंगाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि ।
यद्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥

वृषोऽग्निः, विश्वमिदं सर्वमग्निसन्धिमत्, लोकेऽपि च पश्यामः—शरीरस्य प्रतिधातु स्वकोष्मा पृथक्त्वेन कार्यकरो भवति, तथाग्निरेव पित्तं शरीरे—इति कृत्वा तच्च पित्तं पंचधात्वं प्राप्तं सत् सन्धावपि तिष्ठति, येयं व्यवस्था शरीरस्य सेयं व्यवस्था जगतः, जगति च पश्यामः-वायोरग्नेश्च यः सन्धिस्तद्विद्युतं नाम। तथा च समुद्रे वडवानल इति, वने च दावानल इति, भूमेर्मध्यादुदीर्यमाणोऽनलो ज्वालामुखमिव ज्वालामुखीत्युक्तो भवति। एवं जगत् तमेव वृषपर्वाणं भगवन्तं व्याचष्टे।

धर्मो वा वृष उच्यते। धर्मपर्वेदं जगत्, तद्यथा—न हि चक्षुः श्रवणमारभते, सर्पो हि चक्षुश्रवा उच्यते, तत्रैतज्ज्ञेयम्—न हि चक्षुः शृणोति, परन्तु एकमेव गोलकं द्वयोरिन्द्रियकर्मणोः साधकं भवति। यथोर्ध्वकाये बहुसन्धिभिधृतं ज्ञानगोलकमयमिदं वृषपर्वा धर्मपर्वा वोक्तं भवति। अपरं चोदाहरणम्—समुद्राणां परस्परं जलसन्धयः स्वस्वधर्मे तिष्ठन्ति। अनेकविधलोकधारकग्रहोपग्रहनक्षत्रराशिपर्वमयं कृतं कर्म तं भगवन्तं वृषपर्वाणं सर्वत्र व्यश्नुवानं व्यनक्ति, प्रकटयति वा।

मन्त्र।—अंगादंगात् लोम्नो लोम्नो इत्यादि।

वृष अग्नि को कहते है। यह सम्पूर्ण विश्व अग्नि सन्धि वाला है। लोक में भी देखते हैं कि शरीर की प्रत्येक धातु में अपनी अपनी धातूष्मा पृथक् पृथक् कार्य करती है। इसी प्रकार अग्नि ही शरीर में पित्त है, वह एक ही पित्त पांच प्रकार से शरीर में काम करती हुई सन्धि में भी रहती है, जो यह व्यवस्था शरीर में वर्तमान हो रही है, वही व्यवस्था इस जगत् में है। जगत् में देखते हैं कि वायु और अग्नि की जो सन्धि है, वह विद्युत् कहाती है। वह ही अग्नि समुद्र में 'वडवानल' तथा वनाग्नि दावानल कही जाती है। भूमि के मध्य से निकलने वाली अग्नि 'ज्वालामुखी' कहलाती है। इस प्रकार से यह सारा जगत् उसी 'वृषपर्वा' भगवान् विष्णु का व्याख्यान कर रहा है।

धर्म को भी 'वृष' कहते हैं। यह जगत् धर्म से पूरित है तृप्त है। इसलिये यह जगत् 'धर्मपर्वा' भी कहलाता है, जैसे—आंख देखने के काम को करती है। सर्प 'चक्षुश्रवा' कहाता, उसकी आंख सुनती नहीं परन्तु एक ही नेत्र गोलक में श्रवणेन्द्रिय का भी निवास होता है। अतः उसमें सुनना कर्म श्रवणेन्द्रिय ही करती है। जैसे-शरीर के ऊर्ध्व भाग में बहुत सन्धियों से ठहरा हुआ ज्ञानेन्द्रियों का अधिष्ठानभूत 'वृषपर्वा' या 'धर्मपर्वा' कहलाता है। दूसरा उदाहरण समुद्रों की परस्पर जल सन्धियां अपनी मर्यादा में रहती हैं। अनेकविध लोक लोकान्तर तथा ग्रहोपग्रह नक्षत्र राशि पर्वमय यह भगवान् का बनाया हुआ विश्व सर्वत्र व्यापक 'वृषपर्वा' को व्यक्त करता है।

भवति चात्रास्माकम्—

वृषो ह्यग्निरथो धर्मो द्वयोः सन्धिश्च पर्व तत् ।
स विष्णुरग्निधर्माभ्यां विश्वं व्याप्नोति पर्ववत् ॥१६॥

मन्त्रलिंगं च--

इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।
प्रयम्यमानान् प्रति पू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥ ऋ० ३।३६।२

युक्तियुक्तं वह्निः पुष्णाति जगत्, यथा शरीरसन्धीन् युक्तियुक्तं पित्तं पुष्णाति, तदेव च पित्तं विकृतं सत् शरीरसन्धीन् शिथिलयति । एवमेव सर्वं जगद् युक्तियुक्तेन वह्निना यज्ञरूपेण धार्यते क्रियायां व्यवस्थाप्यते, एवं विविधमूहनीयं भवति ।

वृषोदरः—२६०

वृषः=अग्निः । मन्त्रलिंगं च—

वृषोऽग्निः समिध्यते देवानां यज्ञवाहनः ।
तं हविष्मन्त ईडते ॥ ऋग् ३।२७।१४

सोऽग्निरुदरे यस्य स वृषोदरः । स च विष्णुरुक्तो भवति । लोकेऽपि च पश्यामः- प्रतिप्राणि चतुर्विधस्य लेह्य-चर्व्य-चोष्य-पेयस्य पक्त्यै जठरेऽग्निः पाचकपित्तसंज्ञया स्थितिमाधत्ते । तदेकमेव पित्तं पंचधात्वमाप्नोति, सर्वं पित्तमात्रमाग्नेयं, यथोदरे पित्तं, तथैव सर्वब्रह्माण्डोदरे सूर्यरूपोऽग्निः सर्वं दृश्यं रूपगुणवीर्यविपाकैः

यहां हमारा यह श्लोक है—वृषो ह्यग्निरथो धर्मः० इत्यादि ।

वृष धर्म तथा अग्नि का वाचक है। वह भगवान् इस विश्व को धर्म तथा अग्नि से व्याप्त करता है इसलिये वह 'वृषपर्वा' या 'धर्मपर्वा' कहाता है।

इसमें यह मन्त्र प्रमाण है—इन्द्राय सोमः० इत्यादि ।

युक्तियुक्त व्यवहृत किया हुआ अग्नि इस जगत् का पालन पोषण करता है। जैसे शरीर की सन्धियों को युक्तियुक्त पित्त पुष्ट करता है तथा विकृत पित्त सन्धियों को शिथिल करता है। इसी प्रकार से यह जगत् युक्ति युक्त वह्नि से यज्ञ से धारण किया जाता है अर्थात् क्रिया में व्यवस्थित किया जाता है। इस प्रकार से नाना प्रकार की ऊहा करनी चाहिये ।

वृषोदरः—२६०

वृषोदरः वृष अग्नि को कहते हैं। इस में मन्त्र :-

वृषोऽग्नि समिध्यते० इत्यादि ॥ ऋग् ॥

उदर में है अग्नि जिस के वह "वृषोदर" कहाता है। और वह विष्णु है। लोक में भी देखते हैं कि प्रत्येक प्राणी के उदर में चतुर्विध आहार का पाचन करने के लिये पित्त नाम से अग्नि रहती है। वह एक ही जठर पित्त पाँच प्रकार से विभक्त हो जाती है सारा का सारा पित्त कर्म अग्नि कहलाता है। जैसे शरीर में पित्त है वैसे ही इस ब्रह्माण्डोदर में सूर्य रूप अग्नि इस सम्पूर्ण दृश्य तथा अदृश्य को रूप, गुण, वीर्य्य विपाक से पकाता है। यह व्यवस्था वृषोदर

पचतीव, सैषा व्यवस्था वृषोदरस्य भगवतः सर्वव्यापकस्वरूपं व्यनक्ति। समुद्रे वडवाग्निः, पृथिवीतश्चोदीरणानि वह्नेरर्चींषि। एवं सुधीभिर्विविधमुन्नेयं भवति।

भवतश्चात्रास्माकम्—

वृषोदरो विष्णुरनन्तरूपो विश्वं व्यवस्थाप्य करोति वह्निम्।
मध्ये शरीरस्य तथोदधौ च पृथिवी च वह्निं बहुशो व्यनक्ति ॥१७॥

एषा व्यवस्था हि वृषोदरस्य विज्ञं विधिज्ञं क्षणशो व्यनक्ति।
अग्नौ स्थिते जीवितमाहुरर्च्यं वृषोदरो वर्षति वह्निमन्तः ॥१८॥

यदुक्तं वर्षति वह्निमन्तरिति लोकेऽपि च पश्यामः—ग्रीष्मर्तावग्नेस्तापस्याधिक्यात् सर्वं शुष्कमिव भवति।

अर्च्यं=जीवमिति, स एव हि शरीरेऽर्च्यः श्रेष्ठतमो वा।

वानस्पतिके च जगति दृश्यते यत् अजमोदा-निचयो रात्रौ जलेनार्द्रीकृत्य निधाप्येत तर्हि तस्मिन् अजमोदा-निचये यदि हस्तो दीयेत तदा तस्मिन् वह्निवद्दाहोऽनुभूयते, प्रत्यक्षं कृत्वानुभूतमस्माभिः। अमुथैव सर्वा एव विषात्मिका मूल-पत्र-फल-पुष्प-रूपा ओषधयो वृषोदरा एव, विषरूपात्मकस्याग्नेरन्तरुदरमिव तेषु सद्भावात्। एवं भगवान् विष्णुर्वृषोदरनाम्ना सर्वत्र व्याप्तोऽस्ति।

संज्ञक भगवान् की सर्वव्यापकता को व्यक्त करती है। समुद्र में वडवाग्नि पृथिवी से अग्नि की ज्वालायें उठती हैं। इस प्रकार से बुद्धिमानों को नाना ऊहा करनी चाहिये।

यहाँ हमारे ये दो श्लोक हैं :— [1] वृषोदरो विष्णु० इत्यादि। [2] एषा व्यवस्था हि वृषोदरस्य० इत्यादि।

अनन्त रूप वृषोदर संज्ञक भगवान् विष्णु विश्व को बना कर प्राणी शरीर के मध्य में वह्नि अर्थात् पित्त को व्यवस्थित करता है समुद्र में, वन में, पृथिवी भी ज्वालामुखी के रूप में नाना रूप से उसी वृषोदर को व्यक्त करता है। यह ही वृषोदर भगवान् की व्यवस्था भगवान् की विश्वव्यापिनी व्यवस्था को जाननेवाले बुद्धिमानों का उस का प्रतिभान क्षणे क्षणे करती है। अग्नि के उदर में रहते हुए यह प्राणी जीवित कहाता है, तथा सभी उस का आदर करते हैं, क्योंकि वृषोदर संज्ञक भगवान् ही शरीर के मध्यवर्ती उदर में अग्नि पित्त की व्यवस्था किये हुए है। जो श्लोक में कहा है कि भगवान् वह्नि का वर्षण करता है उस की संगति इस प्रकार है कि ग्रीष्म ऋतु में अग्नि के ताप से सब कुछ सूखे हुए के समान हो जाता है। श्लोक में कहा है कि अर्च्य का अर्थ जीव, क्योंकि शरीर में जीव ही श्रेष्ठतम है। वनस्पतियों में भी भगवान् ने वह्नि निधापित की हुई है। जैसे अजवायन के ढेर को रात को गीला करके रख दें तो प्रातः उस अजवायन के ढेर में हाथ देने पर वह गर्म अनुभव होता है। यह प्रत्यक्ष रूप में हम ने करके देखा है। इसी प्रकार से विषवृक्ष के, मूल, पत्र, फल, पुष्प, रूप ओषधियां भी वृषोदर कहलाती हैं। क्योंकि विष रूप अग्नि उन के अन्तः प्रतिष्ठित है। इस प्रकार भगवान् वृषोदर नाम से सर्वत्र व्यापक हो रहा है।

भवति चात्रास्माकम्—

वृषो वाग्निर्विषं वाग्निर्यथादृश्यं वनस्पतौ ।
तथा वृषोदरः श्रीमान् विष्णुर्विश्वं समश्नुते ॥१९॥

एवं बहुविधमुदाहरणानामूहितव्यं भवति ।

वर्धनः—२६१

वृधु वृद्धौ, भौवादिकः । वर्धयते ण्यन्तात् कर्तरि संज्ञायां ल्यु-प्रत्ययः, नन्दि-ग्रह्यादि ३-१-१३४ सूत्रे वार्त्तिकम्—नन्दिवासिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् ।

योऽयं आयुषा निबन्धनक्रमो यथाशरीरबलं लोकलोकानुरूपं च तं क्रमं वर्धयतीति कृत्वा वर्धनेति नाम विष्णुर्बिभर्ति, सर्वत्रैवास्य क्रमस्यानुस्यूतत्वात् । लोकेऽपि च पश्यामः—जीवः स्वकं निर्मितं वस्तुजातं चिराय संवर्धयितुं प्रयतते, ईश्वरानुस्यूतस्य सर्वव्यापकस्य कर्मणोऽनुरूपं कर्म, तद्यथा चतुर्दशमन्वन्तराण्यस्य भू-कल्पस्यायुषः प्रमाणमिति ।

मन्त्रलिंगं च—

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥
ऋग्–९-९७-३९

यहां हमारा यह श्लोक है :—वृषो वाग्निर्विषं० इत्यादि ।

वृष अग्नि है, विष अग्नि है । जैसे कि वनस्पतियों में देखा जाता है इसी प्रकार से श्री भगवान् विष्णु वृषोदर गुण से सारे विश्व को व्याप्त कर रहा है ।

इस प्रकार से नाना प्रकार की ऊहाओं की कल्पना करनी चाहिये ।

वर्धनः—२६१

भ्वादिगण पठित वृद्ध्यर्थक 'वृधु' धातु से नन्द्यादि सूत्र ३।१।१३४। में पठित "नन्दिवासिमदिदूषीत्यादि वार्तिक से कर्त्रर्थ विशिष्ट संज्ञा में 'ल्यु' प्रत्यय होने से वर्धन शब्द सिद्ध होता है, जो कि भगवान् विष्णु का नाम है । क्योंकि उसने प्रत्येक को लोकानुरूप तथा शरीर और बलानुसार आयु उपलक्षित काल से यथाक्रम बाँध रखा है, तथा वह इस क्रम को निरन्तर बढ़ाता रहता है, तथा च यह वर्धन रूप क्रम मूल से आया हुआ सर्वत्र लोक में अनुस्यूत है, लोक में भी ऐसा देखने में आता है। प्रत्येक जीव अपनी बनाई हुई वस्तु को सदा बढाने का प्रयत्न करता है, यह जीव का कर्म सर्वव्यापक भगवान् विष्णु के कर्मानुरूप है, जैसे कि इस भूकल्प का प्रमाण चौदह मन्वन्तर हैं । इस नाम में यह मन्त्र 'स वर्धिता वर्धन' इत्यादि प्रमाण है ।

भवति चात्रास्माकम्—

> स वर्धनो विष्णुरनन्तशक्तिर्विश्वं समग्रं नयते चिराय।
> समग्रलोकानुत जीवदेहानाभूतृणान् मेरुपदं च यावत् ॥२०॥

भुवस्तृणम्=भूतृणम्। मेरुपदं=पर्वतपरिच्छदम्।
सूर्योऽपि वर्धन एतस्मादेव, स्वयं स वर्धमानः सन् सकलं चराचरं वर्धयति। षे कल्पयति, प्राणेभ्यो योक्तुं समर्थयति, इति कृत्वा।

मन्त्रलिंगं च—

आप्नुहि श्रेयांसमति समं क्राम। अथर्व–२ ११।५

वर्धमानः— २६२

वर्धन इति व्याख्याने यदुक्तं तमायुर्निबन्धनक्रमं वर्धयन् स्वयमपि वर्धते, विष्णुरूपत्वात्तस्य। वर्धयन्तं वर्तमानेन योजयति स्थितौ स्थापयति। स्वकं नित्यात्मकं गुणं सर्वत्र व्यापयन् विष्णुर्वर्धमान इत्युक्तो भवति। तद्यथा लोकेऽपि च पश्यामः—वृद्धिमन्तं स्वकं जातक माता पिता च तदनुकूलोपकरणानामुपस्थापनेन वर्धयत इति कृत्वा वर्धमानेति गुणं तावपि बिभरन्तौ वधमानौ वक्तुमर्ह्येते। अमुथैव मालाकारः स्वक उद्याने वर्धमान इव। वर्धमान-पदपर्याय एधमान इति पदं वेदे दृश्यते तद्यथा

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् अनन्त शक्तिशाली विष्णु, लघु से लघु भूतृण से लेकर मेरू पर्यन्त बड़ी से बड़ी वस्तु अथवा समग्रलोक तथा जीव शरीर रूप समग्र विश्व को सदा आयु निबन्धन रूप क्रम से सनियम चला रहा है।

मेरु पद का, तदन्तर्गत वृक्ष गुल्मादिरूप उपकरण से युक्त मेरु पर्वत, अर्थ विवक्षित है।

सूर्य को भी इसीलिए वर्धन कहते हैं, क्योंकि वह स्वयं बढता हुआ समग्र चराचर को बढाता है, अर्थात् जीवन के लिये समर्थ करता है। इस अर्थ की पुष्टि 'आप्नुहि श्रेयांसमति समं क्राम' अथर्व २।११।५। मन्त्र से होती है।

वर्धमानः—२६२

वर्धन नाम के व्याख्यान में कथित आयु से निबन्धन रूप जो भगवान् का क्रम है, इस वर्धन क्रम से भगवान् स्वयं भी बढता है, क्योंकि जो आयु निबन्धन रूप वृद्धिक्रम है वह भी तो विष्णु रूप है, क्योंकि वह सर्वव्यापक है, इसलिये उसका नाम वर्धमान है। लोक में भी, सब प्रकार के उपकरणों से अपनी संतान को बढाते हुये माता पिता अपने आपको बढता हुआ समझते हैं, इस विवर्धन रूप गुण से युक्त हुवे वे भी वर्धमान नाम से कहे जाते हैं। इसी प्रकार माली भी अपने बाग को बढ़ाता हुआ, वर्धमान नाम से कहा जा सकता है। वेद मन्त्र में वर्धमान का पर्य्याय शब्द "एधमान" आता है

मन्त्रलिंगम्—

श‍ृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्॥
ऋ० ६।४७।१६

भवति चात्रास्माकम्—

स वर्धमानः सकलं जनित्वा यथार्हकालं स्थितिमद् विधत्ते।
नित्यो हि विष्णुर्नियतं विचिन्वन् कला स्वका व्याप्य विराजते च ॥२१॥

नियतं=नियतकालाय गृहीतायुष्कम्। विचिन्वन्=विविध-लिंग-लक्षणोपेतं पृथक् पृथग् विवेकार्हं कुर्वन्निति। कलाः=भगवतो गुणराशिज्ञापकलक्षणानि।

विविक्तः—२६३

विजिर् पृथग्भावे, जौहोत्यादिकः। विविक्तः पृथग्भूतः।

यथा हि लोके यन्त्राणामाविष्कर्ता, यथार्हावश्यकतानुकूलं यन्त्रं विधाय तस्माद् यन्त्रात् स्वयं पृथग्भूतो यन्त्रं यथार्हगन्तव्यं प्रति गमयति तथैवायं सकलसृष्टिकर्ता भगवान् विष्णुः स्वकेन पृथग्भूत-गुणेन युक्तो विविक्त इति संज्ञां प्रापितस्तत्त्व-दर्शिभिः।

एवं लोक उदाहरणानां बहुत्वं कल्पनीयं भवति। तद्यथा—कं=जलम्। कस्य मलं=कमलं, क-मलाज्जायमानं पुष्पं=कमलं जलात् पृथगसंपृक्तं भवति, अर्थात्

जैसे कि 'शृण्वे वीर उग्रमुग्रं······—एधमानद्विळुभयस्य राजे'त्यादि मन्त्र में।

इस भाव को भाष्यकार अपने पद्य से इस प्रकार व्यक्त करता है—

वह वर्धमाननामा भगवान् विष्णु इस समग्र विश्व को यथा समय उत्पन्न करके इसे स्थित करता है, अर्थात् इसको चिरस्थायी बनाता है, तथा वह सनातन नित्यपुरुष विष्णु नियत समय के लिए आयु से युक्त करके प्रत्येक पदार्थ को विविध लक्षणों 'चिन्हों' से पृथक् पृथक् ग्रहण करने योग्य बनाकर अपनी गुणराशि की ज्ञापक कलाओं को व्याप्त करके विराजमान हो रहा है।

विविक्तः—२६३

विविक्त शब्द में पृथक् भाव में वर्त्तमान जुहोत्यादि गण की 'विजिर्' धातु से 'क्त' प्रत्यय है।

जैसे-यन्त्रों के आविष्कार करने वाला, आवश्यकता अनुसार-यन्त्रों को बनाकर स्वयं उस यन्त्र से पृथक् रहता है, उस यन्त्र को प्राप्तव्य स्थान की ओर ले जाता है इसी प्रकार से सम्पूर्ण ब्रह्माण्ड कर्त्ता भगवान् विष्णु अपने पृथक् 'निर्लेप' गुण से सर्वत्र व्यापक होता हुआ 'विविक्त' नाम से ज्ञानियों द्वारा व्यवहृत किया जाता है।

इस प्रकार से लोक में बहुत से उदाहरणों की कल्पना करनी चाहिये। जैसे—क=जल उस के मल पंक से कमल उत्पन्न होता हुआ कमल का पुष्प जल से पृथक् रहता है अर्थात्

कमलपत्रे जलं पृथगिवात्मानमाभासयति ।

मन्त्रलिंगं च—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद् दशांगुलम् ॥

भवति चात्रास्माकम्—

सृष्ट्वा जगत् सर्वविधं विधाता स्वयं विविक्तो ह्यजरोऽमरः सः ।
सहस्रशीर्षा स सहस्रदृष्टिः स सर्वबन्धुः स पृथक् च दृश्यात् ॥ २२ ॥

सर्वबन्धुः=सर्वं बध्नाति स्वकेन नियमेनेति कृत्वा ।
दृश्यात्=दृश्यरूपाज्जगतः शिष्याद् वा शासितुमर्हज्जगत इत्यर्थः ।

श्रुतिसागरः—२६४

श्रूयतेऽनया श्रुतिः, श्रु श्रवणे इति भौवादिकधातोः "स्त्रियां क्तिन्" पा० ३-३-९४ इति सूत्रपठितवार्तिकेन "श्रुयजीषिस्तुभ्यः करणे" इत्यनेन करणे क्तिन् प्रत्यये सिध्यति । एवञ्च यया वेदवाचा स्वस्थ लौकिकं पारलौकिकञ्च विधान, कर्तव्यमेतन्न कर्तव्यमेतदिति श्राव्यते सा श्रवणसाधनं श्रुतिः । ल्युटोऽपवादः क्तिन् । अस्त्रियान्तु ल्युटि श्रवणम् । गॄ निगरणे इति तौदादिकधातो "ॠदोरप्" इति पा०

कमल-पत्र पर पानी पृथक् ही अपनी सत्ता बनाये रहता है ।

मन्त्र—सहस्रशीर्षा पुरुषः—– अत्यतिष्ठद्० इत्यादि० ।

यहां हमारा यह श्लोक है :—सृष्ट्वा जगत् सर्वविधं० इत्यादि ।

अजर अमर विधाता ने इस सर्वविध जगत् को बनाकर स्वयं अपने आप को विविक्त (निर्लिप्त) रखा है । वह सहस्रशीर्षा है, वह सहस्र दृष्टि है, वह सर्वबन्धु है अर्थात् सब को अपनी व्यवस्था से बान्धने वाला है । और वह स्वयं सब से पृथक् है ।

श्रुति सागरः– २६४

श्रुतिः शब्द में स्त्रीलिंग में करण कारक में 'स्थागापापचो भावे' सूत्र की श्रुयजीषिस्तुभ्यः करणे वार्तिक से 'क्तिन्' प्रत्यय होता है । स्त्रीलिंगेतर भाव में ल्युट् होने से सुनने का साधनभूत श्रवण शब्द बनता है जो कि कर्ण का पर्य्यायवाची श्रोत्र कहाता है ।

श्रवण अर्थ में वर्तमान भ्वादिगण की 'श्रु' धातु का सार्वधातुक लकारों में 'शृ' आदेश तथा "श्नु" विकरण होकर "शृणोति" आदि रूप बनते हैं ।

सामान्य रूप में "श्रुतिः" शब्द चारों वेदों के पर्य्याय में व्यवहृत होता है । वेद रूप करण अर्थात् माध्यम से या उस के साहाय्य से मनुष्यों द्वारा उसमें निर्दिष्ट ऐहिक तथा पारलौकिक ज्ञान प्राप्त किया जाता है । इसलिये वेद श्रुति कहाता है ।। आङ् उपसर्ग पूर्वक तुदादिगण की 'गॄ' निगरणे (निगलना अर्थ में वर्तमान) धातु से पचाद्यच् प्रत्यय होकर 'आगरः'

सू० ३-३-५७ इत्यनेन भावे "अप्" प्रत्यये गरणं गरः, गरेण सह वर्तते सगरः सगर एव सागरः स्वार्थेऽण् नदीनां निलयनस्थानं भौमः समुद्र इव श्रुतीनां=वेदानां—सागरो निलयनस्थानमाश्रय इत्यर्थः। सर्वं व्यश्नुवाने तस्मिन् विष्णौ श्रुतयो नद्यः समुद्र इव स्थिताः। सर्वत्र व्याप्ते खे यथा शब्दव्याप्तिः। अर्थात् सर्वत्र व्याप्त आकाशो यथा शब्दं बिभ्राण आस्ते तथायं भगवान् विष्णुः सर्वश्रुतिनिलयो जगद् व्याप्नुवन् सर्वं व्यवहारक्षमं विधत्ते। एतदर्थाभिधायकं मन्त्रलिंगं यथा—

"ऋचो अक्षरे परमे व्योमन्" तथा "अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्"॥ (अथर्व १०-८-३३)

अन्यच्च

"अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥ (यजुः-४०-१३)

भवति चात्रास्माकम्—
यथा नदीनां बहवोऽम्बुवेगाः, समुद्रमेवाभिमुखा द्रवन्ति।
तथा श्रुतीनां बहवोऽर्थकल्पा, विष्णुं विना नान्यमियन्ति कञ्चित्॥ २३॥

सारांशः—सर्वासां वाचां विष्णुरेवाश्रयः।

सुभुजः—२६५

सु उपसर्गः। भुज पालनाभ्यवहारयो रौधादिको, भुज कौटिल्ये तौदादिकश्च, ततो 'हलश्चे'ति करणे घञि "भुजन्युब्जौ पाण्युपतापयो"रिति पा० सूत्रनिपातनाद् गुणाभावः, चजोरिति कुत्वाभावश्च मूलविभुजादेराकृतिगणत्वाद् वा क—प्रत्ययेन साध्यम्। प्रजापतिरूपं धर्मं दधत् सः सर्वत्र व्याप्तः सर्वाः प्रजा रक्षति, भोजयति,

---

बनता है आगर से युक्त=सागर कहाता है। समुद्र को सागर इसीलिये कहते हैं, कि वह स्वयं अपनी सत्ता को रखता हुआ सब नदों को निगल लेता है अर्थात् अपने में समाविष्ट कर लेता है। श्रुतियों का सागर=श्रुतिसागर कहाता है। सर्वत्र व्यापक भगवान् विष्णु में श्रुतियां उसी प्रकार से समाहित हैं, ठहरी हुई हैं जैसे समुद्र में नदियां ठहरी हुई होती हैं। जैसे आकाश स्वयं सत्ता से सर्वत्र व्यापक है परन्तु शब्द गुण उस आकाश में निगलित हुआ है। उसी प्रकार वह भगवान् सब श्रुतियों को अपने में समाविष्ट करके सर्वत्र व्यापक होता हुआ सम्पूर्ण विश्व को व्यवहार के निमित्त समर्थ बनाता है।

सुभुजः—२६५

सु-उपसर्गः। भुज पालन तथा भक्षणार्थक रुधादिगण पठित धातु से, तथा कौटिल्य=निबन्धनार्थक तुदादिगण पठित भुज धातु से घञर्थ कर्मकारक में क प्रत्यय करने से और क्ङिन्निमित्तक गुणाभाव होने से भुज शब्द सिद्ध होता है। इस प्रकार जिसका पालन उपसंहार

कुटिलयति च बन्धनविशेषैरिति शोभनभुजः सुभुज उच्यते। सर्वत्र च लोके, भोजनरूपः, पालनरूपस्तथा कुटिलीभावनारूपश्च धर्मो दृश्यते, तथा च बहुबन्धनवद्धि वग्गुर्जीवानां, शाखाप्रशाखावितानरूपबहुबन्धनविततश्च वृक्षः कुटिलीभाव—मापन्नः सुभुज इति वक्तुमर्हः। एवमुदाहरणवैविध्यमूह्यम्। पालनप्रकाराणि च तस्य विष्णोर्विविधानि, तद्यथा—श्वासप्रश्वासरूपेण वायुना पालयति सर्वं, जलस्थान् जलेन, जलवाताभ्यां वा, वियच्चरानाकाशवाताभ्यां, तथा गण्डूपदांश्च मृदा पालयति ते हि मृदमश्नन्ति, चक्रवाकोऽग्निं, पशवस्तृणानि, पक्षिणः कृमीनन्नञ्च, सिंहादयो मांसं, कुक्कुटादयश्च मांसमन्नञ्चाश्नन्ति, एवं लोकं दृष्ट्वा बहुधोऽन्नेयम्। श्रूयन्ते च लोकप्रसिद्धाः विविधा रक्षाप्रकारास्तस्य तद्यथा—परं हन्तुं प्रवृत्तं मनुष्यं, पशुं, पक्षिणं वा तत्प्रेरिताः सर्पादयो बध्नन्ति। तथा हि श्रूयत एकैषमस्तनी घटना, 'रोहतक'मण्डलान्तर्गतगोहानानिकटस्थे ग्रामे, कश्चित् स्वयं पितृव्य एव न्यूनद्वाद—शाब्दकं स्वं भ्रातृव्यं हन्तुं प्रवृत्तः, परशुहस्तः स तदवस्थ एव सर्पेण चतुरस्रं पर्यावृत्य निबद्धो रक्षापुरुषैश्च प्रार्थितः स सर्पस्तं परित्यज्यान्तर्दधे। पितृव्यो हि

तथा निबन्धन किया जाता है, उसका नाम भुज=लोक है, और यह भुज=संसार सबके मन को मोहित करने तथा विचित्र चातुर्य से रचित होने से, शोभन=सुन्दर है जिसका उसका नाम सुभुज है। यह बहुव्रीहि समास से सुभुज नाम का अर्थ हुआ। अथवा भुज धातु से करण अर्थ में घञ् प्रत्यय और भुजन्युब्जावित्यादि पा० सूत्र से गुण के अभाव का तथा कुत्व के अभाव का निपातन करने से भुज शब्द सिद्ध होता है। इस प्रकार से शोभन=सुन्दर है भुजायें=पालन के साधन, उपसंहार के साधन, तथा निबन्धन के साधन जिसके उसका नाम है सुभुज। यह सुभुज नाम का वाच्यार्थ हुआ। भगवान् के पालन के उपसंहरण के तथा निबन्धन के मार्ग बहुत प्रकार के हैं, जैसे—भगवान् श्वास प्रश्वास रूप वायु से सबका, जल और वायु से जलस्थों का, आकाश और वायु से गगनचरों का, गण्डूपद 'गण्डोओं' का मिट्टी से पालन करता है। गण्डूपद (गण्डोये) मिट्टी खाते हैं। चकोर पक्षी की अग्नि से रक्षा करता है, क्योंकि वह अग्नि को खाता है। इसी प्रकार पशु घास खाते हैं, पक्षी कीड़े तथा अन्न को खाते हैं, सिंहादि हिंस्र जीव मांस खाते हैं।

इस उपरोक्त भाव को भाष्यकर इस प्रकार प्रकट करता है—

भगवान् सुभुजनामा विष्णु, विश्व का निर्माण करके, तथा उसके लिये रक्षा या बन्धनादि में समर्थ और विविध प्रकार की कार्यसिद्धि के लिये बहुत प्रकार की भुजायें देकर, स्वयं किसी प्रकार की चेष्टा न करता हुआ निर्विकल्प=निर्विशेषरूप से स्थित रहता है।

इसी प्रकार और नाना प्रकार की कल्पनायें कर लेनी चाहियें। भगवान् के रक्षाहिंसादि करने के नाना प्रकार के तथा आश्चर्योत्पादक मार्ग हैं जैसे कि आधुनिक ही एक घटना सुनने में आती है, रोहतक जिले के गोहाना नगर के पास किसी गांव में किसी ने अपने भतीजे को इसलिये मारने की चेष्टा की कि इसकी भूमि मुझे मिल जाये, उसके भतीजे की आयु १२ वर्ष से भी कुछ कम थी, जब वह कुल्हाड़ा हाथ में लेकर उसको मारने को तैयार हुआ, तब ही कहीं

स्वभ्रातृव्यस्वभूतभूमिं जिघृक्षुस्तं जिघांसति स्म । पशवोऽपि तद्व्यवस्थानुसारं मूत्र-पुरीष-दुग्ध-दधि-घृत-चर्म-मांस-लोम-वसा-अस्थिप्रभृतिभी रक्षन्ति प्राणिनम् । अत्रापि पशुशरीरयन्त्राधिष्ठातृत्वेन स सुभुज एव रक्षकः । वेदोपदेशरूपवाचापि स विश्वं भुनक्ति=रक्षतीति सोऽन्वर्थो नाम सुभुजः । अग्निरपि विविधकर्मभिर्विश्वं रक्षति । एवं महार्थोऽयं सुभुजेति विष्णोर्नामशब्दो बहुधास्माभिर्व्याख्यातः । लोकं दृष्ट्वा विविधमूहनीयं, दिङ्मात्रमस्माभिरुदाहृतम् ।

भवति चात्रास्माकम्—

बह्वर्थमेतत्सुभुजेति नाम, तं वक्ति विष्णुं विविधस्वरूपम् ।
भुनक्ति भुङ्क्ते भुजतीति यस्माद्, विश्वं स तस्मात् सुभुजोऽत्र गीतः ॥ २४ ॥

मन्त्रलिंगानि च । *भोजने यथा —*

"अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम् ॥ (ऋ० १०-४८-१)

रक्षार्थे—

"तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ (यजु २५-१४)

बन्धनार्थे—

"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ (यजु ३-६०)

से निकल कर एक सर्प ने उसको बांध लिया, तथा रक्षाधिकारी राजपुरुषों की प्रार्थना से उस मनुष्य को सर्प ने बड़ी कठिनाई से छोड़ा । पशुवर्ग भी अपने भगवत्कृत नियमानुसार मूत्र पुरीष (मल) दूध चर्म मांस मेद (मज्जा) तथा हड्डी आदियों से एक दूसरे की रक्षा करता है । रक्षा करनेवाला वहां पशु शरीर रूप यन्त्रों का अधिष्ठाता भगवान् विष्णु ही है, जिसका अपर नाम सुभुज है । अपने ज्ञानरूप वेद के उपदेश (यह करना यह नहीं करना) के द्वारा इस सकल विश्व का निबन्धन करता है, अर्थात् बांधता है । बहुत प्रकार के शाखा प्रशाखा रूप बन्धनों से बंधा हुआ विस्तृत वृक्ष भी सुभुज नाम का वाच्यार्थ है । अग्नि भी विविध कर्मों द्वारा इस विश्व की रक्षा करता है ।

इस अर्थ की पुष्टि में क्रम से मन्त्र प्रमाण इस प्रकार हैं—

भोजन के विषय में "अहं भुवमित्यादि" रक्षाविषय में—"तमीशानं जगत" इत्यादि, तथा बन्धन विषय में "त्र्यम्बक"मित्यादि ।

इस उपरोक्त भाव को भाष्यकार संक्षेप से इस प्रकार व्यक्त करता है—

घञर्थ कर्मकारकार्थक क प्रत्ययान्त भगवान् का सुभुज नाम बहुत प्रकार के व्यक्ताव्यक्त रूप से सर्वव्यापक भगवान् विष्णु का स्पष्ट रूप से व्याख्यान कर रहा है, यह समस्त जडजङ्गम रूप विश्व उसी सर्वेश्वर द्वारा रक्षित, उपसंहृत तथा निबद्ध=व्यवस्थित होता है, इसलिये भगवान् का सुभुज यह अन्वर्थक नाम है ।

सुभुज इत्यत्र बहुव्रीहिः समासो वा शोभनौ भुजौ यस्येति भुजशब्दो बाहु—वचनः। भोजन-रक्षण-बन्धनरूपकर्मकरौ च तावेव। भुङ्क्ते, भुनक्ति, बध्नाति वा कुटिलीभावमापाद्य याभ्यामिति भुजौ, 'बाह्वोर्गुणप्रकर्षद्योतको मन्त्रो यथा—

"प्रदिशो यस्य बाहू"। (ऋग् १०-१२१-४ अथर्व ४-२-५ यजु २५-१२)

प्रसङ्गप्राप्तबाहुशब्दसिद्धिश्च "अर्जिदृशिकम्यमिपसिबाधामृजिपशितुग्धुग्दीर्घहकारश्चेत्युणादि (१-२७) सूत्रेण कुप्रत्ययो बाधृधातोर्धकारस्य हकारश्च, बाधेते इति बाहू। दृशेः पशादेशः कुप्रत्ययश्च, पश्यतीति पशुः, पश्यन्ति येन वा स पशुरग्निः। पश्यति सर्वमिति पशुरीश्वरः।

भवति चात्रास्माकम्—

नूनं हि मन्ये सुभुजोऽत्र विश्वं, यथार्थसिद्ध्यै विविधान् प्रदाय।
भुजान् समेभ्यः प्रतिपालशक्तं, कृत्वा स्वयं तिष्ठति निर्विकल्पः॥ २५॥
बहुव्रीहावपि व्याख्यानः समानः।

दुर्धरः—२६६

दुरुपसर्गः कृच्छ्रार्थे, तत्पूर्वाद् धृञ् धारणे इति भौवादिकाद्धातोः "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्" पा० ३-३-१२६ सूत्रेण खल् प्रत्ययो दुःखेन ध्रियन्त इति दुर्धराणि लोकलोकान्तराणि तान्यस्य सन्तीति मत्वर्थीयेऽचि दुर्धरः।

तथा च यः साधारणप्राकृतप्राणिभिर्दुर्धराणि जगति तदन्तर्गतानि सूर्यचन्द्रादिरूपाणि ज्योतींषि च चक्षूरूपेण धरतीति दुर्धरः स उच्यते भगवान् विष्णुः।

अथवा शरीर के एक अङ्ग विशेष को कहनेवाला यह भुज शब्द है, शरीर के अवयवरूप में इसे बाहु कहते हैं। भोजन रक्षण तथा बन्धन रूप कर्म भुजाओं के द्वारा ही होता है, क्योंकि इन से खाया जाता है, इनसे पालन किया जाता है शरीर का, तथा इनको टेढा करके इनके द्वारा प्रत्येक वस्तु का बन्धन किया जाता है, इसलिये इनका नाम भुजा है। बाहुओं के गुण को प्रकट करनेवाला यह वेद वचन है, "प्रदिशो यस्य बाहू" इत्यादि।

कुछ प्रसङ्ग से प्राप्त का भी निरूपण किया जाता है—

भ्वादिगण पठित विलोडनार्थक बाधृ धातु से अर्जिदृशीत्यादि उणादि सूत्र से उ प्रत्यय तथा धातु को हकारान्तादेश होने से बाहु शब्द सिद्ध होता है। तथा इसी सूत्र में दृश धातु को पश आदेश और उ प्रत्यय होने से पशु शब्द सिद्ध होता है, जिसका अर्थ देखनेवाला ऐसा होता है। अथवा जिसके द्वारा देखा जाये उसका नाम पशु है अथवा जो सबको देखता है उसका नाम पशु है यह ईश्वर का नाम है। जिसकी भुजायें सुन्दर हैं उसका नाम सुभुज है।

दुर्धरः—२६६

दुर्धर शब्द में दुर् उपसर्ग कृच्छ्र=कठिनता अर्थ में है, धारण अर्थ में वर्तमान भ्वादिगण की धृञ् धातु से ईषद् दुःसुषु इत्यादि सूत्र से खल् प्रत्यय होता है, जो कठिनता से धारण किया जावे या कठिनता से जाना जावे उसको जो धारण करता है वह दुर्धर कहाता है अर्थात् जो

भगवतात्मव्यवस्थया कर्मभोगार्थं जीवाय दत्तं शरीरं जातिभेदात् प्रतिप्राणि भिन्नं भिन्नं दृश्यते, तच्च पञ्चभूतमयत्वादनित्यन्नश्वरं, पृथिव्यंशबहुलत्वाच्च पार्थिवं, वायोरंशाधिक्ये वायवीयं, तथा जलांशाधिक्ये जलीयमिति भूतांशाधिक्य-योगेन तत्तद्भूतनाम्ना व्यपदिश्यमानमपि सामान्यतः पार्थिववद् भाति। तच्च शरीरं शुक्रशोणितयोराद्यसंयोगक्षणादारभ्य यावद्देहान्तं भगवद्व्यवस्थानुसारं समनस्केनात्मना धृतं भवति, तद्दुर्धरं शरीरं जीवो धारयतीति जीवो दुर्धर उक्तो भवति। अमुथैव स्वशक्त्या कल्पकल्पान्तमिदं सर्वं चराचरं धारयिष्यति चेति स दुर्धर उच्यते।

मन्त्रलिंगञ्च—

"येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥

भवति चात्रास्माकम्—

यथा शरीरं गतिमद्बिभर्त्ति, मनोऽर्थवज्जीव उ दुर्धराख्यः।
तथार्थवद् भेषु जगद्विभक्तं स दुर्धरस्तद् गतिमद्बिभर्त्ति॥ २६॥

मनोऽर्थवत्=मनोयुक्तं पञ्चेन्द्रियार्थयुक्तञ्च। भेषु=ग्रह—नक्षत्र— राशिषु, अर्थवत्=प्रयोजनवत्॥ दुर्धरः=दुर्धरधरः इति भावार्थः।

सारांशतः—यथा प्रत्यक्षदर्शनरहितो जीव इदं पार्थिवं शरीरं प्रतिपदं धारयन्

दुर्धर को भी सहजतया धारण करले वह दुर्धर भगवान् है जैसे लोक में भी देखते हैं भगवान् ने अपनी व्यवस्था से जीव के भोगों को भुगाने के लिये भिन्न भिन्न प्राणियों को जाति भेद से भिन्न २ पञ्च भूतमय पृथिवी अंश प्रधान नश्वर पार्थिव शरीर दिया है, आकाशादि पञ्च भूतों की प्रधानता से पञ्चविधभूतधारी जीवों का शरीर भी अपने २ भूत की बहुलता को लिये हुए भी पार्थिव ही कहाता है. वह शरीर शुक्र—शोणित के संयोग क्षण से लेकर मरण तक मन और इन्द्रियों सहित आत्मा द्वारा धारण किया हुआ होता है, परन्तु जब जीव शरीर को छोड़ देता है, तब वह शरीर किसी से भी धारण किया हुआ नहीं होता, ऐसे दुर्धर शरीर को जीव धारण करता है। इसलिए जीव भी दुर्धर कहाता है। इसी प्रकार से भगवान् विष्णु इस सृष्टि को अपनी शक्ति से कल्प कल्पान्त तक धारण करता है, तथा धारण करता रहेगा, इसलिये वह विष्णु अपने दुर्धरण गुण से सारे विश्व को व्याप्त करता हुआ सुख से समझने के लिये दुर्धर नाम से कहा जाने लगा। मन्त्र भी यहां पर प्रमाण है—

"येन द्यौरुग्रा पृथिवी"ति मन्त्र।

यहां पर हमारा श्लोक है:—यथा शरीरं प्रतिजीव इत्यादि—जैसे प्रतिजीव को दिया हुआ मन और इन्द्रियों से युक्त शरीर को जीव गतियुक्त बनाये रखता हुआ धारण किये रहता है, इसी प्रकार से इस जगत् को नक्षत्र ग्रह राशियों में प्रयोजनानुसार बंटे हुए को वह दुर्धर भगवान् विष्णु गतियुक्त बनाये हुए धारण किये हुये है। सारांश यह है—प्रत्यक्ष दर्शन से

तमेव दुर्धर-धारकं व्याचष्टे, अमुथैव चक्षुषा मृल्लोष्ठवद् द्रष्टुमशक्यं सदपि ब्रह्म दुर्धरस्य लोकलोकान्तरस्य धारकं सत् दुर्धरधर इति वक्तव्ये दुर्धर इत्युच्यते मध्यमपदस्य लोपात्।

वाग्मी—२६७

वच परिभाषणे, आदादिकः। तस्मात् क्विब्वचिप्रच्छि०, (उणा०-२·५७), इत्यादिसूत्रेण क्विप्-दीर्घत्वमसम्प्रसारणत्वं च विधीयते। तेन वाक्शब्दो निष्पद्यते। तस्मात् वाक्-प्रातिपदिकात् वाचो ग्मिनिः (अ० ५-२-१२४), इत्यनेन मत्वर्थे ग्मिनिः प्रत्ययो विधीयते गश्चान्तादेशः। तेन वाग्मी, युक्तियुक्तमितभाषी वाग्मीत्युक्तो भवति। यो हि सम्यग् बहुभाषते सोऽपि वाग्मीत्युक्तो भवति।

वाग्मी नामवतो भगवतो गुणस्य प्रत्यक्षतो व्यापनं लोके दृश्यते, तद्यथा—पशुपक्षिणः स्वप्रयोजनमात्रज्ञापनाय युक्ते काले युक्तं मितं च भाषन्ते। शकुनीनां यथार्थवाक्त्वमधिगत्यैव शाकुनं शास्त्रं तत्त्ववेदिभिर्लोकोपकाराय प्रवर्त्तितम्।

तद्विषये मन्त्रलिंगं यथा—

आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः।
यदुत्पतन् वदसि कर्करिर्यथा बृहद् वदेम विदथे सुवीराः॥ (ऋग्परिशिष्टे)
भद्रं वद दक्षिणतो भद्रमुत्तरतो वद भद्रं पुरस्तान्नो वद भद्रं पश्चात् कपिंजल।

एवमादि पञ्चर्चं शकुनिविषयमधिकृत्यैव गीतमस्ति॥ तत्रैव तद् द्रष्टव्यम्। वृषस्यन्त्यो गावो महिष्यश्च यथाकालं यावत्प्रयोजनसाधकमात्रं च भाषन्ते।

रहित यह जीव इस पार्थिव शरीर को धारण करता हुआ उस दुर्धर को व्याख्यात करता है, इसी प्रकार से आंख से मिट्टी के ढेले की तरह देखा जाने में अशक्त वर्तमान होता हुआ भी ब्रह्म इस दुर्धर लोक लोकान्तर को धारण करता हुआ दुर्धरधरः शब्द के स्थान में दुर्धरः ऐसा मध्यम पद के लोप से कहाता है।

वाग्मी—२६७

परिभाषणार्थक अदादिगण पठित वच धातु से 'क्विब्वची'त्यादि उणादि सूत्र से क्विप् प्रत्यय होने से वाक् शब्द सिद्ध होता है, तथा वाक् शब्द से "वाचो ग्मिनिः" इस पाणिनीय सूत्र से मत्वर्थ में 'ग्मिनि' प्रत्यय होने से वाग्मी पद बनता है, जिसका अर्थ, युक्तियुक्त तथा परिमित बोलनेवाला ऐसा होता है। अथवा बहुत बोलनेवाला भी जो यथार्थ वक्ता है, उसे वाग्मी कहते हैं। भगवान् का यह वाग्मित्व गुण लोक में प्रत्यक्ष व्याप्त दीखता है, जैसे अपने अभिप्रेतार्थ को प्रकट करने के लिये पशु पक्षी भी युक्त तथा परिमित शब्द करते हैं, पक्षियों की यथार्थ-वादिता को लेकर ही शाकुन शास्त्र का निर्माण लोकोपकार के लिये तत्त्ववेदियों ने किया है। इस विषय की पुष्टि "आवदंस्त्वं शकुने भद्रमावदेत्यादि" तथा भद्रं वद दक्षिणतो भद्रमुत्तरतो वदेत्यादि ऋक्परिशिष्ट मन्त्रों से होती है। वृषभ से या भैंसे से संयोग की इच्छुक गौवें या

स्तनयुर्विद्युत्पातं विज्ञापयति । वर्षाश्चिक्रोषुर्मेघः स्वकेन शब्देन वर्षणं विज्ञापयति । रात्रौ यदि मेघो गर्जति तर्हि तत्र नूनं वर्षणं भवति ।

लोके समुद्रोऽपि महान्तं शब्दं कुर्वन् श्रुतिगोचरतां गतः, ततोऽनु घटीनां दशकानन्तरं 'कलकत्ता' जलेनापूर्णोऽभूद् वर्षदशकात्पूर्वमित्यश्रौषम् । अत एव च वेदोक्तं संगच्छते—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् ।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ॥ (अथर्व १०–८–३३)

वाग्मी=यथायथं वक्ता । यदत्र वाचां बहुत्वेन प्रयोगः, तत् सर्वविधवाग्विषयमधिकृत्य या या वाचो लोक उदीरिता भवन्ति ।

पुरुषस्य वाचि सत्यानृतत्वं च भवति, काम-क्रोध-लोभ-मोहाहंकारवशात्, दोषाणां विकृतेः, विकलांगहेतुना वा, राज्यभयाद्वा, जातिदंडभयाद् वा, अत एव च संगच्छते—

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः ।
प्रणीतिरभ्यावर्तस्व विश्वेभिः सखिभिः सह ॥ (अथर्व–७–१०५–७)

एवं भागवते जगति प्रतिपदं यथार्थपदपर्यायो वाग्मिधर्मो गुणो वा व्यश्नुवानो दृश्यते । तस्यैव वाग्मिनो भगवतो गुणसान्निध्यमिच्छन्तो योगिनो मौनव्रतमाचरन्ति, सिद्धे च मौने मितं भाषन्ते । ते मौनव्रतिनस्तमेव वाग्मिनं सर्वत्रानुपश्यन्तस्तं ध्यायन्ति । वाचः संयमन-फलं भवति वाक्सिद्धिः । तूष्णीं भावेनापि प्रकृतिः सत्यार्थं प्रकटयति,

---

भैंसे भी, अपना मनोगत भाव प्रकट करने के लिये शब्द करती हैं । वर्षुक मेघ भी अपने गर्जन शब्द से वृष्टि का बोधन करता है, रात्री में मेघ के गर्जन से ही प्रतीत होता है कि अब वर्षा हो रही है । अब से दश वर्ष पूर्व मैंने सुना था कि समुद्र में बहुत बड़ा घोष हुआ तथा उसके दश घटिका बाद ही भयङ्कर वृष्टि से कलकत्ता जलमय हो गया । इसी अर्थ को "अपूर्वेणेषिता वाच इत्यदि अथर्व वेद वचन कहता है । यहां वाक् शब्द का बहुवचन में प्रयोग करने से सब विषयक सब वाणियों का बोध होता है ।

पुरुष की वाणी में काम से, क्रोध से, लोभ से, मोह अहङ्कारादि के वश से, दोषों के विकृत होने से, किसी अङ्ग के विकृत होने से, राज के भय से, तथा जाति द्वारा नियत किये हुये किसी प्रकार के दण्ड के भय से, सत्य और मिथ्या का मिश्रण होता है । यह अर्थ "अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वच" इत्यादि अथर्व मन्त्र से सङ्गत होता है । इस प्रकार से भगवान् अन्वर्थक अपने वाग्मित्व रूप नाम गुण से अपने इस विश्व का व्यापन कर रहा है । उस ही भगवान् वाग्मी के गुणों की प्राप्ति के लिये योगिपुरुष मौनव्रत को ग्रहण करते हैं, मौन व्रत के सिद्ध होने पर मितभाषी बनकर भगवान् वाग्मी को ही सर्वत्र देखते हुये उसका ध्यान करते हैं, वाणी के संयमन से वाणी सिद्ध होती है ।

तद्यथा—शीततौ धूम्रपातो यस्मिन् दिने पतति तस्माद्दिनादारभ्याशीत्युत्तरे एकशततमे १८० दिने नूनं मेघा वर्षन्ति। इति दिङ्मात्रमुक्तं विशेषं सुधीभिः स्वयमुन्नेयं जगद् दृष्ट्वा। भवति चात्रास्माकम्—

यथार्थवाचः श्रुतयो वदन्त्यस्तं वाग्मिनं सर्वगतं स्तुवन्ति।
जगत् समस्तं नियतार्थबद्धं तं वाग्मिनं वक्ति यथार्थवाचम् ॥ २७ ॥

नियतार्थबद्धम्=नियतेन-अर्थेन=प्रयोजनेन बद्धम्। यथाविधा वाक् यस्मिन् प्राणिनेऽपेक्ष्यते तथाविधा तस्मै प्रत्ता। स्त्रीपुंसयोश्च वाचि स्वारस्यस्य भेदादियं स्त्रियो वाक्, इयं च पुरुष-वागित्यपि सुखेन भेद प्रकटयति। नियतार्थवाचम्=निष्प्रयोजनं न भाषमाणम्।

मनुष्याः स्वस्या वाचो विविधानुष्ठानैः स्वाद्वीभावायापि प्रयतन्ते, वक्ति च वेदा-'व चस्पतिर्वाचन्नः स्वदतु'। यजुः। ९-१। ११-७। ३०-१।

महेन्द्रः—२६८

इन्द्रः, उणादौ 'ऋज्रेन्द्राग्रवज्र' (२।२८) सूत्रे निपात्यते। इदि परमैश्वर्ये, धातु—र्भौवादिकः। इन्धे इध्यते वा तेजोभिरितीन्द्रः, इन्धे रन् प्रत्ययोऽन्त्यस्य दकारश्च निपात्यते। दशपाद्युणादिः (८-४६)। इन्धे भूतानीति वा, निरुक्ते-१०-८। एक

प्रकृति अपने तूष्णींभाव "मौन" अर्थात् वाणी के बिना भी किसी सत्य अर्थ को प्रकट करती है, जैसे शरद् ऋतु के जिस दिन धूम्रपात (धूमपात) होता है, उसके १८० दिन बाद वर्षा जरूर होती है, हमने उदाहरणों से केवल पथ प्रदर्शन किया है। इस विषय में विशेष कल्पनायें विद्वानों ने स्वयं कर लेनी चाहियें। इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है—

सत्यार्थ प्रतिपादक श्रुतियां, सर्वव्यापक भगवान् वाग्मी की ही सब प्रकार से स्तुति करती हैं, तथा नियत अर्थों से बन्धा हुआ यह समस्त जगत्, उस यथार्थ वक्ता भगवान् वाग्मी को ही पद पद पर व्यक्त कर रहा है। अर्थात् जिस प्राणी में जैसी वाणी की आवश्यकता है, वैसी ही वाणी उसके लिये नियत रूप से प्रदान की है। स्त्री और पुरुष की वाणी उनके बोलने से ही, यह पुरुष वाणी तथा यह स्त्री वाणी है, स्वतः प्रकट हो जाता है। नियतार्थ वाक् का अर्थ, जो बिना प्रयोजन के नहीं बोलता, ऐसा होता है। मनुष्य अपनी वाणी को मधुर बनाने के लिये बहुत प्रकार का यत्न तथा भगवान् से प्रार्थना करते हैं—जैसा कि वेद वचन है, "वाचस्पति-र्वाचन्नः स्वदतु" यजुः।

महेन्द्रः—२६८

इन्द्र शब्द 'इदि परमैश्वर्ये' इस भ्वादिगण पठित धातु से "ऋज्रेन्द्राग्रवज्र" इत्याद्युणादि सूत्र से रन् प्रत्यय करने से सिद्ध होता है। अथवा 'इन्धी दीप्तौ' इस रुधादि गण पठित धातु से रन् प्रत्यय का निपातन करने से सिद्ध होता है। इस प्रकार से परमेश्वर भाव जिसे प्राप्त है, अथवा तेजों के द्वारा जो प्रकाशमान है, उसका नाम इन्द्र है। अथवा अपने तेज से जो भवन-धर्मक भूतों को दीप्त करता है, उसे इन्द्र कहते हैं। निरुक्त १०।८। निरुक्त ७।४। में एक ही आत्मा

एव आत्मा बहुधा स्तूयते, निरुक्ते-७-४।। महाँश्चासाविन्द्रो महेन्द्रः।। स सूर्यं इन्द्रो भूत्वा मध्यत अन्तरिक्षेण तपति।

मन्त्रलिंगं च—

स वरुणः सायमग्निर्भवति, स सविता भूत्वा अन्तरिक्षेण याति।
स इन्द्रो भूत्वा तपति मध्यतो दिवम्।। (अथर्व १३-२-१३।)

अत्र भूगोले यो या यद् वा यत्र तिष्ठति, स ता तद् वा स्वके शिरस्यागतं सूर्यं मध्ये तपन्तं मन्यते, एवं स एक एव सूर्यः सर्वदैवान्तरिक्षस्य मध्यममध्यासीनः सर्वत्र व्यापकमिवात्मानं विद्योतयति, तथैवायं सूर्याणामपि सूर्यो महेन्द्रो भगवान् विष्णुर्दिग्-देश-कालादिभिर्विभागं नाप्नोतीति कृत्वा महेन्द्र उक्तो भवति।

भवति चात्रास्माकम्—

इन्द्रो ह सूर्यो य उ मध्यतो दिवं गोले स्वकात् पश्यति मध्यतो जगत्।
महेन्द्र-नामा भगवान् स वर्धनो विश्वं जगत् पश्यति मध्यतः स्थितः ॥२८॥

चतुर्थे चरणे जगच्छब्दो द्वितीयान्तः। वर्धन इति विष्णोर्नाम।

अपरप्रकारेण च—इन्द्रो राजा, मन्त्रलिगं च—इन्द्रो राजा जगतश्चर्षणीनाम्, ईश्वराणामपि य ईश्वरः स महेन्द्र इति।

भवति चात्रास्माकम्—

की बहुत प्रकार से स्तुति की गई है। महान्=बड़े इन्द्र का नाम महेन्द्र है। सूर्य ही अन्तरिक्ष के मध्य में प्रकाशमान होता हुआ इन्द्र रूप है, इस अर्थ का प्रतिपादक स वरुण सायमग्निर्भवति स सविता भूत्वा अन्तरिक्षेण यातीत्यादि अथर्व १३।२।१३ वेद मन्त्र है, इस भूगोल पर विद्यमान पुरुष स्त्री वा और सब ही प्रकार के प्राणी अपने शरीर पर आये हुये सूर्य को आकाश के मध्य में स्थित समझते हैं। तथा वह एक ही सूर्य सर्वदा आकाश के मध्य में स्थित अपने सर्वव्यापक आत्मा को=अपने आप को व्यक्त कर रहा है, इसी प्रकार सूर्य का भी सूर्य=प्रकाश देनेवाला, दिग्देशकालादि परिच्छेद से रहित भगवान् सर्वव्यापक विष्णु अपनी महेन्द्रता को सर्वत्र स्पष्ट व्यक्त कर रहा है। इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—

सूर्य ही अन्तरिक्ष के मध्य भाग में स्थित इन्द्र रूप है, जिस खगोल के मध्य में स्थित इन्द्र रूप सूर्य को यह सकल जगत् देखता है, या वह सकल जगत् को देखता है, उसी प्रकार महेन्द्र नामा भगवान् विष्णु सकल जगत् में व्यापक होकर उस सम्पूर्ण दृश्य वर्ग को प्रतिक्षण देखता है। चतुर्थ चरण में जगत् शब्द द्वितीया का एक वचनान्त है। अन्य प्रकार से भी इसका व्याख्यान होता है, जैसे कि—इन्द्र नाम ऐश्वर्यशाली राजमान या लोकप्रसिद्ध राजा का है, जैसा कि "इन्द्रो राजा जगतश्चर्षणीनाम्" इस वेद मन्त्र से सिद्ध होता है। इन्द्र=ईश्वर तथा ईश्वरों का भी जो ईश्वर है उसका नाम महेन्द्र है।

इस भाव का प्रकाशन, भाष्यकार द्वारा इस प्रकार किया गया है—

विभ्राजमानस्य गुणेन लोके, सर्वस्य मूलं स महेन्द्र एकः ।
विश्वं समस्तं स समश्नुवानो यथायथं शास्ति च विश्वमात्रम् ।।२८।।
समश्नुवानः=समेकीभावेन सर्वत्र प्राप्नुवन् ।

वसुदः—२६९

वसु ददातीति वसुदः । वसु-शब्दो व्याख्यातः १०४ चतुरुत्तरैकशततमे नाम-व्याख्याने ।

अत्र जगति यस्य यावदायुष्प्रमाणमस्ति, तं तावदायुष्प्रमाणं जीवयितुं तस्मै तदर्होपकरणभूतानां साधनानां दाता सन् "वसुद" उक्तो भवति । लोकेऽपि च पश्यामः—जायमानः शिशुः स्वकेन जन्मना साकमेव मातुः स्तनयोर्दुग्धोत्पत्ति—लक्षणानि प्रादुर्भावयति । एषा हि भागवतो व्यवस्था जीवनाय तदर्होपकरणानि सर्वकस्मै ददात्येव । एवं लोक-दर्शनेन वसुदो भगवान् सर्वत्र व्यश्नुवानोऽनुभूयते, प्रत्यक्षतश्च दृश्यते । मन्त्रलिंगं च—

सायं सायं गृहपतिर्नो अग्ने प्रातः प्रातः सौमनसस्य दाता ।
वसोर्वसोर्वसुदान एधि वयं त्वेन्धानास्तन्वं पुषेम ।। अथर्व–१९–५५–३
प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दाता ।
वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतं हिमा ऋधेम ।। अथर्व–१९–५५–४

प्रत्येकप्राणिशरीररचनां दृष्ट्वेदं निश्चीयते यत् वासयितुं आच्छादयितुम-

---

इस लोक में अपने गुणों के द्वारा प्रकाशमान प्रत्येक पदार्थ का मूल "उद्गम स्थान" वह एक महेन्द्र ही है तथा महेन्द्र नामा भगवान् विष्णु इस समस्त विश्व में व्याप्त होकर इसका यथानियम शासन कर रहा है । समश्नुवानः=सब को एकीभावरूप से प्राप्त करता हुआ ।

वसुदः—२६९

वसु शब्द का व्याख्यान १०४ नाम के व्याख्यान में किया गया है, वसु देनेवाले का नाम 'वसुद' है । वस्तुतः वसु नाम जीवन के साधनभूत उपकरण (सामग्री) का है । जिस जीव की आयु का जितना प्रमाण है, उसको उतनी आयु तक सुख से जीने के लिये तदुपयुक्त उपकरणों को देनेवाले का नाम 'वसुद' है । लोक में भी हम देखते हैं—उत्पद्यमान बच्चे के, जन्म के साथ ही उसकी माता के स्तनों में दुग्धपान के साधनभूत चिन्ह तथा दुग्ध उत्पन्न हो जाता है । यह भगवान् का शाश्वत नियम है, इसके अनुसार प्रत्येक जीव को, उसके जीवन के साधनभूत उपकरण उसके जन्म के साथ ही उसे दे देता है, तथा उसका यह वसुदत्व गुण जगत् में सर्वत्र व्याप्त है यह प्रत्यक्ष देखने में आता है । इस अर्थ की पुष्टि इन वेद मन्त्रों 'सायं सायं गृहपतिर्नो अग्ने प्रातः प्रातः सौमनसस्य दातेत्यादि' तथा 'प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दातेत्यादि' अथर्व १९।५५।३;१९।५५.४ से होती है । प्रत्येक प्राणी की शरीर रचना को देखने से यह निश्चय होता है कि प्रत्येक प्राणी के आच्छादनानुकूल उपकरण भिन्न

हाण्युपकरणानि सर्वकस्यैव पृथक् पृथक् सन्ति, एवमेव स्थावरवृक्ष-क्षुप-गुल्म-लतादि-ष्वपि दृश्यते।

भवतश्चात्रास्माकम्—

सृष्ट्वा जगद्विष्णुरनेकरूपं पृथक् पृथक् साधनवद्विधत्ते।
लोके प्रसिद्धो "वसुदः" स एव, स एव सूर्यः स उ चाग्निरुक्तः ॥३०॥
यो वस्त्र-दाता य उ चान्न-दाता यो वास्ति भूमेरुत तोयदाता।
ज्ञानस्य दाता किमु धैर्यदाता स्वयं निमग्नो वसुदोऽस्ति तेषु ॥३१॥

'वस्त्रदाते'त्यादिषु सम्बन्धषष्ठ्या समासः। निमग्नः=अन्तर्हितः, अन्तः—स्थितो वा।

वसुः—२७०

वसु-शब्दो व्युत्पादितचरश्चतुरुत्तरैकशततमे १०४ नामव्याख्याने, तत्र द्रष्टव्यम्। वसुरूपेण गुणेन व्याप्तिमता भगवता सर्वमिदं जगद् व्याप्तमस्ति,

मन्त्रलिंगं च—

ईशा वास्यमिदं सर्वं यत्किंच जगत्यां जगत् यजुः—४०-१

वसु=धनम् तत्र—

देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥ यजुः—१—१६,
वसोष्पते निरमय मय्येवास्तु मयि श्रुतम् ॥ अथर्व – १-१-४
वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः। स्याम ते सुमतावपि । ऋग् ८-४४-२४

भिन्न हैं, ऐसा ही सब लता, छोटे पौदे गेहूं आदि क्षुप, वृक्ष, झाड़ी आदि गुल्मों में भी देखा जाता है। भाष्यकार का अपने पद्य द्वारा भावप्रकाशन इस प्रकार है—

इस अनेक रूप विश्व की सृष्टि करके स्वयं भगवान् विष्णु इसको जीवनपर्यन्त जीवनोपयोगी साधनों से युक्त करता है, इसलिये वह ही लोक में सूर्य, अग्नि, तथा वसुद नाम से प्रसिद्ध है।

इस लोक में जो कोई भी, वस्त्रों का दान करनेवाले, अन्न दान करनेवाले, भूमि का दान करनेवाले जल दान करनेवाले, ज्ञान देनेवाले तथा धैर्य दिलानेवाले महापुरुष हैं, उन सबमें भगवान् वसुद नामा विष्णु अन्तर्हित है, अर्थात् भगवान् विष्णु ही सबमें स्थित होकर सब कुछ दे रहा है। वस्त्र दाता आदि में सम्बन्ध षष्ठी होने से समास हो गया है।

वसुः—२७०

वसु शब्द का व्युत्पादन १०४ के नाम व्याख्यान में किया जा चुका है वसुत्व रूप गुण युक्त भगवान विष्णु के द्वारा यह सम्पूर्ण विश्व व्याप्त है, इसमें 'ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्' यह यजुः ४० १ मन्त्र प्रमाण है। वसु नाम धन का भी है इस अर्थ में 'तत्र देवो वः सविता हिरण्यपाणि' इत्यादि यजुः १।१६ मन्त्र प्रमाण है। और भी 'वसोष्पते निरमय मय्येवास्तु मयि श्रुतम्' अथर्व १ १।४ वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः। स्याम ते सुमतावपि ॥

न हि ते शूर राधसोऽन्तं विन्दामि सत्रा।
दशस्या नो मघवन् नू चिदद्रिवो धियो वाजेभिराविथ ॥ऋग् ८-४६-११
इति दिङ्मात्रम् न्यस्तम्।

भवति चात्रास्माकम्—

वसुः स्वयं विष्णुरजां निबध्नन् वसौ च रूपं स्वकमाततान।
लोकेऽर्थ्यतेऽतो वसुमान् वसुर्वा जगच्च मन्ये वसुनास्ति गुप्तम् ॥३२॥

अजां=प्रकृतिं निबध्नन्=जगद्रूपेण प्रचारयन्, वसौ=धने वसुमान्—धनवान्, वसुर्वा=धनं वा, वसुना विष्णुना, गुप्तम्=रक्षितम्।

नैकरूपः—२७१

न निषेधार्थीयः। एकशब्दः संख्यावचनः। त्रिपदो बहुव्रीहिः, न एकं रूपमस्येति नैकरूपः। रूपशब्दो 'रु शब्दे' इत्यादादिकाद्धातोः "खष्पशिल्पशष्पबाष्परूपतर्पतल्पाः" इत्युणादि (३।२८) सूत्रेण प—प्रत्यये रोरुकारस्य दीर्घे च सिध्यति। अथवा 'रूप रूपक्रियाया'मिति चौरादिकण्यन्तधातोः पप्रत्ययः पकारलोपो गुणाभावश्च निपात्यते, रूपयति रूप्यते वा रूपम्—चक्षुर्विषयः सौन्दर्यमाकृतिर्वा। तथा च वेदवचनं "नक्षत्राणि रूपम्" (यजु०—३१)॥ नक्षत्रमण्डलञ्च न समानसंख्यक—

८।४४।२४ तथा 'न हि ते शूर राधसोऽन्तं विन्दामीत्यादि' ऋक् ८।४६।११ मन्त्र प्रमाण हैं। यह मार्ग प्रदर्शन मात्र किया है।

भाष्यकार इस भाव को संक्षेप से अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

वसुनामा भगवान् स्वयं जगत् रूप से प्रकृति का विस्तार करता हुआ वसु रूप धन में अपने आपको अन्तर्हित 'व्याप्त' कर देता है, इसलिये लोक में सब ही वसु की प्राप्ति के लिये वसुस्वरूप वसुमान् की प्रार्थना करते हैं, तथा यह सकल जगत् वसु से ही गुप्त=रक्षित है, यह मेरा मत शास्त्रसम्मत है। वसुना=विष्णु के द्वारा। अजा नाम प्रकृति का है, उसका जगत् रूप से विस्तार ही निबन्धन है।

नैकरूपः—२७१

रूप शब्द रू शब्दार्थक इस अदादिगण पठित धातु से "खष्पशिल्पशष्पबाष्परूपतर्पतल्पाः" इस उणादि सूत्र ३।२८। से 'प' प्रत्यय तथा दीर्घ का निपातन करने से सिद्ध होता है। अथवा 'रूप रूप क्रियायाम्" इस चुरादिगण पठित ण्यन्त धातु से 'प' प्रत्यय पकार का लोप तथा गुणाभाव का निपातन करने से बन जाता है। रूप शब्द में कर्ता या कर्म में प्रत्यय करने से इसका अर्थ, जो प्रकाशित करता है अथवा जो प्रकाशित किया जाता है ऐसा होता है। नैकरूप शब्द में नञ् के साथ बहुव्रीहि समास होने से जिसका एक रूप नहीं है, अर्थात् जिसके नाना प्रकार के रूप हैं ऐसा अर्थ नैकरूप शब्द का होता है। तथा वह रूप, सौन्दर्य, अथवा आकार, चक्षु इन्द्रिय का विषय, रूप शब्द का वाच्यार्थ है। इस रूप शब्द के प्रामाण्य में "नक्षत्राणि रूपम्" यह यजुः ३१। वेद वचन प्रमाण है। नक्षत्र मण्डलों में तारों की संख्या

तारकं यथा—अश्विनीनक्षत्रमण्डले तिस्रस्तारका भवन्ति, भरणीनक्षत्रमण्डलेऽपि तिस्रः, कृत्तिकामण्डले षट्, तथा रोहिणीनक्षत्रमण्डले पञ्चेत्यादि ज्योतिः—शास्त्रतः स्पष्टं ज्ञेयम्। समिद्धदीप्तयः सप्त ग्रहा अपि गत्या रूपेण च भिन्नाः, चन्द्रसूर्यौ च प्रतिमासं द्वादशसु राशिसु भ्रमन्तौ पृथक् पृथक् शीतोष्णे दत्तः। स्थावरजङ्गमसृष्टिश्च स्त्रीपुरुषसंयोगेन भवति। भवति चात्रास्माकम्—

आब्रह्मकीटान्तमिदं निबद्धं, पुंस्त्रीप्रयोगेण जगत् समस्तम्।
पृथक् स शुक्रं स पृथग्रजो वा, भिनत्ति भुक्तैकरसश्च सत्त्वम् ॥३३॥

मनुष्यशरीरेऽप्यङ्गानां नैकरूपता, अर्थात् नानाविधरूपा युग्मता दृश्यते, नैकरूपरूपस्य भगवतो गुणस्य सर्वत्र वर्तमानत्वात्। एवमितरेष्वपि प्राणिषु नैकरूपता, किन्तु तत्रापि तस्याः पृथग्विधता व्यवस्थिता, यथा कपालास्थ्नां विन्यासः पृथग्विधः, पर्शुकास्थ्नां विन्यासः पृथग्विधः, ग्रीवाकशेरुकाणां, पृष्ठकशेरुकाणां, कटिकशेरुकाणाञ्च विन्यासः पृथक् पृथग्विध इति।

प्रतिहस्तं पञ्चाप्यङ्गुल्यो रूपेणाकारेण च भिन्ना भिन्नाः। यदि ता अङ्गुल्यः कथञ्चित् केनचित् साधनेन सङ्कोच्यैकतामानीयेरन् तदा सर्वाङ्गुलीविनाशः स्यात्। तत्र भगवतो नैकरूपतारूपस्य धर्मस्य लोपात्।

समान नहीं होती जैसे अश्विनी नक्षत्र मण्डल में ३ तीन तारायें, भरणी में तीन, कृत्तिका में ६ तथा रोहिणी में पाञ्च ५ होती हैं, इसी प्रकार और नक्षत्र मण्डलों में भी ताराओं की संख्या भिन्न भिन्न होती है, यह सब ज्योतिःशास्त्र से जानना चाहिये। उत्कृष्ट दीप्ति वाले सप्त ग्रह भौमादि भी गति और रूप से भिन्न भिन्न हैं, तथा प्रतिमास भिन्न भिन्न राशियों में सङ्क्रमण करते हुये चन्द्र सूर्य गति या रूप भेद से भिन्न भिन्न शीत या उष्णता देते हैं।

विश्व में स्थावर जङ्गम=जड़चेतन की उत्पत्ति स्त्रीपुरुष संयोग से होती है।

भाष्यकार इस भाव को अपने पद्य द्वारा इस प्रकार प्रकट करता है—

ब्रह्मा से लेकर लघु कीट पर्यन्त इस समस्त जगत् की उत्पत्ति, स्त्री तथा पुरुष के परस्पर सम्बन्ध से होती है, तथा भक्षण किया हुआ एक ही रस, शुक्र, रज, तथा सत्त्व, अर्थात् भिन्न भिन्न प्रकार से बीज रूप में परिणत हो जाता है, यह ही इसकी अनेक रूपता है। मनुष्यों के शरीर में भी प्रत्येक अङ्ग एक रूप में न होकर युग्म रूप अथवा स्थान भेद से नाना रूप हैं। क्योंकि नैकरूप भगवान् का यह नैकरूपत्व गुण सर्वत्र वर्तमान है। इसी प्रकार दूसरे प्राणियों में भी अङ्गों की नाना रूपता व्यवस्थित है, जैसे—कपाल की हड्डियों की रचना सब की भिन्न भिन्न प्रकार की है, पर्शुक जो स्कन्ध के ऊपर भाग की हड्डियां हैं, उनकी रचना भिन्न भिन्न प्रकार की है, तथा ग्रीवा कशेरु, पीठ के कशेरु कटि के कशेरुओं की भी रचना सब भिन्न भिन्न है। प्रत्येक हस्त में पाञ्चों अङ्गुलियां रूप तथा आकार से भिन्न भिन्न हैं, यदि उन अङ्गुलियों को कोई किसी रज्ज्वादि साधन विशेष से संकुचित करके एक रूप में ले आये तो उसका फल सकल अंगुलियों का विनाश रूप ही होगा, क्योंकि ऐसा करने से वहां भगवान् के नैकरूपत्व रूप धर्म का लोप हो जाता है। आत्मा मन और इन्द्रियार्थों के संयोग का नाम

आत्ममनोऽर्थानां संयोगो जीवनं, तेषां पृथक्करणञ्च मृत्युः। संयोगो वियोगतां नीतो नेष्टं साधयति, वियोगश्चैकतां नीतो नेष्टं साधयति। एवं शरीराङ्गसन्धयो जीवं जीवयन्ति विश्लिष्टाश्च ते मारयन्ति। भगवान् विष्णुर्नैकरूपतामाश्रितो विश्वं सृजति। दृश्यते च वेदे—

"इन्द्रो मायाभिः पुरुरूप ईयते" ऋक्।

भगवतो या विविधा विकल्पना सा माया, तया ताभिर्वा मायाभिः स पुरुरूपः=बहुरूप इत्यवगम्यते। मायाशब्दो ज्ञापनलिङ्गर्योऽपि। सर्वमेतन्मायाशब्दनिरूपणं 'महामाय'नाम्नि विहितम्।

भवति चात्रास्माकम्—

स नैकरूपो भगवान् वरेण्यो, विश्वं सृजन्नैकविधं विधत्ते।
यो नैकरूपं तमु हृद्गुहास्थः, पश्यञ्जगत् पश्यति वीक्षते सः ॥३४॥

बृहद्रूपः—२७२

बृहन्महद् रूपमस्येति बृहद्रूपः। मन्त्रलिंगं च—

यस्य भूमिः प्रमान्तरिक्षमथोदरम्।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ ३२ ॥
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ ३३ ॥

ही जीवन है। तथा उनका वियोग ही मृत्यु है। संयोग के वियुक्त होने पर जैसे इष्टसिद्धि नहीं होती, वैसे ही वियोग के संयुक्त होने पर भी इष्ट की सिद्धि नहीं होती। शरीर के अङ्ग संश्लिष्ट जीव को जिलाते हैं, तथा वे विश्लिष्ट होकर इस जीव को मार देते हैं।

भगवान् के इस नैकत्व रूप से ही विश्व की सृष्टि होती है। यह वेद मन्त्र से भी प्रतिपादित है जैसे—'इन्द्रो मायाभिः पुरुरूप ईयते" ऋक्। भगवान् का नानाभवनरूप सङ्कल्प ही माया का रूप है, इस माया के द्वारा ही उस के पुरुरूपत्व=बहुरूपत्व का ज्ञान होता है। ज्ञापन के लिङ्ग=चिन्ह विशेष का नाम भी माया है। माया शब्द का निरूपण "महामाय" नाम के व्याख्यान में किया गया है। इसका संक्षिप्त भाव भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

सब के वरेण्य=प्रार्थनीय भगवान् नैकरूप अपने स्वरूपानुसार इस विश्व को भी नैकरूप ही बनाता है। इसलिये जो मनुष्य, हृदयरूप गुफा में विराजमान भगवान् नैकरूप विष्णु, तथा भगवद् गुण से व्याप्त होने से नैकरूप जगत् को देखता है, वह ही वास्तविक द्रष्टा है।

बृहद्रूपः—२७२

बहुत बड़ा रूप=आकार जिसका है, उसका नाम है बृहद्रूप। यह नामार्थ "यस्य भूमिः प्रमान्तरिक्षमथोदरम्। दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व १०-७-३२ यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः। — — तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व-१०।७।३३ यस्य

यस्य वातः प्राणापानौ चक्षुरंगिरसोऽभवन् ।
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥३४॥
स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दाधारोर्वन्तरिक्षम् ।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कम्भ इदं विश्वं भुवनमा विवेश ॥३५॥
(अथर्व १०-७)

एतेन मन्त्रनिदर्शनेन ज्ञायते यत् सूर्यादीनां तेजस्विनामपि धारको कश्चिदन्य एव, तमेव विश्वं व्यश्नुवान भगवन्तं विष्णुं महद्रूपतामुपगतं वेदोऽनुगायति ।

भवति चात्रास्माकम्—

यो रूपतां विश्वमियर्ति नित्यं यो वा च गर्भे तमु आदधाति ।
रूपेण विश्वं बृहता स विष्णुर्जगद् दधद् रूपमयं विधत्ते ॥ ३५ ॥

इयर्त्ति,=प्रापयति । तं=विश्वम् । रूपमयं=दर्शनविषयम् । सामान्यतो विश्वमिदं पांचभौतिकं पंचभिरेवेन्द्रियैर्ज्ञातुमर्हं भवति । तत्र प्रत्यक्षस्य प्राधान्यादिदमुक्तं भवति 'रूपमयं विधत्ते' इति ।

शिपिविष्टः— २७३

शिपयो बालरश्मयः । तैर्बालकिरणैराविष्टो बालसूर्यः शिपिविष्ट उच्यते, यथा हि भूगोल उदीयमानसूर्यः सर्वैः पूज्यते प्रीयते नमस्कारेण च योज्यते । सर्वत्र च गोले सर्वस्मिन् काल एव च सूर्य उदीयमानावस्थां प्राप्नुवन्नास्ते तथैवायं भगवान्

वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन् ।——तस्मै ज्येष्ठाय ब्रह्मणे नमः । तथा "स्कम्भो दाधा द्यावापृथिवी उभे इमे स्कम्भो दाधारोर्वन्तरिक्षम् । स्कम्भो दाधार प्रदिशः षडुर्वी, स्कम्भ इदं विश्वं भुवनमाविवेश । अथर्व-१०।७।३२-३५। इत्यादि मन्त्रों से प्रमाणित है। तथा इन मंत्रों से प्रतीत होता है कि, सूर्यादि तेजस्वी पदार्थों का भी स्कम्भ=धारण करने वाला कोई और है, और उसी बृहद्रूप सर्वव्यापक भगवान् विष्णु का वेद गान करता है। इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—जो भगवान् बृहद्रूप, इस विश्व को रूप से सम्पन्न करके अपने ही बृहद्रूप में धारण करता है, तथा रूप के द्वारा इस समस्त विश्व को दर्शन का विषय बनाता है, वह अपने बृहद् रूप से सकल विश्व में व्याप्त है।

यद्यपि इस विश्व का जो कि पाञ्चभौतिक दृश्यवर्ग है, सामान्य से सब ही ज्ञानेन्द्रियों से प्रत्यक्ष होता है, तथापि इस बृहद्रूपत्व के प्रत्यक्ष में चक्षुर्जन्य प्रत्यक्ष के प्रधान होने से "रूपमय" दर्शन का विषय बनाता है ऐसा कहा है।

शिपिविष्टः—२७३

शिपि नाम बालरश्मियों का है, उन बाल किरणों से आविष्ट=व्याप्त उदीयमान बालसूर्य शिपिविष्ट नाम का वाच्यार्थ है, जैसे इस भूलोक में उदय होते हुये सूर्य को सब पूजते तथा नमस्कार करते हैं, तथा समस्त ब्रह्माण्ड में सब समय में सूर्य उदीयमानावस्थ ही रहता है।

विष्णुः प्रतिक्षणं चतुर्विधसृष्टिं नवनवां समुद्भावयन्नात्मनः शिपिविष्टाख्यगुणेन विश्वं व्याप्नुवन्नास्ते, अत एव च बालैर्भगवान् स्वकेन शिपिविष्टत्वगुणेन बाल-मुखात् सत्यं निर्विकल्पं च वाचयति।

मन्त्रलिंगं च—

किमित्ते विष्णो परिचक्ष्यं भूत् प्र यद् ववक्षे शिपिविष्टो अस्मि।
मा वर्पो अस्मदप गूह एतद् यदन्यरूपः समिथे बभूथ॥ (ऋग् ७-१००-६)

भवति चात्रास्माकम्—

उदीयमानः प्रपलं पतंगो गोले जनानां समुपेति दृष्टिम्।
विष्णुः स्वयं वै शिपिविष्ट-नामा जगद् विधत्ते शिपिविष्टरूपम्॥ ३६॥

पशवो वा पिशयस्त एव शिपयस्तेषु विविधरूपेण वर्तमानेन पशुना-दृश्यरूपेण द्रष्टृरूपेण च जगता स्वकस्थो भगवान् वरेण्यः शिपिविष्टरूपेण प्रपदं व्यज्यत इति यज्ञो वै विष्णुः, पशवः पिशिर्यज्ञ एव पशुषु प्रतितिष्ठति। (तै० सं० १-७-४)

भवति चात्रास्माकम्—

पशुर्जगत् पश्यतिमात्रहेतोर्विष्णुर्विशन् ख्यापयते तनूं स्वाम्।
अतोऽस्ति लोके शिपिविष्ट उक्तो नमन्ति तं वीक्ष्य जना जगत्याम्॥३७॥

प्रपलं=प्रतिपलम्, पतंगः=सूर्यः, गोले=ख—गोले, जगत्याम्=विश्वे।

उसी प्रकार भगवान् विष्णु, स्वस्वरूपभूत इस चतुर्विध सृष्टि को प्रतिक्षण अपने शिपिविष्टत्व गुण से व्याप्त होकर नवीन नवीन बनाता रहता है, तथा इस सर्वत्र व्याप्त अपने गुण से ही बालकों से निष्पक्ष निर्विकल्प तथा सत्य उच्चारण करवाता है। इस अर्थ की पुष्टि "किमित्ते विष्णो परिचक्ष्यं भूत् प्र यद् ववक्षे शिपिविष्टो अस्मि" इत्यादि ७।१००।६ ऋग्वेद मन्त्र से होती है।

इस भाव को भाष्यकार संक्षेप से इस प्रकार व्यक्त करता है- जैसे खगोल में प्रतिक्षण उदय होता हुआ सूर्य जनों के दृष्टिगोचर होता है, इसी प्रकार शिपिविष्ट नामा भगवान् विष्णु नित्य प्रतिक्षण उदीयमान इस चतुर्विध सर्ग का निर्माण करता है।

अथवा शिपि नाम पशुओं का है, तथा पश्यतिधर्मक दृश्य दर्शक रूप यह जगत् ही पशु शब्द से उपलक्षित है, इस में व्याप्त भगवान् विष्णु ही शिपिविष्ट है, यह ही भाव "यज्ञो वै विष्णुः पशवः पिशिर्यज्ञ एव पशुषु प्रतितिष्ठतीति" तै सं० १.७।४। से स्पष्ट होता है।

इस भाव को भाष्यकार इस प्रकार स्पष्ट करता है—

दृश्य दर्शक रूप धर्मक होने से पशु नाम जगत् का है तथा भगवान् विष्णु इस जगत् में व्यापक होकर रहता है इसलिये उसका नाम शिपिविष्ट है, इस जगत् में सर्वत्र प्रसृत "फैले हुये उसे देखकर महापुरुष उसे नमस्कार करते हैं।

प्रकाशनः—२७४

प्र-उपसर्गः, काशृ दीप्तौ भौवादिकः, तस्मात् णिच्, तस्मात् बाहुलकात् कर्त्तरि 'युच्' प्रत्ययः। प्रकाशयतीति प्रकाशनः। स प्रकाशन-नामा भगवान् विष्णुः सूर्यादीनां तेजसामपि प्रकाशकः सन् प्रकाशन उक्तो भवति। प्रकाशरूपगुणेन सर्वं व्यश्नुवानः सन् प्रकाशन उक्तो भवति। लोकेऽपि च पश्याम—पार्थिवं शरीरं धरन् जीवात्मा स्वकेन प्रकाशधर्मेण चक्षुरादीनि पञ्चेन्द्रियाणि तथा तेषां पञ्चार्थान् प्रकाशयति, व्यपगते जीवे न चक्षुःप्रभृतीनीन्द्रियाणि स्वविषयादानाय प्रबुध्यन्ते, प्रकाशन्ते, रुचिमादधति। मन्त्रलिंगं च—

सूर्य आत्मा जगतस्तस्थुषश्च।

सूर्यो ह्यत्र विश्वात्मा विष्णुः, अन्तरात्मा वा सूर्यः पार्थिवस्य शरीरस्य प्रकाशकत्वात्। भवति चात्रास्माकम्—

प्रकाशनो विश्वमिदं समस्तं प्रकाशयन् सर्व-जगद् बिभर्ति।
स्वयं प्रकाशः स उ सर्ववन्द्यस्तेजांसि सर्वाणि च तं नमन्ति ॥ ३८॥

तेजांसि, तेजोगुणवन्ति, सर्वं जगत्=सर्वजगत्, तत्, यद् वा—प्रकाशन्ते सर्वं एव ग्रहा तेन करणभूतेन तस्मात् स विष्णुः प्रकाशन उक्तो भवति।

भवतश्चात्रास्माकम्—

प्रकाशनः—२७४

प्र उपसर्ग है, तथा दीप्त्यर्थक भ्वादिगण पठित काशृ धातु है, ण्यन्त में कर्ता अर्थ में बाहुलक से ल्यु या ल्युट् प्रत्यय करने से प्रकाशन शब्द सिद्ध हो जाता है, भगवान् विष्णु का नाम है क्योंकि वह जगत् के प्रकाशक सूर्यादि तेजस्वी पदार्थों का भी प्रकाशक है, इसलिये वह प्रकाशन है। उसका यह प्रकाशन रूप गुण सर्वत्र व्याप्त है, लोकों में भी हम देखते हैं—जीवात्मा इस पार्थिव शरीर में स्थित पञ्च ज्ञानेन्द्रिय तथा उनके विषय रूप अर्थों को प्रकाशित करता है, तथा उसी जीव के निकल जाने पर वह ही चक्षु आदि इन्द्रिय अपने विषयों के ग्रहण करने में समर्थ नहीं होती, प्रकाशित नहीं होती, अथवा विषयों का प्रकाश करने का जो रुचि रूप धर्म है, उसे छोड़ देती हैं। इस अर्थ की पुष्टि "सूर्य आत्मा जगतस्तस्थुषश्चेति वेद मन्त्र से होती है। अन्तरात्मरूप सूर्य ही इस पार्थिव शरीर को प्रकाशित करता है, तथा विश्वात्मा भगवान् विष्णु सूर्य सहित इस समस्त विश्व को प्रकाशित करता है। इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

प्रकाशन नाम भगवान् विष्णु का है, क्योंकि वह स्वयम्प्रकाशस्वरूप तथा सब का वन्दनीय, इस समस्त जगत् को प्रकाशित करता हुआ इसे धारण करता है, तथा सब ही ज्योतिःस्वरूप पदार्थ उसे प्रणाम करते हैं।

अथवा उस प्रकाशन नाम भगवान् की प्रेरणा से ही सब ग्रह प्रकाशित होते हैं, इसलिये भी उसका नाम प्रकाशन है।

इस भाव को भाष्यकार यों व्यक्त करता है—

प्रकाशते दीप्तिमतः प्रदीप्त्या सूर्यः शशाङ्कोऽपि तथा तथैव ।
प्रकाशनं तं प्रणमन्ति सर्वे ग्रहाः समस्ताः स्वविकारयुक्ताः ॥ ३९ ॥

स्वविकारयुक्ताः—स्वेन विकारेण च युक्ताः, चक्षुः सूर्यस्य विकार इत्यादिः ।

ओजस्तेजोद्युतिधरः—२७५

ओजः—उब्ज आर्जवे तौदादिः । उब्जेर्बले ब-लोपश्च, (दशपाद्युणादिः-९-५२) उब्जेर्धातोरसुन् प्रत्ययो भवति बले गम्यमाने ब-लोपश्च भवति, उब्जतीति-ओजो बलम् ।

तेजः—तिज निशाने भौवादिकः, असुन् (दश-पाद्युणादिः-९-४९) तितिक्षत इति तेजः-दीप्तिः ।

द्युतिः-द्यु अभिगमने आदादिकः, 'स्त्रियां क्तिन्' द्युतिः, । ओजश्च तेजश्च द्युतिश्च ओजस्तेजोद्युतयः, तासां धर ओजस्तेजोद्युतिधरः, द्वन्द्वान्ते श्रूयमाणं पद प्रत्येकमभिसम्बध्यत इति, तेन—ओजोधरः, तेजोधरः, द्युतिधर इति च विगृहीतं भवति । द्युतिरभिगतिः, आभिमुख्येन गमनम्, यथा सूर्यादयो ग्रहा राशेराशिमभिक्रामन्ति तथैवायं देहाभिमानी-आत्मा देहाद्देहान्तरमतिक्रामति, जीवोऽपि द्युतिधर उक्तो भवति । भगवता विश्वमिदं—ओजसा तेजसा द्युत्या च धृतमास्ते तथैवायं जीवोऽपि स्वके देहे ओजः, तेजः, द्युतिं च धारयन् जीवितुं क्षमते । ओजस्तेजोद्युतिधरेण विष्णुना विश्वमिदं ओजसा तेजसा द्युत्या च धृतमास्ते । मन्त्रलिंगं च—

उस प्रकाशमान प्रकाशन के प्रकाश से यह सूर्य चन्द्र अपने चक्षु आदि विकारों सहित तथा सविकार अन्य ग्रहगण और जगत् प्रकाशित होकर, उस प्रकाशन को प्रणाम करता है ।

ओजस्तेजोद्युतिधरः—२७५

ओज नाम बल का है, यह ओज शब्द आर्जवार्थक तुदादिगण पठित उब्ज धातु से "उब्जेर्बले बलोपश्चे"ति, दशपाद्युणादि ९-५२ सूत्र से असुन प्रत्यय तथा बकार लोप होने से बनता है, बल के प्रतीयमान होने पर । तेज—तिज, इस तीक्ष्णीकरणार्थक भ्वादिगण पठित धातु से दशपाद्युणादि ९-४९ सूत्र से असुन् प्रत्यय करने से बनता है दीप्ति का नाम है ।

द्युति—अभिगमनार्थक अदादिगण पठित 'द्यु' धातु से स्त्री विशिष्ट भाव में, क्तिन् प्रत्यय करने से बनता है, जिसका अर्थ सामने जाना, अथवा सब ओर जाना है, अर्थात् जो जहां पर स्थित है, वहां ही उसकी ओर जाना द्युति का अर्थ है । धर=धारण करनेवाला, यह द्वन्द्वान्त पद है इसलिये इसका ओज, तेज, द्युति, इन सब के साथ सम्बन्ध होगा, इस प्रकार से ओज तेज तथा द्युति को धारण करने वाला यह ओजस्तेजोद्युतिधर इस नाम का अर्थ हुआ ।

एक राशि से अपर राशि में सङ्क्रमण करने से, तथा एक शरीर से अपर शरीर में सङ्क्रमण करने से, ग्रह और जीवात्मा का नाम भी द्युतिधर हो जाता है । ओज, तेज तथा द्युति के द्वारा भगवान् इस विश्व को धारण किये हुये है, इसी प्रकार यह जीवात्मा भी तेज, ओज, तथा द्युति के द्वारा ही आत्मधारण "जीने" में समर्थ होता है । ओजस्तेजोद्युतिधर

ओजोऽस्योजो मयि धेहि, तेजोऽसि तेजो मयि धेहि (यजुः १९-९)
द्युमां असि क्रतुमां इन्द्र धीरः (ऋग् १-६२-१२)

भवति चात्रास्माकम्—

ओजस्तेजोद्युतिधरस्तथा व्याप्य जगत् स्थितः।
यथा जीवो वपुर्नित्यं व्याप्नोत्योजोभिरान्तकम् ॥ ४० ॥

आ अन्तकम्=आन्तकम्, यावन्मृत्युरिति। यद्यपि शरीरौजसादयो गुणाः पार्थिवास्तथापि जीवापाये ते गुणा न कार्यक्षमा भवन्तीति कृत्वोक्तं भवति—व्याप्नोत्योजोभिरिति।

प्रकाशात्मा—२७६

प्रकाशो दीप्तिः, आत्मा शब्दः स्वरूपपर्यायः, प्रकाश एव आत्मा स्वरूपं यस्य स प्रकाशात्मा विष्णुः। मन्त्रलिंगं च—

शुद्धमपापविद्धम् (यजुः ४०) *तमसः परस्तात्* (यजुः ३०)

यथायं भगवान् सूर्यः स्वयं प्रकाशस्वरूपः सन् विश्वमिदं प्रकाशयति तथैवायं प्रकाशात्मा भगवान् विष्णुः सकलं तैजसं जगत् प्रकाशयति, लोकेऽपि च पश्यामः प्रकाशस्वरूप आत्मा शरीरेन्द्रियाणि प्रकाशयति, तैः प्रकाशमाप्तैरिन्द्रियैर्युक्तं वपुरपि

भगवान् विष्णु अपने तेज ओज तथा द्युति रूप गुणों से इस विश्व में व्याप्त हो रहा है। इस नामार्थ में यह "ओजोऽस्योजो मयि धेहि तेजोऽसि तेजो मयि धेहि" यजुः १९-९ तथा "द्युमां असि क्रतुमां इन्द्र धीरः" ऋग् १-६२-१२ मन्त्र प्रमाण हैं। इस भाव को भाष्यकार संक्षेप से इस प्रकार व्यक्त करता है—

जैसे जीवात्मा अपने तेज, बल, तथा द्युति के द्वारा अन्तिमसमय=मृत्यु तक इस शरीर को धारण किये रहता है, उसी प्रकार यह ओजस्तेजोद्युतिधर नामा भगवान् विष्णु भी अपने तेज, बल, तथा द्युति=कान्ति से इस सकल विश्व को धारण किये हुये है, । यद्यपि सब शरीर सम्बन्धी ओज आदि गुण पार्थिव हैं, तथापि जीव के निकल जाने पर वे इस शरीर के सञ्चालन तथा किसी प्रकार के भी कार्य करने में असमर्थ होते हैं, इस ही अभिप्राय से तेज आदि से जीवात्मा शरीर को धारण किये हुये है, ऐसा कहा है।

प्रकाशात्मा—२७६ प्रकाशस्वरूप

प्रकाश यह दीप्ति का नाम है, आत्मा शब्द स्वरूप का वाचक, है प्रकाश है स्वरूप जिसका उसको कहते हैं प्रकाशात्मा भगवान् विष्णु का नाम है। इस भगवन्नाम की पुष्टि में "शुद्धमपापविद्धम्" यजु ४० तथा "तमसः परस्तात्" इत्यादि ३० यजुर्वेद के वचन प्रमाण हैं।

जैसे भगवान् सूर्य समस्त विश्व को प्रकाशित करते हैं, उसी प्रकार भगवान् प्रकाशात्मा इस सूर्यादि तैजस वर्ग को प्रकाशित करता है। लोक में भी देखने में आता है यह जीवात्मा शरीरेन्द्रियों को प्रकाशित करता है और उस प्रकाश को प्राप्त हुई इन्द्रियों से युक्त शरीर को

प्रकाशात्मोक्तं भवति, प्रकाशोऽस्मिन् आत्मनि-अस्तीति प्रकाशात्मा, आत्मात्र विग्रहवाचकः।

यद्वा-प्रकाशेन साकं नित्यमतति गच्छतीति, प्रकाशात्मा सूर्यः, सूर्य-प्रकाशे जगत् नित्यं अतति गच्छतीति, प्रकाशात्मा जगदुक्तं भवति, अमुथैव भगवद् व्यवस्थात्मके यथानियत-ज्ञानात्मके प्रकाशे जगदतति प्रलयोदयौ लभत इति कृत्वा प्रकाशात्मा जगदप्युक्तं भवति। एवं विविधा विकल्पनाः 'प्रकाशात्म'नाम्नो विश्वे वैविध्यविज्ञानायैव प्रदर्शिता भवन्ति।

भवति चात्रास्माकम्—

प्रकाशकानामपि योऽन्तरात्मा स्वयं स्वरूपेण च यः प्रकाशः।
विश्वस्य सर्वस्य गतौ रतस्य प्रकाशभूतः स उ चाऽऽत्मभूतः ॥४१॥

प्रकाशकानाम्=सूर्यादीनां तैजसाम्।

प्रतापनः—२७७

तप संतापे भौवादिकः, तस्माण्णिच्, तस्मात् 'ण्यासश्रन्थो युच्' (पा० ३-२-१२४) इत्यनेन बाहुलकात् कर्तरि युच् प्रत्ययः, प्र उपसर्गः प्रकर्षे। प्रतापयतीति प्रतापनो विष्णुः सूर्यादीनपि तापयति, गर्भस्थमपि स-जीवं पिण्डं मातृगर्भाशयोष्मणा तापयति, भूमिस्थं बीजं च भूमेरूष्मणा तापयति। तस्य भगवतोऽभीद्धतपस ऋतं, सत्यं चोत्पन्ने,

---

प्रकाशात्मा कहते हैं, यद्वा प्रकाश जिस आत्मा में है, उसका नाम है प्रकाशात्मा, यहां आत्मा शब्द शरीर का वाचक है। यद्वा जो नित्य प्रकाश के साथ ही चलता है, उसका नाम प्रकाशात्मा है यह सूर्य का नाम है। यद्वा सूर्य के प्रकाश में नित्य चलनेवाले जगत् का नाम प्रकाशात्मा है। इसी प्रकार भगवान् के व्यवस्थापक रूप यथाप्राणी नियतिकृत ज्ञान में सम्पूर्ण जगत् घूम रहा है, अर्थात् प्रलय और उत्पत्ति को प्राप्त हो रहा है, इसलिये भी जगत् का नाम प्रकाशात्मा है। विश्व में विविध प्रकार के विज्ञान यद्वा प्रकाशात्मा नाम की महार्थता को दिखलाने के लिये विविध कल्पनायें की हैं। भाष्यकार का अपने पद्य द्वारा संक्षेप से भावप्रकाशन इस प्रकार है—

जो स्वयं स्वरूप से प्रकाशस्वरूप तथा प्रकाशकरूप सूर्यादिकों का भी अन्तर्यामिरूप से स्थित होकर प्रकाशियता और इस जड़ चेतन रूप सकल विश्व के प्रकाश तथा आत्मरूप होने से भगवान् का प्रकाशात्मा नाम है।

प्रतापनः—२७७ प्रकृष्ट ताप=सन्ताप देनेवाला।

भ्वादिगण पठित सन्तापार्थक ण्यन्त तप धातु से "ण्यासश्रन्थो युच्" ३।२।१२४। पा० इस सूत्र से बाहुलक से कर्ता में युच् प्रत्यय तथा यु को अनादेश होने से तापन शब्द सिद्ध होता है प्र उपसर्ग लगने से प्रतापन शब्द बन जाता है, 'जिस का प्रतप्त करनेवाला' ऐसा अर्थ होता है। प्रतापन नाम भगवान् विष्णु का है, क्योंकि वह जगत् के प्रताप=सन्ताप देनेवाले सूर्य आदि ग्रहों को भी तपाता है, गर्भस्थ जीव पिण्ड को माता के गर्भाशय की गर्मी से तपाता है, तथा भूमि में स्थित बीज भूमि की गर्मी से तपाता है। भगवान् के जाज्वल्यमान तपोरूप ताप से ही, यह ऋत=अरूप वायु तथा आकाश, तथा सत्य=सरूप अग्नि जल पृथिवीरूप जगत्

मन्त्रलिंगं च—

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत (ऋग्)

अतः स विष्णुस्तापन उक्तो भवति।

भवति चात्रास्माकम्—

प्रतापनो विष्णुरनन्तरूपः प्रतापभेदैश्च जगत् समस्तम्।
प्रतापयन् सौति[1] शुभाप्तये[2]ऽदस् तपस्विनं स्वीकुरुते च विद्या ॥४२॥

आप्तविद्या=आप्ता प्राप्ता विद्या ज्ञानम्। प्रतापभेदैः=सूर्यप्रतापः, अग्निप्रतापः, गर्भप्रतापः, भूमिप्रतापः, कालप्रतापः, पित्तदोषप्रतापः, कर्मपरिपाकः, इत्येवमादिः। सूर्योऽपि प्रतापन उक्तो भवति, सर्वं जगत् तापयतीति कृत्वा।

१ सौति=अभ्यनुजानाति २ शुभाप्तये=शुभप्राप्तये

ऋद्धः—२७८

ऋधु वृद्धौ, दैवादिकः सौवादिकश्च। ऋद्धः वृद्धः, पूर्णः इत्यर्थः। सर्वकमेव लोके स्वकेन करणभूतेन साधनेन पूर्णमिति कृत्वा ऋद्ध-रूपो भगवान् विष्णुः सर्वं व्यश्नुवान आस्ते। तद्यथा मानुषं वपुः सर्वक्रियाक्षमं सत् ऋद्ध-नामानं भगवन्तं विष्णुं प्रपदं व्याचष्टे, अमुथैव मनुष्योऽपि स्वकानि यन्त्राणि निर्मिमाणस्तद्यन्त्रं ऋद्धं सुचारुरूपेण क्रियाक्षमं कर्तुं प्रयतते, यो य एवं प्रयत्नगुणः स तस्यैव ऋद्ध इति नामतो व्याप्तस्यानुकरणमात्रमेव। मन्त्रलिंगं च—

आत् ऋध्नोति हविष्कृतम् ऋग्–१·१८·८

उत्पन्न हुआ इस भावार्थ की पुष्टि "ऋतञ्च सत्यञ्चाभीद्धात्तपसो अध्यजायत" इत्यादि ऋग्वेद मन्त्र से होती है।

इस भावार्थ को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है—

प्रतापन यह भगवान् विष्णु का नाम है, क्योंकि वह अनन्तरूप परमात्मा विविध प्रकार के तापों ऊष्माओं से उस सकल जगत् को तपाता हुआ इसको शुभ प्राप्ति के लिये अभ्यनुज्ञा या प्रेरणा देता है, तथा विद्या देवी भी तपस्वी का ही वरण करती है, अर्थात् विद्या की प्राप्ति भी तपस्वी को ही होती है।

ऋद्धः—२७८

स्वाभाविक ज्ञान बल क्रियाओं से सम्पन्न। दिवादि तथा स्वादिगण पठित वृद्ध्यर्थक ऋधु धातु से कर्ता अर्थ में क्त प्रत्यय करने से ऋद्ध पद सिद्ध होता है पूर्ण या सम्पन्न अर्थ का वाचक ऋद्ध शब्द है। भगवान् ऋद्ध की व्याप्ति से यह सकल जगत् ही अपने अपने उपभोग साधनभूत कारणों से सम्पन्न है, या पूर्ण है। जैसे मनुष्य का शरीर सर्व क्रिया सम्पन्न होने से, भगवान् ऋद्ध का पद पद पर व्याख्यान कर रहा है। जैसे मनुष्य अपने किसी यन्त्र का आविष्कार करके उसे पूर्ण बनाने की अर्थात् क्रियाक्षम बनाने की कोशिश करता है। पूर्ण करने का गुण जो प्रयत्न रूप है, वह सर्वव्यापक परमात्मा का व्याख्यान मात्र है। इसी भाव की यह "आत् ऋध्नोति हविष्कृतम्" १।१८।८। ऋङ् मन्त्र पुष्टि करता है।

भवति चात्रास्माकम्—

ऋद्धः स्वयं स भगवान् वरेण्यो विश्वं समग्रं कुरुते ह वृद्धम्।
ऋध्नोति चार्थ्यान् बहुधार्थिनः स काया तमृद्धं प्रपदं विचष्टे ॥४३॥

काया=सर्वप्राणिनां काया, अर्थ्यान्=लब्धुमर्हान्, अर्थिनः=याचकान् यत्तूक्तं-'ऋध्नोति चार्थ्यान् बहुधार्थिनः सः' तत्र मन्त्रलिंगं च यथा—

प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दाता।
वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतं हिमा ऋधेम ॥
अथर्व–१६।५५।४

स्पष्टाक्षरः—२७६

स्पश बन्धने, भौवादिकः, स्पष्टो बद्धः। अक्षरं नक्षर नक्षत्रं वा, बद्धं नक्षत्रैर्जगत् येन, स स्पष्टाक्षरो भगवान् विष्णुः सर्वं नक्षत्रैर्बद्धं जगत् नयति। यावदायुष्प्रमाणं यस्य; तद्यथा—मानुषे शरीरेऽस्थिबन्धनानि न नश्यन्ति, यावदायुष्प्रमाण, अमुथैव सर्वस्मिन् शरीरे यथाशरीरभोगाय कृतान्यस्थिबन्धनानि न नश्यन्ति यावदायुष्प्रमाणं तस्य जीवस्य, मांसमयैः स्नायुभिस्तानि निबद्धानि सन्ति, एवं स्पष्टाक्षरत्वगुणो

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है—

वह सब का वरेण्य सर्वश्रेष्ठ प्रार्थनीय भगवान् ऋद्ध इस समग्र विश्व को अपने स्वभावानुसार ऋद्ध ही बनाता है, तथा अर्थिवर्ग के मनोरथों को वह ही पूर्ण करता है, और यह ही मनुष्य शरीर पद पद पर उसी का व्याख्यान कर रहा है।

पद्य में जो अर्थियों के मनोरथों को पूर्ण करता है, ऐसा कहा है उस में यह—"प्रातर्गृहपतिर्नो———शतं हिमा ऋधेम" इत्यादि १६।५५।४ अथर्व वेद मन्त्र प्रमाण है।

स्पष्टाक्षरः—२७६

बन्धनार्थक भ्वादिगणपठित स्पृश धातु से क्त प्रत्यय करने पर इडभाव के निपातन से स्पष्ट शब्द सिद्ध होता है। अक्षर शब्द का अर्थ, जो अक्षर=नष्ट न होवें आप्रलय स्थायी नक्षत्रादि हैं। इस प्रकार से स्पष्ट=बांध रखा है परस्पर नक्षत्र मण्डल यद्वा नक्षत्रों के द्वारा जगत् जिसने, उसका नाम हुआ स्पष्टाक्षर, यह भगवान् विष्णु का नाम है। स्पष्टाक्षर नामा भगवान् विष्णु ही परस्पर एक एक से बद्ध नक्षत्रों तथा नक्षत्रों से नियन्त्रित परस्पराङ्गोपाङ्गों से विबद्ध इस विश्व को व्यवस्था से चला रहा है जितनी जिसकी आयु है वहां तक। जैसे मनुष्य शरीर की आयु तक उसकी हड्डियां नष्ट नहीं होती। इसी प्रकार सब ही प्राणी शरीरों में जीवों के उपभोग से सम्बद्ध आयु तक उन शरीरों की अस्थियां (हड्डियां) नष्ट नहीं होती क्योंकि वे परस्पर मांसमय स्नायु (तन्तुओं) से बन्धी हुई होती हैं। इस प्रकार स्पष्टाक्षर

भगवतो विष्णोः स्पष्टाक्षरेति नामवतः स्पष्टाक्षरत्वं सर्वत्र व्याप्तं दृश्यते। अमुथैव—वीरुध-वृक्ष-गुल्म-लतादिष्वपि योजनीयं भवति।

अक्षरधर्मकानि नक्षत्राणि यावदायुष्प्रमाणमस्य कल्पस्य तावन्निबद्धानि कल्पमेनदग्रे नयन्ति, ग्रहा अपि नियतमार्गचलनेन निबद्धा एव जगद् भावाभावौ नयन्ति, प्रपदं संख्यातुमनर्हाणि नक्षत्राणि तमेव स्पष्टाक्षरं सर्वव्यापकं विष्णुं गायन्ति।

मन्त्रलिंगं च—

यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु।
प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु॥

अथर्व १९-८-१ इत्येवमादि।

भवति चात्रास्माकम्—

स्पष्टाक्षरो विष्णुरसंख्य-मेषु नद्ध्वा ग्रहान् नह्यति विश्वमेतत्[1]।
स्पष्ट्रा निबद्धं जगदात्ममानं नयन् जगन् नह्यति विश्वमात्रम्॥ ४४॥

भ-शब्दो लग्न-राशि-ग्रह-नक्षत्राणां च वाचकः प्रयुक्तो भवति। जगदात्ममानं=जगदायुरिति। विश्वमात्रम्—निःशेषमिति। वर्णपर्यायकोऽक्षरशब्दः कविनाम्नि व्याकृतः।

१-विश्वमेतत्=चतुर्भेदविभक्तं जगत्।

मन्त्रः—२८०

मन ज्ञाने दैवादिकः, मनु अवबोधने तौदादिकः। आभ्यां सर्वधातुभ्यः ष्ट्रन् उणादिः—१५९, मन्यते मनुते-अनेनेति मन्त्रः, जगति यज्ज्ञानं प्रसृतं वर्त्तते तस्य

नामवाले भगवान् विष्णु का स्पष्टाक्षरत्वरूप गुण सकल विश्व में व्याप्त हुआ दृष्टिगोचर होता है। इसी प्रकार से लता वृक्ष गुल्म=झाड़ी आदि में भी योजना कर लेनी चाहिये। परस्पर निबद्ध नक्षत्र, कल्प को कल्प की आयुपर्यन्त आगे को चला रहे हैं, तथा सूर्यादि ग्रह भी नियत मार्ग गति से बन्धे हुए ही इस जगत् के भाव या अभाव के हेतु होते हैं। गणना में न आने वाले असंख्य नक्षत्र, उस ही सर्वव्यापक स्पष्टाक्षर नामवाले भगवान् का पद पद पर गान कर रहे हैं इस भावार्थ में "यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु। प्रकल्पयंश्चन्द्रमा यान्येति" इत्यादि १९।८।१। अथर्व वेद प्रमाण है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है।

भगवान् विष्णु का नाम स्पष्टाक्षर है, क्योंकि वह इस समस्त विश्व को असंख्य ग्रह नक्षत्र आदि में बांध कर चला रहा है। तथा उस स्पष्टाक्षर से बन्धा हुआ यह जगत् निःशेष अर्थात् सब को अपने से बांधकर अपनी आयु तक चला रहा है।

मन्त्रः—२८०

जिस से जाना जाये, ज्ञान का साधन। ज्ञानार्थक दिवादिगणपठित मन यद्वा तुदादिगणपठित मनु धातु से "सर्वधातुभ्यः ष्ट्रन्" इस उणादि सूत्र से ष्ट्रन् प्रत्यय करने से मन्त्र शब्द सिद्ध

ज्ञानस्य प्रवर्त्तनं येन भवति स विष्णुर्मन्त्रः, ज्ञानस्य साधनीभूता ऋचो अपि मन्त्र-शब्दवाच्या भवन्ति. मन्त्र-नामायं भगवान् विष्णुः स्वकृते विश्वे प्रतिपदं ज्ञानेनानुस्यूतं सर्वं गमयति. तद्यथा—यस्मिन् देशे, यस्मिन् काले, यथाविधप्रक्रियया यदुद्भवति, तत्तथैव कल्पान्तं यावदुद्भविष्यति । सूक्ष्मपरिज्ञानाय वेदस्य सृष्ट्युत्पत्ति-क्रमज्ञानमवश्यं कर्त्तव्यं भवति । वेदोक्तसिद्धान्ताश्चाविचलाः सन्ति, तद्यथा—"गावो घृतस्य मातरः" अथर्व ६-९-३ गावो धेनवो घृतस्य मातरो जनन्यः सन्ति । महिष्या-दीनां घृतं सदोषत्वान्नाहतम् ।

अपरं च यथा—संभूतिं च विनाशं च यस्तद् वेदोभयं सह । विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते ।। यजुः ४० । विनाशो निर्यातः, विक्रयो वा, मृत्युः नैत्यिको विषमीभावः, सम्भूतिः=निर्माणं, अमृतं यावदायुष्प्रमाण-जीवनाय समर्थीभावः । आकल्पमनश्वरोऽयं सिद्धान्तः ।। अपरं यथा—दशमे मासि सूतवे अथर्व ५-२५-१०।११ नवमासानामान्तर्येण सर्वराशीनां प्रादुर्भावः, मेषाख्यो राशिः स्वकात् नवोत्तरं जनयति, स राशिश्च मकरः, मकरो नवान्तरायोत्तरमुत्पादयति, स च राशिस्तुलास्थानीया, तुला च स्वकान्नवोत्तरं दशमं कर्क—राशिं जनयति, कर्कश्च स्वकान्नवान्तरायोत्तरं मेषाख्यं राशिं जनयति, अमुथैव २-११-८-५ इत्यस्मिन् वर्गे योज्यं, अमुथैव च ३-१२-९-६ इत्यस्मिन् वर्गे योजनीयम् । इति दिङ्मात्रमुक्तम् ।

होता है । जिसके द्वारा जाना जाये, उसका नाम मन्त्र है । यह भगवान् विष्णु का नाम है, क्योंकि जगती में जो ज्ञान का प्रसार (फैलाव) है, उस ज्ञान का प्रसार विष्णु के ही द्वारा होता है, इसलिये विष्णु का नाम मन्त्र है । ज्ञान की साधनभूत ऋचाओं का नाम भी मन्त्र है, मन्त्रनामा भगवान् विष्णु ही अपने इस समस्त विश्व को ज्ञान से ओत प्रोत करके चला रहा है । जैसे कि जो वस्तु जिस देश में जिस काल में जिस विधि से उत्पन्न हुई या हो रही है, वह आगे कल्पान्त पर्यन्त इसी प्रकार होती रहेगी । सूक्ष्म ज्ञान के लिये वेद के सृष्ट्युत्पत्तिक्रम का ज्ञान अवश्य होना चाहिये । वेद के सिद्धान्त अविचल=स्थायी हैं, अर्थात् उन में किसी प्रकार का परिवर्तन नहीं किया जा सकता, जैसे "गावो घृतस्य मातरः" यह अथर्ववेद का वचन है, गाय पशु घृत के उत्पादन में साधनीभूत है। भैंस आदि का घृत विकारी होने से ही अनाहत है, अयज्ञीय है । इसी प्रकार "सम्भूतिञ्च विनाशञ्च विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते" इस अ० ४० यजुर्वेद के मन्त्र में विनाश नाम निर्यात=व्यय तथा विक्रय का है । मृत्यु नाम नित्य होने वाले विषम भाव का है । सम्भूति नाम बनने या बनाने का है, तथा अमृत नाम जीवन शक्ति या जीने में समर्थ होने का है । यह यावत्कल्प वेद का स्थायी सिद्धान्त है । इसी प्रकार "दशमे मासि सूतवे" इत्यादि वेदसिद्धान्तानुसार नव नव मासों के आन्तर्य से सब राशियों का प्रादुर्भाव होता है, जैसे मेष राशि अपने से नव बाद की दशवीं मकर राशि को पैदा करती है । मकर राशि अपने से नवोत्तर दशमी तुला राशि को उत्पन्न करती है तुला अपने से नवव्यवहित कर्क राशि को उत्पन्न करती है तथा कर्क अपने से नवान्तरित मेष राशि को पैदा करती है । यह ही जनन-क्रम २-११-८-५ । तथा ३।१२।९।६ वें वर्ग का समझ लेना चाहिये । यह हमने केवल पथप्रदर्शन करवाया है । मनुष्य का सिद्धान्त या

मनुष्यसिद्धान्तितं ज्ञानं नैकान्ततोऽवितथं भवति, अत एव च सिद्धान्तितं वेदे—अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः । प्रणीतिरभ्यावर्तस्व विश्वेभिः सखिभिः सह ॥ अथर्व ७-१०५-१ मन्त्रः समानं भवति "ज्ञ" इत्यनेन । मन्त्रेण विष्णुना सर्वमिदं विश्वं ज्ञानेन नियतीकृतमास्ते, तस्माद् यो यस्य ज्ञानं मन्त्रं तत्त्वं वेद स तस्य विष्णुं व्याप्तं गुप्तं तत्त्वं वेद, एवं विविधमूहनीयं भवति ।

भवति चात्रास्माकम्—

ज्ञानात्मना विश्वमिदं समस्तं मन्त्रेण गुप्तं तदु याति कल्पम् ।
यो वेद मन्त्रं स उ वेद विश्वं मन्त्रेण गुप्तेन समूढमेतत् ॥ ४५ ॥

मन्त्रेण गुप्तम्=विष्णुना गुप्तम् रक्षितम् । मन्त्रेण विष्णुना गुप्तेनान्तःस्यूतेन समूढं सर्वतो निबद्धमिव व्याप्तमस्ति ।

चन्द्रांशुः—२८१

चन्द्र-शब्दो हि चदि आह्लादे दीप्तौ च भौवादिकः, तस्मात् रक् प्रत्ययः, स्फायितंचिवंचि०-इत्युणादि १, १३ सूत्रेण, चन्दति, आह्लादयति, हर्षयति, दीपयतीति वा चन्द्रः, सोमः, रात्रिपतिर्वा ।

अंशुः—अंश विभाजने चौरादिकः, तस्मात् मृगय्वादित्वात् कुः प्रत्ययः, बाहुलकाद् वा उः प्रत्ययः ।

निश्चित किया हुआ ज्ञान अव्यभिचारी सत्य नहीं होता, इसीलिये वेद का सिद्धान्त "अपक्रामन् पौरुषेयादित्यादि अथर्व ७।१०५।१ मन्त्र से सिद्ध होता । है मन्त्र और ज्ञ शब्द दोनों ही समानार्थक हैं । मन्त्र नामक भगवान् विष्णु ने ही यह विश्व ज्ञान से व्याप्त कर कर रक्खा है इसलिये जो जिसके ज्ञानरूप मन्त्र=तत्त्व को जानता है, वह उसमें व्याप्त तथा गुप्त मन्त्ररूप विष्णु तत्त्व को जानता है ।

इस भाव को भाष्यकार अपने पद्य से यों व्यक्त करता है—

ज्ञानरूप विष्णु से रक्षित यह समस्त विश्व कल्पों तक चलता रहता है, जो मन्त्र को जानता है वह ही विश्व को जानता है, अपने अन्तः अनुस्यूत मन्त्ररूप विष्णु से यह सकल विश्व बन्धा हुआ है ।

चन्द्रांशुः—२८१

आह्लादक तथा विभाजक । आह्लादक=आनन्दनार्थक तथा दीप्त्यर्थक भ्वादिगणपठित चदि धातु से "स्फायितञ्चिवञ्चीत्यादि उणादि १,१३ सूत्र से रक् प्रत्यय होने से चन्द्र शब्द सिद्ध होता है । जो आनन्दित या प्रकाशित करता है, या स्वयं आनन्द स्वरूप वा प्रकाशस्वरूप है, उसका नाम चन्द्र है ।

विभाजनार्थक चुरादिगण पठित अंश धातु से मृगय्वादि लक्षण कु प्रत्यय, यद्वा बाहुलक से उ प्रत्यय करने से अंशु शब्द सिद्ध होता है ।

अंशूङ् व्याप्तौ संघाते च, अश भोजने च, अस्मात् बाहुलकादौणादिक उ-प्रत्ययो नुमागमश्च।

अन प्राणने, अस्मात् उ-प्रत्ययः शुगागमश्च।

अम गतौ, धातोः-उ-प्रत्ययः शकारागमश्च, एवं विविधधातुकल्पनया अंशु-शब्दः साध्यते।

अत्र भाष्ये स्मर्तव्यं सर्वत्र च योजनीयं यत् बहूनर्थान् विज्ञापयितुं बहूनां धातूनां किं वा कस्यचिद्धातुविशेषस्य कल्पना सम्भाविनोऽर्थस्य किञ्चिन् निमित्त-मधिकृत्य शब्द-व्युत्पत्तिः क्रियते, तेन-अन्वाख्यानानि वैविध्यमापद्यन्ते। उक्तं च—

अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु।
बहूनां सम्भवेऽर्थानां निमित्तं किंचिदिष्यते॥ वाक्यपदीये २-१७१

चन्द्रांशुशब्दस्य धातुभेदादिमेऽर्थाः सम्पद्यन्ते—आह्लादते विभजतीति च, आह्लादते व्याप्नोति च, आह्लादते संघातयति च, आह्लादते अश्नाति च, आह्लादते प्राणिति च, आह्लादते अमति गच्छति च, योजना त्वेवं-भगवत आह्लादन-विभजनो-भयरूपधर्मः पुष्पे, तत्र पुष्पपत्राणि हर्षकराणि विभजनवन्ति च भवन्ति, प्रतिप्राण्यं-गानि विभजनवन्ति सन्त्यपि प्राणिनं प्रति तस्य क्रियायां साधकानि सन्ति प्राणिनो

यद्वा व्याप्त्यर्थक तथा संघातार्थक स्वादिगण पठित अशूङ् क्र्यादिगणपठित भोजनार्थक अश धातु से वा बाहुलक से उ प्रत्यय और नुम् का आगम करने से अंशु शब्द बनता है।

यद्वा प्राणनार्थक अन् धातु से उ प्रत्यय और शुक् का आगम करने से अंशु शब्द सिद्ध होता है।

यद्वा अम इस गत्यर्थक धातु से उ प्रत्यय तथा शकार का आगम होने से यह अंशु शब्द सिद्ध होता है।

इस हमारे भाष्य में, यह बात ध्यान में रखनी चाहिये, और यत्र तत्र स्थलों में उसकी योजना करनी चाहिये कि, एक नाम से बहुविध अर्थों का बोध करवाने के लिये, बहुत से या किसी एक धातु विशेष की कल्पना करनी पड़ती है, क्योंकि किसी निमित्त विशेष से ही सम्भवी- योग्य अर्थ को प्रकट करने के लिये शब्द की व्युत्पत्ति की जाती है। इसलिये शब्द का व्याख्यान बहुत प्रकार से किया जा सकता है। जैसा कि वाक्यपदीय २। १७१। में कहा है "अन्वाख्यानानि भिद्यन्ते" इत्यादि। चन्द्रांशु शब्द के धातु भेद से ये अर्थ होते हैं जैसे—इस विश्व को विविधरूपों में विभक्त करता हुआ आनन्दित होता है तथा आनन्दित होकर सब में व्याप्त है, आनन्द का अनुभव करता हुआ सब का संघात (योग) तथा अशन--संहार करता है। जो आनन्द स्वरूप सबको प्राणन शक्ति देता हुआ सर्वगत है। इस प्रकार चन्द्रांशु शब्द का अर्थ सम्पन्न होता है। इस अर्थ की योजना इस प्रकार करनी चाहिये जैसे—पुष्प में भगवान् के आनन्दरूप विकास तथा विभाग ये दोनों ही स्वरूपभूत धर्म विद्यमान हैं। क्योंकि विभक्त हुये कमलपत्रों के दर्शन से सबको आनन्द होता है। प्रत्येक प्राणी के अंग विभक्त होते हुये सबके कार्यों के साधक तथा हर्ष जनक होते हैं जैसे कि —

हर्षं, आह्लादं च जनयन्ति, तद्यथा—द्वे जघे. द्वे भुजे, विंशतिश्चांगुलयः, पृथक् पृथक् चेन्द्रियद्वाराणि, वामनत्वाद् अर्थाद् विविधज्ञानमयत्वात् तस्य विष्णोरिति। एवं चन्द्रांशुरूपेण भगवान् विष्णुः सर्वं व्याप्नुवन्नात्मना प्रकाशतेतराम्। यथा नियन्ता स्वकया व्यवस्थयाऽऽत्मानं दीपयति, व्याप्नोति च तथैव भगवान् विष्णुः स्वके शासितव्ये जगति स्वकां व्यवस्थां व्यवस्थापयन् प्रतिवस्तु चन्दते दीपयति प्रकाशयति वा।

आह्लादते संघातयतीति च यदुक्तं तत्र-लोके पश्यामः स्थानान्तरं प्रतिष्ठासुर्मनुष्यः स्वकानि विकीर्णानि साधनानि संघातयति. अमुथैवायं भगवान् सर्वं व्यश्नुवानो विष्णुः प्रतिपदं लोकान् संघातयति यथा मृत्युः प्रतिपदम्मनुष्यान् निगृह्णाति।

यदुक्तं—आह्लादते-अश्नाति च, यथा लोके पश्यामः—परिवारे बाला युवानो वृद्धा वा पृथक् पृथग् व्यंजनेन भुंजाना आह्लादमनुभवन्ति, तथैवायं नानाविधान् प्राणिने शाक-फल-मूलान् नानाविधानन्नांश्च समुद्भावयति. तेनैतेन कर्मणा चन्द्रांशुत्वं तस्य सर्वत्र व्याप्तं दृश्यते।

यत्तूक्तं—आह्लादते प्राणिति च, अत्र भूगोले विचित्रचित्रचित्रितासु परिस्थितिषु तिष्ठन् प्राणी सहर्षं जीवति, जीवनाय वा कृतमोहो दृश्यते। अमुथैव भगवान् चन्द्रांशुर्विष्णुः प्रतिप्राणि हृदयाकाशे विराजमानस्तं तं प्राणिनं हर्षयति, जीवयति, भोगैर्योजयति च।

दो जांघे दो भुजायें २० बीस अंगुलियां तथा भगवान् विष्णु के वामन स्वरूप अर्थात् विविधज्ञानमय=विविध ज्ञानरूप होने से भिन्न-भिन्न इन्द्रियद्वार। इस प्रकार चन्द्रांशु रूप से सब में व्याप्त हुआ भगवान् विष्णु स्वयं सर्वत्र प्रकाशमान हो रहा है जैसे कोई नियामक अपनी व्यवस्था से अपने को प्रकाशित करता हुआ अपने अविकृत स्थल में व्याप्त रूप से रहता है। इसी प्रकार भगवान् विष्णु अपने शासितव्य इस जगत् की प्रत्येक वस्तु को व्यवस्थित करता हुआ उसमें विकसित अथवा प्रकाशित हो रहा है।

जो ऊपर कहा है कि, भगवान् आनन्द का अनुभव करता हुआ सबका संघात अर्थात् योग (समूह) करता है, इसको उदाहरण रूप में इस प्रकार समझना चाहिये, जैसे—

हम लोक में देखते हैं, कोई मनुष्य एक स्थान से दूसरे स्थान में जाता हुआ अपने सब विकीर्ण (बिखरी) हुई सब वस्तुओं का संघात अर्थात् उन्हें इकट्ठा कर लेता है। उसी प्रकार सब में व्याप्त भगवान् विष्णु मरण समय पर सबका संघात अर्थात् संहार (निग्रह) कर लेता है।

आनन्द का अनुभव करता हुआ अशन (भक्षण) करता है, इस अर्थ का लौकिक उदाहरण इस प्रकार समझना चाहिये जैसे लोक में एक परिवार में बालक, युवा तथा वृद्ध पृथक् पृथक् विविध शाक आदि से भोजन करते हुये आनन्द का अनुभव करते हैं, तथा उस परिवार का सञ्चालक स्वयं आनन्दित होता है, उसी प्रकार भगवान् नाना प्रकार के शाक, फल, मूल तथा बहुविध अन्न प्राणियों के लिये उत्पन्न करता है। इस प्रकार के कर्म से उस भगवान् चन्द्रांशु की सार्वत्रिक व्याप्ति प्रकट होती है। और जो पहले कह आये हैं, आनन्द स्वरूप वह सब को

यत्तूक्तं—आह्लादते अमतीति-तत्र-प्रतिपदं लोके पश्यामः सर्वक एव विश्वे गति कुर्वन्नेव प्रसादयत्यात्ममनसी, एवं चन्द्रांशुत्वं तस्य विष्णोः सर्वत्र व्यश्नुवद् दृश्यते। एवं सम्भवेऽर्थेऽर्थं व्यञ्जयितुं निमित्तमन्वेष्टव्यं भवत्येवेति। य एवं लोकं पश्यति जानाति वा स मन्त्रमिमं साक्षात् कुरुते—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥

दृश्यमानचन्द्रकिरणा इव सर्वजगदाह्लादको वा विष्णुश्चन्द्रांशुरुक्तो भवति। मन्त्रलिंगं च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः ॥

भवति चात्रास्माकम्—

चन्द्रांशुराह्लादयते समस्तं चन्द्रांशुरन्तः करणानि यौति।
चन्द्रांशुमन्तर्विततं ह लोके पश्यन्ति कर्माणि च तस्य विज्ञाः ॥४६॥

विज्ञाः=विविधज्ञानविज्ञाननिष्ठाः, लोकमर्मज्ञा इत्यर्थः।
यौति=विविध-भावाभावाय च मिश्रयति, वियुनक्ति वा।

प्राणन (जीवन) शक्ति देता है, इस को भी लौकिक उदाहरण से सिद्ध किया जाता है जैसे कि इस भूगोल में विचित्र=कठिन (दुःखमय) परिस्थितियों में भी प्राणी जीवन में ही आनन्द का अनुभव करता हुआ जीता है या जीने के लिये प्रयत्न करता है इसी प्रकार भगवान् चन्द्रांशु नामा विष्णु प्रत्येक प्राणी के हृदय में विराजमान होकर, उसी प्राणी को सानन्द जीवित रखने के लिये जीवनीय भोगों से युक्त करता है।

जो पहले यह कहा है, वह आनन्दरूप और गन्ता अथवा सर्वगत है, इसे लौकिक उदाहरण से इस प्रकार स्पष्ट करना चाहिये—जैसे इस लोक में प्रत्येक चेतन वस्तु गमन करती हुई ही प्रसन्न प्रतीत होती है, इसलिये भगवान् चन्द्रांशु नाम भगवान् का आनन्द तथा गमनरूप गुण सकल लोक में व्याप्त हो रहा है। इस प्रकार योग्य अर्थ को प्रकट करने के लिये कोई निमित्त ढूंढना ही पड़ता है। जो इस प्रकार लोक को देखता या जानता है, वह इस मन्त्र 'तद्विष्णोः परमं पद'मित्यादि का साक्षात् द्रष्टा है।

दीखते हुये चन्द्रमा की किरणों के समान, सकल जगत् का आनन्ददायक भगवान् विष्णु चन्द्रांशु नाम से कहा जाता है। इस में "तदेवाग्निस्तदादित्य इत्यादि मन्त्र प्रमाण है।

इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—

चन्द्रांशु नामा भगवान् विष्णु इस विश्व को आनन्दित करता है, तथा वह ही सब के उत्पत्ति विनाश के लिये अन्तःकरण जो मन बुद्धि आदि हैं, उनका संयोग या वियोग करता है, उस व्यापक रूप से सर्वत्र प्रसृत भगवान् चन्द्रांशु तथा उसके कर्मों को विद्वान् पुरुष ही देखते हैं विज्ञ=ज्ञान विज्ञान में निपुण तथा लोक के रहस्य को जाननेवाले। यौति=मिलाता है, या वियुक्त करता है।

भास्करद्युतिः—२८२

भाः=प्रकाशः, तं करोतीति भास्करः, दिवाविभानिशेत्यादिना (पा० ३-३-२१) करोतेष्टः प्रत्ययः, द्युतिः=प्रकाशः, भास्करस्य द्युतिः भास्करद्युतिः, भास्करे विष्णोरेवैषा द्युतिरिति।

मन्त्रलिंगं च—

इन्द्रो राजा जगतश्चर्षणीनाम्, ऋग्
सर्वं तदिन्द्र ते वशे, ऋग्

लोकेऽपि च पश्यामः—स्थावरे नश्वरे चास्मिन् शरीरे द्युतिः प्रकाश आत्मन एव, उक्तं च वेदे—सूर्यं आत्म जगतस्तस्थुषश्चेति, एवं समानं भवति लोके विष्णोर्ज्योतिस्तथैव यथा शरीरे जीवस्येति।

भवति चात्रास्माकम्—

प्रकाशकानां स उ एक एव प्रकाशकः सर्वजगद्वरेण्यः।
यथा शरीरस्य उ सूर्य आत्मा प्रकाशकोऽस्यापि१ तथैव विष्णुः ॥४७॥

१ अस्य=सूर्यस्य।

भास्करद्युतिः—१८२

भास्कर=सूर्य में है द्युति=चमक जिसकी अर्थात् भास्कर को प्रदीप्त करनेवाला—

भास् नाम प्रकाश का है, तथा उसे करनेवाले का नाम भास्कर है। भास् पूर्वक कृञ् धातु से "दिवाविभानिशा" इत्यादि पा० ३।३।२१ सूत्र से ट प्रत्यय करने से भास्कर शब्द सिद्ध होता है। द्युति नाम भी प्रकाश का है, भास्कर=सूर्य में है द्युति=प्रकाश जिसका उसका नाम है भास्करद्युति, व्यधिकरण बहुव्रीहि समास है, तथा यह विष्णु का नाम है। परमपिता परमात्मा की प्रभा से ही यह सूर्य आदि ज्योतिर्मंडल समेत सकल विश्व भासमान है, इसी आशय को प्रकट करने वाला "यस्य भासा सर्वमिदं विभाति" यह कठोपनिषद् वचन है। तथा इसी भाव को यह 'इन्द्रो राजा जगतश्चर्षणीनाम्" और "सर्वं तदिन्द्र ते वशे" इत्यादि ऋक् प्रमाणित करती है। लोक में भी हम देखते हैं, इस नश्वर और स्थावर शरीर में जो दीप्ति है वह जीवात्मा की ही है, जैसा कि वेद में कहा है "सूर्य आत्मा जगतस्तस्थुषश्चे"त्यादि। जैसे यह सकल शरीर जीवात्मा की ज्योति से व्याप्त है, वैसे ही यह सकल लोक विष्णु की ज्योति से व्याप्त है।

वह सर्वश्रेष्ठ अथवा सकल विश्व का प्रार्थनीय भगवान् भास्करद्युति विष्णु, सब सूर्य आदि प्रकाशकों का तथा लोक लोकान्तरों का प्रकाशक इसी प्रकार है, जसे जीवात्मा इस शरीर का।

अमृतांशूद्भवः—२८३

अमृतं=जलम्, अंश विभाजने, तस्मात् अंशुः विभाग इति, उद्भव उत्पत्तिः= जलं विभज्य-उत्पद्यत इति अमृतांशूद्भव इति ।

मन्त्रलिंगं च—

तम आसीत् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिना जायतैकम् ॥ ऋग्

सारार्थस्तु—अमृतं यथान्यायं विभज्यात्मानं जीवानां कृते उच्चैः प्रकाशयतीत्यमृतांशूद्भवो विष्णुः ।

लोकेऽपि च पश्यामः—गर्भस्थजले पृथग् निर्विकारं स्थापयन् गर्भं जनयति । कमल-शृंगाटक-शेवाल-प्रभृतीनि च तमेव विष्णुं निर्विकल्पं कृतिषु नियतनियमं व्यंजन्ति ।

अमुमेव जीवो जलं पिबन्, अन्नमश्नंश्च स्वयं प्रकृत्यैव विभज्य शरीरमुद्भावयति, वर्धयति, प्रकाशयति, रस एव तस्य सार इति । एवं सर्वत्र लोके प्रतिक्षणं वैष्णवं कर्म दृष्ट्वा योजनीयं भवति, एवं अमृतांशूद्भवः स्वकेन नाम्ना सर्वं व्यश्नुवान आस्ते ।

अमृतांशूद्भवः—२८३

जल का भेदन या विभाग करके प्रकट होने वाला । अमृत यह जल का नाम है । अंशु शब्द 'अंश विभाजने' धातु से उणादि उ प्रत्यय करने से सिद्ध किया जाचुका है । उद्भव नाम उत्पत्ति या प्रकट होने का है । इस प्रकार से अमृतांशूद्भव नाम का, जलों का भेदन या विभाग करके प्रकट होने वाला, यह अर्थ हुआ ।

इस नामार्थ में "तम आसीत्तमसे"त्यादि ऋग्वेद वचन प्रमाण है । इस का सारार्थ यों समझना चाहिये,—

जल को विभक्त करके, जीवों के लिए जो अपने आपको अच्छी प्रकार प्रकाशित करता है उसका नाम अमृतांशूद्भव है । लोक में भी देखा जाता है, गर्भाशय में स्थित जल में गर्भ को निर्विकार रखता हुआ उसे उत्पन्न करता है । इसी भगवन्नाम की अन्वर्थता को कमल शृङ्गाटक (सिंघाड़ा) तथा शेवाल=जम्बाल (काई) आदि जलीय तत्त्व प्रकट करते हैं, तथा इससे अपनी कृतियों में अटलनियम निर्विकल्प रूप भगवान् विष्णु की अभिव्यक्ति होती है इसी प्रकार यह जीवात्मा अन्न जल का खान पान करता हुआ प्रकृति से ही विभक्त करके शरीर को उत्पन्न करता है, तथा इसे बढाता और प्रकाशित करता है इस में साररूप वस्तु रस ही है इस प्रकार सकल लोक में स्वाभाविक वैष्णव कर्म को देखकर इस प्रकार की कल्पनायें कर लेनी चाहियें इस प्रकार अमृतांशूद्भवत्व रूप अपने धर्म से भगवान् अमृतांशूद्भव सकल लोक में व्याप्त है ।

भवति चात्रास्माकम्—

जलं स विष्णुस्तपसा विभिन्दन् जगत् प्रकाश्यं कुरुते ह नित्यम्।
तञ्चामृतांशूद्भव—नाम—गेयं जगत् समस्तं प्रपदं विचष्टे ॥४८॥

अमृतांशूद्भवनामगेयम्=अमृतांशूद्भवेन नाम्ना गातुमर्हं स्तोतुमर्हमस्तीत्यर्थः। प्रकाश्यम्=प्रकाशमानेतुमर्हम्। विचष्टे=विविधप्रकारैराख्याति।

भानुः—२८४

भा—दीप्तौ-आदादिकः, दाभाभ्यां नुः (उण् ३-३२) इत्यनेन नुः प्रत्ययः। भातीति भानुः सूर्यः, सर्वेषां भास्वतां भास्करः स विष्णुर्भानुरुक्तो भवति। यथेदं बाह्यं जगत् भानुना दीप्तं सत् प्रकाशते, तथैवास्मिञ्शरीरेऽग्निः प्रभामास्थापयति।

उक्तं च चरके—

आयु र्वर्णो बलं स्वास्थ्यं यमुत्साहोपचयौ प्रभा।
ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहाग्निहेतुकाः॥
शान्तेऽग्नौ म्रियते युक्ते चिरं जीवत्यनामयः।
रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते॥

चरकचिकित्सा० १५, ३–४

एवमग्निरूपेण चराचरं भानुस्वरूपेण च भगवान् विष्णुर्जगदात्मानं-व्यश्नुवानः सन् भानुरुक्तो भवति।

भाष्यकार इस नाम के संक्षिप्त भाव को अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु अपने ज्ञानरूप तप के द्वारा जल का भेदन करके अपने आप को जगत् रूप में प्रकाशित करता है, उस अमृतांशूद्भव नाम से स्तुत्य भगवान् विष्णु को यह समस्त जगत् पद पद पर प्रकाशित कर रहा है, विविध प्रकार से व्यक्त कर रहा है।

भानुः—२८४

दीप्त्यर्थक स्वादिगण पठित भा धातु से 'दाभाभ्यां नुः" इस उणादि सूत्र से नु प्रत्यय होने से भानु शब्द सिद्ध होता है। भानु जो भासमान या प्रकाशमान है। यद्वा भा धातु का अन्तर्गभित ण्यर्थ लेकर, जो सब सूर्य आदिकों का भी प्रकाशक है, उसका नाम है भानु। जैसे यह बाह्य जगत् भानु सूर्य से प्रकाश लेकर प्रकाशित होता है, उसी प्रकार यह शरीर भी अग्नि के प्रकाश से प्रकाशित होता है।

जैसा कि चरक में—"आयुर्वर्णो बलं स्वास्थ्य"मित्यादि—रूप से कहा है, जिसका भावार्थ यह है—

शरीर के आयु, वर्ण=रूप, बल, स्वास्थ्य, उत्साह, वृद्धि, ओज, तेज, तथा प्राणादि ये सब शरीराग्नि हेतुक हैं। अर्थात् इन सब का हेतु शरीर अग्नि है शरीर अग्नि के समावस्थ रहने पर यह जीव चिरकाल रोगरहित जीता है, विकृत होने पर रोगी होजाता है, तथा अग्नि शान्त होने पर मरजाता है। इस प्रकार अग्नि रूप से समस्त चराचर तथा भानुत्व रूप गुण से समष्टिरूप जगदात्मा का व्यापन करता हुआ भगवान् विष्णु नाम से कहा जाता है। इस में

मन्त्रलिंगं च—

पाहि नो अग्ने रक्षसः पाहि धूर्त्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद् भानो ! यविष्ठ्य ! ॥ ऋग्

प्रसंगतः—चित्रं भातीति चित्रभानुः । आदित्यः, अग्निश्च । स्वर्भातीति स्वर्भानुः— राहुः ।

बृहति भातीति बृहद्भानुः । विश्वे भातीति विश्वभानुः ।

भवति चात्रास्माकम्—

भानुर्हि विष्णुः स विभाति विश्वे चरेऽग्निरूपेण विभाति काये ।
स चित्रभानुः स उ विश्वभानुः स भास्वतां चापि विभासकोऽत्र ॥४६॥

शशविन्दुः—२८५

शश प्लुतगताविति भौवादिको धातुस्ततः पचादिलक्षणेनाच् प्रत्ययेन शश इति सिद्ध्यति । ये तरन्त इव क्षिप्रगामिनस्ते शशा इत्युच्यन्ते ।

विन्दुशब्दस्च ज्ञानार्थकाद् विद्धातो"विन्दुरिच्छुः" (पा० ३।२।१६६) सूत्रेण उः प्रत्ययो निपातनान्नुमागमश्चैवं सिद्धम् । एवञ्च तरतामिव गच्छतां सूर्यचन्द्रादिग्रहाणां तेषां गतेश्च यो ज्ञाता स शशविन्दुरित्युच्यते, तथा च यो यस्य ज्ञाता तत्त्वतः स तस्य प्रवर्तको, यथा लोके पश्यामः मनःसहितानामिन्द्रियाणां ज्ञाता=तत्त्वविदात्मा

"पाहि नो अग्ने ——जिघांसतो बृहद् भानो" इत्यादि ऋग्वेद मन्त्र प्रमाण है । यह प्रसङ्ग से प्राप्त का कथन है जैसे, चित्रभानु नाम सूर्य या अग्नि का है । स्वर्भानु नाम राहु ग्रह का है, तथा बृहद्भानु और विश्वभानु नाम परमपिता जगदीश्वर का है । भाष्यकार का अपने पद्य द्वारा भाव प्रकाशन इस प्रकार है—

भानु नाम भगवान् विष्णु का है, क्योंकि वह विश्व में प्रकाशमान हो रहा है, तथा चराचर व्यष्टि शरीरों में वह अग्नि रूप से प्रकाशमान है, वह ही चित्रभानु है और वह ही विश्वभानु है तथा वह सब प्रकाशकों का भी प्रकाशक है ।

शशविन्दुः—२८५

शीघ्रगामी सूर्य आदि का ज्ञाता या गति दाता । प्लुतगति अर्थवाली भ्वादिगण पठित शश धातु से पचादिलक्षण अच् प्रत्यय करने से शश शब्द सिद्ध होता है । जो तिरते हुये से वा शीघ्र चलते हैं उनका नाम शश है ।

विन्दु=वेदनशील, विद् इस ज्ञानार्थक धातु से "विन्दुरिच्छुः" इस (पा० ३-२-१६६) सूत्र से उ प्रत्यय और नुम् के निपातन से विन्दु शब्द सिद्ध होता है ।

इस प्रकार तिरते हुए से शीघ्र चलने वाले सूर्य चन्द्र आदि ग्रह अथवा उनकी गति को जो जानता है, उसका नाम शशविन्दु है, और जो जिसका जानकार है, वह उसका प्रवर्तक है, जैसे लोक में देखते हैं मन सहित इन्द्रियों का पूर्ण रूप से ज्ञाता आत्मा इन मन समेत सब

समनस्कानामिन्द्रियाणां प्रवर्तकस्तथैव सूर्यचन्द्रादीनां पूर्णरूपेण ज्ञाता सर्वाध्यक्षो भगवान् सर्वेषामेषां प्रवर्तकः। अर्थादेषां सर्वेषां गतिदाता नियन्ता चास्ति। एतदेवाभिप्रेत्य विद्वांसो भगवन्तं शशविन्दुनाम्ना स्तुवन्ति। एष भगवतः शीघ्रगामित्वरूपोऽपि ज्ञानशीलत्वरूपश्च गुणः सर्वत्र लोके व्याप्तः। अत एवेह लोके प्रत्येकं जीवः स्वोद्देश्यपूर्त्यै महतीं त्वरां विधत्ते, करोति चाविष्कारं शीघ्रगामिनां यन्त्राणाम्। प्राणिषु शीघ्रवेदि मनो, ग्रहेषु च शीघ्रगश्चन्द्रः शशविन्दुरुच्यते।

मन्त्रलिंगं च—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति॥
तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य वाह्यतः॥

यजुः ४०।४.५

भवति चात्रास्माकम्—

जिज्ञासवस्तं शशविन्दुमग्र्यं मनोजवेनैव विदन्ति वेद्यम्।
गतिं स विश्वे प्रणिधाय सर्वां गत्यैव सर्वानणुशो युनक्ति॥५०॥

इन्द्रियों का प्रवर्तक है, इसी प्रकार सूर्य चन्द्र आदिकों का पूर्ण ज्ञाता सर्वाध्यक्ष भगवान् इन सब का प्रवर्तक है, अर्थात् इन सब का गति देने वाला तथा नियन्ता है इसी अभिप्राय से शशविन्दु नाम से विद्वानों ने भगवान् की स्तुति की है। यह भगवान् का शीघ्रगामित्व तथा उस की ज्ञानशीलता रूप गुण सर्वत्र जगत् में व्याप्त है। इसीलिए लोक में प्रत्येक जीव अपने उद्देश्य की पूर्ति के लिए बड़ी शीघ्रता करता है, और इसके लिए वह शीघ्रगति वाले यन्त्रों का आविष्कार करता है। प्राणियों का अन्तःकरण रूप मन शीघ्रवेदन शील होने से, तथा ग्रहों में चन्द्रमा शीघ्रगामी होने से शशविन्दु कहे जाते हैं। भगवान् विष्णु स्वयं आत्मवेदन शील अपने शशविन्दुस्वरूप गुण से सकल विश्व को गमन से युक्त करता है, इसलिए वह शशविन्दु है।

यह भावार्थ "अनेजदेकं मनसो जवीयो" इत्यादि तथा "तदेजति तन्नैजति" इत्यादि यजुर्वेद ४०।४-५ मन्त्र से प्रमाणित होता है।

भाष्यकार इस भाव को अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

जिज्ञासु महापुरुष उस सर्वश्रेठ वेद्य भगवान् शशविन्दु को मनोवेग से बहुत शीघ्र जानने का प्रयत्न करते हैं, वह भगवान् शशबिन्दु समष्टि रूप गति से विश्व को युक्त करके, सब को पृथक् पृथक् गति से भिन्न करता है। इस प्रकार भगवान् शशबिन्दु रूप से लोक में व्याप्त हो रहे हैं।

सुरेश्वरः—२८६

सूपसर्गपूर्वो रा दाने–आदादिकस्तस्मात् क्विप्–प्रत्यया, सुरः शोभनदानः। को नाम शोभनदानः? यो हि सत्वगुणसंसिक्त-मनोबुद्धीभ्यां ददाति, तेषामीश्वरः, रक्षकः स्वामी वा। ईश्वर-शब्दो हि ईश ऐश्वर्ये—आदादिकस्तस्मात् स्थेशभासपिसकसो वरच् पा० ३-२-१७५ सूत्रेण वरच् प्रत्ययस्तच्छील-तद्धर्म-तत्साधुकारिष्वर्थेषु।

आदत्तस्य विसर्जनं दानं भवति। पात्रापात्रविवेचनं दानस्य स्थानविवेचनमात्रमेव। दानादाने नित्यशो लोके भवतः। तद्यथा—श्वास आदानं, उच्छ्वासो दानं, अशनमादानम् हदनं दानम्, द्रवस्य पानमादानम् मूत्रप्रसेको दानम्, लोकेऽपि च पश्यामः—स्थावरस्य वनस्पतिजगतः पत्र-पुष्प-फलानि प्राणिभिरादीयन्ते, वनस्पतिभ्यश्च दीयमानानि प्राणिभिर्मलमूत्रस्वेदादीनि वनस्पतीन् पुष्णन्ति। एष हि क्रमः सार्वत्रिका, यो हि मन्दबुद्धिः क्रममेनं व्युत्क्रम्य दानं विसर्जनं त्यागं वा न कुरुते, अयुक्ते स्थाने-अयुक्ते वा काले त्यागं करोति नासौ यशो लभते न च पुण्यानि वचांस्यादत्ते। प्रत्यहं विष्णुः स्वयं कृते लोके दानादानाभ्यां व्याप्तः सन् दानेऽप्रमादिनामीश्वरत्वं स्वीकुर्वन् "सुरेश्वरः" उक्तो भवति। ये हि युक्तियुक्तं दानं न कुर्वन्ति ते म्रियन्ते, कुतः पुनस्तेषामीशित्वं स्यात्। मन्त्रलिंगं च—

सुरेश्वरः—२८६

सात्त्विक दान करनेवालों का स्वामी या रक्षक सु उपसर्ग है, दानार्थक अदादिगण पठित रा धातु है उस से "अन्येष्वपि दृश्यते" इस (पा० ३।२ १०१) में पठित अपि शब्द के बल से ड प्रत्यय तथा टि का लोप होने से सुर शब्द सिद्ध होता है शोभन सात्त्विक दान देनेवाले का नाम है सुर अर्थात् जो सत्त्वगुणयुक्त मन बुद्धि से देता है उसका नाम सुर, और उसका जो रक्षक या स्वामी है, उसे कहते हैं सुरेश्वर, भगवान् विष्णु का नाम है। ग्रहण किये हुये का जो विसर्जन=त्याग है, उसका नाम दान है जिसमें आत्मीयता=अपनापन नहीं रहता। दान देने के लिये दान योग्य पात्र या अपात्र का विचार किया जाता है। वैसे तो लोक में दान अथवा अदान स्वभाव से ही होते रहते हैं। जैसे श्वास का आदान, प्रश्वास का त्याग=दान, अशन=भक्षण आदान, मलोत्सर्ग दान, तरल वस्तु जलादि का पान आदान तथा मूत्रोत्सर्ग दान हैं। लोक में भी देखा जाता है प्रायः सब ही प्राणी वनस्पतियों से फल फूल पत्र आदि का आदान=ग्रहण करते हैं, और उनके लिये मल मूत्र आदि का दान करते हैं, जिससे प्राणी और वनस्पति दोनों की पुष्टि होती है। यह दान आदान का सर्वव्यापी क्रम है, सब ही अपने जीवन के लिये किसी दूसरी वस्तु से किसी वस्तु का आशन करते हैं, तथा दूसरी वस्तु को स्थिर रखने के लिये अपने स्वरूप से कुछ दान करते हैं। जो मन्द बुद्धि जीव इस सार्वत्रिक दानादान क्रम का उल्लङ्घन करके केवल आदान करता हुआ दान नहीं करता, यदि करता भी है तो अयोग्य पात्र या अयोग्य काल में करता है, उसे यश पुण्य या दूसरों से प्रयुक्त आशीर्वचन नहीं मिलता। इस दानादान रूप से सर्वत्र जगत् में व्याप्त हुये विष्णु का नाम सुरेश्वर है। जो वेद विहित दानविधि से दान नहीं करते उन की सत्ता=अस्तित्व ही समाप्त हो जाता है, फिर उनका स्वामी या रक्षक क्या होना है। इस नामार्थ में—

अहं भुवं पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः।
मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम् ॥ ऋग्

भवति चात्रास्माकम्—

चरं नृलोके पुष्णाति तस्थिवान् स्थिरं च पुष्णाति चरं तथैव।
सुरेश्वरोऽयं भगवान् वरेण्यो सुरं जगत् शास्ति सनात् पुराणः ॥५१॥

सुरं जगत्=दानादाने प्रवृत्तं जगदिति। स्थिरं जगत्=स्थाणुजगत् वृक्ष-लता-क्षुप-वनस्पति-प्रभृतीनि।

हित्वा च यो दानविधिं विमुग्धो जिजीविषेद्दीर्घमथापि कालम्।
तं नष्टबुद्धिं भगवान् जहाति तं प्राणवायुश्च जहाति सद्यः ॥५२॥

यो हि नाम कश्चित् आदत्त एव न विसृजति स म्रियते, तद्यथा—कश्चिद् भुंक्त एव न हदति स म्रियते, तथा यो ददात्येव न चादत्ते तद्यथा—अतिसारिवत् अतिसरत्येव नाश्नाति स म्रियत एव, तेषां मृत्युमभिसरतां नासावीश्वरः, तद्यथा—न हि मृतस्य सेनाध्यक्षो राजा वा सेनायामीशिता तथैव सुदातृणामीश्वरः "सुरेश्वर" इत्युक्तो भवति।

अहं भुवं पूर्व्यस्पतिरहं धनानि सञ्जयामि शश्वतः" इत्यादि ऋङ् मन्त्र प्रमाण है।

भाष्यकार इस भाव को अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

पारस्परिक दान तथा आदान से स्थावर जगत् जङ्गम जगत को और जङ्गम स्थावर को पुष्ट करता है, अर्थात् दानादानरूप क्रिया से ही वह जड़जङ्गम रूप जगत् पुष्टि तथा सत्ता से युक्त है सर्वश्रेष्ठ सनातन भगवान् विष्णु ही युक्ति युक्त दानादान में प्रवृत्त हुये सुर जगत् की रक्षा करता है तथा इसका स्वामी है इसीलिये भगवान् का नाम सुरेश्वर है। वृक्ष, लता गुल्म क्षुप आदि को स्थावर नाम से कहा है। एतद्विषयक ज्ञान शून्य जो मूढ जीव उपरोक्त दानादान प्रक्रिया को छोड़कर यथेच्छ मन ईप्सित भोगों में रमण करता हुआ दीर्घसमय तक जीना चाहता है, उसे बहुत शीघ्र ही प्राण वायु छोड़ देता है, तथा वह भगवद्दया का पात्र नहीं होता। जैसे कोई खाता ही खाता है और मल त्याग नहीं करता, उसका मरण निश्चित है, इसी प्रकार जो केवल लेता ही है और देता नहीं, अथवा अतिसारी के समान देता ही है और लेता नहीं वह मृत्यु को प्राप्त हो जाता है, उसका भगवान् ईश्वर नहीं, जैसे सेना में मृत का राजा या सेनापति कोई ईश्वर नहीं होता इस प्रकार भगवान् विष्णु सात्विक दानादान से युक्तों का स्वामी या रक्षक है, इसलिये उसका नाम सुरेश्वर है।

औषधम्—२८७

उष दाहे भौवादिकः, ओषो दाहः पाको वा स ओषो धीयतेऽत्रेत्यौषधिः । दकारोपजनत्वाद्दोषो धीयतेऽत्र दोषधिः सन्नोषधिरुच्यते । ओषधेर्विकारः कर्म वा औषधम्। सूर्यस्य भूगोलं प्रति यत्र यत्र यथाविधप्रकारः सन्तापप्रभावस्तथाविधेन य उत्पन्नः पृथिव्यां रसस्तं रसमोषेण सहितं मूलिन आददते, ते बहिरुन्नयन्ति, बहिरागतस्य फलमिति संज्ञा क्रियते । यथा हि मूलिनः पृथिवीस्थमोषं दधति तथैव वृक्ष-गुल्म-लता-वनस्पतीनां पंचागं जीवानां शरीरस्य दोषं, ओषं वा दधति । तद्यथा—क्षुधौष्माणमन्नं दधाति, दोषेण प्रवृद्धमूष्माणं स्वयं निगीर्यामलकी-हरिद्रा-गुडूच्यादीनि नामग्राहं संख्यातुमशक्यानि शरीरिणामुपकुर्वन्ति । यथा लोके वह्न्याधानाय भ्राष्ट्रचुल्लाहसन्तीप्रभृतीनि निर्मीयन्ते, तथैव भगवता प्रतिप्राणि-अग्न्याशयं प्रकल्प्य तत्र पित्तरूपेणाग्निः प्रस्थापितोऽस्ति, अग्निरेव पित्तं पित्तं वाग्निः समानं भवति पूर्वेण । समुद्रो हि वाडवाग्नेरधिष्ठानम्, एवं वक्तुमर्ह्यते— ओषधिः समुद्रः, ओषधिः =अग्न्याशय इति एतत् कर्म केन कृतम् ? उत्तरं भवति. विधिना विधिश्च धाता ब्रह्मपर्यायः, अत एव मृते

औषधम्—२८७

ऊष्मा या सन्ताप को धारण करनेवाला । ओष शब्द दाहार्थक उष धातु भ्वादिगण पठित से घञ् प्रत्यय होने से बना है, ओष नाम दाह का है, वह ओष=दाह जिसमें स्थित होता है, उसका नाम ओषधि है, तथा ओषधि ही जातिभिन्न अर्थ में औषध है । यद्वा दोषधि ही दकार वर्ण लोप होने से ओषधि है । ओषधि के विकार या कर्म का नाम भी औषध है। सूर्य का भूगोल में जहां जहां जितना जितना सन्ताप का प्रभाव है, वहां उस सन्ताप प्रभाव से पृथिवी में उत्पन्न रस को सन्ताप सहित मूली=वृक्ष आदि ग्रहण कर लेते हैं, और इसे पृथिवी से बाहर ले आते हैं, बाहर आने पर वह सन्ताप अन्तिम फलरूप में प्रकट होता है, जिसका फल ही नाम होता है। जैसे वृक्ष, लतायें आदि पृथिवी के सन्ताप को धारण करते हैं, उसी प्रकार इन वृक्ष लता आदिकों का पञ्चाङ्ग शरीर के दोष वा ओष को धारण करता है, जैसे क्षुधा=भूख की गर्मी या सन्ताप को अन्न धारण करता है । दोष वश बढ़े हुये ऊष्मा=पित्त रूप अग्नि को आमलक हरिद्रा गिलोय आदि असंख्य औषधियां अपने में निगीर्ण करके अर्थात् धारण करके प्राणियों का उपकार करती हैं । लोक में जैसे अग्नि को रखने के लिये भ्राष्ट्र (भाड़) चुल्ला तथा हसन्ती (भट्टी) प्रभृति बनाये जाते हैं, उसी प्रकार भगवान् ने प्राणियों के शरीर में अग्न्याशय अर्थात् अग्नि का स्थान बनाकर उसमें पित्तरूप अग्नि की स्थापना की है । पित्त और अग्नि एक ही वस्तु है । समुद्र में रहने वाले अग्नि का नाम वाडवाग्नि है, अर्थात् वाडव नामक अग्नि का अधिष्ठान समुद्र है ।

इसे इस प्रकार भी कह सकते हैं, समुद्र तथा अग्न्याशय ओषधि रूप हैं । यह जहां तहां अग्न्याधान रूप कार्य किया किसने ? इस प्रश्न का उत्तर एक ही है, और वह यह है कि यह अग्न्याधान रूप कार्य ब्रह्मा का ही है, क्योंकि यदि ब्रह्मेतर कोई व्यक्ति इस कर्म के करने में

पुरुषे सत्यपि सर्वावयवे न कोऽपि पुनरग्निं पित्ताख्यं कार्याय समर्थयितुं शक्तोऽभूत्, सूर्यः कस्मिंस्तपति ? खे, खञ्च तत्, तस्मात् सूर्यात्मकस्यौषस्य धारणात्–ओषधिर्ब्रह्म ओषधेः कर्म सर्वं जगत् तदस्यास्तीति मत्वर्थीयोऽच्, अत एतदुपपद्यते—औषधं ब्रह्म, ब्रह्म वौषधं, औषधं विष्णुः, विष्णुर्वौषधमिति, ओषधिरूपेण, औषधरूपेण वा भगवान् प्रपदं व्यश्नुवान आस्ते। अत एव चोपपद्यते मन्त्रोक्तम्—

अवपतन्तीरवदन् दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ ऋग् १०-९७-१७

सर्वमिदं सूक्तमौषधिमधिकृत्यास्ति, तत् सुधीभिरध्येयम्। प्राणिनि पुनरग्न्याशयं कार्यकरणाय समर्थयितुमौषधय एव प्रभवन्ति। यावद् भगवान् रक्षति प्राणिनं तावदौषधयोऽपि तं प्राणिनं जीवयन्ति यदा क्षीणायुष्ट्वाद् ब्रह्म तं जीवं जहन्निवास्ते तदा नैता पार्थिवा ओषधयस्तं मुमूर्षुं रक्षन्ति, अत एवेदमुक्तं भवति सर्वेषामौषधीनां प्रधानौषध-भूतत्वाद् ब्रह्मैवौषधम्।

मन्त्रलिंगं च—

आप इद्वा उ भेषजी आपो अमीवचातनः । अथर्व ३-७-५, ऋग् १०-१३७-६

आपो वै ब्रह्म। मन्त्रलिंगं च—'*आपो ब्रह्म जना विदु*'रिति। अथर्व १०-७.१०

भवन्ति चात्रास्माकम्—

समर्थ होता, तो सब अवयवों से युक्त मृत शरीर में भी अग्नि की स्थापना कर देता, किन्तु ऐसा कोई कर नहीं सकता, इसलिये यह सिद्ध हुआ कि यह अग्न्याधान सर्वत्र सर्वव्यापक विष्णु ही करता है। सूर्य स्वरूप ब्रह्म में स्थित तपता है, इसलिये सूर्य ओष के धारण करने से परब्रह्म का नाम ओषधि है। ओषधि का कर्म औषध है, यह जगत् हुआ तथा वह औषधरूप जगत् जिसका है उस ब्रह्म का नाम भी औषध है, यहां मतुबर्थ में अच् प्रत्यय किया है। इस प्रकार से औषध, ब्रह्म, विष्णु ये एक ही वस्तु के नाम हुये। भगवान् विष्णु ही सर्वत्र औषध या औषधि रूप से व्याप्त है। इसलिये यह मन्त्रार्थ उपपन्न होता है। जैसा कि "अवपतन्तीरवदन् दिव ओषधयस्परि" इत्यादि ऋक् १०।९७।१७। में कहा है। यह सम्पूर्ण सूक्त ओषधियों के अधिकार का है, इसलिये ओषधि विषयक जिज्ञासु विद्वान् पुरुषों का यह अध्येतव्य है। प्राणियों के अग्न्याशय को अपना कार्य=पाचन आदि करने की शक्ति ओषधियों से ही प्राप्त होती है अथवा यों कहा जाये कि प्राणियों के विकृत हुये अग्नि को ओषधियां ही स्वस्थ बनाने में समर्थ हैं। किन्तु ये भौतिक ओषधियां प्राणियों के जीवाने में तब ही तक समर्थ हैं, जब तक भगवान् ओषधिरूप ब्रह्म उनकी रक्षा करता है। क्षीणायु होने से ब्रह्म इस प्राणी को छोड़ देता है, तब ये पार्थिव ओषधियां भी इस प्राणी की जो मरणासन्न है रक्षा नहीं कर सकतीं। इसलिये परब्रह्म ही सब ओषधियों में प्रधान औषध रूप हैं। इस नामार्थ में "आप इद् वा उ भेषजी आपो अमीवचातनः" अथर्व। तथा आपो वै ब्रह्म–आपो ब्रह्म जना विदुरित्यादि मन्त्र प्रमाण है।

इसका भाव प्रकाशन संक्षेप से भाष्यकार इस प्रकार करता है—

ओषधस्य पित्तस्य यथाविधस्य प्रकल्पनं ब्रह्म चकार पूर्वम् ।
तथाविधं नैव शशाक कर्तुं प्रकल्पनं ना भगणैरनेकैः ॥५३॥
तस्यौषधस्यापि च पात्रभूतं कलामयं ब्रह्म चकार जालम् ।
चरं समस्तं किमु वाचरं वा तमौषधं विष्णुमुपस्तुवन्ति ॥५४॥

कलामयम्—आयुर्वेदविदो भाषन्ते—षष्टिः पित्तधरा कला इति । भगणैः=वर्षगणैरिति ।

ओषो हि सूर्यः स उ तं ज्वलन्तं स्वकोदरे ब्रह्म दधाति नित्यम् ।
अतोऽस्ति विष्णुः कथितः पुराणैः स औषधं ब्रह्म च तत् स देवः ॥५५॥

जातावबर्तमानादोषधिशब्दात् "ओषधेरजातौ" (पा० ५।४।१३७) सूत्रेण स्वार्थिकोऽण् प्रत्ययः, ओषधिरेवौषधम् । यद्वा—ओषरूपकर्मोपपदाद्धातेः "आतोऽनुपसर्गे कः" इति (पा० ३।२।३) सूत्रेण क-प्रत्यये-आतो लोपे-ओषधं तदेवौषधं ब्रह्म स्वार्थिकोऽण् प्रत्ययः ।

एवं विविधमूहनीयं भवति । तद्यथा कामातुराय पुरुषाय "स्त्री" औषधं स्त्रियै च पुरुष औषधमस्ति ।

जगतः सेतुः—२८८

जगत्=गत्यर्थाद् गच्छतेः क्विपि—द्युतिगमिजुहोत्यादीनां द्वे च (पा० ३ २-१७८ सूत्रे वा०) इति क्वौ द्विर्वचनं, गमः क्वौ (पा० ६-४-४०) इत्यनेनानुनासिकलोपः,

---

ओषधरूप ब्रह्म ने इस ओषधरूप पित्ताग्नि को जैसा सृष्टि के=प्रारम्भ में बनाया, वैसा वर्षगणों=बहुत से वर्षों के बीत जाने पर भी आज तक मनुष्य इसे न बना सका ।

तथा उस ब्रह्म ने इस ओषरूप पित्त की स्थिति के लिये एक कलामय जाल बनाया, जैसा कि आयुर्वेदविद् कहते हैं "षष्टिः पित्तधरा कला" इसी ब्रह्म की चर अथवा अचर वर्ग ओषध नाम से स्तुति करता है ।

ओष यह सूर्य का नाम है, और उस दीप्यमान सूर्य को परब्रह्म अपने उदर में धारण करता है, इसलिये उस ब्रह्म सूर्य या विष्णु को पुरातन आचार्य ओषध नाम से उच्चारण करते हैं ।

जाति भिन्न अर्थ में वर्तमान ओषधि शब्द से स्वार्थ में अण् प्रत्यय करने से औषध शब्द बनता है ।

यद्वा ओष पूर्वक धा धातु से क प्रत्यय आकार का लोप तथा उस से स्वार्थ में अण् प्रत्यय करने से औषधशब्द बन जाता है ।

जगतः सेतुः—२८८

जगत् को बांधनेवाला । गत्यर्थक गम् धातु से क्विप् प्रत्यय क्विप् परे रहते धातु को द्वित्व, "गमः क्वौ" पा० ६-४-४० सूत्र से अनुनासिक मकार का लोप, द्वित्व ग्रहण बल से अभ्यास संज्ञा और अभ्यास सम्बन्धी कार्य तथा तुगागम होने से जगत् शब्द सिद्ध होता है ।

अथवा—वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च (उणा० २-८४) इत्यनेन गम्लृ गतौ भौवादिकः, अस्य द्विर्वचनं टिलोपश्च निपात्यते, आददानः सूर्यो लोकलोकान्तरान् गमयति क्षयं प्रति वा नयतीति जगत् विश्व-पर्यायः।

सेतुः=षिञ् बन्धने सौवादिकः, सितनिगमि० (उणा० १६९) इत्यादिना तुन् प्रत्ययः, तितुत्रतथ० (पा० ७-२-९) इत्यादिना निषेधः, सिनोति बध्नातीति सेतुः, समुद्रोऽपि सेतुरस्मादेव द्वीपाद् द्वीपं बध्नातीति। नदीसंक्रमो वा सेतुः, तटात् तटं सिनोति बध्नातीति कृत्वा, जगतः सयनं बन्धनं करोतीति जगत्सेतुः सन् षष्ठ्या अलुका निर्देशो बाहुलकात्।

जगतः सेतुः किम्? मेरुदण्डम्। पृष्ठवंशो वा, प्रतिप्राणि पृष्ठवंशोऽङ्गानि बध्नाति। तत्र च पृष्ठवंशकशेरवः—सप्त ग्रीवा-कशेरुकाः, द्वादशपृष्ठकशेरुकाः, पञ्च कटिकशेरुकाः, पञ्चानां कशेरुकाणां मिलितानामस्थ्नां समाहारभूतमस्थि चैकं, अनुत्रिकास्थि चैकम्। श्रोणिफलके द्वे तानि सङ्कलितानि-अष्टाविंशतिर्भवन्ति, अनुत्रिकास्थि प्राचां च यत् गुदास्थि तत् यदि त्रिकास्थ्न्येव परिगण्येत तर्हि सप्तविंशतिरेव संख्या भवति ग्रीवादा-

---

अथवा "वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च" इस उणादि २।८४। सूत्र से अति प्रत्ययान्त जगत् शब्द गम् धातु को जगादेश होकर सिद्ध होता है।

सूर्य, लोकलोकान्तरों की आयु का ह्रास करता हुआ इन्हें क्षय की ओर अर्थात् इनका क्षय करता हुआ चलता है, इसलिये सूर्य सहित समस्त दृश्यादृश्य वर्ग का नाम जगत् है।

सेतु शब्द षिञ् इस बन्धनार्थक स्वादिगण पठित धातु से "सितनिगमि" इत्यादि उणादि सूत्र से तुन् प्रत्यय और "तितुत्रतथ" इत्यादि पा० ७।२।९। सूत्र से इट् निषेध होने से बनता है। जो बांधता है उसका नाम सेतु है। समुद्र का नाम भी सेतु है, क्योंकि वह एक देश या द्वीप को दूसरे देश से बांधता है। नदी से पार करनेवाले रास्ते का नाम भी सेतु है, क्योंकि वह परस्पर एक तट से दूसरे तट को बान्धता है।

जगत् को बांधनेवाले का नाम जगत् सेतु है, यहां बाहुलक से षष्ठी का लुक् नहीं किया। जगत् को बांधने वाली वस्तु क्या है? इस प्रश्न का, समस्त जगत् मेरुदण्ड से बन्धा हुआ है, यह उत्तर है। "लोकसम्मितः पुरुषः" इस सिद्धान्त के अनुसार प्रत्येक प्राणि-पिण्ड ही जगत् है, और उसके अवयवभूत अङ्गों को यह मेरुदण्ड या पृष्ठवंश ही बांधता है इस प्राणी शरीर के अवयवभूत अङ्गों को बांधनेवाले मेरुदण्ड से सम्बद्ध अस्थियों का विभाग इस प्रकार है, सात ७ ग्रीवा कशेरुक, बारह १२ पृष्ठकशेरुक, पाञ्च ५ कटिकशेरुक, १ त्रिक, १ अनुत्रिक तथा दो श्रोणिफलक, इस प्रकार ये सब मिलकर २८ अठाइस हो जाते हैं। इन में अनुत्रिकास्थि की सत्ता नक्षत्रों में अभिजित् के समान है, अर्थात् मुख्यतः सताइस ही हैं। क्योंकि अनुत्रिकास्थि जिसको गुदास्थि भी कहते हैं, उसकी गणना त्रिकास्थि में ही हो जाती है, किन्तु त्रिक तथा अनुत्रिक में कशेरुत्व धर्म है, इसलिये ये सब मिलकर २७ कशेरुक हो जाते हैं। यह कशेरुक

रस्य गुदान्तं यावत् श्रोणिफलकसहितानाम् । यथैवैतत् कशेरुमयं जगतो गच्छतो गतिमतः प्राण्यङ्गानां निबन्धनं कुरुते, तस्मिन्नेव च मेरौ इडा पिङ्गला सुषुम्णा च निवसति, इडा वामनासया पिंगला च दक्षिणनासया सम्बन्धमातिष्ठति, सुषुम्णा ज्ञानं वहति । अमुथैव सप्तविंशतिर्नक्षत्राणि अभिजिता प्राधान्येन युक्तानि च अष्टाविंशतिर्भवन्ति, तानि समग्रस्य गतिमतः संसारस्य निबन्धनकर्तॄणि भवन्ति, तेषु नक्षत्रेषु ग्रहाः खगा इति निबद्धा सन्ति, अत एव च ज्ञानप्रधानानामिन्द्रियाणामाशयभूतं शिरः-कशेरुकाणां निबन्धनेन निबद्धं सत् लोकवच्छरीरमिदं ज्ञानेन निबध्नाति, तथैव सर्वशक्तिमान् भगवान् स्वकेन ज्ञानातिशययोगेन गच्छतां ग्रहाणां सेतुभूतं नाक्षत्रं मण्डलं निबध्नाति तस्मात् भागवतं नामैव "जगतः सेतु"रित्युक्तं भवति ।

प्रतिप्राणि कशेरुमयस्य दण्डस्य दर्शनाद् वेवेष्टित्वं तस्य भगवतो दृश्यतेऽतः विष्णुः—जगतः सेतुरिति युक्तमुपपद्यते । लोकसम्मितः पुरुष इति च चरकोक्तमुपपद्यते ।

भवति चात्रास्माकम्—

यथा जगद् मेषु निबद्धमेतत् तथैव जन्तुश्च कशेरुदण्डे ।
कशेरुकाणामथ तारकाणां मत्र्येऽस्ति साम्यं श्रुतिसम्मतं तत् ॥५६॥
को नाम शक्नोति विना महेशं कर्तुं ह सेतुं जगतां यथार्थम् ।
प्रभासते तत् प्रतिजन्तु-कायं विष्णुर्ह उक्तो जगतां स सेतुः ॥५७॥
यथा नभोगा उडुमार्गबद्धाः करैः स्वर्कविभ्रमिदं विभान्ति १ ।
तथात्र वंशाक्त=शिरस्थितानां खानां च भासा प्रतिभाति कायः ॥५८॥

१ विभान्ति=अन्तर्गभितण्यर्थकोऽयं क्रियाशब्दः ।

जाल, इस समस्त जड़जङ्गमरूप जगत के अङ्गों को बान्धता है, इसी कशेरुगण में इड़ा पिङ्गला और सुषुम्णा नाड़ी का निवास है । इड़ा का सम्बन्ध वामनासिका से तथा पिङ्गला का सम्बन्ध दक्षिण नासिका से है, सुषुम्णा ज्ञान का वहन करती है, अर्थात् ज्ञान का प्रवाह सुषम्णा के द्वारा होता है । इसी प्रकार नक्षत्रों में अभिजित् की समान रूप से गणना करने पर नक्षत्रों की संख्या २८ अट्ठाइस होती है, और वे समग्र जगत् का बन्धन करते हैं, अर्थात् यह समग्र जङ्गम जगत् नक्षत्रों से निबद्ध होकर चल रहा है, यहां तक की समस्त ग्रह भी नक्षत्रों से निबद्ध हैं । इसीलिये ज्ञानेन्द्रियों का स्थान यह शिर है, कशेरुकरूप बन्धनों से बन्धा हुआ स्वयं नक्षत्रों से लोक के समान ज्ञान से इस शरीर का बन्धन करता है । इसी प्रकार भगवान् सर्वशक्तिमान् अपने सर्वज्ञानातिशायी ज्ञान से ग्रहों के सेतुभूत इस नक्षत्र मण्डल को बान्धे हुये है, इसलिये भगवान् का नाम जगतः सेतु है ।

बन्धन कारक कशेरुकरूप दण्ड के सब प्राणियों में विद्यमान होने से भगवान् की व्यापकता प्रकट होती है ।

भाष्यकार उपरोक्त समग्र भावार्थ को अपने पद्यों द्वारा इस प्रकार प्रकट करता है—

जैसे यह समग्र विश्व नक्षत्र मण्डल से बन्धा हुआ है, उसी प्रकार यह प्राणी शरीर कशेरुकगण से बन्धा हुआ है "लोकसम्मितः पुरुषः" इस वैदिक मतानुसार जैसे समष्टि लोक में नक्षत्र हैं, इसी प्रकार व्यष्टि शरीर में कशेरुक हैं ।

भेषु=नक्षत्रेषु । तारकाणाम्=नक्षत्राणाम् । जगतां=नभोगानाम् । उडुमार्गबद्धाः=नक्षत्र-राशिबद्धाः । करैः=किरणैः । विभान्ति=विविधं प्रकाशन्ते । वंशाक्तशिरस्थितानां=पृष्ठवंशेन बद्धशिरोगतानाम् । भासा=ज्योतिषा । त्रिस्कन्द-ज्यौतिषं चास्यैव व्याख्यानभूतम् ।

१ विभान्ति=अन्तर्गभितण्यर्थकोऽयं क्रियाशब्दः ।

आत्मा वै सूर्यः शरीरे—मनश्चन्द्रस्थानीयः——स मनः शरीरेऽणुना कालेन क्रियाः कारयति । तद्यथा प्राचां सूत्रम्—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्दं जनयति स्वरम् ॥ पाणिनीयशिक्षा

अमुथैव सर्वत्र योजना कर्तव्या भवति, तद्यथा द्रष्टुमीहमान आत्मा—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते दिदृक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो दृष्टि-स्रोतांसि गत्वा दृश्यं प्रकाशयेत् ॥

भगवान् सर्वशक्तिमान् महेश के बिना इस प्रकार जगत् का बन्धन करने में कौन समर्थ हो सकता है । वह सेतु प्रत्येक प्राणी के शरीर में प्रतीत हो रहा है, इसलिये भगवान् का जगतः सेतु यह नाम है । जैसे नक्षत्र मण्डल से बन्धा हुआ ग्रहगण अपनी किरणों के द्वारा इस विश्व को प्रकाशित करता है, उसी प्रकार मेरुदण्ड से सम्बन्द्ध कशेरुकों से व्याप्त शिर में स्थित ज्ञानेन्द्रियों से यह सकल शरीर प्रकाशमान है । विभान्ति अन्तर्गभित ण्यर्थ अर्थात् प्रेरणार्थक क्रियापद है । भ तथा तारक नाम नक्षत्रों का है । उडुमार्ग नाम मेषादि राशियों का है ।

त्रिस्कन्धज्योतिषशास्त्र भी इसी का व्याख्यान है । इस प्राणी शरीर में सूर्य ही आत्मा है और चन्द्र ही मन है, तथा वह चन्द्ररूप मन, ज्ञानकर्मेन्द्रियों द्वारा इस शरीर से थोड़े ही समय में बहुत सी क्रियायें करवाता है, अर्थात् बहुत जल्दी २ कार्य करवाता है । जैसा कि पुरातन ऋषियों का सूत्र है—

आत्मा को जब कुछ कहने की इच्छा होती है, तब वह बुद्धि से सम्पृक्त होकर मन को प्रेरित करता है, और मन के द्वारा ताडित किया हुआ अग्नि शरीर में वायु को प्रेरित करता (उठाता) है, तब यह वायु हृदय उर आदि स्थानों में विचरण करता हुआ मन्द स्वर जो कि परा तथा पश्यन्ती नाम से कथित है, उत्पन्न करता है । इसी प्रकार जब वह आत्मा देखना चाहता है, तब वह बुद्धि से संयुक्त होकर मन को प्रेरित करता है, तथा मन से प्रेरित शरीराग्नि से प्रेरित वायु दृष्टि स्रोतों में पहुंचकर दृश्य वर्ग को प्रकाशित करता है । इसी प्रकार

अमुथैव—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते रिरंसया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो शुक्रस्रोतांसि गत्वानंगं प्रहर्षयेत् ॥

अमुथैव—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते जिघृक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो नस्यस्रोतांसि गत्वा गन्धाय कल्पयेत् ॥

अमुथैव—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते ह लिप्सया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतश्चाप्यस्रोतांसि गत्वा लोभं प्रचोदयेत् ॥

एवं शारीरभावेषु सर्वत्र योजनीयं सुधीभिरिति, तद्यथा—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते निनंसया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो रसस्रोतांसि गत्वा चुम्बमुदोक्षते ॥

निनंसा=चुम्बनेच्छा ।

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्तेऽहमास्थितः ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो बाहुस्रोतांसि गत्वा बाहुमुदस्यति ॥

अमुथैव—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते जिघत्सया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो वह्निस्रोतांसि गत्वा क्षुत् समुदीरयेत् ॥

अमुथैव—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते पिपासया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतो वारिस्रोतांसि गत्वा तर्षमुदीरयेत् ॥

एष हि कल्पनाक्रमो मया स्वकैः पद्यैः प्रदर्शितो मार्गप्रदर्शनाय ।

आत्मा की इच्छानुसार पूर्वोक्त क्रम से बुद्धि संयुक्त आत्मा से प्रेरित मन के द्वारा प्रेरित हुआ कायाग्नि वायु को प्रेरणा देता है, तथा वह वायु तत् तत् स्थान में जाकर आत्मा के इष्टार्थ=अभिप्रेत अर्थ को प्रकाशित करता है । इस प्रकार सब शारीरिक क्रियाओं में योजना कर लेनी चाहिये ।

यथा हि द्वादश राशयो नक्षत्राण्यन्तर्भावयन्ति, तथैव शरीरेऽपि प्रतिबाहु त्रिंशदस्थीनि भवन्ति, एवमेव हि प्रतिसक्थिन त्रिंशदस्थीनि भवन्ति। अत उक्तं च सुश्रुतसंहितायां शारीरस्थाने पंचमेऽध्याये "त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते" (१७ खण्डे)।

मन्त्रलिंगं च—

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत।

तत्राहतास्त्रीणि शतानि शंकवः षष्टिश्च खीला अविचाचला ये॥ अथर्व० १०.८.४

चरके च–*"त्रीणि सषष्टीनि शतान्यस्थनां सह दन्तोलूखलनखेन"* शारीरस्थाने-७ एवं समानं भवति लोकेन शरीरं, "लोकसम्मितः पुरुष" इति च युक्तमुपलभ्यते।

सत्यधर्मपराक्रमः—२८९

सत्य-शब्दो धर्म-शब्दश्च प्रकृतिप्रत्ययाभ्यां पृथक् निर्दिष्टौ। परा-आङ्-पूर्वात् 'क्रमु पादविक्षेपे' धातोः घञ्-प्रत्यये पराक्रम इति। सत्ये धर्मे पराक्रमो यस्यास्ति स सत्यधर्मपराक्रमो विष्णुः।

यथा हि भगवता सत्येनायुषा धर्मेण धारयितुं क्षमेण रक्षणाय क्रियायां समर्थयितुं वा हृदयं पराक्रमते यथावदनेकविधरोगेषु सत्स्वपि स्वयं परमेण-आक्रमणेन, आकर्षणेन क्रमते स्वानि पदानि जीवतीत्येवं ज्ञापनीयलक्षणैर्विक्षिपति तथैवायं

जैसे १२ बारह राशियां नक्षत्रों को अपने में अन्तर्हित करलेती हैं, उसी प्रकार शरीर में भी प्रत्येक बाहु में ३० अस्थियां होती हैं, तथा प्रत्येक सक्थि(टांग)में ३० तीस अस्थियां होती हैं सुश्रुत संहिता शारीर स्थान में भी कहा है "त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते' इत्यादि १७ खण्ड में। इस में "द्वादशप्रधयश्चक्रमेक"मित्यादि मन्त्र प्रमाण है। चरक में भी "त्रीणि सषष्टीनि" इत्यादि रूप से कहा है, खण्ड७। इस प्रकार "लोकसम्मितः पुरुषः" यह सिद्धान्त उपपन्न होता है। यहां हमने अस्थियों का निदर्शन मात्र किया है, विशेष परिगणन सुश्रुत आदि संहिताओं में देखना चाहिये।

सत्यधर्मपराक्रमः—२८९

सत्यधर्म का प्रवंतक सत्य तथा धर्म शब्द का साधन, प्रकृति प्रत्यय प्रदर्शन पूर्वक पहले किया गया है।

पराक्रम शब्द पादविक्षेपण (टहलने) अर्थ में विद्यमान परापूर्वक क्रमु धातु से घञ् प्रत्यय करने से बनता है। सत्य धर्म में पराक्रम है जिसका, अथवा सत्यधर्म का पराक्रम प्रवर्तन है जिससे, अर्थात् जिससे सत्यधर्म की प्रवृत्ति हुई है, उसका नाम सत्यधर्मपराक्रम है, विष्णु का नाम है। जैसे भगवान् सत्य आयुरूप धर्म से धारण करने में समर्थ, क्रिया करने में वा समर्थ, हृदय रूप वस्तु का पराक्रम=प्रारम्भ यद्वा निर्माण करता है, जिससे विविध रोगों के होने पर भी यह अपने पदों=स्थानों का आक्रमण करता हुआ जीता है। इन लक्षणों से प्रतीत

भगवान् विष्णुः सत्ये यथार्थे धर्मे जन्म-मरण-युक्तैः षड्भावविकारैर्योजयितुं विश्वं पराक्रमते, एष हि तस्य सर्वव्यापको नियमः, यावज्जीवो हृदये विराजते तावत् हृदयं पराक्रमते, एवमेव हि यावत् विष्णुरभीद्धेन तपसा सत्ये धर्मे जगन्नियोजयति तावत् दृश्यमिदं जगत् तमेव विष्णुं सत्यधर्मपराक्रम-गुणवन्तं स्तुवन्-"तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्" इति व्याचष्टे।

भवति चात्रास्माकम्—

षड्भिर्विकारैः प्रतिवस्तु युक्तं यथाऽन्तकालं परिरक्षते यः।
तं सत्यधर्मेषु पराक्रमन्तं विष्णुं ह लोकः प्रपदं गृणाति ॥ ५६ ॥

गृणाति शब्दते स्तौति वा। मन्त्रलिंगं च—

सर्वं तदिन्द्र ते वशे। (ऋग्०)

सारार्थतः—यावदायुः प्रमाणमस्याः सृष्टेस्तावदायुर्यावद् विश्वमिदं सत्यधर्मे गमयितुं पराक्रमयतीति कृत्वा सत्यधर्मपराक्रम इत्युक्तं भवति सर्वत्र व्यश्नुवानो विष्णुरिति। बहुलमेतन्निदर्शनमिति सर्वेषु नामव्याख्यानेषु ज्ञातव्यम्।

———

भूतभव्यभवन्नाथः पवनः पावनोऽनलः।
कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः ॥४५॥

२८० भूतभव्यभवन्नाथः, २८१ पवनः, २८२ पावनः, २८३ अनलः। २८४ कामहा, २८५ कामकृत्, २८६ कान्तः, २८७ कामः, २८८ कामप्रदः, २८९ प्रभुः ॥

होता है कि, भगवान् विष्णु जन्ममरणादि षड्भाव विकारों से युक्त इस समस्त विश्व को सत्य धर्म से युक्त करने के लिये पराक्रम करता है और उसका यह सर्वव्यापक नियम है कि जब तक जीवात्मा हृदय में विराजमान रहता है, तब तक हृदय पराक्रम करता है। इसी प्रकार जब तक भगवान् अपने अभीद्ध तप से जगत् को सत्यधर्म में लगाता (नियुक्त करता) है तब तक यह समस्त विश्व या दृश्य वर्ग उसी भगवान् सत्यधर्म पराक्रम रूप गुणवाले विष्णु की "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इत्यादि मन्त्रार्थानुसार स्तुति यद्वा व्याख्यान करता है। भाष्यकार इस भावार्थ को अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

षड्भाव विकारों से युक्त जगत् के प्रत्येक पदार्थ की जो उसके परिमित आयु तक रक्षा करता है, उस सत्य धर्म में पराक्रम या सत्य धर्म का प्रवर्तन करनेवाले विष्णु की यह समस्त लोक पद पद पर स्तुति करता है। इसका सारांश यह है—इस सृष्टि की जितनी आयु है, उतनी आयु तक इस विश्व को सत्य धर्म में प्रवृत्त होने के लिये पराक्रमशील बनाता है। इस करके सर्वव्यापक भगवान् विष्णु का नाम सत्य धर्म पराक्रम है।

भूतभव्यभवन्नाथः— २६०

भूतं च भव्यं च भवच्च भूतभव्यभवन्ति तेषां नाथः स्वामी प्रभुर्वा, भूतभव्यभवन्नाथः, यदा हि ध्याता ध्यायति स वर्त्तमानः कालः, अतीतः कालो भूत-संज्ञां लभते, आयियासुः कालो भविष्यत्संज्ञां लभते । तस्मिन् काले स्थितस्य सर्वस्य विश्वस्य स नाथः, नाथृ धातुर्भ्वादिकस्तस्माद् याञ्चा-उपताप-ऐश्वर्य-आशिष्षु वर्त्तमानद् घञि नाथ-शब्दः सिध्यति : तैर्याचितः, याच्यते, याचयिष्यते च स तानुपातीतपत्, उपतापयति, उपतापयिष्यति च, स तानैष्ट, ईष्टे, ईक्ष्यते च, स तानशिषत्, शास्ति, शासिष्यति च, एषा कालकृता तिङ्व्यवस्था मनुष्यबुद्धिमधिकृत्यैव प्रदर्शिता, ब्रह्मणि कालकृतो भेदो नोपपद्यते, उक्तं च भूतभव्यभवत्प्रभुः चतुःसंख्याके नामव्याख्याने । किमुक्तम् ?—

यो देश-दिक्-काल-विभागमुक्तः स्वयं प्रभुः सन् सृजते च विश्वम् ।
तमच्युतं सर्वतिङां समूहो व्यनक्तिमात्रं न भिनत्ति कालात् ।

सर्वं वा तत्रोक्तं व्याख्यानमत्रापि स्मर्तव्यं सुधीभिः । एवं स सर्वव्यापनशीलत्वाद् विष्णुरुक्तो भवति ।

मन्त्रलिंगं च—

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति ।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ अथर्व १०-८-१ ॥

भूतभव्यभवन्नाथः—२६०

भूत वर्तमान भविष्यादित्रिकालस्थित समस्त विश्व का स्वामी ।

भूत=व्यतीत काल, भव्य=आनेवाला काल, भवत्=वर्तमान काल, जब ध्यान करने वाला ध्यान=चिन्तन करता है, उस काल का नाम वर्तमान काल है, जो समय बीत गया उसका नाम भूतकाल है, तथा जो आगे आयेगा उसका नाम भविष्य काल है, इन तीनों कालों में स्थित समस्त विश्व का जो नाथ=स्वामी है, उसका नाम भूतभव्यभवन्नाथ है ।

याच्ञा-उपताप-ऐश्वर्य तथा शुभाशंसा अर्थ में विद्यमान भ्वादिगण पठित नाथ धातु से कर्म कारक में घञ् यद्वा कर्तृकारक में पचाद्यच् प्रत्यय करने से सिद्ध होता है नाथ शब्द । इस प्रकार सांसारिक जीवों द्वारा जिस से याचना=प्रार्थना की जाती है, अथवा जो सब का उपतापन, ईशन=शासन तथा शुभाशंसन=कल्याण की इच्छा करता, है, उसका नाम है नाथ, भूत भव्य भवत् शब्दों से तीनों काल तथा तत्स्थ पदार्थों का ग्रहण होता है । जिसकी याच्ञा=प्रार्थना की गई, की जायेगी या की जारही है तथा जो उपतापनादि करचुका, कर रहा है और करेगा इत्यादि तिङ्वाच्य कालकृत भेद, केवल मनुष्य बुद्धि की अपेक्षा से दिखाया है. वस्तुतस्तु ब्रह्म से काल का सम्बन्ध न होने से उसमें कालकृत भेद नहीं हो सकता । इसका स्पष्ट व्याख्यान (भूतभव्यभवत्प्रभु) इस चतुर्थ नाम में किया गया है, वहां यह स्पष्ट कर दिया है कि भगवान् में देशकृत कालकृत आदि किसी प्रकार का भेद नहीं है सर्वदा स्वरूप से अच्युत रूप उस विष्णु को तिङ् गण काल के द्वारा व्यक्त करता है, किन्तु भिन्न=भेद युक्त नहीं करता । इस भावार्थ को "यो भूतञ्च भव्यंच सर्वं यश्चाधितिष्ठति" इत्यादि १०।८।१। अथर्व मन्त्र प्रमाणित करता है ।

भवति चात्रास्माकम्—

नाथः स विश्वस्य जगन्नियन्ता त्रिकालभेदेन विभक्तमात्रम् ।
त्रिलोचनः पश्यति काल-भक्तं तथा यथा विश्वमिदं दिनेशः ॥ ६० ॥

कालभक्तम्=भूत-भव्य-भविष्यद्भिर्भेदमापादितम् ।

पवनः— २६१

पूञ् पवने भौवादिकः, पवत इति पवनः । पूञ् पवने क्रैयादिकः । ल्युटि प्रत्यये पवनः । वायुः, अग्निः, जलम्, पृथिवी चेत्यादीनि पवित्राणि पुनन्ति । उक्तं च— वायुः पवित्रं स मा पुनातु, अग्निः पवित्रं स मा पुनातु, इत्यादि । एतेन ज्ञायते यत् भागवते जगति तस्य पवित्रीकरणगुणः सर्वं व्यश्नुवान आस्ते ।

मन्त्रलिंगं च—

अनस्थाः पूताः पवनेन शुद्धाः । अथर्व ४-३४-२ ॥
पवित्रपते पवित्रपूतस्य यत्कामः ॥

भवति चात्रास्माकम्—

स विश्वकृत् सर्वजगन्नियन्ता विश्वं पवित्रं कुरुते ह सर्वम् ।
शुद्धः स विष्णुः स पुनाति लोकान् परस्परं शुद्धमुशन्ति विश्वम् ॥ ६१ ॥

इस भावार्थ को भाष्यकार संक्षेप से अपने पद्य द्वारा इसप्रकार व्यक्त करता है—

वह विश्व का नाथ जगन्नियता भगवान् विष्णु त्रिकालद्रष्टा अर्थात् सर्वदा प्रकाश स्वरूप भूतभव्यभविष्यद्रूप कालत्रय से विभक्त=भेद को प्राप्त हुए इस विश्व को प्रकाशपुञ्ज सूर्य के समान प्रतिक्षण देखता रहता है । तथा अपनी ईशनशक्ति से सकल विश्वका नियमन करता रहता है ।

पवनः—२६१

पवित्र करनेवाला । पवित्र करणार्थक भ्वादिगण अथवा क्र्यादिगण पठित पूङ् धातु से ल्युट् प्रत्यय करने से पवन शब्द की सिद्धि होती है, जिसके द्वारा पवित्र किया जाता है, उसका नाम पवन है । उस पवन रूप गुण से भगवान् विष्णु इस जगत् में सर्वत्र व्याप्त है । उस ही पवन नामा भगवान् विष्णु का पवित्र करण रूप, गुण, वायु, पृथिवी, अग्नि जल में भी आया हुआ है, इसलिये वे स्वयं पवित्र तथा औरों को पवित्र करते हैं । जैसा कि वेद मन्त्र "वायुः पवित्रं स मा पुनातु, अग्निः पवित्रं स मा पुनातु" इत्यादि से सिद्ध है ।

इस भावार्थ में "अनस्थाः पूताः पवनेन शुद्धाः" तथा "पवित्रपते पवित्रपूतस्य यत्कामः" इत्यादि मन्त्र प्रमाण है । इसी भाव को भाष्यकार पद्य द्वारा इस प्रकार प्रकट करता है

वह सकल जगत् का नियामक तथा विश्व का कर्ता भगवान् विष्णु स्वयं शुद्धस्वरूप इस सकल विश्व को पवित्र करता है, तथा विश्वान्तर्गत प्रत्येक वस्तु स्वयं शुद्ध और दूसरों को शुद्ध करती है ।

पावनः—२९२

पावयतीति पावनः, पूङ् पवने, पूञ् पवने, आभ्यां ण्यन्ताभ्यां बाहुलकात् कर्तरि नन्द्यादिल्युः, योरनः। पावयतीति पावनः। एकस्य विकारमपरः शमयति, एष हि सार्वत्रिको नियमः। तद्यथा वृश्चिकस्य विषं पुनाति शमयति वा रक्तमारिचयमम्भः कर्णे च्योतितम्, एवं हि मक्षिकानेत्रेऽञ्जनवदञ्जिता—उदर्दाख्यं विकारं शीतपित्ताख्यं वा सद्यः शमयति पावयतीति वा, एवं बहुत्र योजनीयं भवति। तद्यथा—अपामार्गपत्र-स्वरसः कर्णे च्योतितः कर्णनिस्रावं निःशूलं च कुरुते।

भवति चात्रास्माकम्—

स पावनो विष्णुरनन्तशक्तिर्विश्वं मिथः पावयते समस्तम्।
तं पावनं नौति जगत् समस्तं नेनीयते विश्वमिदं च तेन॥ ६२॥

तद्यथा—नदी वेगेन शुद्ध्यति, नद्यां प्लुतं च नदी पावयति, अमुथैव—अग्निः शुद्ध्यति स्वार्चिषा, अग्नौ च क्षिप्तं वह्निः पावयति, एषा हि सार्वत्रिका योजना।

पावनः—२९२

पवित्र करनेवाला पूङ् या पूञ् ण्यन्त धातु से कर्ता अर्थ में नन्द्यादि ल्यु प्रत्यय करने से पावन शब्द सिद्ध होता है। जो स्वयं पवित्र तथा अपना पावित्र्य गुण दूसरों को देकर दूसरों से दूसरों को पवित्र करवाता है उसका नाम पावन है। जगत् में ऐसा देखने में आता है कि जब किसी प्राकृत वस्तु में किसी प्रकार का विकार उत्पन्न होता है तब उस विकार का शमन दूसरी वस्तु से होता है, यह सर्वव्यापी नियम है। जैसे कि वृश्चिक (बिच्छू) के विष का शमन कर्ण (कान) में डाला हुआ लालमिरचों का जल करता है। इसी प्रकार नेत्रों में अञ्जन के समान उपयोग की हुई मक्षिका (मक्खी) उदर्द (पित्ती) नामक रोग का शमन कर देती है, अर्थात् उसका शोधन कर देती है। इसी प्रकार अन्य अन्य योजनायें भी कर लेनी चाहियें, जैसे कि ऊंगे के पत्तों का स्वरस कान में डालने से कान के स्राव (बहने) का तथा कान की पीड़ा का शमन (शान्ति) कर देता है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

पावन नामा अनन्तशक्ति भगवान् विष्णु इस विश्व को परस्पर एक एक से पवित्र करवाता हुआ, सुव्यवस्थित प्रक्रिया से चला रहा है, तथा यह समस्त जगत् उस भगवान् पावन को नमस्कार करता है।

जैसे नदी अपने वेग से स्वयं शुद्ध होती हुई अपने में बहती हुई वस्तु को नदी वेग के द्वारा पवित्र करवाती है। इसी प्रकार अग्नि अपनी ज्वाला से स्वयं पवित्र होता हुआ अपने में पतित वस्तु को ज्वाला के द्वारा पवित्र करवाता है। इसी प्रकार की योजना सर्वत्र की जासकती है।

अनलः—२९३

अनन्तीत्यनाः प्राणिनस्तांल्लात्याददत्त इत्यनलो वह्निः सूर्यो वा प्राणिनामादानञ्च शारीराग्नेः शमीभावेन सूर्यरश्मिविच्छेदेन वा, व्यापनशीलत्वाच्चानत्वरूपगुणस्य स विष्णुरित्युक्तो भवति।

लोकेऽपि च पश्यामोऽनलस्याधिक्यं सर्वं शोषयति=जरयति, तथा ग्रीष्मर्तौ नद्यः शुष्यन्ति, निर्बलाश्च सत्त्वा उत्कटं तापमसहमानाः प्राणान् जहति।

यद्वा 'णल गन्धने' इति भौवादिकधातोः पचाद्यचि नल इति, नलति=गन्धं गृह्णातीति नलः। गन्ध इति सर्वविषयोपलक्षणं, सर्वविधान् रूपरसादीन् विषयान्न गृह्णातीत्यनलः सर्वविधविषयरहित इत्यर्थः। तथा चोक्तम्—अशब्दमस्पर्शमरूपमगन्धं ब्रह्म इत्यादि। यथा च वायुर्यं यं देशं स्पृशति ततस्ततस्तदीयं गुणमादाय स्थानान्तरं नयति, एवमयं निर्विषयो जीवो येन येनान्तःकरणजन्येन संस्कारेण वासनया वा युक्तः शरीरं त्यजति, गच्छति तेन तेन संस्कारेण वासनया वा युक्तोऽन्यच्छरीरमेष एव क्रमो भगवतोऽनलत्वरूपगुणस्य सर्वत्र व्याप्तस्य दृश्यते। स्वयं सर्वविधविषयविहीनोऽपि सर्वं जगत् सविषयं निर्मिमीते। न—अलं पर्याप्तिः=पूर्णता यस्य

अनलः—२९३

प्राणियों को ग्रहण करने वाला। जो श्वास प्रश्वास करते हैं, उनका नाम अन है। श्वास प्रश्वास प्राणी करते हैं, इसलिये अन नाम प्राणियों का है, तथा उनका जो आदान=ग्रहण करता है उसका नाम अनल है, अग्नि तथा सूर्य का नाम अनल है। शरीर की अग्नि का शान्त होना, वा सूर्य रश्मि का सुषुम्णा नाड़ी से विच्छेद होना ही प्राणियों का आदान है। यह सर्वत्र व्यापनशील अनलरूप गुण, सर्वव्यापक भगवान विष्णु का होने से, विष्णु का ही नाम अनल है। लोक में भी हम देखते हैं, अनल की अधिकता सब का शोषण करती है अर्थात् सब को जीर्ण कर देती है। ग्रीष्म ऋतु में नदियां भी सूख जाती हैं और सन्ताप के सहन न होने से निर्बल प्राणी अपने प्राणों को छोड़ देते हैं।

यद्वा गन्ध ग्रहणार्थक भ्वादिगण पठित णल धातु से पचाद्यच् करने से नल शब्द सिद्ध होता है, जिसका गन्ध ग्रहण करने वाला, ऐसा अर्थ होता है। नञ् तत्पुरुषसमास से अनल पद बन जाता है, जिसका जो गन्ध ग्रहण नहीं करता ऐसा अर्थ होता है। गन्ध शब्द सब विषयों का उपलक्षण है, अर्थात् जो किसी प्रकार के विषय का ग्रहण नहीं करता, सब विषयों से शून्य का नाम अनल है। जैसा कि "अशब्दमस्पर्शमरूपमगन्धं ब्रह्म" इत्यादि वाक्य से सिद्ध हैं। जैसे वायु जिस जिस स्थान का स्पर्श करता है, उस उस स्थान का गुण स्थानान्तर को ले जाता है, इसी प्रकार यह निर्विषय जीव, जिस जिस अन्तःकरण जन्म संस्कार या वासना से युक्त इस शरीर को छोड़ता है, उस उस संस्कार या वासना को शरीरान्तर में ले जाता है।

यह ही क्रम भगवान् के सर्वत्र व्याप्त अनलत्व रूप गुण का देखने में आता है, भगवान् स्वयं सब विषयों से शून्य है, तथापि इस जगत् को सविषय बनाता है।

सोऽनलः, अनन्त इत्यर्थः। लोकेऽपि च पश्यामोऽस्मिन् वैष्णवे जगति न हि कस्य— चिदन्तः=एतावत्त्वं दृश्यते, यथा रूपवानग्निः स च विश्वं विविधरूपवद् विदधाति। तथैव भगवाननलो नैजेनानलत्वरूपेण गुणेन विश्वे व्यष्टोऽनल इत्युक्तो भवति।

भवति चात्रास्माकम्—

विष्णुर्विरूपं कुरुते ह विश्वं स्वयं विगन्धः कथितो विरूपः।
अनन्तकर्तुर्भुवने न शक्तो जीवः कदाचित् पर्याप्तिमाप्तुम् ॥ ६३ ॥

विरूपं=विविधं रूपम्। विरूपः=विगतरूपः। भुवने=विश्वे। पर्याप्तः= अन्तभावः।

कामहा—२९४

काम इच्छा, एषणा वा, तद्यथा—लोकैषणा, वित्तैषणा, पुत्रैषणा, मानैषणा, इत्येवमादि। सर्वे वेदा ब्रह्मण्येव स्वात्मानमुपरमन्ते, तस्माद् ब्रह्मज्ञस्य कामा उपरमन्ति, अत एवोक्तं भवति कामहा विष्णुरिति, एष हि सर्वव्यापको नियमो नूनं दृश्यते।

यद्वा, अलं=पूर्णता, समाप्ति, अर्थात् अन्त जिसका नहीं है, उसका नाम अनल है, जिसका अर्थ अनन्त होता है। लोक में भी देखा जाता है, इस वैष्णव जगत् में किसी भी वस्तु का अन्त=एतावत्त्व परिच्छिन्नता देखने में नहीं आती। जैसे अग्नि रूपवाला है, वह इस विश्व को विविधरूपों (अनन्त रूपों) वाला बनाता है। इसी प्रकार अपने अनल रूप गुण से विश्व में व्याप्त भगवान् विष्णु अनल नाम से कहा जाता है।

इस भाव को भाष्यकार संक्षेप से इस प्रकार व्यक्त करता है—

भगवान् विष्णु, स्वयं रूपरहित तथा गन्धरहित होता हुआ भी, इस विश्व को विविध गन्ध रूपादि से युक्त बनाता है, इस स्वयं अनन्त तथा अनन्तरूप विश्व को करनेवाले भगवान् का कोई भी जीव अन्त नहीं प्राप्त कर सकता।

विविधरूपवाले का नाम विरूप है, तथा रूप रहित का नाम विरूप है। बहुत गन्ध वाले का नाम विगन्ध है, तथा गन्धरहित का नाम विगन्ध है।

कामहा—२९४

कामनाओं को समाप्त करनेवाला। काम नाम इच्छा का है, इच्छा का ही पर्यायवाची शब्द एषणा है, एषणा में लोकैषणा, वित्तैषणा, पुत्रैषणा मानैषणा आदि रूप से अनेक प्रकार की हैं। सब वेद अपने आप को ब्रह्म रूप परतत्त्व में उपरत=अन्तर्लीन करलेते हैं. इसलिये ब्रह्मज्ञ के सब ही काम शान्त हो जाते हैं। इसलिए विष्णु का नाम कामहा है। यह सार्वत्रिक

तद्यथा—महोच्चैः शिखरे गत्वा शिखरारूढो न हि नीचैस्तराणामधिरोहणमालिप्सते, तथैव सर्वज्ञानमयस्य भगवतः कृतस्य विश्वस्य परिज्ञानानन्तरं न हि कामा अवशिष्यन्ते, अतः कामहा विष्णुरित्युक्तमुपपद्यते । ब्रह्मज्ञश्च—अकामो भवति, अकामत्वाद् ब्रह्मण इति, मन्त्रलिंगं च—

अकामो धीरो अमृतः स्वयंभूः रसेन तृप्तो न कुतश्चनोनः ।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ॥

अथर्व–१० ८।४४

यथैव आनन्दरसेन तृप्तः स्वयंभूर्विष्णुस्तथैव तज्ज्ञोऽपि आनन्दरसेन तृप्तः सन् 'अकामो" भवति, अथवा—ब्रह्मज्ञानं तस्य कामान् परिपूर्य शमयति, समान भवति "कामहा"पदेनेति ।

भवति चात्रास्माकम्—

विष्णुः स्वयंभूर्न कुतश्चनोनस्तज्ज्ञस्य कामान् निराकरोति ।
रसेन तृप्तः स नरोऽत्र लोके विष्णोः पदं गायति चाप्रमत्तः ॥६४॥

तज्ज्ञं=ब्रह्मज्ञम् । कामान्=एषणाः । रसेन तृप्तः=आत्मस्थो ब्रह्मस्थो वा । आनन्दः सः ।

कामकृत्—२९५

कामान् करोति पूरयतीति कामकृत् । सर्वे कामास्तस्मिन्नैव विष्णौ समुद्रे जन्तव इव निभृताः सन्ति, अतः प्रार्थ्यमानस्य कामान् स जोहूयमानस्य वा कामान्

नियम है कि कोई भी सब से उत्तम शिखर पर चढकर, उस से नीचे के शिखरों पर चढने की रुचि नहीं करता, इसी प्रकार इस ज्ञानस्वरूप भगवान् के बनाये हुये विश्व या ब्रह्म के जान लेने पर कोई भी विश्वान्तर्गत वस्तु ज्ञान या कामना का विषय नहीं बनती, अर्थात् सब प्रकार की कामनायें शान्त हो जाती हैं, इसलिये भगवान् का नाम कामहा है । ब्रह्म के अकाम होने से ब्रह्मयज्ञ भी अकाम हो जाता है । इस में "अकामो धीरो अमृतः स्वयम्भूः" इत्यादि मन्त्र प्रमाण है जैसे स्वयम्भू स्वयं सब प्रकार के रसों से तृप्त है, इसी प्रकार ब्रह्मज्ञ भी सब रसों से तृप्त होकर अकाम हो जाता है । अथवा ब्रह्मज्ञान से उसकी कामनायें पूर्ण होकर शान्त हो जाती हैं, इसलिये वह स्वयं भी कामहा नाम समानार्थक बन जाता है । इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है ।

भगवान् विष्णु स्वयम्भू तथा सर्वत्र परिपूर्ण है, वह अपने ब्रह्म तत्त्व के जाननेवाले के सब कामों को पूर्ण करके समाप्त कर देता है, तथा वह ब्रह्मज्ञानी मनुष्य सर्वविध रस से तृप्त होकर सदा सचेत विष्णु के नामों का गान करता है ।

कामकृत्—२९५

इच्छाओं को पूर्ण करनेवाला । कामों को, इच्छाओं को जो पूर्ण करता है, उसका नाम है कामकृत् । समुद्र में जन्तुओं के समान सब कामनायें विष्णु में ही स्थित हैं, इसलिये प्रार्थना

समेधयतीति कृत्वा विष्णुः कामकृदुक्तो भवति। लोकेऽपि च पश्यामः—समृद्धार्थ एव व्यसमृद्धार्थं कामैरुद्वर्धयति, मन्त्रलिंगं च—

प्रजापते ! न त्वदेतान्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥ यजुः

रयीणाम्=लौकिक-भोगसाधनभूतस्य विविधसाधनतामुपगतस्य धनस्य, तेषामिति। यत्कामाः=यं यं काममधिकृत्य जुहुमः स्तुतिं वितनुम इति।

भवति चात्रास्माकम्—

व्यृद्धः समृद्धार्थमुपैति यद्वत् तद्वद् ह विष्णुं समुपैति जीवः।
कामान् स तेषां हृदयस्थितः सन् पुष्णाति, गीतः स उ कामकृत् कः ॥६५॥

कः=ब्रह्मा, यथा ह्रदे स्थितस्य जलीयान् कामान् ह्रदः पूरयति तथैव विष्णुरिति भावः।

कामान् कृन्तति वा कामकृत्, आत्मजिज्ञासोर्जीवस्यासत्यान् कामान् कृन्तति।

कान्तः—२९६

कर्मणिङन्तात् कर्मणि क्तः, काम्यत इति कान्तः सुखरूपत्वात् सर्वेषां काम—विषयीभूतोऽर्थः। मनोरमणे हि वस्तुनि सुखोपलब्धिः। मनसश्च रमणं मनोहरे

था हवन यज्ञादि करनेवाले के काम=मनोरथों को भगवान् बढाता=धनी पुरुष ही असमृद्धार्थं=निर्धन पुरुष को उसकी इच्छायें पूर्ण करके बढा=समृद्ध कर सकता है। इस भावार्थ में "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव" इत्यादि यजुर्वेद मन्त्र प्रमाण है।

इस भावार्थ को भाष्यकार इस प्रकार व्यक्त करता है—

जैसे कोई निर्धन मनुष्य धनी के पास अर्थ की कमी की पूर्ति के लिये जाता है उसी प्रकार यह जीव अपनी कामपूर्ति के लिये भगवान् के पास आता है तथा भगवान् उस जीव के हृदय में स्थित उसकी कामपूर्ति करता है, इसलिये विज्ञ पुरुष उसका कामकृत् नाम से गान करते हैं। 'क' ब्रह्मा का नाम है। जैसे तालाब के पास रहनेवाले की जल सम्बन्धी सब कामनायें तालाब पूर्ण कर देता है, उसी प्रकार हवन यज्ञादि तथा अन्यान्य प्रार्थनायें करने वालों के काम की पूर्ति विष्णु कर देता है। यद्वा आत्मजिज्ञासु के असत्य=विषय सम्बन्धी कामों का जो छेदन करता है उसका नाम कामकृत् है।

कान्तः—२९६

सब जिसको चाहते हैं। णिङ् प्रत्ययान्त इच्छार्थक भ्वादिगण पठित कमु धातु से कर्म में क्त प्रत्यय करने से कान्त शब्द सिद्ध होता है जिसका अर्थ सुखरूप होने से सब की इच्छा का विषय अर्थात् सब के चाहने योग्य ऐसा होता है। सुख की प्राप्ति मनोरम वस्तु में होती है,

रमणीये वस्तुनि। अतोऽशेषं जगद्व्याप्य विलक्षणविविधरूपप्रतिवस्तुसंस्थः प्राणिनां मनोरमणहेतुत्वात् कान्त इत्युच्यते रमणीयपर्यायः। सर्वत्र ह्यत्र जगति तस्य कान्तत्वं व्याप्तं, तत्र मन्त्रलिंगं च—

"प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा" ॥ यजुः।

भवति चात्रास्माकम्—

कान्तः स विष्णुः सुखरूप उक्तः स विश्वरूपः प्रतिवस्तुसंस्थः।
विद्वांस्तमीशं विविधस्वरूपं पश्यन् मुहुर्हृष्यति वीतमोहः ॥ ६६ ॥

कामः—२९७

कमु कान्तौ भौवादिकः। तस्मात् "घञ्" काम्यत इति कामः। कामः=इच्छा तद्धेतुभूतः संकल्पो वा कामः।

मन्त्रलिंगं च—

कामस्तदग्रे समवर्त्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ ऋग् १०-१२९-४ ॥

मनोहर वस्तु में ही मन रमण करता है। इसलिये सकल जगत् व्याप्त करके विचित्र रूपों वाले विविध वस्तुओं में स्थित, प्राणियों के मनोरमण का हेतु होने से भगवान् विष्णु रमणीय शब्द के पर्यायवाचक कान्त शब्द से कहा जाता है। उसका कान्तत्व रूप गुण सकल विश्व में व्याप्त है। इसमें "प्रजापतिश्चरति गर्भे" इत्यादि यजुर्वेद मन्त्र प्रमाण है।

इस नाम के भावार्थ को भाष्यकार अपने पद्यद्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम कान्त है, क्योंकि सुखरूप होने से उसको सब चाहते हैं तथा वह प्रत्येक वस्तु में व्यापक रूप से स्थित है तत् तदाकारवाला होने से विविध स्वरूप है, इस प्रकार उस परमात्मा को जो विद्वान् जानता या देखता है, वह विगतमोह होकर बार बार आनन्द का अनुभव करता है।

कामः—२९७

कामरूप सृष्टि का मूलभूत तत्त्व इच्छार्थक भ्वादिगणपठित कमु धातु से घञ् प्रत्यय करने से काम शब्द की सिद्धि होती है, काम इच्छा या तत्प्रकृतिभूत संकल्प विशेष का नाम है जो कि मननरूप कार्य का प्रथम=आदि बीज=कारण है। इसमें "कामस्तदग्रे समवर्त्ताताधि मनसो रेतः प्रथमं यदासीदित्यादि १०।१२९।४। ऋग्वेद मन्त्र प्रमाण है। इस मन्त्र का भावार्थ

कामः अग्रे सृष्टिकाले तत् समवर्त्तत समनुगतवान्, किं तत् ? मनसः मननस्य ज्ञानात्मकस्य रेतः बीजं कारणं प्रथममनन्यपूर्वं यदासीत् । सतो विद्यमानस्य महदादि-विकारस्य बन्धुं बन्धनमूलं यतः प्रभवति न हि निर्बीजोत्पत्तिर्दृश्यते एतद् धृदि हृदये प्रतीष्य पर्येष्य कवयो मेधाविनो मनोषा प्रज्ञया निश्चिन्वन्ति, बीजभावः पूर्वार्धर्चेन प्रदर्श्यते । वस्तुतस्तु यद्ब्रह्म न सत् न असत् अविकारकं वा ब्रह्म । तदपि पुनः महदादिषु विकारेषु जगत् तनोति ।

मन्त्रलिंगं च—

ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत । ऋग् १०-१९०-१ ।

सदसदभावे मन्त्रलिंगं च—

नासदासीद् नो सदासीत् । ऋग् १०-१२९-१ ।

कस्यचिद् वचनं च, यथा—

यदा यथा सिसृक्षुस्तु भवेद् देवो रजस्वलः ।
विभक्तेषु विशेषेषु स तदैव प्रतायते ॥

लोकेऽपि च पश्यामः—स्वपतो मनुष्यस्य जागरणं लभमानस्याणुनाऽन्तरेणैव काम इच्छोत्पद्यत इदमिदं वा कर्तुमह्यं मया कार्यमस्तीति । एवं स भगवान् कामः सन् सर्वं व्यश्नुते । आब्रह्मकीटान्तमिदं जगत् कामेन व्याप्तं वर्तते । समानं च भवति लोकसम्मितः पुरुष इति ।

इतरोऽपि काम एतस्मादेव बहुत्वमात्मनो विभावयिषुर्वा प्रकृतिभूतां क्षेत्र-भूतां वा स्त्रियमुपादत्ते । पुनः स तस्यां जवाधिष्ठानं गर्भमाधित्सति सा प्रकृतिरूपा

इस प्रकार है मननरूप ज्ञान का कारण जो काम है वह सृष्टि का मूलभूत तत्त्व है, जिससे महदादि सद्रूप विकारी तत्त्वों का प्रादुर्भाव होता है क्योंकि बिना कारण के किसी की उत्पत्ति नहीं होती है । मेधावी=विद्वान् पुरुष इसका हार्दिक इच्छा से निर्णय करते हैं, अपनी प्रतिभा के द्वारा इस ऋचा के पूर्वार्ध भाग से इस काम का बीजभाव=कारणत्व सिद्ध होता है । वास्तविक रूप से वह ब्रह्म न सत् है न असत् है तथा न विकारी है, किन्तु वह महत् आदि विकारों के द्वारा इस जगत् का प्रसार करता है इस अर्थ में "ऋतञ्च सत्यञ्चाभीद्धात्तपसो-ऽध्यजायत" इत्यादि मन्त्र प्रमाण है, तथा उसके सत् असत् आदि भाव का निषेधक "नासदासीत्" "यदा यथा सिसृक्षुस्तु" इत्यादि भी किसी का वचन है ।

लोक में भी देखा जाता है, सोकर उठे हुये मनुष्य के क्षणभर में ही काम=इच्छा की उत्पत्ति होती है, यह करना चाहिये या मैं करूंगा । इस प्रकार कामरूप भगवान् विष्णु सर्वत्र व्याप्त है, क्योंकि ब्रह्मा से लेकर चींटी पर्यन्त सब काम से व्याप्त हैं इसीलिये "लोकसम्मितः पुरुषः" यह उपपन्न होता है । और यह जो रतिपति नाम से प्रसिद्ध काम है वह भी इसीलिये काम शब्द से कहा जाता है क्योंकि सब से प्रेरित होकर युवा पुरुष अपने आप को बहुत रूपों में उत्पन्न करने के लिये क्षेत्रभूत स्त्री को ग्रहण करता है तथा उसमें बीजाधान करता है, वह प्रकृतिरूप

क्षेत्ररूपा वा स्त्री तस्मै कमनीया वांछनीया वा भवति। काम्यते वा सा सर्वकेण चतुर्विधयोनिविक्लृप्तेन जगता तस्मात् काम उक्तो भवति ॥ काम्यमधिकृत्य तत्साधनीभूतानां क्षेत्राणामपि बहुत्वमुपपद्यते। तद्यथा—तापसः तपः सिद्ध्यै व्रतान्याचरति। विद्यार्थी विद्याप्त्यै गुरुं शुश्रूषते। धान्यार्थी च क्षेत्रं मृद्नाति। एवं लोकं स एक एव कामात्मा प्रभुः सन् स्वात्मना कामरूपेण धर्मेण सर्वं व्यश्नुवानेन धर्मेण विश्वं व्याप्नोति। अत एवैतदुक्तं भवत्यस्माकम्—

> संकल्पप्रभवः कामः सकल्पः काम एव वा।
> संकल्प-वृक्ष-संक्लृप्तं जगद् भोगाय कल्पते ॥ ६७ ॥

अत एव च मनसिजः काम उक्तो भवति, हृदयभावजो वा। यथा यथा हि चन्द्रमा मनुष्यस्य जातलग्ने गर्भाधानलग्ने वा यथाविधानां ग्रहाणां दृष्टिमुपगतः स्यात् तथा तथा विधानां कामानां स चन्द्रमा तन्मनो वा प्रसविता भवति। "चन्द्रमा मनसो जात" इति याजुषमन्त्रलिंगदर्शनात्। चन्द्रमा वा मनो ब्रह्मणः, एतेन विज्ञानेन विज्ञायते यत्—नूतनवर्षारम्भसमये मेषराशेः प्रथमेंऽशे वैशाखस्य प्रथमे दिने वा यादृशी चन्द्रमसः स्थितिर्भवति उदयकाले तादृक्षमावर्षं प्रजानां मनः क्षेमाय वा प्रवृत्तिमारभते। इति बहुधा परीक्षितमस्माभिः। अनंगो वा काम एतस्मादेव। रहसिजो वाऽप्येतस्मादेव यतो हि रहस्येव नानाविधा नवनवका ऊहापोहा आविष्कर्तॄणां विचारकाणां चोत्पद्यन्ते। रहसि वा कामो जागर्ति। रात्रिर्हि रहः। एवं कामो

स्त्री, उसकी कामना का विषय होती है अथवा सब उसे चाहते हैं, इसलिये उसका नाम काम है। कामनाओं के विषय के बहुत होने से उसके साधन या अधिकरणभूत क्षेत्र भी बहुत होते हैं जैसे एक तपस्वी अपने तप की सिद्धि के लिये यम नियमादि व्रतों का आचरण करता है। विद्यार्थी विद्या प्राप्ति के लिये गुरु की सेवा करता है तथा धान्यार्थी धान्य के लिये क्षेत्र का कर्षण करता है। इस प्रकार वह कामरूप भगवान् अपने कामरूप धर्म से इस समस्त विश्व को व्याप्त करके स्थित है। इसलिये हमारा "सङ्कल्पप्रभवः कामः" इत्यादि कथन युक्तियुक्त है, अर्थात् काम सङ्कल्प से उत्पन्न होता है, यद्वा सङ्कल्प ही काम है तथा सङ्कल्प वृक्ष से बना हुआ यह जगत् भोगरूप में परिणत हो जाता है। इसलिये काम का नाम मनसिज है। चन्द्रमा ब्रह्मा का मन है, अतः चन्द्रमा के मनोरूप होने से चन्द्रमा मनुष्य के जन्म या गर्भाधान लग्न में जिस प्रकार के ग्रहों से दृष्ट होता है, उसी प्रकार के कामों को उत्पन्न करता है। समष्टि अर्थात् विराट् पुरुष के मन से चन्द्रमा की उत्पत्ति होती है या हुई है इसमें "चन्द्रमा मनसो जातः" इत्यादि यजुर्वेद मन्त्र प्रमाण है इस से यह वैज्ञानिक रहस्य प्रकट होता है कि जैसे वर्ष के आरम्भ में मेष राशि के प्रथम अंश मे अथवा वैशाख के प्रथम दिन चन्द्रमा की जैसी स्थिति होती है, उसी के अनुसार प्रजाओं का मन सकल वर्ष पर्यन्त कल्याणी या दुःखमयी प्रवृत्ति का आरम्भ करता है। इसकी परीक्षा हमने बहुत बार की है। काम को रहसिज भी कहते हैं क्योंकि आविष्कारक या विचारकों के नूतन=नये नये ऊहापोह=तर्क वितर्क एकान्त में ही उत्पन्न होते हैं यद्वा एकान्त में ही काम उद्बुद्ध होता है। यद्वा रहस नाम रात्रि का है क्योंकि

विष्णुः सर्वं व्यश्नुवानः काम उक्तो भवति। स काम एवाभिमतं ददातीति कृत्वा कामदेवोऽपि विष्णुरुक्तो भवति। महादेवोऽपि काम एतस्मादेव, स हि-इच्छयोद्वेलितो महता बलेनोत्थाप्यं तृणवल्लघीयांसं कृत्वा स्थापयति। दृश्यते च लोके पशूनां मैथुनप्रसंगे। महाभारवतां वृषभ-महिषादीनां चोत्पतनं निजां गर्भधिं प्रति। कामेनैव मनुष्यैर्महाभारोत्थानसमर्थानां यन्त्राणमाविष्करणं कृतम्। समानश्च भवति लोको वेदेन। एवं लोकं दृष्ट्वा विविधा ऊहा ऊहितव्या भवन्ति। चन्द्रमूलत्वात् कामानां मनसिजो रेतोऽधः गच्छन् लौकिकं सुखमुपजनयति। मनसि तिष्ठन् ब्रह्मसुखमनुभावयति। स एव कामः तिर्यंग् गच्छन् विविध-शब्द-स्पर्श-रूप-रस-गन्धादिषु लोकं तदर्हवस्तूनामुत्पादने कल्पयति। यथा मनो विविधानां रूपाणां कल्प्ता दृश्यते तथैव लोके चन्द्रस्थानीया स्त्री विविधानां रूपवतां जातकानां प्रसवित्रीत्वेन दृश्यते। यथा चन्द्रमा सप्तविंशति दिनानि नक्षत्राणि वा पर्येति तथैव स्त्री प्रतिचान्द्रमासं रजसा पर्येति नियतं वर्षाणां यावत् तावत्। यथा चन्द्रमसि कलंको दृश्यते स्त्रियो गर्भाशयदोषपरापसृत्यै रूपाणां संभृत्यै वा स्त्रियः शारीरदोषान् प्रतिमासं प्रवर्त्तमानं रजो बहिरपनयति। यतो हि रजः लोकानां ज्ञानवतां शब्दस्पर्शरूपरसगन्धादिज्ञानेन्द्रिययुक्तानां कर्मेन्द्रिययुक्तानां जातकानां प्रसवे कारणं भवति, अतो रजांसि लोका

विशेष करके काम का उद्बोध रात्रि में ही होता है। इस प्रकार कामरूप से सर्वत्र व्याप्त भगवान् विष्णु काम शब्द से कहा जाता है। इस सकल विश्व को सब कुछ अभिमत अर्थ काम ही देता है, इसलिये भगवान् का नाम कामदेव भी है। महादेव भी काम का ही नाम है, क्योंकि वह कामरूप इच्छा युक्त हुआ बहुत बड़े बल से उठाने योग्य वस्तु को तिनके के समान तुच्छ सा समझ कर उठा लेता है। यह लोक में मैथुन कर्म के अवसर में देखा भी जाता है बहुत वजनदार या भारवाले वृषभ=अड्डिल या महिष=भैंसा अपनी गर्भधि=गौ या महिषी के प्रति बड़ा लघु अर्थात् हल्का सा होकर कूदता है। मनुष्यों ने काम के द्वारा ही बहुत भारवाही यन्त्रों का आविष्कार किया है। लोक और वेद परस्पर समान हैं। इस प्रकार लोक को देखकर विविध प्रकार की कल्पनायें कर लेनी चाहियें। कामों के चन्द्रमूलक होने से मनसिज रेतः=वीर्य निम्नस्तर को जाता हुआ लौकिक सुख को उत्पन्न करता है तथा मन में एकत्रस्थित अथवा ऊर्ध्वगति ब्रह्म सुख का अनुभव करवाता है, तथा तिर्यग्गति काम, शब्द-स्पर्श-रूप-रस गन्धादि विषयों तथा इन को प्राप्त करवानेवाली वस्तुओं के उत्पन्न करने में समर्थ करता है। जैसे मन विविध प्रकार के रूपों की कल्पना करता है उसी प्रकार यह चन्द्रस्थानीय स्त्री विविध प्रकार के रूपवाले बालकों को उत्पन्न करती है। जैसे चन्द्रमा अपने संक्रमण द्वारा २७ सताईश नक्षत्रों को प्राप्त करता है, उसी प्रकार स्त्री भी प्रति चन्द्रमास रजो धर्म को प्राप्त करती है, नियत वर्षों तक। जैसे चन्द्रमा में कलङ्क होता है उसी प्रकार स्त्री के गर्भाशय में कुछ दोष होते हैं, जिन से प्रवृत्त होता हुआ रज बाहर निकलता है क्योंकि उभयविधेन्द्रिययुक्त ज्ञानसमवेत बालकों की तथा लोकों की उत्पत्ति में रज ही कारण होता है इसीलिये लोक का नाम भी रज है। चन्द्र और मंगल का संयोग ही रज है, उसमें सूर्य और

उच्यन्ते । चन्द्रमंगलसंयोग एव रजः, तत्र सूर्यशुक्रसंयोगेन सात्मगर्भः क्रियाक्षमो भवति, बृहस्पतिना संयुक्तेन सद्दृष्ट्या परिपाकाय निबद्ध्यते, शनिना स्वाकाराय विकृताकाराय वा समर्थ्यते । राहुणा दृढतायै, विघ्नोदयाय वा, इत्यादिकं शास्त्रान्तरात् विविधमुन्नेयं, ज्ञानस्य प्रकाशनिदर्शमात्रमेवास्माकमभिमतत्वाद् ग्रहाणामंशांशानुस्यूतत्वात् सर्वंजगतः ।

भवति चात्रास्माकम्—

कामो हि विष्णुः स ससर्ज विश्वं रूपाणि कामो विविधानि वव्रे ।
तत्कामक्लृप्तः समनस्कमात्मा खानां सहायेन तनोति तन्त्रम् ॥ ६८ ॥

तन्तुः=संतानम्, स्वं तन्त्रं तायत इति कृत्वा स्वतन्त्र इत्यप्युक्तं भवति ।

प्रसंगतः—एतद्व्याख्याप्रसंगेन—कामदेवः, ६५१, श्लोके–८३, कामपालः–६५२, श्लोके–८३, कामी–६५३, श्लोके–८३, कामप्रदः–२९८, श्लोके–४५, अपि व्याख्याता भवन्ति ।

कामान् प्रददातीति कामप्रदः । कामान् ददातीति कामदेवः, कामं पालयतीति कामपालः, कामोऽस्यास्तीति कामी ।

भवति चात्रास्माकम्—

स कामदेवः स उ कामपालः कामी स उक्तः स उ कामदश्च ।
स एव विश्वं विविधं विधत्ते भांशांशयुक्तः प्रतिवस्तुनिष्ठैः ॥ ६९ ॥

शुक्र का संयोग होने से चेतन अर्थात् सजीव गर्भ क्रिया=गत्यादि करने में समर्थ होता है। बृहस्पति के संयोग से अच्छी दृष्टि से युक्त होता है ।

शनि के संयोग से अच्छा या विकृत आकार उत्पन्न होता है । राहु के संयोग से दृढता या किसी प्रकार के विघ्न की उत्पत्ति होती है, इत्यादि अन्यान्य शास्त्रों से जान लेनी चाहिये। यह सकल विश्व, ग्रहों के अंश तथा अंशांशों से व्याप्त है, अर्थात् ओत-प्रोत है । हमारा प्रयोजन केवल ज्ञान की प्रक्रियामात्र दिखाना है । इसी भावार्थ को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का ही नाम काम है, उसी ने इस विश्व को बनाया तथा नाना प्रकार के रूपों का निर्माण किया, उसी काम के द्वारा क्लृप्त किया हुआ मन सहित यह जीवात्मा इन्द्रियों की सहायता से विश्व का विस्तार करता है । काम नाम की व्याख्या के प्रसङ्ग से ही कामदेव ६५१, कामपाल ६५२, कामी ६५३, कामप्रदः २९८ नाम भी व्याख्यात हो जाते हैं। क्रम से कामों को देनेवाला, काम की रक्षा करनेवाला, तथा काम जिस में या जिसका हो ये इन नामों के अर्थ हैं । भाष्यकार का भावप्रकाशन पद्य द्वारा इस प्रकार है—

मन्त्रलिंगं च—

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य ।
सम्राडेको विराजति ॥ यजु०–१२–११७

कामप्रदः—२९८

कामान् प्रददातीति कामप्रदः । प्र-पूर्वाद् ददातेः आतश्चोपसर्गे पा० ३-१-१३६ इत्यनेन कः प्रत्ययः । प्रद इति ।

इष्टमापूरयतीति वा कामप्रदः । मन्त्रलिंगं च—

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥
यजुः १५ ५४

अग्निना रयिमश्नवत् पोषमेव दिवे दिवे ।
यशसं वीरवत्तमम् ॥ ऋग् १-१-१३
अग्निः परेषु धामसु कामो भूतस्य भव्यस्य ।
सम्राडेको वि राजति ॥ अथर्व ६-३६-३

भवति चात्रास्माकम्—

अग्निः समस्मै प्रददाति कामान् कामेन युक्तश्च विभाति जन्तुः ।
कामप्रदो विष्णुरिहास्ति गीतः करतं विनाग्निं समिन्धीत कार्ये ॥७०॥

भगवान् विष्णु के ही, कामदेव, कामप्रद, कामपाल तथा कामी नाम हैं, वह ही प्रत्येक वस्तु में होनेवाले राग्यादि के अंश तथा अंशांशों से विश्व को नाना प्रकार का बनाता है। इस में 'अग्निः प्रियेषु धामसु" इत्यादि मन्त्र प्रमाण है।

कामप्रदः—२९८

जो कामों को देनेवाला है, उसका नाम कामप्रद है। प्र पूर्वक दा धातु से "प्रे दाज्ञः इस पा० सूत्र से क प्रत्यय तथा आकार का लोप होने से कामप्रद शब्द सिद्ध होता है। अर्थात् प्रार्थयिता के इष्ट=वाञ्छित अर्थ की पूर्ति करनेवाला भगवान् विष्णु। इस में यह "उद्बुध्य॰ स्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते" इत्यादि १५।५४ यजुर्वेद मन्त्र प्रमाण हैं। इसी प्रकार "अग्निना रयिमश्नवत्" इत्यादि ऋक् १-१-१३। तथा "अग्निः परेषु धामसु" इत्यादि ६।३६।३। अथर्व मन्त्र प्रमाण है।

भाष्यकार का अपने पद्य द्वारा संक्षेप से भावप्रकाशन इस प्रकार है—

सब के कामों=इच्छाओं की पूर्ति अग्नि करता है, तथा कामरूप अग्नि से युक्त हुआ ही प्राणी शोभायमान है।

कामेन युक्तः=अग्निना युक्त इत्यर्थः। कामप्रदः=आमाशयेऽग्नेरधिष्ठातृत्वात् कामप्रदः, अग्निप्रदो वा समानं भवति, समिद्धाग्निः समाग्निर्वा कामान् प्रार्थयितुं समुत्सहते, तान् स पूरयति। विशदं काम-नाम-व्याख्यायां द्रष्टव्यम्।

प्रभुः—२९९

प्रभुः—विप्रसम्भ्यो ड्वसंज्ञायाम्, पा० ३-२-१८० इति डुप्रत्यये कृते प्रभवति समर्थो भवतीति प्रभुर्विष्णुस्तस्य भगवतः शक्तेः सर्वत्र व्यापनशीलत्वात्। मन्त्रलिंगं च—

त्वष्टा रूपाणि हि प्रभुः पशून् विश्वान् समानजे।
तेषां नः स्फातिमा यज ॥ ऋ० १।१८८।९

भवति चात्रास्माकम्—

सामर्थ्ययुक्तस्य विभोर्जगत्यां विना प्रभुत्वेन न किंचिदस्ति।
प्रभुर्हि विष्णुः स समस्तमित्वा जगत् समस्तं कुरुते सशक्तम् ॥७१॥

प्रभुत्वेन=सामर्थ्येन। प्रभुः=समर्थः। सशक्तम्=स्वशक्तिगुणेन युक्तं सशक्तमिति।

युगादिकृत्—३००

युजिर् योगे, युज समाधौ धातोर्वा घञि, उञ्छादिपाठाद् गुणाभावनिपातनाच्च युगशब्दः सिध्यति युज्यतेऽस्मिन् सर्वमिति युगं=कालचक्रम्। तदादीयते यत

भगवान् विष्णु के बिना इस शरीर में अग्नि का निधान कौन कर सकता है, इसलिये भगवान् का नाम कामप्रद है। आमाशय में अग्नि की स्थिति होने से काम और अग्नि समानार्थक, तथा कामप्रद और अग्निप्रद समानार्थ शब्द होते हैं। प्रार्थयिता के कामों की पूर्ति के करने से भगवान् कामदेव कहे जाते हैं, अथवा कामप्रद।

इस की अधिक स्पष्ट व्याख्या काम नाम व्याख्या में देखनी चाहिये।

प्रभुः २९९—समर्थ

समर्थ का नाम प्रभु है। प्र पूर्वक भू धातु से "विप्रसम्भ्यो ड्वसंज्ञायाम्" इस ३।२।१८० पा० सूत्र से संज्ञा में भी बाहुलक से डु प्रत्यय, तथा डित् लक्षण टि का लोप होने से प्रभु शब्द सिद्ध होता है। प्रभु की ही शक्ति सकल विश्व में व्याप्त है।

इस नाम में "त्वष्टा रूपाणि हि प्रभुः" इत्यादि १।१८८।९ का मन्त्र प्रमाण है।

इसी भाव को भाष्यकार इस प्रकार व्यक्त करता है—

सामर्थ्य से युक्त भगवान् विष्णु की प्रभुता के बिना लोक में अन्य कुछ है ही नहीं। भगवान् ही अपने प्रभुत्व से जगत् में व्यापक होकर, इस सकल विश्व को शक्तियुक्त बना रहा है।

युगादिकृत्—३००

योगार्थक, समाध्यर्थक वा युज धातु से, अधिकरण में घञ् प्रत्यय तथा उञ्छादि गण में पठित होने से निपातन से गुणाभाव होने से युग शब्द सिद्ध होता है। यह सब जिसमें युक्त=जुड़ा हुआ, या समाहित है, उसका नाम युग है, यह कालचक्र का नाम है। उस कालचक्र का

इति, आङ्पूर्वाद् दाधातोः—"उपसर्गे घोः किः" पा० ३।३।९२ सूत्रेण किः प्रत्यय आतो लोप आदिः। युगस्यादिर्युगादिस्तं करोतीति युगादिकृदिति सोपपदात् करोतेः क्विप्, तुक् चेति युगादिकृत्। पृथक् पृथक् समुदितं युक्तं सज्जीभूतं समाहितं वा ग्रह-नक्षत्रोपनक्षत्रसहितं विश्वं करोति विश्वं प्रचिचालयिषुस्तं गतिमत् कुरुत इति युगादिकृत् विष्णुरुक्तो भवति। लोकेऽपि च पश्यामस्तद्यथा—पृथक् वृषभौ, उष्ट्रः, यन्त्रं वा, पृथक् योक्त्रं, पृथक् हलम्, पृथक् प्रेरणयष्टिः, पृथक् रश्मिः, एवं पृथक् पृथक् साधनेषु सत्सु सस्यमुत्पिपादयिषुः कृषीवलस्तान् सर्वान् अधिकरणभूते क्षेत्रे गतिमत् कुरुते, एवं कृत्वा स कृषकोऽपि स्वकर्मसिद्धये युगादिकृत् उक्तो भवति। लोकसम्मितत्वात् पुरुषस्य, पुरुषकृतेर्वा। एवं सर्वत्र तस्यैव विष्णोर्व्याप्तं कर्म दृश्यते। तस्मात् मन्त्रोक्तं च संगच्छते—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् इति।

पदं=पदनीयं ज्ञातुमर्हं, भगवन्तं विज्ञापयितुमर्हं वा कर्म ज्ञानपूर्वकमुद्घाटितचक्षुष्काः सूरयः सदा पश्यन्ति। यथाऽऽकाशे सामान्यो जनः सूर्यं पश्यति।

मन्त्रलिंगं च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥ ऋग्

भवति चात्रास्माकम्—

जहां से आदान=आरम्भ होता है, उसका नाम युगादि है, यह सूर्य का नाम हुआ क्योंकि सूर्य से ही कालचक्र का आरम्भ होता है। उसको जो करता है, अर्थात् उसका जो आदि कारण है, उसका नाम युगादिकृत् है, यह विष्णु का नाम है। क्योंकि वह ही इस व्यष्टि तथा समष्टिरूप, सकल ज्योतिर्मण्डल सहित विश्व को करता है, अर्थात् विश्व को चलाने की इच्छा से इसको गति देता है, इसलिये युगादिकृत् है। लोक में भी हम देखते हैं, जैसे बैल भिन्न है, ऊंट भिन्न है, यन्त्र भिन्न है, जुवा भिन्न है, हल भिन्न है, तथा प्रेरणयष्टि=प्रतोद (सांटा) और रश्मि (रास) भिन्न है, इस प्रकार सब साधनों के भिन्न २ होते हुये भी कृषीवल (किसान) धान्य उत्पन्न करने की इच्छा से उन सब साधनों को खेत (क्षेत्र) में गतियुक्त करता है, इसीलिये अपने कार्यकर्ता किसान भी युगादिकृत् नाम से कहा जा सकता है। पुरुष लोकसम्मित होता है इसी प्रकार उसका कर्म भी लोक का अनुकरण होता है। इस प्रकार भगवान् के कर्म की व्याप्ति सर्वत्र देखने में आती है। यह अर्थ "तद्विष्णोः परमं पद"मित्यादि मन्त्रार्थ से सङ्गत होता है। ज्ञेय वस्तु का नाम पद है, यद्वा भगवज्ज्ञान करवानेवाले कर्म को सदा प्रबुद्ध विद्वान् प्रतिक्षण देखते हैं। जैसे आकाशस्थित सूर्य को साधारण मनुष्य देखता है। इस नामार्थ का समर्थन "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" इत्यादि ऋग्वेद मन्त्र करता है।

भाष्यकार इस नाम के भावार्थ को इस प्रकार अपने पद्यद्वारा व्यक्त करता है—

पृथक् स्थितान् विश्वहिते समर्थान् ग्रहानुडून् भानि दिशोऽथ कालम् ।
संयोज्य चक्रं कुरुते सलीलं युगादिकृत् तं कथयन्ति विष्णुम् ॥७२॥
भानि=राशयः ।

इति महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४९)
विष्णुसहस्रनामस्तोत्रस्य वेदप्रमाणोपबृंहित-
सत्यभाष्यस्य तृतीयं नाम-शतकं
पूर्णतामगमत् ।

भगवान् विष्णु का नाम युगादिकृत् है, क्योंकि वह विश्व के हित करने में समर्थ, ग्रह नक्षत्र राशि दिशा तथा काल आदि जो परस्पर पृथक् पृथक् स्थित हैं, इन सबको मिलाकर जगच्चक्र को चलाता हुआ क्रीडा कर रहा है, इसलिये भगवान् विष्णु को युगादिकृत् कहते हैं।

समाप्तमेतच्छतकं तृतीयं मनोरमं विष्णुसहस्रनाम्नः ।
अनूदितं राष्ट्रगिरा च भूयाद् भव्याय दिव्यं भुवि भावुकानाम् ॥

महाभारत अनुशासन पर्व (अ० १४९) अन्तर्गत विष्णु सहस्रनाम स्तोत्र के वेदप्रमाण से बृंहित सत्यभाष्य का तृतीय शतक पूर्ण हुआ।

युगावर्तः—३०१

युगशब्दोऽधिकरणघञन्तः कालविशेषवाचकः, "चजोः कु घिण्ण्यतोः" इति पा० ७।३।५२ सूत्रेण जस्य कुत्वे गकारे—उञ्छादिपाठाद्गुणाभावः, युज्यते=सम्बध्यते सर्वमस्मिन्निति युगस्तं तत्स्थांश्चावर्तयति=परिभ्रमयतीति युगावर्तः। युगशब्दो हि लक्षणया कालं तत्स्थांश्चाह । एवञ्च युगं युगान्तर्गतान् सूर्यचन्द्रादींश्च यः पुनः पुनरावर्तयतीति युगावर्तो भगवान् विष्णुः ।

तथा च यथा लोके कुम्भकारादिः कर्ता कृतं घटादिकं द्रव्यं पुनः पुनरेकरूपेणावावर्तयत्येवं विष्णुरपि यावत्कल्पं सूर्यचन्द्रादीन् यथापूर्वक्रमं नित्यमावर्तयति=परिभ्रमयतीति विष्णोरेष गुण आवर्तनरूपः प्रतिपदं प्रतिपलञ्च लोके व्याप्तो दृश्यते तथा च मन्त्रानुगमो यथा "स्वस्ति पन्थानमनुचरेम सूर्याचन्द्रमसाविव। पुनर्ददता घ्नता जानता संगमेमहि" ऋक् ५।५१।१५ संगमनं युगसमानार्थकं, संगतं युक्तं भवतीति यतः। भवति चात्रास्माकम्—

> आवर्तयन् स्सोऽत्र युगं युगस्थं विष्णुर्युगावर्त इहास्ति गीतः ।
> यथादिकालं भगणं१ युनक्ति सोऽद्यापि विष्णुस्तं तं तथैव ॥ ७३ ॥

१—भगणं=ग्रहगणं नक्षत्रगणञ्च ।

युगावर्तः—३०१

युग शब्द अधिकरण कारक में घञ् प्रत्यय करने से तथा घञ् प्रत्यय परे जकार को कुत्व गकार करने से, और उञ्छादिगण पाठ से गुणाभाव होने से सिद्ध होता है। जिस में सब कुछ बन्धा (जुड़ा हुआ) रहता है, उसका नाम युग है। यह काल विशेष या तत्स्थों का उपलक्षण है। इस प्रकार से जो काल या कालस्थ पदार्थों का आवर्तन=परिभ्रमण करता है, उसका नाम युगावर्त है, यह भगवान् विष्णु का नाम है। अर्थात् जो युग अथवा युगान्तर्गत सूर्य चन्द्र आदि को बार २ परिभ्रमण करवाता है, वह युगावर्त है। जैसे एक कुम्भकार (कुम्हार) आदि कर्ता अपने किये हुये घटादि द्रव्य के समान रूप से ही अन्य घटादि द्रव्यों का आवर्तन करता है, इसी प्रकार भगवान् विष्णु भी कल्पकल्पान्तरों तक सूर्य चन्द्र आदि का आवर्तन बार २ करता है। यह विष्णु का आवर्तन रूप गुण प्रतिपद और प्रतिक्षण देखने में आता है, तथा सर्वत्र व्याप्त है।

यह भाव "स्वस्ति पन्थानमनुचरेम" इत्यादि ऋक् ५।५१।१५ से पुष्ट होता है। संगमन और युग शब्द तुल्यार्थक हैं। क्योंकि ऐसा कहने में आता है, यह संगत है-अर्थात् युक्त है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

युग और युगस्थ सूर्यादिकों का पुनः पुनः आवर्तन करता हुआ भगवान् विष्णु ही युगावर्त शब्द का वाच्यार्थ है, जैसे वह कल्प या सृष्टि के आदिकाल में ग्रहगण या नक्षत्रगण का परिभ्रमण करवाता था वह आज भी उसी प्रकार आवर्तन करवा रहा है।

भगण शब्द से ग्रह गण या नक्षत्र गण का ग्रहण है।

नैकमायः—३०२

नञो भिन्नो निषेधार्थीयो न-निपातः, एका-असहाया, माया ज्ञापनहेतुभूता क्रिया, माया-शब्दो व्युत्पादितो महामायेति १०७ नाम-व्याख्यानावसरे। विशदं च तत्र द्रष्टव्यम्। नास्ति-एका माया यस्य स नैकमायः। अर्थादापद्यते यत् स विष्णुर्भूयसीः क्रिया विज्ञापनसाधनीभूता वहति, गुणप्रधाना वा। विष्णुसहस्रनामात्मकं सर्वं समुदितं व्याख्यानं नैकमायशब्दस्यैव व्याख्यानमस्तीति शास्त्रज्ञाननिष्णातैर्ज्ञेयम्।

मन्त्रलिंगं च—

इन्द्रो मायाभिः पुरुरूपमीयते।

भवति चात्रास्माकम्—

इन्द्रो महान् दीधितिभिः स्वकाभिर्मानं स एकं कुरुते ह्यनेकम्।
यथास्थिमानं कुरुते स बाहौ तथास्थिमानं कुरुते च सक्थिन् ॥७४॥

प्रत्येकं बाहुः त्रिंशदस्थ्नां बिभर्त्ति, सक्थि च तथैव त्रिंशदस्थ्नां बिभर्त्ति, रूपं कर्म च तयोर्मर्त्यदेहे भिन्नं भिन्नं भवति। तथैव तं विष्णुमनुकुर्वन् मनुष्यो नियतेन साधनेन रूपाणामनेकत्वं कुर्वन् स्वकं ज्ञानं विज्ञाने परिवर्त्तयन् सुखमश्नुते समानं च भवति लोकेन सम्मितः पुरुष इति।

नैकमायः—३०२

नैकमाय इस नाम में नञ् से भिन्न निषेधार्थीय नकार नियत है। जिसका अवबोधन करनेवाली क्रिया एक नहीं है अर्थात् अनेक हैं उसका नाम नैकमाय है। माया नाम अवबोधन =ज्ञापन के हेतुभूत चिन्ह का है, अर्थात् जिससे जाना जासके। माया शब्द का विशद व्याख्यान १०७वें महामाय नाम में किया गया है वहां देखना चाहिये अर्थात् जिसका अवबोधन करनेवाले गुण या कर्म अनेक हैं उसका नाम नैकमाय है, यह भगवान् विष्णु का नाम है। यह विष्णुसहस्रनाम इस नैकमाय शब्द का ही व्याख्यान है। इस में "इन्द्रो मायाभिः" इत्यादि मन्त्र प्रमाण है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

इन्द्र—अथवा परमैश्वर्यशाली भगवान्, नैकमाय नाम विष्णु, एक ही पदार्थ का कर्मों के द्वारा अनेक रूप से निर्माण करता है, जिस प्रकार और जितनी अस्थियों (हड्डियों) का निर्माण वह बाहुओं में करता है, उसी प्रकार उतनी ही अस्थियों का निर्माण वह जङ्घाओं में करता है।

प्रत्येक भुजा में जैसे तीस ३० तीस ३० हड्डियां हैं। उसी प्रकार प्रत्येक जङ्घा में भी तीस ३० तीस ३० हड्डियां हैं। किन्तु प्राणिशरीर में उनका रूप और कर्म भिन्न भिन्न हैं। मनुष्य भी भगवान् का अनुकरण करता हुआ रूपों की विविधता का निर्माण करता है, बहुत प्रकार के यथानियत साधनों से अपने विज्ञान का विस्तार करता हुआ। इस से लोकसम्मितः पुरुषः इस सिद्धान्त की पुष्टि होती है।

महाशनः—३०३

अशनः, अशूङ् व्याप्तौ, अश भोजने, आभ्यां ल्युटि-अशनः सिद्ध्यति। महदशन-मस्यास्तीति महाशनः। अशनं हि नाम-आत्मनि धारणं रूपान्तरे वा व्यवस्थापनम्। तद्यथा–अन्नं भुञ्जानः स्वोदरे भोज्यं निदधाति, भुक्तं च वा दोष-धातु-मलेषु विपरिणमय्य रूपान्तरे व्यवस्थापयति। अमुथैव विष्णोर्व्यवस्थया-आदित्यः प्राणिन आददानो याति। तद्व्यवस्थयैव मृत्युः प्राणिनो मारयति। मृतं देहान्तरेण योजयति, मृत-शरीर-विकारान् पंचभूतानि निगृह्णन्ति=स्वात्मनि निलाययन्ति। एष क्रमः सर्वत्र व्यश्नुवानो दृश्यतेऽतो महाशनो विष्णुरिति युक्तं संगच्छते। एवं त्रिविधमूहनीयं भवति, तद्यथा—पृथिव्या विकारान् वृक्षा आददते, ते वृक्षाः पुनस्तं विकारं पत्र-पुष्प-फलेषु विपरिणमयन्ति, तानि पत्र-पुष्प-फलानि मनुष्योऽश्नाति, स मनुष्यस्तं दोष-धातु-मलेषु च विपरिणमयति, तं पौरुषं जैवं वा पुनर्वृक्षाः स्व-खाद्यरूपेणाददते, एवं चक्रवद् भ्रमति लोको महाशनस्य विष्णोर्गर्भे। एष क्रमस्तमेव महाशनं विष्णु-मन्वाख्याति। मन्त्रलिंगं च—

वायुरनिलममृतमथेदं भस्मान्तँ शरीरम्। यजु० ४०-१५

भवति चात्रास्माकम्—

महाशनः—३०३

व्याप्त्यर्थक स्वादिगणपठित अशूङ् तथा भोजनार्थक क्र्यादि गणपठित अश धातु से ल्युट् प्रत्यय करने पर अशन शब्द सिद्ध होता है। जिसका व्यापन (व्याप्ति) या भोजन महत् (बड़ा) है, उसका नाम महाशन है। अशन नाम किसी अन्य वस्तु का अपने में धारण करना, अथवा किसी वस्तु का किसी दूसरे रूप में परिणमन करने का है। जैसे भोक्ता किसी अन्न का भक्षण करके अपने में धारण करता है, तथा उस भक्षित वस्तु का दोष धातु मलादि रूपों में परिणाम करके रूपान्तरों में व्यवस्थित कर देता है।

इसी प्रकार भगवान् विष्णु की व्यवस्था से सूर्यदेव प्राणियों का आदान (ग्रहण) करता है, तथा उसी की व्यवस्था से मृत्यु प्राणियों को मार कर उन्हें अन्य देहों में परिणत अर्थात् रूपान्तरों में व्यवस्थित करता है। मृत्यु हुये शरीर के विकारों को पञ्चभूत अपने में लीन (धारण) कर लेते हैं। यह ही क्रम सर्वत्र व्याप्त देखने में आता है, इसलिए विष्णु का महाशन नाम युक्तिसङ्गत है। इसी प्रकार अन्यान्य प्रकार की कल्पनायें करलेनी चाहियें। जैसे वृक्ष पृथिव्यादि के अंश को अपने में धारण करके उसे पत्र पुष्प फल आदिमें परिणत कर देते हैं, फिर उन ही पत्र पुष्प फलादिकों को मनुष्य आदि खाते हैं, और दोष धातु मल रूप में परिणमन कर देते हैं तथा उस मल को फिर वृक्ष अपने खाद्य रूप से ग्रहण करते हैं। इस प्रकार यह सम्पूर्ण विश्व इस महाशन विष्णु के गर्भ में चक्र के समान भ्रमण कर रहा है। यह क्रम उस महाशन विष्णु का ही व्याख्यान कर रहा है। इसी भाव को "वायुरनिलममृतम-थेदमित्यादि यजुर्वेद अध्याय ४० मन्त्र १५ प्रमाणित करता है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

मृत्युर्न तृप्तिं भजते कदाचित् मृता यतन्ते न च देहलब्ध्यै ।
भुक्तं ह्यभुक्तं कुरुते ह विश्वं महाशनं विष्णुमियर्ति भोज्यम् ॥ ७५ ॥

अभुक्तं=दोष-धातु-मलेषु विपरिणमय्य वृक्षादिभ्यो भोज्यरूपेण तदेव ददातीति भावः । इयर्ति=प्राप्नोति ।

अदृश्यः—३०४

अदृश्यः, दृशिर् प्रेक्षणे धातुः, चक्षुषा द्रष्टुं शक्यं दृश्यम्, तस्य प्रतिषेधोऽदृश्यम् । विष्णुरपि स्थूलचक्षुषा द्रष्टुमशक्योऽस्तीति कृत्वाऽदृश्य उक्तो भवति । तद्यथा गर्भोऽनुमानगम्यः । मातृकलाभिरन्तापिहितत्वाद् गर्भस्य, गर्भोऽस्ति चादृश्यश्च । तथैव विष्णुरस्ति चादृश्यश्च ।

मन्त्रलिंगं च—

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ॥ अथर्व १०-८-१३

एष एव च तस्य विष्णोः क्रमश्चतुर्विधसृष्ट्यां सर्वं व्यश्नुवानो दृश्यते ।
भवति चात्रास्माकम्—

प्राणियों का प्रतिक्षण ग्रसन करता हुआ भी मृत्यु कभी तृप्त नहीं होता, तथा मृत्यु को प्राप्त हुये प्राणी फिर शरीर प्राप्ति के लिये किसी प्रकार का प्रयत्न नहीं करते, यह सकल विश्व भुक्त को अभुक्त करता हुआ, अर्थात् खाये हुये को फिर मलरूप से दूसरों का भोज्य बनाता हुआ स्वयं भोज्य रूप से भगवान् विष्णु को प्राप्त होता है ।

भुक्त किये हुये का दोष धातु मल रूप में परिणाम करके खाद रूप से वृक्षादिकों को देना ही अभुक्त को भुक्त करना है ।

अदृश्यः—३०४

दृशिर् प्रेक्षणार्थक भ्वादिगणपठित धातु से क्यप् प्रत्यय करने से दृश्य पद सिद्ध होता है। जो देखा नहीं जा सके उसका नाम अदृश्य है । भगवान् विष्णु चक्षु का विषय न होने से अदृश्य है ।

जैसे स्त्री के उदर में स्थित गर्भ स्त्री के अङ्गों से आच्छादित होने के कारण अदृश्य है और स्त्री-लक्षणों से प्रतीत होने के कारण उसका अस्तित्व भी है, इसलिये वह अनुमानगम्य है । इसी प्रकार भगवान् अदृश्य होने पर भी है, यह तर्कानुमानसहकृत आगम से सिद्ध है। इसी भाव को "प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो" इत्यादि १०।८।१३। अथर्व मन्त्र पुष्ट करता है । चतुर प्रकार की सृष्टि में भगवान् का यह ही क्रम समग्ररूप से व्याप्त हुआ दीखता है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

स विष्णुरन्तः प्रतिप्राणिसंस्थो विद्योतयत्यात्मविभूतिमन्तः ।
तथा यथा जन्तुरनन्यबुद्धिर्गुह्यानि कुर्वन् न जनैर्हि दृश्यः ॥ ७६ ॥

गुह्यानि=गुप्तानि, जनेभ्यः प्रतिरक्षितुमर्हाणि ।

व्यक्तरूपः—३०५

व्यक्तरूपः—वि-उपसर्गः, अंजतेः क्त-प्रत्यये-अक्तः । रूपशब्दश्च रू शब्दे धातोः खष्प-शिल्प-शष्प-बाष्प-रूप-तर्प-तल्पाः (उणादिः-३-२८) इत्यनेन सूत्रेण पप्रत्ययस्य दीर्घस्य च निपातनात् सिध्यति ।

व्यक्तं स्पष्टं रूपयतीति व्यक्तरूपो विष्णुः । भागवतेऽस्मिन् लोके प्रच्छन्नमपि भगवान् व्यक्तं रूपयति, तद्यथा-इयमन्तर्वत्नी पुत्रगर्भा पुत्रीगर्भा वेति जिज्ञासायां लज्जावन्तं क्षुपं स्पृशन्ती माता व्यक्तं विजानाति विज्ञापयति वान्तःस्थं गर्भम्, तत्र यदि लज्जालुः क्षुपः स्वानि पत्राणि संकोचयति तदा पुत्रवती, यदि लज्जालुः क्षुपः स्वानि पत्राणि न संकोचयति तदा पुत्रीगर्भेयमिति व्यक्तं रूप-दर्शनमिव भवति, अन्तर्वत्न्या नेत्रयोर्गुरुत्वलघुत्वसद्भावोऽपि गर्भं लिंगभेदे स्पष्टं व्यक्तरूपमिव विवेचयति, एवं सर्वत्र भगवान् विश्वमिदं व्यक्तरूपं कुर्वन् सर्वत्र स्वात्मगुणेन व्यक्तरूपेण विश्वं वेवेष्टीति कृत्वा विष्णुर्व्यक्तरूप उक्तो भवति ।

एवं विविधमूहनीयं भवति लोक-वेद-ज्ञाननिष्णातैर्जिज्ञासुभिरिति ।

मन्त्रलिंगं च —

सब प्राणियों में गुप्त रूप से स्थित भगवान् अपने परमेश्वर भाव को प्रकट कर रहा है तथा अदृश्य है, जैसे कि कोई मनुष्यप्राणी गुप्त रूप से गुह्य कर्म करता हुआ औरों से अदृश्य होता है ।

गुह्य नाम गुप्त का है, जो अन्य मनुष्यों से छिपाने लायक होता है ।

व्यक्तरूपः—३०५

वि-उपसर्ग पूर्वक अञ्जू धातु से क्त प्रत्यय होने से व्यक्त शब्द की सिद्धि होती है । तथा रूप शब्द, रु इस शब्दार्थक धातु से "खष्पशिल्पशष्प" इत्यादि सूत्र से औणादिक प प्रत्यय और दीर्घ के निपातन से सिद्ध होता है । व्यक्त नाम स्पष्ट, रूप नाम दिखाना या कहना, अर्थात् जो अन्तर्हित=निगूढ वस्तु को स्पष्ट रूप से प्रत्यक्ष के समान दिखा रहा है या कह रहा है उसका नाम है व्यक्तरूप, विष्णु का नाम है ।

स्वनिर्मित इस विश्व में भगवान् प्रच्छन्न वस्तु को भी स्पष्ट करके दिखाता है । जैसे कोई अन्य या गर्भवती स्वयं यह जानने की इच्छा करे कि गर्भ में पुत्र है या पुत्री तो वह लज्जावन्ती के पौधे का स्पर्श करती है, स्पर्श करने से यदि उस क्षुप के पत्ते संकुचित हो जायें तो पुत्री, यदि संकुचित न होवें तो पुत्र है यह स्पष्ट प्रतीत होता है । गर्भवती के नेत्रों का गुरुत्व और लघुत्व

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ अथर्व ७ २६'२
सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि । यजुः ३।५२

भवति चात्रास्माकम्—

सोऽव्यक्तरूपो हि महान् वरेण्यो व्यनक्ति रूपं प्रतिवस्तुसंस्थम् ।
तं व्यक्तरूपं प्रतिवस्तुसंस्थं विजानते ज्ञानदृशः समन्तात् ॥ ७७ ॥

महान्=विष्णुः, तत्र मन्त्रलिंगं—महिना महान् ऋग् ८।१२।२६, इन्द्र इति शेषः।

सहस्रजित्— ३०६

शत-सहस्र-शब्दौ बहुपर्यायौ निघण्टौ पठितौ । सहस्रं जयतीति सहस्रजित् । मन्त्रलिंगं च—

गोजिन्नः सोमो रथजिद्धिरण्यजित् स्वर्जिदब्जित् ।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्टं द्रप्समरुणं मयोभुवम् ॥

ऋक् ९ ७८।४

लोकेऽपि च पश्यामः—इनेन स्वामिनात्मना सहितेन सम्पूर्णावयवयुक्तेन मनुष्येण जय्यं जीयते न हि निर्गतेनो मृतस्तथाकर्तुं शक्नोति, एष हि तस्य विष्णोः सर्वं व्यश्नुवानस्य नियमो दृश्यते, अतः सहस्रजिद् विष्णुरुक्तो भवति ।

भी गर्भ के पुत्र या पुत्री का ज्ञापक होता है । इस प्रकार भगवान् इस सकल विश्व को अपने व्यक्तरूपरूप गुण से व्यापन करता हुआ विष्णु नाम का वाच्य होता है । इसी प्रकार लौकिक और वैदिक ज्ञान में कुशल विद्वानों ने और भी ऊहायें कर लेनी चाहियें । इस भाव की पुष्टि इस 'तद्विष्णोः परमं पदं सदे'त्यादि अथर्व ७।२६।२। मन्त्र से होती है तथा "सुसन्दृशं त्वा वयं" मन्त्र भी इस की पुष्टि करता है । भाष्यकार इस भाव को अपने पद्य द्वारा संक्षेप से इस प्रकार व्यक्त करता है—

सब के प्रार्थनीय सर्वश्रेष्ठ महान् विष्णु अव्यक्त रूप होते हुए भी प्रत्येक वस्तु में स्थित अन्तर्हित=अव्यक्त वस्तु को व्यक्त के समान बोधित करने से व्यक्त रूप कहे जाते हैं तथा प्रत्येक वस्तु में स्थित उस भगवान् व्यक्त रूप को विद्वान् पुरुष ज्ञानदृष्टि से देखते हैं विष्णु महान् है इसमें "महिना महान्" यह ऋक् मन्त्र प्रमाण है ।

सहस्रजित्– ३०६

शत और सहस्र शब्द का निघण्टु में बह्वर्थक शब्दों में पाठ है, जो सहस्रों अर्थात् बहुतों को जीतता है उसका नाम सहस्रजित् है । इस ही अर्थ को कहनेवाला "गोजिन्नः सोमो रथजि" दित्यादि ९।७८।४। ऋग्वेद मन्त्र है ।

लोक में भी देखा जाता है, अपने स्वामी आत्मा से युक्त सावयव शरीरी मनुष्य जीतने में शक्य अर्थात् जीती जानेवाली वस्तु को जीत लेता है, किन्तु वह ही अपने स्वामी आत्मा के निकल जाने पर कुछ भी करने में समर्थ नहीं रहता । ऐसा ही सर्वत्र व्यापक रूप से स्थित भगवान् विष्णु का नियम देखने में आता है । इसलिये विष्णु का सहस्रजित नाम है ।

भवति चात्रास्माकम्—

सेना यथा स्वाम्युपदिष्टनेत्रा जयत्यशेषान् द्विषतां महौघान् ।
तथैव देही सकलांगयुक्तो जय्यं पराजित्य च मोमुदीति ॥ ७८ ॥

अनन्तजित्– ३०७

मनुष्यो यत् संख्यायं संख्यायमियत्तया परिच्छेत्तुं न शक्नोति तदनन्तं, तज्जयतीत्यनन्तजित् । अनन्तानि लोकलोकान्तराणि भगवान् विष्णुः स्वकेन वीर्येण जयति वशे कुरुत इति वा तस्मात् स अनन्तजिद् विष्णुरुक्तो भवति। तद्यथा लोकेऽपि पश्यामो यद् यावज्जीवं मनुष्योऽनन्तान् विघ्नान् जयति, तेषां विघ्नानां जये वा कृतप्रयत्नस्तिष्ठति परन्तु विघ्नानामन्तं न पारयति, अत उक्तं भवति विघ्नास्त्वनन्ताः, तान् जयतीति कृत्वा मनुष्योऽप्यनन्तजिदुक्तो भवति । मनुष्यस्यानन्तजित्त्वं तस्यैवानन्तजितोर्विष्णोरन्वाख्यानमात्रमेव भवति ।

मन्त्रलिंगं च—

अनन्तं शुष्ममुदियर्ति भानुना । ऋग् १०।७५।३

भवति चात्रास्माकम्—

अनन्तजिद् विष्णुरनन्तलोकान् वशे स्ववीर्येण दधाति नित्यम् ।
तथा यथा ना निजसिद्धशक्त्या विघ्नाननन्तान् निहतान् विधत्ते ॥ ७९ ॥

इसी भाव को भाष्यकार अपने पद्य द्वारा संक्षेप से कहता है—

जैसे सेनापति के द्वारा उपदिष्ट मार्ग से चलती हुई सेना शत्रुओं के समूह को जीतकर प्रसन्न होती है, वैसे ही वह सावयव शरीरी जीतने में शक्य वस्तु को जीतकर अत्यन्त प्रसन्न होता है ।

अनन्तजित्– ३०७

जिसकी गणना करके भी अन्त न पास के अर्थात् जो गणना में न आये उसका नाम अनन्त है और उस अनन्त को जो जीत लेता है उसका नाम अनन्तजित् है । भगवान् विष्णु अनन्त लोक लोकान्तरों को अपनी शक्ति से जीते हुये वा वश में किये हुये हैं, इसलिये भगवान् विष्णु का नाम अनन्तजित् है । तथा लोक में मनुष्य भी अपने जीवन सुख मे या कार्य में बाधक अनन्त विघ्नों को जीतता या जीतने की कोशिश (प्रयत्न) करता है, इसलिये मनुष्य का नाम भी अनन्तजित् है । क्योंकि विघ्नों का अन्त नहीं होता इसलिये विघ्न अनन्त है । यह विष्णु का अनुकरण मात्र है, जो मनुष्य का अनन्तजित् होना है । इसमें "अनन्तं शुष्ममुदियर्ति भानुना" यह १०–७५–३ ऋग्वेद मन्त्र प्रमाण है । इस भाव को भाष्यकार अपने पद्यद्वारा संक्षेप से यों व्यक्त करता है—

भगवान् विष्णु का नाम अनन्तजित् है, क्योंकि वह अपने बलसे अनेक=अनन्त लोक लोकान्तरों को वश में करके धारण कर रहा है । इसी प्रकार मनुष्य भी अपनी शक्ति से अनन्त विघ्नों का निराकरण या हनन करने से अनन्तजित् नाम से कहा जाता है ।

इष्टः—३०८

देवपूजा-संगतिकरण-दानार्थाद् यजतेः क्त-प्रत्यये वचिस्वपियजादीनां किति पा० ६।१।१५ इत्यनेन संप्रसारणे कृते, व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः इत्यनेन झलि परतः पदान्ते च षान्तादेशः। प्रत्यय-तकारस्य "ष्टुना ष्टुः" पा० ८।४।४१ इत्यनेन टवर्गादेशः, एवं निष्पद्यते "इष्टः" शब्दः।

इच्छार्थादिषेर्वा "इष्टः"। यः सर्वैरिज्यते, यद्वा सर्वैरिष्यते=इच्छाविषयीक्रियते प्राप्तुमितीष्टः। तथा च वेदे देवा यज्ञेन यज्ञम्, "यज्ञो वै विष्णु"रिति च ब्राह्मणम्। विष्णुमयजन्त पूजितवन्तो वा तस्माद्विष्णुरिष्ट उक्तो भवति, यज्ञो हि संगतिकरणाद् दानादानाद् वा सर्वं व्यश्नुवानो दृश्यते, यदुक्तं संगतिकरणादिति तत्रायमभिसंधिः- सूर्यादयो ग्रहाः सनक्षत्रा गत्या भिन्ना अपि सन्तो विश्वस्योपकाराय संलग्नाः समाने काले व्रजन्तो यजन्ते, तद्यथा—एकस्मिन् मेरुदण्डे संगता हस्त-पाद-पर्शुकाः सशिरस्काः देहिनमात्मानं यजन्ते, अत्र शरीरे विष्णुरात्मा स्वशक्त्या प्रत्येकम् मनसा पुरुषं शरीरं पशुं पश्यतिमात्रं निबध्नाति, एवं हि दानादानेन च परस्परं पश्यतिमात्रं पुरुषं जगत् निबद्धं भवति।

मन्त्रलिंगं च—

यज्ञेन यज्ञमयजन्त देवाः। यजुः-३१-१६

भवति चात्रास्माकम्—

इष्ट—३०८

देवपूजार्थक सङ्गतिकरणार्थक तथा दानार्थक यज धातु से क्त प्रत्यय "वचिस्वपी"-त्यादि सूत्र से सम्प्रसारण, यकार को इकार ' व्रश्चभ्रस्जसृजे"त्यादि सूत्र से अन्त को षकार आदेश तथा "ष्टुना ष्टु" सूत्र से तकार को टकार आदेश करने से इष्ट शब्द की सिद्धि होती है।

यद्वा इच्छार्थक इष धातु से क्त प्रत्यय करने से इष्ट शब्द की सिद्धि होती है। जिसका सब यजन=पूजन करते हैं, अथवा जिसको सब प्राप्त करना चाहते हैं उसका नाम इष्ट है। वेद में भी ऐसा प्रसङ्ग है कि देवों ने यज्ञ के द्वारा यज्ञ की पूजा की, यज्ञ नाम भगवान् विष्णु का है "यज्ञो वै विष्णुः" ऐसा ब्राह्मण वचन भी है। इसलिये सब से पूजित या सब का इष्ट होने से इष्ट नाम भगवान् विष्णु का है। सङ्गतिकरण या दान आदान रूप क्रिया से वह सर्वत्र व्याप्त है। संगतिकरण रूप क्रिया से व्याप्ति का अभिप्राय इस प्रकार है—

नक्षत्रों सहित सूर्य आदि ग्रह भिन्न गति अथवा गति से भिन्न होते हुये भी परस्पर सङ्गत=सम्बद्ध होकर एक ही समय में विश्व का उपकार रूप यज्ञ करते हुये चलते हैं। जैसे एक मेरुदण्ड में सङ्गत=सम्बद्ध कपालास्थियों सहित हस्त-पाद तथा पार्श्व अस्थियां शरीरी आत्मा का यजन करती हैं। इस शरीर में आत्मरूप विष्णु अपनी शक्ति से तथा मनोरूप बन्धन से सकल-पुरुष शरीर रूप दृश्य को बांध देता है। इसी प्रकार यह दृश्य पुरुष जगत् दान आदान रूप क्रिया से निबद्ध है। इसमें "यज्ञेन यज्ञमयजन्त देवाः" यह मन्त्र प्रमाण है। इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

यज्ञेन देवा अयजन्त यज्ञमिष्टो हि तस्मादिह विष्णुरुक्तः ।
यज्ञेन विश्वं परिवर्त्तमानं गर्भे स्वके तद् कुरुते ह यज्ञः ॥ ८० ॥

तत्=विश्वमिति ॥

अविशिष्टः—३०९

विशेषेण युक्तो विशिष्टो न विशिष्टोऽविशिष्ट इति निर्विशेष इत्यर्थः । समानरूपेण सर्वान्तर्यामित्वादविशिष्टः । अथवा-प्रतिजातिभेदेन समानरूपेण दत्तेन्द्रियान्तःकरणादिसाधनत्वाद् अविशिष्टः । तद्यथा मनुष्याः सर्वत्र समानेन्द्रियगोलकव्यवस्थाना दृश्यन्ते, एवं काकाः, मृगाः, मत्स्याः, मकराः, कच्छपाः, सिंहाः, शृगाला इत्यादयः, एवं वृक्ष-लता-गुल्मेष्वपि दृश्यते । यत्र भूगोलकृतो भेद उत्पद्यते तत्र सर्वेषु तत्रत्येषु समानरूपेणैव भेदो व्यश्नुवानो दृश्यते ।

भवति चात्रास्माकम्—

समानरूपेण स जन्तुमात्रं युनक्त्यशेषैः करणैः समानैः ।
लोकेऽस्ति विष्णुरविशिष्ट उक्तस्तथैव वृक्षादिषु कल्पनीयम् ॥ ८१ ॥

शिष्टेष्टः—३१०

शिष्टः-शासु अनुशिष्टौ, इत्यस्माददादिकात् क्त-प्रत्यये शास इदङ्हलोः पा०

भगवान् विष्णु का नाम इष्ट है, क्योंकि देवों ने यज्ञ के द्वारा भगवान् यज्ञ की पूजा की है, तथा यज्ञ के सहित परिवर्तमान सकल विश्व को वह अपने में धारण करता है ।

अविशिष्टः—३०९

जो किसी प्रकार के विशेष भाव से युक्त हो उसको विशिष्ट कहते हैं तथा जो विशिष्ट नहीं है, उसका नाम अविशिष्ट है, अर्थात् अविशिष्ट नाम निर्विशेष का हुआ, क्योंकि वह समान रूप से सर्वान्तर्यामी अर्थात् सब के अन्तःस्थित है, इसलिये उसका अविशिष्ट नाम है । यह भगवान् विष्णु का नाम है । अथवा जातिभेद के अनुसार समान अन्तःकरण तथा बाह्येन्द्रिय आदि साधन देने से वह अविशिष्ट है । जैसे काग-मृग-मच्छ-कच्छुवे-सिंह तथा शृगाल =गीदड़ आदि सब ही अपनी २ जात्यनुसार अन्तःकरणेन्द्रियादि से युक्त हैं । यह ही प्रकार वृक्ष-लता-गुल्म-झाड़ आदि क्षुपों में देखने में आता हैं । जहां भौगोलिक भेद होता है वहां पर वह भेद भी सब में समान ही होता है ।

भाष्यकार इस भाव को इस प्रकार व्यक्त करता है—

वह प्रत्येक जीव को समान अन्तःकरण इन्द्रियादि साधनों से युक्त करता है, तथा भौगोलिक भेदानुसार वृक्षादिकों को भी समान ही बनाता है, इसलिये भगवान् अविशिष्ट है ।

शिष्टेष्टः—३१०

इष्ट शब्द की सिद्धि पूर्व की जा चुकी है । शिष्ट शब्द अनुशासनार्थक अदादिगणपठित शासु धातु से क्त प्रत्यय करने पर "शास इदङ्हलोः" सूत्र से उपधा को इत्व तथा 'ष्टुना ष्टुः'

६-४-३४ सूत्रेण शास उपधाया इत्वं, शासिवसिघसीनां च पा० ८-३-६०, इत्यनेन षत्वं, ष्टुना ष्टुः पा० ८-४-४१, इत्यनेन टुत्वम्— । इष्ट-शब्दो व्युत्पादितचरः ॥ शिष्टैरिष्टो यज्ञेन यज्ञ इष्ट इति शिष्टेष्टः ॥ के पुनः शिष्टाः ? साध्या देवाः ।

मन्त्रलिंगं च—

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ यजुः ३१-१६ ।

साध्यैर्देवैरयं सर्वव्याप्तो यज्ञ इष्टस्तस्मात् शिष्टेष्टत्वं सर्वव्याप्तं दृश्यते, यतः प्रत्यहं प्रतिक्षणं लोकोऽयं यज्ञे प्रतिष्ठमान आस्ते ।

सर्वव्याप्तत्वं यज्ञस्यात्रैव यथा—यत् पुरुषं व्यदधुः यजु ३१-१०, इत्यत्र जगत्-पर्यायः पुरुष-शब्दो यता नपुंसकलिंगेन निर्दिष्टत्वात् ।

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ यजु ३१-१४

तत्र यज्ञे—वसन्ततुं राज्यं घृतमासीत्, कुत एवं हेमन्तशिशिरयोश्चितं संघीभूतं द्रवमयं वसन्ते सूर्यखरांशुभिर्द्रवतां प्राप्नोति, पृथिव्यां पार्थिवा रसाः, मनुष्ये च श्लेष्मा धातवश्च उपचयं प्राप्ताः सन्तः, फाल्गुनस्य पंचदशदिनानि व्यतियाय १५ वैशाख इति यावत् स्वद्रवणधर्ममनुप्राप्ताः श्लैष्मिकान् रोगान् कुर्वते । अमुथैव विश्व-

से ष्टुत्व करने से सिद्ध होता है । शिष्टों के द्वारा जिसका यजन=पूजन किया गया है, यद्वा शिष्टों का जो ईप्सित है, उसका नाम शिष्टेष्ट है । शिष्ट नाम साध्य देव ऋषि आदिकों का है, इन्होंने ही प्रथम यज्ञ के द्वारा यज्ञरूप भगवान् विष्णु का यजन किया था जो कि "यज्ञेन यज्ञमयजन्त देवाः" इत्यादि ३१।१६। यजुर्वेद मन्त्र से सिद्ध होता है । सर्व व्यापक भगवान् यज्ञरूप विष्णु का साध्य देव ऋषि आदि शिष्टों ने यजन किया, यह ही शिष्टेष्टत्वरूप धर्म प्रतिदिन तथा प्रतिक्षण लोक में यज्ञ रूप से व्याप्त दीखता है, क्योंकि यह सकल लोक प्रतिक्षण यज्ञ में ही संलग्न रहता है । "यत्पुरुषं व्यदधुः" इत्यादि यजुर्वेद ३१।१०। मन्त्र से यज्ञ की सर्वव्यापकता सिद्ध होती है । इस मन्त्र में नपुंसक लिङ्ग यत् शब्द से निर्दिष्ट होने के कारण पुरुष नाम जगत् का है ।

यत् पुरुषेण हविषेत्यादि मन्त्रार्थानुसार उस यज्ञ में वसन्त ऋतु घृत था, इसका वास्तविक अभिप्राय यह है कि जो शिशिर और हेमन्त ऋतु में शीताधिक्य से रस में घनता=कठिनता आजाती है, वह वसन्त ऋतु में सूर्य तेजःकणों से द्रुत होने से पिघलने लग जाती है, तथा पिघलने से रस का क्षरण आरम्भ हो जाता है, इस रस के क्षरणाभिप्राय से ही वसन्त ऋतु में घृतत्व की कल्पना की गई है । पृथिवी में पार्थिव रस, मनुष्य में श्लेष्मा तथा अन्य धातुयें प्रवृद्ध होकर फाल्गुन के १५ दिन जाने के बाद आधे वैशाख तक द्रुत होकर श्लेष्मा सम्बन्धी रोगों को उत्पन्न करते हैं ।

यज्ञे ग्रीष्मर्तु रश्मि-स्थानीयः, प्रखरतरत्वात्सूर्यकिरणानां सर्वं जारयति, हविःस्थानीयः शरदृतुसूर्यः, तत्र शीताभिमुखत्वात् सूर्यस्य, अत एव च यवैर्व्रीहिभिर्वा जुहुयादित्युक्तं संगच्छते, यव-व्रीहयो॰ शरदन्तर्भूतत्वात्। अस्य पुरुषस्य, अर्थात् जगतः सप्त परिधय आसन्। ते च सप्त वायवः, तद्यथा— आवह-प्रवहानुवह-संवह-विवह-परावह-परिवहाः, तत्र—मेघपृथिव्योरन्तराले आवहः, मेघसूर्ययोरन्तराले प्रवहः, सूर्यचन्द्रमसोरन्तराले "अनुवहः", चन्द्रनक्षत्रयोरन्तराले "संवहः", नक्षत्रग्रहयोरन्तराले "विवहः", ग्रहसप्तर्षयोरन्तराले "परावह", सप्तर्षिध्रुवयोरन्तराले "परिवहः"। विश्वयज्ञस्यास्य त्रिगुणिताः सप्तसमिधः, सूर्य-चन्द्र-मंगल-बुध-गुरु-शुक्र-शनयः, ते हि दीप्तिमत्त्वात् समिध इव। ते च वसन्ते ग्रीष्मर्तौ शरदृतौ च समिद्धतेजा भवन्ति, हेमन्त-शिशिर-वर्षर्तू नामपेक्षया। भूगोलस्य सूर्यकृतोष्णभेदाः दृतूनां तथैव कल्पना कर्त्तव्या भवति, वेदस्य वस्तु-तत्त्वभूत-नियम-निर्देशनपरत्वात्।

एवं संक्षेपतो यज्ञस्य विश्वव्यापकत्वमुक्तं, संगच्छते च ब्राह्मणम्—"यज्ञो वै विष्णुरिति।" भवति चात्रास्माकम्—

इसी प्रकार इस विश्वयज्ञ में ग्रीष्म ऋतु समिध रूप है क्योंकि इस ऋतु में सूर्य किरणों के अत्यन्त प्रचण्ड हो जाने से रस का शोषण हो जाता है। शरद् ऋतु हविस्थानीय है इसमें सूर्य के तैजस कणों के क्षीण हो जाने से शीत प्रारम्भ हो जाता है, इसीलिये शरद् ऋतु के गुण विशिष्ट यव तथा चावलों से हवन किया जाता है, इसी प्रकार का "यवैर्व्रीहिभिर्वा जुहुयात्" यह वैदिक वचन है। यव और व्रीही शरद् ऋतु के ही अन्तर्भूत हैं। इस पुरुष अर्थात् जगत् की सात ७ परिधियां हैं, जोकि सप्त वायुरूप हैं, वे सप्त वायु रूप कौन कौन नाम के तथा कहां पर हैं इसका वर्णन इस प्रकार है— आवह नाम का वायु मेघ और पृथिवी के मध्य भाग में, प्रवह नामक वायु मेघ और सूर्य के मध्य में, अनुवह नामक वायु सूर्य और चन्द्रमा के मध्य में, संवह नामक वायु चन्द्र और नक्षत्रों के मध्य में, विवह नामक वायु नक्षत्र और ग्रहों के मध्य में, परावह नामक वायु ग्रह और सप्त ऋषियों के मध्य में, तथा सप्त ऋषियों और ध्रुव के मध्य में परिवह नामक वायु रहता है। इस विश्वयज्ञ के वसन्त-ग्रीष्म-शरद् ऋतु कृत शीतोष्णसमदीप्ति, प्रखरोष्णदीप्ति तथा शीतदीप्ति भेद से ७ सात चन्द्र-मङ्गल-बुध-बृहस्पति-शुक्र-शनि ये ग्रह त्रिगुणित अर्थात् तीन प्रकार से भिन्न होकर २१ प्रकार की समिधायें मानी जाती हैं, अर्थात् जैसे समिधायें अग्नि का समिन्धन=दीपन करती हैं उसी प्रकार ये ग्रह भी दीप्तिमान होने से जगद् रूप यज्ञ का दीपन=प्रकाशन करते हैं, इसलिये इनकी समिध् रूप से कल्पना की है। भूगोल के उत्तर दक्षिणायन रूप सूर्य के गतिभेद से उष्णता की न्यूनता और अधिकता के कारण ऋतुओं की भी शीत तथा उष्ण भाव से कल्पना की गई है, क्योंकि वेद वस्तुतत्त्व का प्रतिपादन करता है इस प्रकार यज्ञ की विश्वव्यापकता का संक्षेप से प्रतिपादन किया है। "यज्ञो वै विष्णु" इस ब्राह्मण वचन की भी इसमें सङ्गति होती है।

इस उपरोक्त भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

शिष्टा हि साध्या अयजन्त यज्ञं यज्ञो हि विश्वं परितोऽभ्युपैति।
शिष्टेष्ट-नाम्ना च स विष्णुक्तस्तं चानुकुर्वन्ति नराश्च शिष्टाः ॥ ८२ ॥

शिखण्डी—३११

शिखाशब्दः शीङ्धातोः "शीङो ह्रस्वश्च" इत्युणादि ५।२४ सूत्रेण खः प्रत्ययो धातोरीकारस्य ह्रस्वश्च, तथा स्त्रीत्वविवक्षायां टाबिति सिध्यति ज्वालार्थकः। अण्ड-शब्दश्च गत्यर्थकाद्—अमधातोः "अमन्ताड्डः" इत्युणादिसूत्रेण ड-प्रत्यये सिध्यति, तथा च-अमति=गच्छति, व्याप्नोति वा-अण्डः। शिखया=तेजोरूपया ज्वालया शेत आकाशे व्याप्नोति विषयं, गच्छत्यूर्ध्वमाकाशमिति वा शिखण्डः सूर्योऽग्निर्दीपो वा। शिखा-अण्ड इत्यत्र शकन्ध्वादिलक्षणं पररूपं शिखण्ड इति। स स्वविकारसहितः शिखण्डः सूर्योऽस्यास्मिन् वास्तीति शिखण्डी विष्णुः, मतुबर्थीय इनिः। यद्वा शक्लृ शक्ताविति स्वादिगणपठितधातोर्बाहुलकादुणादिः "अण्डन्" प्रत्ययो धातोरिकारागमो वर्णविपर्ययश्चेति शक्नोति सर्वथेति शिखण्डः समर्थः, समर्थाश्चेमे सृष्ट्यवलम्बनाः सशक्तिका ब्रह्मादयस्तेऽस्य सन्तीति शिखण्डी परमेश्वरो विष्णुः। आकाशशयनरूपार्थ-सामान्यात् शिखण्डेति-इन्द्रधनुषोऽपि नाम तदपि शेत आकाशे। निर्वचनश्चाक्षरवर्ण-

---

शिष्ट नाम साध्य देवों ने भगवान् यज्ञ रूप विष्णु का यजन किया, तथा वह यज्ञ इस सकल विश्व में व्याप्त है, शिष्टों के द्वारा पूजित होने से भगवान् विष्णु का नाम शिष्टेष्ट है, अनिन्दिताचार शिष्ट पुरुष भी सदा विष्णु का अनुकरण करते हैं।

शिखण्डी—३११

शिखा शब्द की सिद्धि शीङ् इस शयनार्थक धातु से उणादि ख प्रत्यय धातु के इकार को ह्रस्वादेश तथा स्त्रीत्व की विवक्षा में टाप् प्रत्यय करने से होती है। शिखा शब्द ज्वाला अर्थ का वाचक है।

अण्ड शब्द गत्यर्थक अम धातु से उणादि ड प्रत्यय करने से बनता है, जो गति करता है, अथवा व्यापन करता है उसका नाम अण्ड है, जो शिखा=तेजःस्वरूप ज्वाला के द्वारा आकाश में सोता रहता अथवा अपने विषय को व्याप्त करता है, उसका नाम शिखण्ड है, शकन्ध्वादि लक्षण पररूप होने से शिखण्ड शब्द बना है।

सूर्य अग्नि, या दीपक का नाम शिखण्ड है, वह स्वत्व रूप से जिसका है या जिसमें है उसका नाम शिखण्डी है। मतुप् के अर्थ में इनि प्रत्यय हुआ है। यह भगवान् विष्णु का नाम है। अथवा शक्त्यर्थक स्वादिगणपठित शक्लृ धातु से बाहुलक से उणादि अण्डन् प्रत्यय धातु को इकार का आगम तथा ककार को वर्णविपर्यय खकार होने से शिखण्ड शब्द बनता है, जो सब प्रकार से समर्थ है उसका नाम शिखण्ड है, सृष्टि के आश्रयभूत ब्रह्मा विष्णु शिवादि समर्थ हैं तथा वे जिस परमपिता परमेश्वर के शक्ति विशेष हैं, उस परमेश्वर का नाम शिखण्डी है। आकाश में शयनरूप अर्थ की समानता से इन्द्रधनु का नाम भी शिखण्ड है, क्योंकि वह भी आकाश में सोता है नैरुक्तों के सिद्धान्तानुसार शब्द का निर्वचन अक्षर, वर्ण वा अर्थ की समानता से

सामान्यादर्थसामान्याद्वा विधेयमिति नैरुक्तसिद्धान्तः । तदस्यास्तीति शिखण्डी सूर्योऽपि । मन्त्रलिङ्गञ्च तदर्थे—

धनुर्बिभर्षि हरितं हिरण्ययं सहस्रघ्नि शतवधं शिखण्डिनम् ।
रुद्रस्येषुश्चरति देवहेतिस्तस्यै नमो यतमस्यां दिशीतः ॥ अथर्व ११।२।१२

सर्वासु दिक्ष्विन्द्रधनुषः सद्भावः, तस्मिंश्चेन्द्रधनुषि हरितपीतसुवर्णभवर्ण-विविधता प्रत्यक्षं दृश्यते, तस्य चाकाशे शयनात् शिखण्डत्वं सूर्यप्रभवाच्च सूर्यस्य शिखण्डित्वम् । सूर्योऽपि खे शेत इति सूर्यः स्वयमपि शिखण्डः, स च विष्णोरेवेति विष्णुः शिखण्डी । मयूरपुच्छस्यापि खे शयनात् शिखण्डत्वं तच्च मयूरस्य स्वमिति मयूरः शिखण्डी । मयूरपुच्छेऽपि—इन्द्रधनुषीव रोचना विविधवर्णता । मयूरवचनः शिखण्डि-शब्दो वेदे यथा—

यत्राश्वत्था न्यग्रोधा महावृक्षाः शिखण्डिनः ।
तत् प्रेताप्सरसः प्रतिबुद्धा अभूतन ॥ अथर्व ४-३७-४

लोकेऽपि च पश्यामः—सूर्यदैवतस्य चक्षुषो द्युलोकसम्मिते उत्तमाङ्गे स्थितस्यो-परितने भागे स्थितस्यावरणपटलस्य भृकुटेर्धनुषाकारता पक्ष्मणाञ्च किरणतुल्यता । चक्षुषि जलस्य सद्भावश्च नैसर्गिकः । यथा चात्र चक्षुषः सन्निकृष्टो नासिकाया विन्यासस्तथैव सूर्यस्य सन्निकृष्टे राशौ बुधस्य सन्निवेश इति पुनर्वसोरात्रेयस्य सिद्धान्तोऽनुपदं पुष्यते लोक-सम्मितः पुरुष इति । द्विपदेषु पुरुषो लोकसम्मितः, चतु-

---

कर लेना चाहिये ऐसा न होवे कि जो निर्वचन ही न किया जाये । वह इन्द्रधनु जिसका है उसका नाम शिखण्डी, यह सूर्य का नाम है । इस अर्थ का अभिधायक यह मन्त्र है "धनुर्विभर्षि हरितमित्यादि" । अथर्व ११।२।१२ । सब दिशाओं में इन्द्रधनुष का अस्तित्व है, तथा उसमें हरित पीतादि रङ्गों की विविधता प्रत्यक्ष देखने में आती है, वह आकाश में सोता है इसलिये शिखण्ड है, तथा उसकी उत्पत्ति सूर्य से होने से सूर्य का नाम शिखण्डी है । सूर्य स्वयं शिखण्ड है, क्योंकि वह भी आकाश में शयन करता है, और वह विष्णु का है इसलिये विष्णु का नाम शिखण्डी है । मयूर की पूंछ भी आकाश में शयन करने से शिखण्ड नाम से कही जाती है, तथा वह मयूर की है इसलिये मयूर का नाम भी शिखण्डी है, इसकी पूंछ में भी जिस का अपर नाम बर्ह है वर्णों की विविधता जो कि बड़ी रोचनशील है, देखने में आती है । मयूर का वाचक शिखण्डी शब्द वेद में "यत्राश्वत्था न्यग्रोधा महावृक्षा शिखण्डिनः" इत्यादि मन्त्र में आया है । अथर्व ४।३७।४ लोक में भी देखा जाता है, चक्षु इन्द्रिय का देवता सूर्य है, और जिस प्रकार सूर्य द्युलोक में स्थित है, उस ही प्रकार चक्षु भी द्युलोक के समान शरीर के उत्तमाङ्ग (मस्तक) में स्थित है, उसके ऊर्ध्व भाग में स्थित आवरणरूप भृकुटि धनुषाकार है, तथा पक्ष्म (पलकें) किरणों के समान हैं । चक्षु में जल की स्थिति स्वाभाविक है । जैसे यहां शरीर में नासिका की स्थिति चक्षु के अत्यन्त सन्निकट है, उस ही प्रकार बुध ग्रह भी सूर्य की राशि के या राशि में अत्यन्त सन्निकट रहता है, तथा इससे पुनर्वसु आत्रेय का "लोकसम्मितः पुरुषः"

ष्पदेषु गौर्लोकसम्मितः, तथा हिंस्रेषु सिंहो लोकसम्मितः। परन्तु चक्षुर्वर्त्मनः सर्वत्र धनुर्वदायाम ऋते पक्षिवर्गात् पक्षिणां नेत्रेन्द्रियगोलकस्य निर्माणं तेषामुड्डयनसौकर्यमुद्दिश्य कृतम्। एवं चक्षुर्मात्रावलोकनेन भगवतः शिखण्डिनः सर्वव्यापकता दृश्यते। शिखण्डिस्वरूपेण गुणेन सर्वत्र व्याप्तस्य भगवतः शिखण्डीति नामोपपद्यतेतराम्। तथा च मन्त्रः—"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्"मिति। परमं पदं=तत्त्वतो ज्ञेयं कर्म। प्रसङ्गतो दीपहस्तः पुरुषोऽपि शिखण्डी दीपज्वालया समुपेतत्वात्।

भवन्ति चात्रास्माकम्—

शीङ्ह्रस्वमाप्नोति च खेन युक्तश्चूडा=शिखा खे शयनात् सदुक्ता१।
उणादिसूत्राणि च यानि तत्र शब्दस्य सिध्यै बहुलप्रयोगः ॥८३॥

१–सद्भिरुक्ता

अनन्तपारस्य च शब्दराशेर्यथाकथं पारमवाप्तुमत्र।
२अण्डन्विधानं कुरुते पुरस्तात् तज्ज्ञापयत्येव बहुत्वमस्य ॥८४॥

२–अण्डन्प्रत्ययस्य विधानमिति विग्रहः।

शेते यथा खे वरुणस्य ३हेतिस्तथैव लोके नयनस्य वर्त्म।
सूर्यो हि तद्वान् कथितः शिखण्डी चक्षुश्च तद्वत् कथितं शिखण्डि ॥८५॥

३–वरुणस्य हेतिः=इन्द्रधनुः।

यह सिद्धान्त पुष्ट होता है। द्विपदों में पुरुष लोकसम्मित है, चतुष्पदों में गौ और घातक जीवों में सिंह लोकसम्मित है। केवल पक्षिवर्ग को छोड़कर चक्षु का आवरणरूप जो भृकुटि है उसका धनुष के तुल्य आकार है।

पक्षियों के चक्षुगोलक का निर्माण उनके उड्डयनरूप गति के सौकर्य (आसानी) के उद्देश्य से किया है। इस प्रकार चक्षुमात्र के स्वरूप दर्शन से भगवान् शिखण्डी की सर्वव्यापकता दृष्टिगोचर होती है, तथा इसी शिखण्डिस्वरूप गुण के सर्वव्यापक होने से भगवान् का शिखण्डी यह नाम युक्तिसङ्गत होता है, तथा इस भाव में "तद्विष्णोः परमं पदमित्यादि" मन्त्र प्रमाण है। तत्त्वरूप से जानने योग्य का नाम परमपद है। दीपज्वाला से युक्त होने से दीपहस्त पुरुष का नाम भी शिखण्डी है।

इन भावों को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

शीङ् शयनार्थक धातु से उणादि ख प्रत्यय तथा धातु के दीर्घ ईकार को इकार ह्रस्व होने से शिखा शब्द बनता है, तथा आकाश में शयनरूप अर्थ की समानता से यह चूड़ा (चोटी) का वाचक है, यह सत्पुरुषों की उक्ति है, ज्वाला भी चूड़ा के समान होने से चूड़ा है। तथा इस अनन्त शब्द शास्त्र का किसी प्रकार भी पार पाने के लिये शास्त्रकार उणादि तथा अन्यत्र सूत्रों में बाहुल्य का आश्रय लेता है, जिससे शब्द की किसी प्रकार भी सिद्धि हो जाये। बाहुलक से अण्डन् प्रत्यय का विधान ही इसके बहुत्व को व्यक्त करता है।

नैकस्य वर्णस्य यथा निवेशो रुद्रस्य हेतौ प्रपदं ह दृश्यः ।
तथा मयूरस्य च बर्हिमात्रे बहुत्वमन्वेति च वर्णकानाम् ॥८६॥
आग्नेयधर्मा : कथितो मयूरस्तथाग्निधर्मानुसृतश्च चक्षुः ।
बुधो यथार्कस्य तथात्र नासा सख्यं१ विधत्ते नयनस्य नित्यम् ॥८७॥

१ सख्यं=समानस्थानम् ।

विष्णुः शिखण्डी स्वगुणं ततानो विश्वे समस्ते कुरुते च दृश्यम् ।
निजं स्वरूपं कवयः प्रसन्नाः पश्यन्ति नित्यं हृदि सन्निविष्टम् ॥८८॥

नहुषः—३१२

णह बन्धने दैवादिकः, नहिकलिहन्यर्त्तिलसिभ्य उषच्, सायणः ऋग् १-३१-११ मन्त्रभाष्ये,एतेन सूत्रेण ज्ञायते यदुणादिसूत्राणां बहुधा निबन्धनानि सन्ति, वर्त्तमान उपलभ्यमाने उणादिग्रन्थे सूत्रं—पृनहिकलिभ्य उषच् ४-७५, ऋहनिभ्यामुषन् दशपाद्युणादिसूत्रे ९-१३ ।

जैसे इन्द्रधनु आकाश में सोता (रहता) है, उस ही प्रकार नयनवर्त्म=भृकुटि भी आकाश में शयन करती (रहती) है इसलिये इन्द्रधनुवाला सूर्य तथा भृकुटिवाला चक्षु शिखण्डी नाम से कहे जाते हैं । श्लोक में वरुणहेति यह इन्द्रधनु का नाम लिया गया है ।

जैसे इन्द्रधनु में अनेकवर्णों का विन्यास है. उसी प्रकार मयूर के प्रत्येक बर्ह में भी अनेक हरित नील पीतादि वर्णों का निवेश है ।

जैसे चक्षु अग्निधर्मक (तैजस) है, उसी प्रकार मयूर भी तैजस बर्हयुक्त होने से अग्निधर्मा है । तथा जैसे बुध ग्रह सूर्य का निकटस्थानस्थायी है, उसी प्रकार नासिका नयन की निकट स्थानीया है ।

भगवान् विष्णु का नाम शिखण्डी है. और वह अपने इस शिखण्डित्वरूप धर्म से समस्त विश्व को व्याप्त करता है. इसी से प्रसन्नचित्त विद्वान् पुरुष उसको सदा अपने हृदय मे देखते रहते हैं ।

नहुषः—३१२

दिवादिगण पठित बन्धनार्थक णह धातु से "नहिकलिहन्यर्तिलसिभ्य उषच्" इस उणादि सूत्र से उषच् प्रत्यय होने से नहुष शब्द सिद्ध होता है नहिकलि इत्यादि सूत्रपाठ सायणकृत ऋग्वेद मन्त्र भाष्य का है, किन्तु उणादि सूत्रपाठ में इससे भिन्न "पृनहिकलिभ्य उषच्" ऐसा सूत्रपाठ है, इसके अतिरिक्त दशपाद्युणादि ९.१३। सूत्र का "ऋहनिभ्यामुषन्" ऐसा पाठ

एवमुषजन्तोऽयं नहुष-शब्दः सिद्धयति । यथात्रोणादिसूत्रेषु भेदः प्रदर्शितः, तथैवान्योपि दृश्यते, तद्यथा— भृमृदृशियजिपर्विपच्यमितमिनमिहर्य्यिभ्योऽतच् ३-११० दृशिर् प्रेक्षणे धातौ दर्शन इति पदं व्याकुर्वन् माधवीयधातुवृत्तिकारो माधवः सूत्रमेनद् भृमृदृशियजिपर्विपच्यमितमिनमिहर्य्यिभ्योऽनच् इति पठति, तेन—भरणः, मरणः, दर्शनः, यजनः, पर्वणः, पचनः, अमनः, तमनः, नमनः, हर्यणः इति । इति प्रसंगप्राप्तमुक्तमस्माभिः । प्रकृतमनुसरामः—नह्यति बध्नाति सर्वं विश्वं सर्गादारभ्य सर्गान्तं निर्विकल्पमिति नहुषो विष्णुरव्ययः । बन्धनं चापि द्विविधं, सन्धिमतामपृथग्भावः, तद्यथा-अंगुलीनां पुटकानां, अपरेषां च सर्वांगसन्धिमतां सन्धावेवास्थापनम्, अपरं च—पृथक्-पृथक् स्थितानां बाहुजंघांगुलीनां च पृथक्-पृथग् भाव एवास्थापनं बन्धनमुक्तं भवति, एषा योजना सर्वत्र वृक्षादिस्थावरजातिष्वप्यवगन्तव्या भवति । अयमत्राभिसन्धिः- बद्धस्य पृथक्करणं मरणं नाशो वा, पृथक्-पृथक् स्थितस्यैकीकरणं मृतिर्नाशो वा, तौ बद्धाबद्धौ यदि विपर्यस्ततामापाद्य यातां तर्हि सर्वं विपर्यस्येत्, अत उक्तं भवति—नह्यति बध्नातीति नहुषो विष्णुरिति, एष च गुणस्तस्य सर्वं व्यश्नुवानो दृश्यते सर्वस्मिन् चराचरे विश्वे ।

मन्त्रलिंगं च—

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन् नहुषस्य विश्पतिम् ।
इडामकृण्वन् मनुषस्य शासनीं पितुर्यत् पुत्रो ममकस्य जायते ॥ ऋग् १-३१-११

उषजन्तो नहुष-प्रयोगः-ऋग् ५-१२-६, इत्यत्रापि ॥

है, तथा जहां उणादि में "भृमृदृशियजिपर्विपच्यमितमिनमिहर्य्यिभ्योऽतच्" उणादि ३।११० सूत्र अतजन्त पढा है। इससे प्रतीत होता है उणादि सूत्रों की रचना आचार्यों के मत से भिन्न २ प्रकार की है। यह प्रसङ्ग से कुछ कहा गया है, अब प्रकृत विषय को लेते हैं जो सृष्टि से लेकर सर्ग की समाप्ति पर्यन्त इस समग्र विश्व को निश्चित रूप से बांधता=नियन्त्रित करता है उसका नाम नहुष है, यह अव्यय विष्णु का नाम है। बन्धन भी दो प्रकार का होता है, परस्पर सन्धित (जुड़े) हुओं का पृथक् न होना, जैसे अंगुलियों के पर्व अर्थात् जोडों का तथा सब शरीर के सन्धिवाले अङ्गों को सन्धि में ही स्थित रखना। दूसरा बन्धन पृथक् २ स्थित बाहुजङ्घा अंगुलि आदिकों को पृथक् ही रखना। इसका अभिप्राय यह है, परस्पर संहित (जुड़े) हुओं का पृथक् होना मरण है, तथा पृथक् २ विभक्तों का एक होना मरण है। अर्थात् संहित और विभक्तों का विपर्यय, संहित का विभक्त होना और विभक्त का संहित होना नाश का कारण है।

यह भगवान् का बन्धन रूप गुण सर्वत्र व्याप्त है तथा इस में "त्वामग्ने प्रथममायुमायवे" इत्यादि ऋग् १-३१-११ मन्त्र प्रमाण है। ऋग् ५-१२-६. मन्त्र में भी उषजन्त नहुष का प्रयोग किया है।

भवतश्चात्रास्माकम्—

यदत्र धात्रा विहितं पुरस्तात् बद्धं स्वरूपात् किमु वाप्यबद्धम्।
तथैव तन्नह्यति निर्विकल्पं विपर्यये नाशमियात् समस्तम् ॥ ८९ ॥
यथा खगा नामस्वरूपभिन्नाः सन्तोऽपि राशेः परियन्ति वर्त्म।
तथैव देहे पृथगिन्द्रियाणि देहं निबद्धं परियन्ति चैकम् ॥ ९० ॥

खगा ग्रहाः, राशिवर्त्म=नाक्षत्रक्रान्तिमार्गः। इन्द्रियाणि, रसादयो धातव उपधातवो दोषाश्च ग्रहदैवतकाः सन्तोऽपि समानराशिं शरीरमधितिष्ठन्ति। एवं सर्वत्रैकता पृथक्ता च दरीदृश्यते तां पृथक्तामेकतां च नह्यति बध्नातीति नहुषो विष्णुरुक्तो भवति। एवं विविधमूहानां कल्पनीयं भवति।

वृषः—३१३

वृषु सेचने भौवादिकः। इगुपधज्ञाप्रीकिरः कः पा० ३-१-१३५, इत्यनेन कः प्रत्ययः। वृषोऽग्निः, अग्निरेव सर्वं निष्पादयति। अग्निः सूर्यः, स हि ऋतून् विकल्पयति, अग्निरेव चतुर्विधं पचति, सूर्य एव पृथिव्यां रसानामुदयं करोति, स्वस्य तापस्य योगेन।

भाष्यकार का अपने पद्यद्वारा भावप्रकाशन इस प्रकार है—विधाता ने विश्व में जिस वस्तु का निर्माण जिस प्रकार बद्ध या अबद्ध रूप से किया है, उसको उसी प्रकार निबद्ध करता है, यदि कदाचित् विपर्यय अर्थात् बद्ध वस्तु स्वरूप से अबद्ध और अबद्ध स्वरूप से बद्ध होजाये तो वह नष्ट ही होजाती है।

जैसे नाम रूप और गति से भिन्न भिन्न भी सूर्य आदि ग्रह, एक ही राशि में नियमानुसार निबद्ध होकर भ्रमण करते हैं, उसी प्रकार स्वरूप से भिन्न होती हुई भी इन्द्रियां इस निबद्ध शरीर में अपने अपने रूप से भ्रमण कर रही हैं।

खग नाम ग्रहों का है। राशिवर्त्म नाम नक्षत्रक्रान्ति मार्ग का है। इन्द्रिय से इन्द्रिय और ग्रहदैवतक रस धातु उपधातु और दोषों का ग्रहण है, इन सबका जो कि स्वरूप से भिन्न २ हैं एक ही शरीर अधिष्ठान है। इस प्रकार सर्वत्र भिन्नता और एकता देखने में आती है, उस पृथक्ता और एकता को जो बान्धकर रखता है उसका नाम नहुष है, भगवान् विष्णु का नाम है।

इसी प्रकार अन्यान्य ऊहायें करलेनी चाहियें।

वृषः—३१३

सेचनार्थक भ्वादिगणपठित वृषु धातु से "इगुपधज्ञाप्रीकिरः कः" सूत्र से क प्रत्यय होने से वृष शब्द सिद्ध होता है। वृष नाम अग्नि का है क्योंकि सब कुछ अग्नि से ही निष्पन्न होता है, तथा वृष नाम सूर्य का भी है क्योंकि वह ऋतुओं का निर्माण करता है। चतुर्विध आहार

मन्त्रलिंगं च—

वैश्वानरो यतते सूर्येण, । ऋग् १–९८–१,

प्रतिप्राण्यन्तःस्थितोऽग्निश्च वैश्वानरसंज्ञां लभते, "अहं वैश्वानरो भूत्वा पचाम्यन्नं चतुर्विधम्" इति गीतायाम्। "तिष्ठत्येव हि भूतानां जठरे जठरे ज्वलन्" बृहद्देवता १–६५। आतृणात् सूर्यपर्यन्तं पृथक्-पृथक् स्थिता अग्नयो वैश्वानरसंज्ञां लभमाना विश्वं परिपालयन्ति, तेषामभिमतं वर्षतीति कृत्वा वृषोऽग्निः। सोऽग्निः सर्वं व्यश्नुवानः सन् विष्णोर्नामसु वृष-शब्देनाभिधीयमानोऽलंकुरुते, तं बृहन्तं भगवन्तं विष्णुं सर्वव्यापकमीश्वरम्।

मन्त्रलिंगं च—

वृषोऽग्निः समिध्यते श्वोऽन देववाहनः।
तं हविष्मन्त ईडते॥ अथर्व २०–१०२–३

अग्निः किं वर्षति ददाति वा किंचिन्मात्रमुच्यते—

पृथिवी धेनुस्तस्या अग्निर्वत्सः सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम्।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा॥ अथर्व—४–३९–२
अग्नावग्निश्चरति प्रविष्टः ऋषीणां पुत्रो अभिशस्तिपा उ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्मभागम्॥ अथर्व ४–३९–९
हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान्।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम्॥ अथर्व ४–३९–१०

जातवेदोऽग्निः, वृषो वाग्निः, सर्ववेत्तृत्वं चास्य निर्विकल्पमुक्तं मन्त्रे अतो वृषो विष्णुर्वा युक्तमुपपद्यते।

का पचन अग्नि से होता है, तथा सूर्य के ताप से ही पृथिवी में रसों की उत्पत्ति होती है। प्रत्येक प्राणी में स्थित जाठराग्नि वैश्वानर नाम से बोला जाता है, जैसा कि गीताकार ने कहा है—

"अहं वैश्वानरो भूत्वेत्यादि" तथा "वैश्वानरो यतते सूर्येण" इत्यादि ऋक् १।९८।१ मन्त्र से भी जाठराग्नि का वैश्वानरत्व सिद्ध होता है, तथा "तिष्ठत्येव हि भूतानां जठरे जठरे ज्वलन्" इस बृहद्देवता १।६५ से प्रत्येक प्राणी के उदर में अग्नि का वास प्रमाणित होता है। तिनके से लेकर सूर्य पर्यन्त पृथक् पृथक् स्थित सब ही अग्नि वैश्वानर नामवाले विश्व का परिपालन करते हैं। उनके अभिमत=मनोरथों को सिद्ध करने से अग्नि का नाम वृष है। वह सर्वव्यापक अग्नि, विष्णु नामों में वृष शब्द से कथित होकर सर्वव्यापक महान् परमेश्वर विष्णु को विभूषित कर रहा है। वृष शब्द अग्नि का वाचक है यह "वृषोऽग्निः समिध्यते" इत्यादि मन्त्र से सिद्ध है। अग्नि क्या क्या देता है इस विषय में कुछ अथर्व वेद के "पृथिवी धेनुस्तस्या अग्निर्वत्स इत्यादि अथर्व ४।३९।२, ४।३९ ९ तथा ४।३९।१० मन्त्र द्रष्टव्य हैं। जैसे वृष यह अग्नि का नाम है, वैसे ही जातवेदा नाम भी अग्नि का है, क्योंकि मन्त्र में अग्नि का निश्चित रूप से सर्ववेत्तृत्व बताया है, इसलिये सर्वज्ञ होने से वृष नाम विष्णु का उपपन्न होता है।

भवतश्चात्रास्माकम्—

वृषोऽग्निरेको बहुधा विक्लृप्तो विश्वं समस्तं परियाति, धत्ते।
नष्टोऽति वोग्रो कुरुते विनाशं उक्तं "त्वमग्ने रुद्रोऽसि" वेदे ॥ ६१ ॥

त्वमग्ने ! रुद्रः ऋग् २-१-६

सोऽग्निः समस्तं समभावमाप्ते तत्स्थभावेन युनक्ति विश्वम्।
अग्नेर्विधानं य उ वेत्ति विद्वान् कामानशेषान् स उ दोग्धि तस्मात् ॥६२॥

धर्मोऽपि वृष उच्यते—

वृषो हि भगवान् धर्मः स्मृतो लोकेषु भारत।
नैघण्टुक-पदाख्याने विद्धि मां वृषमुत्तमम् ॥

महाभारते-शा० प० ३४२-८८

क्रोधहा—३१४

क्रुध कोपे दिवादिकः, क्रुध्यतेर्भावे घञ् प्रत्ययः क्रोधः। क्रोधं हन्तीति क्रोधहा। क्रोधो हि नाम-ग्रहणीस्थ-पित्तोष्मा वायुनातिप्रवृद्धो रसवहाभिः सिराभिर्हृदयं गत्वा, अणुना कालेन च मस्तिष्कं गत्वा परुषं, सातिक्षेपं, सातिदण्डप्रपात-विज्ञापनीयं च कर्म कारयति। स एव चोष्मा निम्नाभिगामिस्रोतःसु गत्वा शिश्नमनुप्राप्तः काम

इस भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

वृष यह अग्नि का नाम है, एक होता हुआ भी यह बहुरूप होकर समस्त विश्व का व्यापन तथा धारण कर रहा है, जब यह अग्नि किसी कारण से विकृत होकर अत्यन्त मन्द या अत्यन्त उग्र=तेज हो जाता है, तब वह स्वाश्रित प्राणी का नाश कर देता है, जैसा कि "त्वमग्ने ! रुद्र' इत्यादि ऋक् २.१ ६ मन्त्र में अग्नि को रुद्र नाम से सम्बोधित करके व्यक्त किया है।

समावस्थापन्न वह ही अग्नि, समस्त विश्व को उसके अभिप्रेत भाव से युक्त करता है, जो इस प्रकार अग्नि के विधान को जानता है वह विद्वान् सकल मनोरथों को अग्नि से ही प्राप्त करता है।

धर्म का नाम भी वृष है, जैसा कि महाभारत शान्तिपर्व ३४२।८८ में "वृषो हि भगवान् धर्मः" इत्यादि रूप से कहा है।

क्रोधहा—३१४

दिवादिगण पठित कोपार्थक क्रुध धातु से भाव में घञ् प्रत्यय करने से क्रोध शब्द सिद्ध होता है, तथा क्रोध कर्मोपपद हन् धातु से "ब्रह्मभ्रूणवृत्रेषु क्विप्" पा० सू० ३।२.८७ से उपपद नियम का प्रायः अर्थ लेने से क्विप् प्रत्यय हो जाता है, ततः प्रातिपदिक संज्ञा और सुबादिकार्य होने से क्रोधहा शब्द सिद्ध हो जाता है। क्रोध नाम ग्रहणी कला में स्थित पित्त का उष्मा वायु के द्वारा प्रवृद्ध होकर, रसवहा नामक नाड़ियों द्वारा हृदय में जाकर बहुत शीघ्र मस्तक में पहुँच जाता है और सतिरस्कार दण्ड आदि के प्रहार रूप क्रूर कर्म करवाता है। फिर वह ही उष्मा

इति संज्ञां लभते । कामक्रोधयोर्विपरीतिकरणं तयोश्चिकित्सा भवति । तद्यथा कामोदयः क्रोधं, क्रोधोदयश्च कामं शमयति, सर्वाधारे विष्णौ क्रोधोदयो न भवति, क्लेशकर्मविपाकाशयैरपरामृष्टत्वात्तस्य । अत उक्तं भवति प्रभोर्गुणानुध्यानपरस्यापि सर्वकस्य स क्रोधोदयं हन्ति, सर्वको वा भगवद् गुणानुप्रेरितः क्रोधं जहाति, सर्वस्मिन् तमनुस्यूतं पश्यन् । द्वितीयं प्रति क्रोधोदयो भवति ।

लोकेऽपि च पश्यामः—दुर्व्यवहरन्तं भगवान् श्वासप्रश्वासाभ्यां न वियुनक्ति, सत्कर्मवृत्तं च नातिश्वासप्रश्वासाभ्यां वा युनक्ति । अमुथैव सर्वत्र योजनीयं भवति । तद्यथा—क्रुध्यन्तं सूर्यः स्वसंतापेन न वियुनक्ति, शान्तं च नातियुनक्ति । ज्ञानपूर्वकं मन्युर्भवति, उक्तं च यजुषि—मन्युरसि मन्युं मयि धेहि । मन्यते मन्युरिति ॥

एवमत्र व्याख्याप्रसंगेन-जितक्रोधः, द्विषष्ठितमे ६२ श्लोके द्विषष्ठ्युत्तरं चतुःशततमं ४६२ च नाम व्याख्यातं भवति ॥ तथैव—त्रयोदशोत्तरैकशततमे ११३ श्लोके चतुस्त्रिंशदुत्तरं नवशततमं ९३४ च नाम जितमन्युरिति च व्याख्यातं भवति । यत्तु कदाचिज्जनपदप्रध्वंसिनि भूकम्पाद्यनिष्टे जात उच्यते दैवः=दैवसम्बन्धी कोपोयमिति तत्रोच्यते, न हि स वस्तुतो देवसम्बन्धी कोपो भवति, किन्तु जगदन्तर्गतग्रहनक्षत्र-

---

शरीर के अधोगामी स्रोतों में जाकर शिश्न=गुह्येन्द्रिय को प्राप्त हुआ काम नाम से बोला जाता है । काम और क्रोध की परस्पर के वैपरीत्य भाव से चिकित्सा होती है, अर्थात् क्रोधोदय से काम शान्त होता है, और कामोदय से क्रोध शान्त हो जाता है । सर्वाधार भगवान् विष्णु में क्लेश-कर्म-विपाक तथा आशयों का अभाव होने से क्रोध का उदय नहीं होता । इसीलिये कहा है, भगवान् का गुणगान और ध्यान करनेवाले के क्रोध का भगवान् विनाश कर देता है, यद्वा सब ही भगवद् गुणों से प्रेरित होकर क्रोध को छोड़ देते हैं, क्योंकि वे सब में भगवान् को ही ओतप्रोत हुआ देखते हैं, इसलिये वे किसी को दूसरा नहीं मानते तथा क्रोध दूसरे के प्रति ही होता है । लोक में भी देखा जाता है कि, जो कोई दुर्व्यवहार करता है, उसके श्वासों को भगवान् क्षीण नहीं करता तथा जो सत्कर्म में प्रवृत्त है, उसके श्वासों की वृद्धि नहीं करता । इसी प्रकार और भी ऊहायें कर लेनी चाहियें । जैसे सूर्यदेव क्रुद्ध को अपने ताप से वञ्चित नहीं करता तथा शान्त को अधिक तपाता नहीं । क्रोध का एक नाम मन्यु भी है, किन्तु क्रोध में ज्ञान नहीं रहता, और मन्यु में ज्ञान का सद्भाव होता है । इसलिये "मन्युरसि मन्युं मयि धेहि" इत्यादि यजुर्वेद मन्त्र में मन्यु को उपादेय कहा गया है, मन्यु शब्द मन, इस ज्ञानार्थक धातु से सिद्ध होता है ।

इसी व्याख्या के प्रसङ्ग से ६२वें श्लोक में पठित ४६२ वां जितक्रोध नाम तथा ११३ के श्लोक में पठित ९३४ वां जितमन्यु नाम भी व्याख्यात हो जाता है ।

किसी समय किसी देश विशेष को ध्वस्त करनेवाले भूकम्प आदि अनिष्ट के हो जाने पर सामान्यरूप से कहा जाता है कि यह देव का कोप है, अर्थात् यह परमेश्वर के कोप से हुआ है,

तिथि-लग्न-सम्बन्धविशेषजनितो जगदनिष्टकारो भौतिको विकारविशेषो भवति। भवति च स सम्बन्धविशेषव्यवस्थितो, यथा जरायौ सदपि जलं ग्रहनक्षत्रतिथिलग्नादिसम्बन्धविशेषं प्राप्य बहिः स्रवति न तु ततः प्राग् व्यवस्थितत्वात्। एतेन सिद्धं यद्दैवप्रकोपशब्देनाभिधीयमानः कोपो देवस्य न भवति किन्तु ग्रहनक्षत्रादिसंसर्गरूपव्यवस्थाविहितः न हि सर्वा अन्तर्वत्न्य एकस्मिन्नेव ग्रहनक्षत्रलग्नतिथिषु प्रसुवते। अमुथैव सर्वत्र प्राकृतेषु विकारेषूहनीयं भवति। अनन्तत्वात् प्राकृतविकाराणाम्, सान्तत्वाच्च मनुष्यस्यायुषो बुद्धिबलोदयस्य च। भवन्ति चात्रास्माकम्—

स क्रोधहा विष्णुरनन्तशक्तिर्नाप्नोति कोपं न च मन्युमेति।
"अकाय" उक्तो न हि तत्र मन्ये द्वन्द्वोदयो जीव इव उदेति ॥ ९३ ॥
दैव-प्रकोपोऽयमिति ब्रुवाणाः स्वादल्प-विज्ञान-बलादिहेतोः।
वम्भ्रम्यमाणाश्च निजार्थनाशैर्निन्दन्ति नन्दन्ति च तं महेशम् ॥ ९४ ॥
यदत्र विश्वे प्रतिसूर्यलग्नं स्पृश्यं च वा श्रव्यमथापि दृश्यम्।
तत् सर्वकं सत्यकृतेऽस्ति नित्यं सूते यथा सव्यमनिन्द्य-योनिः ॥ ९५ ॥

नित्यं=नियतम्।

किन्तु यह भगवान् के क्रोधहा नाम के विरुद्ध है, इसका समाधान भाष्यकार इस प्रकार करता है। वस्तुतः वह कोप परमेश्वर का नहीं होता किन्तु जगत् के ही अन्तर्गत ग्रह नक्षत्र तिथि लग्न आदिकों के सम्बन्ध विशेष से उत्पन्न हुआ जगत् का अनिष्ट करनेवाला भौतिक विकार विशेष होता है। तथा वह ग्रह नक्षत्र आदि सम्बन्ध विशेष से व्यवस्थित होता है, जैसे जरायु (जेर) में होता हुआ भी जल ग्रह नक्षत्र तिथि लग्न आदि के सम्बन्ध से ही बाहर निकलता है पहले नहीं क्योंकि वह व्यवस्थित है। इस से यह सिद्ध हुआ कि, दैवकोप से कहा जानेवाला कोप देव अर्थात् भगवान् का नहीं होता किन्तु वह ग्रह नक्षत्र आदि के सम्बन्ध रूप व्यवस्था से विहित होता है। सब ही स्त्रियों का प्रसव, एक ही ग्रह नक्षत्र तिथि लग्न आदि के सम्बन्ध विशेष में नहीं होता। सब प्राकृत विकारों के विषय में इसी प्रकार कल्पनायें करनी चाहियें, क्योंकि मनुष्य की आयु तथा बुद्धि सान्त अर्थात् अल्प हैं, और विकार अनन्त हैं। इस भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

अनन्तशक्ति भगवान् विष्णु का नाम क्रोधहा है, क्योंकि वह क्रोध वा मन्यु को कभी प्राप्त नहीं होता, वह अकाय=शरीर रहित निराकार है, इसलिये उसमें जीव के समान सुख दुःख शीतोष्णादि द्वन्द्वों का उदय नहीं होता।

कुछ मनुष्य अपने स्वल्प विज्ञान या स्वल्प बुद्धि बल के कारण से समझने में असमर्थ, इसीलिये अपने इष्ट-अभिमत के नाश का कारण देवप्रकोप को मानते हुये भगवान् की निन्दा करते हुये जगच्चक्र में घूमते रहते हैं, तथा वास्तविक तत्त्व को जाननेवाले महापुरुष प्रत्येक दशा

उक्तं च संगच्छते विष्णुसहस्रनाम-माहात्म्ये—

न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ।।

भागवतं कर्म पश्यन्— न क्रुध्यति, न मुह्यति, न शोचति—इत्यादिः ।

भवति चात्रास्माकम्—
स क्रोधहा विष्णुरजेयशक्तिः पुष्णाति विश्वं निजमार्गबद्धम् ।
न क्रोधमन्वेति न हर्षमेति कर्मानुबद्धं च युनक्ति भोगैः ॥ ९६ ॥
मनुष्यवद् देवताभिधानं भवतीति नैरुक्तानां समय, इति कृत्वा ।
हेड इति क्रोध नाम । मन्त्रलिंगं च—

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ।। ऋग् १-२४-११

एवं बहुत्र "अहेडमानः" इति वेदे ।

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेडयन्नुच्चरसि स्वधा अनु । ऋग् १०-३७-५

यथायं क्रोधहा उक्तो भवति, तथायमशस्तिहा—अप्युक्तो भवति, तद्यथा—

अपाधमदभिशस्तीरशस्तिहा अथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ।। ऋग् ८-८९-२

एवं बहुत्र वेदे ।

में प्रसन्न होते हैं। इसी भाव को विष्णुसहस्रनाम के माहात्म्य में "न क्रोधो न च मात्सर्य-मित्यादि" रूप से कहा है, अर्थात् कृतपुण्य पुरुष भगवत् सम्बन्धी गुण कर्मों के तत्त्व को जानता हुआ न कभी क्रोध करता है और न मोह तथा शोक करता है। इसी अर्थ को भाष्यकार फिर अपने पद्य से व्यक्त करता है—

किसी अन्य के द्वारा अपरिभूत शक्ति अर्थात् सर्वोत्कृष्टानन्तशक्ति भगवान् विष्णु का नाम क्रोधहा है, वह अपने इस व्यवस्थित तथा कर्मानुरत विश्व का भोगों से युक्त करके पोषण करता हुआ न क्रोध करता है तथा न हर्ष करता है। मनुष्यों के समान ही देवताओं का क्रिया आदि व्यवहार होता है, इस नैरुक्तों के सिद्धान्त को पुष्ट करनेवाला यह "तत्त्वा यामि ब्रह्मणा वन्दमान" इत्यादि ऋग्वेद १।२४।११ मन्त्र है।

इस में हेड नाम क्रोध का है। अहेड पद वेद में बहुत स्थानों में आता है, जैसे कि विश्वस्य हि प्रेषितो रक्षसीत्यादि मन्त्रों में है। जैसे भगवान् का क्रोधहा नाम है, इसी प्रकार भगवान् का नाम (अशस्तिहा) भी है, जैसा कि "अपाधमदभिशस्तीरशस्तिहा" इत्यादि ऋक् ८।८९।२ मन्त्र में है। इस नाम से युक्त वेद में बहुत स्थल हैं।

क्रोधकृत्कर्त्ता—३१५

क्रोधं करोतीति क्रोधकृत्, क्रोधकृतं कृन्तति छिनत्ति हन्ति वा स क्रोधकृत्, यद्वा क्रोधोदयकरं कारणं कृन्तति स क्रोधकृत्कर्त्ता, यद्वा क्रोधकृतं करोतीति क्रोधकृत्। उभयथा विग्रहः कर्तुं शक्यते। क्रोधोदयप्रकारः क्रोधहेति नामव्याख्याने व्याख्यातः। अग्निः स्वयं स्वकैर्विकारैश्च जगद्धारयति, क्रोधश्चाप्याग्नेयः। तत्र-औषधयश्चाप्याग्नेया, तत्रैव स भगवान् विष्णुस्तत्प्रतिरोधकमौषधं कुरुते जनयति, एवैवावस्था सर्वत्र लक्ष्यते, तद्यथा जलं, जलप्रधानं पदार्थं च जनयति, तस्य शमनमग्निः अग्निप्रधानं च पदार्थजातं कुरुते जनयति वा, एतस्य प्रसिद्धोदाहरणं लोके यथा—बिच्छू-बूटीति प्राकृतं नाम, तद् ह्याग्नेयं, पालकेति प्राकृतनामतः प्रसिद्धं तस्य समीप एव नातिदूरे वा जनयति, मारकरक्षकाभ्यां व्याप्तमिदं जगत् तमेव क्रोधनाम्ना व्यञ्जनुवानं विष्णुं प्रतिपदं व्याख्याति। साराथंत एवं वक्तुमर्ह्यंते-विकारं कुर्वन्तं विकृतं वा कृन्तति छिनत्तीति, विकारं कुर्वाणस्य विकृतस्य वा शमयितारं जनयति करोतीति वा "क्रोधकृत्कर्त्ता" विष्णुरुक्तो भवति। मनुष्यवद्दैवताभिधानं भवतीति नैरुक्तसमयेन।

मन्त्रलिंगं च—

क्रोधकृत्कर्ता—३१५

क्रोध करनेवाले का नाम क्रोधकृत् है, उस क्रोधकृत् अथवा क्रोध के उत्पादक कारण को जो काटता = छिन्न करता है, उसका नाम है क्रोधकृत्कर्ता यद्वा क्रोधकृत् को बनानेवाले का नाम क्रोधकृत्कर्ता है। दोनों ही प्रकार से विग्रह किया जा सकता है। क्रोध की उत्पत्ति कैसे होती है इसका प्रकार क्रोधहा नाम में बताया जा चुका है। अग्नि अपने आप तथा अपने विकारों से जगत् को धारण कर रहा है, क्रोध भी अग्नि का ही विकार है तथा औषधियाँ भी अग्नि के ही विकार हैं। इसके अतिरिक्त भगवान् ऐसी औषधियां भी बनाता है, जो इन औषधियों के प्रतिकूल या इनका शमन करती हैं। यह ही स्थिति सर्वत्र देखने में आती है, जैसे भगवान् जल और जलप्रधान वस्तु को उत्पन्न करता है तथा उस के साथ ही, अग्नि तथा अग्निप्रधान पदार्थ जो कि उसका शमन करनेवाला है को उत्पन्न करता है। लोक में इसका प्रसिद्ध उदाहरण इस प्रकार है। लोक में एक बिच्छूबूटी नाम से प्रसिद्ध बूटी होती है, जिसमें अग्नितत्त्व प्रधान होता है तथा उसी के पास में या थोड़ी दूर पर उसका शमन करनेवाली पालक नाम से प्रसिद्ध बूटी उत्पन्न होती है, जो जलीय तत्त्व प्रधान होती है। इस प्रकार यह सकल जगत् मारक और रक्षक तत्त्वों से व्याप्त हुआ क्रोध नाम से सर्वव्यापक भगवान् विष्णु का ही पद पद पर व्याख्यान कर रहा है, सारांश रूप से इस प्रकार कहा जा सकता है, विकार करनेवाले वा विकृत का जो छेदन करता है, अथवा विकार करनेवाले के शमन करनेवाले को जो उत्पन्न करता है उसका नाम क्रोधकृत्कर्ता है, भगवान् विष्णु का नाम है। मनुष्य की क्रियाओं के समान ही देवताओं की क्रियाओं का प्रकाशन होता है।

इस नैरुक्त समय के अनुसार मन्त्रलिङ्ग—

व्यास इन्द्रः पृतनास्वोजा अधा विश्वं शत्रूयन्तं जघान । ऋग् ७-२०-३
उदगादयमादित्यो विश्वेन सहसा सह ।
द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रधम् ॥ ऋ० १।५०।१३
ऊर्ध्वो नः पाह्यंहसो निकेतुना विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः ॥ ऋग् १-३६-१४

भवति चात्रास्माकम्—
विकारकर्त्तृन् स उ हन्ति नित्यं विकारभावं स निराकरोति ।
जगत् समस्तं स समे प्रकुर्वन् सव्येन साकं कुरुतेऽपसव्यम् ॥ ९७ ॥

विश्वबाहुः— ३१६

बाधृ विलोडने भौवादिकः, तस्मात् "अर्जिदृशिकम्यमिपसिबाधां ऋजिपशितुक्-धुक्दीर्घहकाराश्च" उणादिः-१-२७ इत्यनेन कुः प्रत्ययः, धातोर्हकारान्तादेशश्च । बाधते विलोडत इति बाहुः, बाध्यन्ते विलोड्यन्तेऽभीप्सितार्था याभ्यां तौ बाहू भुजपर्यायौ । विश्व-शब्दो व्युत्पादितो "विश्वम्" इति नाम-व्यानावसरे । विश्व-शब्दो जगत्-पर्यायः सर्वपर्यायश्च । विश्वस्य सर्वस्य चराचरस्य यो विलोडनकर्त्ता प्रशमयिता वा स विश्वबाहुः । विश्वेषां विलोडन-कर्तृ साधनानि विश्वबाहुसंज्ञां लभन्ते ।

व्यास इन्द्रः पृतनास्वोजा अधा विश्वं शत्रूयन्तं जघान । ऋक् ७।२०।३

तथा "उदगादयमादित्यो—द्विषन्तं मह्यं रन्धयन्" इत्यादि हैं । ऋक् १।३६।१६

इस भाव को भाष्यकार अपने पद्यद्वारा संक्षेप से यों व्यक्त करता है—

भगवान् विष्णु क्रोधकृत्कर्ता इसलिए है कि वह विकार अर्थात् क्रोध के करनेवाले वा क्रोधोत्पादक कारणों का कर्तन=विनाश कर देता है, तथा विकारी पदार्थों के विकार भाव को वह उसके विरुद्ध पदार्थों का निर्माण करके शान्त कर देता है, इसी प्रकार से समस्त जगत् को तुल्यावस्था में स्थापित करता हुआ भगवान् दायें के विरुद्ध बायें का सृजन अर्थात् एक वस्तु के विरुद्ध उस वस्तु के स्वभाव का शमन करने के लिये दूसरी वस्तु का निर्माण करता है ·

विश्वबाहुः— ३१६

विलोडनार्थक बाधृ धातु से "अर्जिदृशिकम्यमिपसीत्यादि उणादि १।२७। सूत्र से कु प्रत्यय तथा धातु के धकार को हकार आदेश करने से बाहु शब्द सिद्ध होता है । जो बाधन=विलोडन करता है उसका नाम बाहु है, अर्थात् जिसके द्वारा अपने अभीप्सित अर्थों का विलोडन किया जाये, उसका नाम बाहु होता है, भुजा शब्द का पर्यायवाची शब्द है । विश्व शब्द का व्युत्पादन विश्व नाम के व्याख्यान में किया गया है । जो सकल विश्व का विलोडन करनेवाला या शमन करनेवाला है, उसका नाम विश्वबाहु है । विश्व का विलोडन करनेवाले साधनों का

विश्वानि भूतानि याभ्यां बाहुभ्यां स्वकीयमभिमतं विलोडयन्ति, मथ्नन्ति पुनः पुनस्तदेव कर्माभ्यस्यन्ति वा तौ बाहू। मन्त्रलिंगं च—

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।

सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः॥ ऋग् १०-८१-३

विश्व-शब्दो बहुपर्यायः, तत्रार्थे मन्त्रलिंगं च—

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्।

स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशांगुलम्॥ अथर्व १९-६-१

शत-सहस्रशब्दौ च बहुनामसु पठितौ निघण्टौ। लोकेऽपि च पश्यामः—क्षेत्रं विवप्सवः कृषीवलाः सर्वप्रथमं क्षेत्रं विलोडन्ति मथ्नन्ति क्षुभ्नन्ति। अत्र क्षोभन-विलोडन-बाधन-साधनीभूतं सर्वमपि बाहु-शब्दवाच्यतां साधनशब्दवाच्यतां वा प्राप्नोति। तद्यथा—कृषीवलस्य सीरं तस्य बाहुः, येनासौ क्षेत्रं मथ्नाति। बलीवर्दौ वा बाहू ययोः साहाय्येन कृषीवलः क्षेत्रं विलोडते, तस्य स्वकौ शरीरांगभूतौ साधनेषु मूर्द्धन्यौ च बाहू उच्येते। एवं हि भगवान् विलोडनधर्ममनुसारयन् सर्वं बाहु-रूपेण व्यश्नुवानो दृश्यते, तद्यथा—वाक् शब्दं मथ्नाति, बाहू कर्माणि मथ्नीतः, पादसनाथे सक्थिनो मार्गं मथ्नीतः, दन्ता जिह्वा-साहाय्येन भुज्यमानमन्नं मथ्नाति, अन्त्राणि चतुर्विधं—चर्व्यं चोष्यं, लेह्यं, पीतं च वा मथ्नन्ति, वृषणौ द्वौ तौ च बाहू इव यभमानयोः शुक्ररजसी मथ्नीतः। नेत्रे दृश्यं मथ्नीतः, हेयोपादाने प्रति सतर्के भवतः। नासा प्रियमप्रियं च विज्ञापयति गन्धं विलोडयन्ती, मस्तिष्कं च सत्यानृते मथ्नाति हेयोपादाने विवेचयति, श्वासप्रश्वासौ च देहिनं जीवयितुं नक्तंदिनं

नाम भी विश्वबाहु है। सब ही प्राणी जिनके द्वारा अपने अभिमत अर्थों का विलोडन या मथन अथवा बार २ उस ही कर्म का अभ्यसन करते हैं, उनका नाम बाहु है। इसमें "विश्वतश्चक्षुरुतो विश्वतो मुखः सम्बाहुभ्यां धमति" इत्यादि ऋक् १०।८१।३ मन्त्र प्रमाण हैं। विश्व शब्द के बहुपर्यायवाची होने में सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपादित्यादि अथर्व १९।६।१ मन्त्र प्रमाण हैं। निघण्टु में बह्वर्थक नामों में शत और सहस्र शब्दों का पाठ है। लोक में भी देखते हैं, कृषक बीजवपन की इच्छा से पहले क्षेत्र का विलोडन-मथन या क्षोभण करता है। यहां क्षोभण विलोडन या बाधन के सभी साधन बाहु शब्द के वाच्यार्थ होते हैं। जैसे कृषीवल का हल बैल तथा सब साधनों में मुख्य शरीराङ्गभूत भुजायें ये सब क्षेत्र का विलोडन या मथन करने में कृषक के सहायक होने से, बाहु शब्द से कहे जाते हैं। इस प्रकार भगवान् विलोडन धर्मानुसार बाहुरूप से सर्वत्र व्याप्त देखने में आता है।

जैसे वाणी शब्द का मथन करती है, भुजायें कर्मों का मथन करती हैं, पादयुक्त जङ्घायें मार्ग का मथन करती हैं, दन्त जिह्वा की सहायता से भुज्यमान अन्न का मथन करते हैं, अन्त्र 'आन्ते' चार प्रकार के चर्व्य-चोष्य-लेह्य तथा पेय अन्न का मथन करती हैं, दोनों अण्डकोश भुजाओं के समान मैथुन क्रिया करते हुये स्त्री और पुरुष के रज तथा शुक्र का मथन करते हैं, नेत्र दृश्यमान रूप का तथा हेय उपादान का मथन करते हैं, नासिका गन्ध का विलोडन करती हुई प्रिय और अप्रिय का विज्ञापन=बोधन करती है, श्वास-प्रश्वास देही को जीवित रखने के

च मथ्नीतः। गुरुः शिष्यं दण्डमाध्यमेन विद्योपदेशेन वा मथ्नाति, प्रजां प्रजिजनिषुः स्त्रीक्षेत्रं शिश्नमाध्यमेन बाधते विलोडति मथ्नाति वा, एवं सर्वत्र बाधनं मथनं विलोडनं वा यद् दृश्यते तत् तस्यैव भगवतो विश्वबाहुरूपकं स्वरूपं सत् तं सर्वं व्यश्नुवानं भगवन्तं विश्वबाहुं विष्णुं प्रपदं व्याख्याति। एवमनन्तविधमूहनीयं भवत्युदाहरणानां लोके पशु–पक्षि–वृक्ष–लता–यन्त्राणि च मनुष्यकृतानि दृष्ट्वा। दिग्दर्शनमात्रमेव प्रदर्शनं तावदस्माकमिहाभिमतम्।

भवति चात्रास्माकम्—

स विश्वबाहुर्भगवान् वरेण्यो व्याप्नोति मथ्नाति गुणेन नित्यम्।
तं विश्वबाहुं कवयः सदैव ध्यायन्ति कर्माणि च बाधमानाः॥ ९८॥

यथा बाहू द्वे, तथैव—अयने द्वे, शरीरे च द्वयं द्वयमंगानां भवति, एवं बाह्वोरिव विश्वं द्वित्वेन व्याप्तमस्ति।

भवति चात्रास्माकम्—

यथैव बाहू सकलं तथैव युग्मेन युक्तं कुरुते ह विष्णुः।
तस्मान्मयोक्तं बहुधा च भाष्ये यो लोकवित् स्यात् स उ वेदवित् स्यात्॥ ९९॥

उक्तं च स्वके सत्याग्रहनीतिकाव्ये—

अनन्तकर्तुः कर्मापि नालमन्ताय कर्हिचित्।
जगद् वेदस्य व्याख्यानं वेदो विश्वप्रकाशकः॥
लोकज्ञो न च वेदज्ञो वेदज्ञो न च लोकवित्।
एकपक्षखगस्येव वाक्यं तस्यावसीदति॥ (अध्याय–५, श्लो–९, १०।)

लिये रात और दिन का मथन करते हैं, गुरु विद्योपदेश या दण्डदान के माध्यम से शिष्य का मथन करता है, सन्तान उत्पन्न करने की इच्छा से पुरुष स्त्रीरूप क्षेत्र का शिश्न=गुह्येन्द्रिय के माध्यम से मथन विलोडन या बाधन करता है। इस प्रकार से जो सर्वत्र बाधन-विलोडन या मथन दृष्टिगोचर होता है, वह सर्वव्यापक भगवान् विष्णु के विश्वबाहुत्व का व्याख्यान कर रहा है। इसी प्रकार लोक में पशु-पक्षी-वृक्ष-लता तथा मनुष्यकृत यन्त्रों को देखकर विविध प्रकार की कल्पनायें कर लेनी चाहियें। मार्गमात्र दिखाना हमारा प्रयोजन है।

इस उपरोक्त भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

श्लोक ९९ जैसे बाहु युगलरूप हैं उसी प्रकार भगवान् सब युग्मरूप बनाता है, इसीलिये मैंने बार बार कहा है कि जो लोकवित् है वह ही वेदवित् है।

श्लोक ९८ वह भगवान् विश्वबाहु सबसे श्रेष्ठ अथवा सबका प्रार्थनीय अपने मथन रूप गुण से सबमें व्यापक रूप से स्थित है, विद्वान् पुरुष अपने कर्मों का विलोडन करते हुये उस विश्वबाहु का ध्यान करते हैं। मैंने अपने सत्याग्रह नीति काव्य में इसी अर्थ को 'अनन्तकर्तुः कर्मापि' तथा 'लोकज्ञो न च वेदज्ञो' इत्यादि ५ अ० के ९।१० श्लोकों से पुष्ट किया है।

यह समस्त विश्व ही बाहुओं के समान द्वित्व से व्याप्त है—जैसे दो अयन और शरीर में दो दो अङ्ग होते हैं इत्यादि।

महीधरः—३१७

मह पूजायाम् भौवादिकः चौरादिकश्च। महति महयति वा महः, पचाद्यच् प्रत्ययः। मह-शब्दोऽयं गौरादिषु पठितस्तस्मात् स्त्रियां ङीष् प्रत्ययः, तेन मही, पृथिवीपर्यायो वा।

तत्र मन्त्रलिंगं च—

यदा प्राणा अभ्यवर्षीत् वर्षेण पृथिवीं महीम्।
ओषधयः प्रजायन्तेऽथो याः काश्च वीरुधः ॥ अथर्व ११–४–१७

प्रसंगतः—महच्छब्दश्च गौरादित्वान्ङीषं लभते, महती। गौराद्यन्तर्गते पिप्पल्यादिगणे पृथिवीशब्दोऽपि स्त्रियां ङीषं लभते॥ महीं पूजां धारयतीति महीधरः।

मन्त्रलिंगं च—

वाजस्य नु प्रसवे महीमदिति नाम वचसा करामहे।
यस्या उपस्थ उर्वन्तरिक्षं सा नः शर्म त्रिवरूथं नियच्छात् ॥ अथर्व ७–६–४

पृथिवी–पर्याये मन्त्रलिंगं च—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

महीशब्दो गोर्वाण्या, पृथिव्याश्च वाचको वेदे बहुत्र गीतोऽस्ति।

प्रसङ्गतः "सूर्य आत्मा जगतस्तस्थुषश्च, यजुः—७-४२ ऋग् १-११५-१, यथैवायं सूर्यः सरणधर्मा चराचरस्यात्मा, सततं गतावास्थापयिता, तथैवायं जीवोऽपि पृथिव्यादिपंचभूतविकारात्मकस्य शरीरस्य यावज्जीवनं तावद् गतावास्थपयिता

महीधरः—३१७

पूजार्थक भ्वादि या चुरादिगणपठित मह धातु से पचाद्यच् प्रत्यय करने से मह शब्द सिद्ध होता है।

मह शब्द का गौरादिगण में पाठ होने से, इस से ङीष् प्रत्यय होकर स्त्रीलिङ्ग में मही शब्द बनता है, मही शब्द पृथिवी का पर्याय वाचक है, जैसा कि "यदा प्राणा अभ्यवर्षी" दित्यादि अथर्व ११-४-१७ मन्त्र से समर्थित है।

प्रासङ्गिक वर्णन महद् शब्द का भी गौरादि गण में पाठ होने से उस से ङीष् होकर महती शब्द बन जाता है।

मही=पूजा या महत्त्व को जो धारण करता है, उसका नाम महीधर है, इस अर्थ की "वाजस्य नु प्रसवे महीमदितिं नामे" त्यादि अथर्व ७।६।४। मन्त्र से पुष्टि होती है।

जहां मही शब्द पृथिवी का पर्याय है वहां उसे पृथिवी शब्द में वेद करता है, जैसे "स दाधार पृथिवीं द्यामुते मा" मित्यादि। मही शब्द वाणी तथा पृथिवी का वाचक रूप से वेद में बहुत स्थानों में आता है।

पुनः कुछ प्रासङ्गिक कथन—सकल चराचर का आत्मा सूर्य जैसे सब को गति से युक्त करता हुआ महीधर रूप से पृथिवी को धारण करता है, इसी प्रकार जीवात्मा भी जीवन पर्यन्त इस पाञ्चभौतिक शरीर को गतिशील बनाता हुआ धारण करता है, लोक की वेद से

दृश्यते, समानं च भवति लोको वेदेन यथैवायं जीवो देहाद् देहान्तरं गच्छति तथैवायं सूर्योऽपि राशे राश्यन्तरं क्रमत इति ।

मन्त्रलिंगं च

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॥ यजु० ३३–४३

प्रतिशरीरमात्मा धारयतीति कृत्वाऽऽत्मापि महीधर उक्तो भवति, यथाऽनन्ता लोका भगवता निजव्यवस्थया व्यवस्थापिताः सन्ति तथैवायं जीवोऽपि भगवद्व्यवस्थया व्यवस्थापितः सन् नानाविधा योनीर्धारयति मनुष्योऽपि तासां योनीनां नामग्राहं ग्राहं नान्तं प्राप्तुमर्हति । शरीराण्यपि महीमिव बहूनां कृमियोनीनामधिष्ठानानि भवन्ति । यथैव भूम्यां नद्यः प्रस्रवन्ति तथैव शरीरे महाधमन्यो महासिराश्च स्व-स्वशाखाप्रशाखाभिः सहिता वहन्ति । सर्वा योनयः स्थानकालभेदाद् वाणीं भिन्दन्ति तां वाणीरूपामपि महीं भगवान् धारयति जानाति तासां स्वाभिमतं साधयति–इति कृत्वा भगवान् समानेऽर्थे महीधरो वाणीधरो वा वक्तुमर्हो भवति । एवं लोके महीधरत्वं तस्य विष्णोः प्रपदं दृश्यते ।

भवन्ति चात्रास्माकम्—

महोऽत्र पूजार्थविधानसिद्धोऽच्ं प्राप्य गौरादिषु चैति ङीषम् ।
द्यावापृथिव्योरुत वाचि भूमौ नूनं प्रसिद्धो गवि चापि वेदे ॥ १०० ॥

समानता है, अर्थात् जो कुछ वेदों में है वह ही लोक में है । जैसे सूर्य एक राशि से राश्यन्तर में जाता है, उसी प्रकार जीव भी एक देह से देहान्तर में जाता है । सूर्यगति में "आकृष्णेन रजसे"त्यादि यजुः ३३।४३। मन्त्र प्रमाण है । शरीर का धारक होने से आत्मा का नाम भी महीधर है । जैसे अनन्तलोक भगवान् की व्यवस्था से व्यवस्थित हैं उसी प्रकार भगवद् व्यवस्था से व्यवस्थित यह जीव भी नाना प्रकार की योनियों को धारण करता है जिन योनियों की मनुष्य नामों का उच्चारण करके गणना भी नहीं कर सकता । पृथिवी के समान शरीर भी नाना प्रकार की क्रिमियोनियों के अधिष्ठान होते हैं । जैसे पृथिवी पर नदियां बहती हैं इसी प्रकार शरीर में महाधमनी तथा सिरायें बहती हैं अपनी शाखा प्रशाखाओं सहित । स्थान और काल के भेद से सब योनियों की वाणी में, जो कि गो नाम की समानता से मही शब्द का समानार्थक शब्द है, भेद होता है । उस वाणी रूप मही को धारण करने से अथवा सम्यक् जानने से उन योनियों के अभिमत को सिद्ध करता है, इस करके भी भगवान् विष्णु का नाम महीधर या वाणीधर कहा जा सकता है । इस प्रकार भगवान् का महीधर भाव पद पद पर देखने में आता है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

पूजार्थक मह धातु पचाद्यच् प्रत्यय करने से सिद्ध हुआ । मह शब्द गौरादिगण में पठित होने से ङीष् प्राप्त करके मही शब्द बनता है, जो द्यावापृथिवी–वाणी–भूमि तथा गो पशु का वाचक वेद में प्रसिद्ध है ।

तां योऽप्रमादं विविधार्थसिद्धां महीं सदा धारयते स विष्णुः ।
महीधरं तं कवयो विधिज्ञाः पश्यन्ति नित्यं कमलासनस्थम् ॥ १०१ ॥
महीधरो विष्णुरनन्तकर्मा महीं सदा धारयते यथैव ।
तथैव देही प्रकृतेर्विकारं वहन् नितान्तं तमु वक्ति विष्णुम् ॥ १०२ ॥
देहाद्यथा देहमुपैति देही तथैव भाद् भं समुपैति सूर्यः ।
सूर्यो यथाऽऽत्मा सकलस्य लोके तथा शरीरे स उ सूर्य आत्मा ॥ १०३ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ४८ ॥

३१८–अच्युतः, ३१९–प्रथितः, ३२०–प्राणः, ३२१–प्राणदः, ३२२–वासवानुजः । ३२३–अपां निधिः, ३२४–अधिष्ठानम्, ३२५–अप्रमत्तः, ३२६–प्रतिष्ठितः ॥ ४८ ॥

अच्युतः—३१८

च्युङ् गतौ भौवादिकः, तस्मात् क्तः प्रत्ययः, गत्यर्थात् कर्तरि क्तः, गत्यर्थाकर्मक०पा० ३–४–७२, प्रतिषेधार्थकेन नञा युक्तोऽच्युत इति । सर्गारम्भे यत् यत् यथाविधव्यवस्थया व्यवस्थापितं तत् तत् तथैवाद्यावध्यायाति तथैव च कल्पान्तं यास्यतीति कृत्वाच्युतधर्मस्य भगवतो विष्णोः सर्वव्यापकगुणं व्याचष्टे । लोकेऽपि च पश्यामः– यस्या यस्या योनेः प्रसवकालो यावान् सर्गारम्भ आसीत् तावानेव कालो–

उस विविधार्थ सम्पन्न मही को जो प्रमाद रहित अर्थात् व्यवस्थित रूप से धारण करता है उस विष्णु को विद्वान् विधानज्ञ पुरुष नित्य महीधर रूप से देखते हैं । जैसे अनन्तकर्मा विष्णु महीधरनामा सदा मही को धारण करता है, उसी प्रकार यह जीवात्मा भी प्रकृति के विकारभूत शरीर को धारण करता हुआ, सर्वथा विष्णु को ही बतला रहा है । जैसे यह जीवात्मा एक शरीर से शरीरान्तर में जाता है, उसी प्रकार यह सकल लोक का आत्मा सूर्य भी एक राशि से राश्यन्तर में जाता है तथा शरीर में भी आत्मरूप से सूर्य ही विद्यमान है ।

अच्युतः—३१८

गमनार्थक भ्वादिगण पठित च्युङ् धातु से 'गत्यर्थाकर्मकेति' पा० ३।४।७२ सूत्र से कर्ता अर्थ में क्त प्रत्यय करने पर च्युत शब्द के साथ निषेधार्थीय नञ् का तत्पुरुष समास करने से अच्युत शब्द सिद्ध होता है । जो अपने स्वरूपभूत लक्षणों से च्युत=स्खलित नहीं होता, उसका नाम अच्युत है । सर्गारम्भ में जो वस्तु जिस रूप में अपने स्वरूपभूत लक्षणों सहित उत्पन्न हुई, वह वस्तु अपने लक्षणों सहित उस ही रूप में अब तक आरही है, तथा कल्पान्त तक इसी रूप में व्यवस्थित रूप से चलती रहेगी । यह ही नियम भगवान् विष्णु के सर्वव्यापक अच्युतरूप धर्म को बता रहा है, अर्थात् उसके अच्युतत्व का बोधन कर रहा है । लोक में भी हम देखते हैं कि जिस जिस योनि का जितना जितना प्रसवकाल अर्थात् सन्तानोत्पत्ति का समय

ऽद्यापि लगति । अमुथैव स्थावरयोनिष्वपि पत्र-पुष्प-फलोद्गमो यथानियतकालमायाति कल्पान्तञ्च तथैव यास्यति । एतत् सर्वं विश्वं ससूर्यादिग्रहकं तमेवाच्युतं प्रतिपदं व्याख्याति । एवं विष्णोः सर्वं व्यश्नुवानमच्युतं गुणं कवयः प्रपदं पश्यन्ति ।

मन्त्रलिंगं च—

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥ यजुः-३८-२६

अक्षितम्=अच्युतम् ।

भवति चात्रास्माकम्—

वशी वसिष्ठः स उ चात्मकल्पैर्गुणैर्निबध्नन् जगदावृणोति ।
न तत्र किंचिच्च्यवते स्वधर्मात् प्रकाशयच्चाच्युतमर्च्यमर्कैः ॥ १०४ ॥

अर्कैः=स्तोत्रैः । अर्किणः स्तोतार इति, तत्र मन्त्रलिंगं च—

गायन्ति त्वा गायत्रिणो अर्चन्त्यर्कमर्किणः । ऋग्

उदाहरण-कल्पन-प्रकारो यथा—मनुष्यस्य तत्रैव नेत्रे सपरिच्छदे संलग्ने स्तो यत्र कल्पादावृषीणामास्ताम् । एवमेवापरेष्वंगेषु व्यवस्थायाति तथैव च कल्पान्तं यास्यति, अपरासु च योनिष्वपि तथैवोहनीयं भवति ।

सर्ग के आरम्भ में था, उतना ही समय सन्तानोत्पत्ति में अब लगता है, तथा कल्पान्त पर्यन्त इतना ही समय नियत रहेगा । यह ही नियम स्थावरयोनियों में फल पुष्पादि उत्पत्ति का भी समझ लेना चाहिये । सूर्यादिग्रहों सहित यह सकल जगत् भगवान् अच्युत नाम विष्णु का ही व्याख्यान कर रहा है । इस प्रकार सब में व्याप्त भगवान् विष्णु के अच्युतत्व रूप गुण को विद्वान् पुरुष पद पद पर देखते हैं । इस भावार्थ की पुष्टि—"यावती द्यावापृथिवी यावच्च सप्त सिन्धवो" इत्यादि यजुर्वेद १८।२६ मन्त्र से होती है । इस मन्त्र में अच्युत का समानार्थक शब्द अक्षित है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार स्पष्ट करता है—

पूर्णकाम होने से सब प्रकार के इन्द्रियजन्य विषयों से असंस्पृष्ट=पृथक् तथा सर्वसाधन सम्पन्न भगवान् अच्युत जगत् की रचना करके उसे अपने समान गुणों से आच्छादित=व्याप्त कर देता है, इस जगत् की कोई भी वस्तु भगवान् के अच्युतत्व धर्म का स्तवन करती हुई अपने स्वरूप से च्युत (स्खलित) नहीं होती । अर्क नाम स्तोत्र का है, तथा अर्की नाम स्तोता का है, यह इस 'गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः" ऋग्मन्त्र से सिद्ध होता है । इसी प्रकार से अन्य उदाहरणों की कल्पनायें कर लेनी चाहियें, जैसे की—अपने उपकरण सहित जो नेत्र कल्प के आदि में ऋषियों के थे, वे ही आज भी साधारण मनुष्यों के लगे हुये हैं, तथा कल्पान्त पर्यन्त इसी प्रकार के रहेंगे ।

प्रथितः— ३१६

प्रथ प्रख्याने, भौवादिकश्चौरादिकश्च। प्रथते=प्रख्यातो भवतीति प्रथितः। आसर्गात् सर्गान्तं विश्वं यथावदवस्थानेन धारयतीति कृत्वा प्रख्यातः सन् प्रथित इत्युक्तं भवति। तद्यथा लोकेऽपि च पश्यामः—तद्यथा प्लक्षन्यग्रोधोदुम्बरान् कृतवान् तथैव तान् सर्गान्तं नेष्यतीति तस्य प्रख्यातिः, न हि केनापि प्लक्षन्यग्रोधोदुम्बरा अद्यावधिः कृताः, न चाग्रे कर्तुं शक्ष्यन्ते-इति कृत्वा स विष्णुः स्वकया व्यवस्थया प्रथित उच्यते। मन्त्रलिंगं च—

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम्॥ यजु ३८-२६

भवतश्चात्रास्माकम्—

प्रख्यातवीर्यः स उ विश्ववन्द्यो लोकेऽस्ति गीतः प्रथितः स विष्णुः।
तं रोदसी, तं च समुद्रयुग्मं[१] व्यंजन्ति नित्यं "प्रथितं" पुराणम्॥ १०५॥
स नैति षड्भावविकारसंघं चक्रं क्रमन्तं कुरुते स नित्यम्।
यथाविधं यच्च कृतं विधात्रा तथाविधं कर्तुमिहास्ति नान्यः॥ १०६॥

समर्थ इति शेषः। १ पार्थिवमन्तरिक्षीयञ्च।

प्रथितः—३१६

प्रथ धातु प्रख्यान=प्रसिद्धि अर्थ में भ्वादि या चुरादिगणपठित है, अकर्मक होने से "गत्यार्थकर्मकेति" सूत्र से कर्ता में क्त प्रत्यय होने से प्रथित शब्द सिद्ध होता है।

सृष्टि से लेकर प्रलय पर्यन्त इस समस्त विश्व को व्यवस्थित रूप से धारण करने के कारण प्रख्यात=प्रसिद्ध होने से वह प्रथित है। यह भगवान् विष्णु का नाम है।

जैसा कि लोक में भी देखने में आता है, सर्गारम्भ में किये हुये प्लक्षन्यग्रोधादि वृक्षों को सर्ग के अन्त तक उसी प्रकार ले जायेगा यह उसकी प्रख्याति=प्रसिद्धि है। प्लक्षन्यग्रोधादि वृक्षों को न आज तक किसी मनुष्य ने बनाया और न आगे बना सकेगा। इसी प्रकार से वह विष्णु ही अपनी व्यवस्था के द्वारा प्रथित है। इस में "यावती द्यावापृथिवी यावच्च सप्त सिन्धवो" इत्यादि यजुर्वेद ३८।२६ प्रमाण है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

वह अपने बल तथा कर्मों से प्रख्यात=प्रसिद्ध, सकल विश्व का वन्दनीय भगवान् विष्णु लोक में प्रथित नाम से स्तुत होता है, उसको द्यावापृथिवी तथा पार्थिव और आन्तरिक्ष समुद्र युगल नित्य=प्रतिक्षण व्यक्त कर रहे हैं।

भगवान् विष्णु इस चलते हुये जगच्चक्र को चलाता हुआ भी षड्भाव विकारों को प्राप्त नहीं होता, तथा जो कुछ जैसा भगवान् ने बनाया उसे और कोई दूसरा बनाने में समर्थ नहीं है।

प्राणः—३२०

प्रपूर्वात् -अनतेर्घञि, अचि वा प्राण-शब्द उपपद्यते, तत्र स्वरो विभेदकः।

सूत्रात्मना भगवान् प्राणरूपो विष्णु विश्वं जीवनाय समर्थयति, यावद्भिः सूर्य-भगणैरायुनक्ति प्राणिनं तावत्सु सूर्य-भगणेष्वतियातेषु प्राणी म्रियते । एष वै नियमः सर्वं व्यश्नुवानो दृश्यते सर्गारम्भात् सर्गान्तं च, अत एव च ज्योतिर्विद्भिरायुर्मीयते मनुष्यस्य । एवं प्राण एव भगवानुक्तो भवति ।

मन्त्रलिंगं च—

प्राणाय नमो यस्य सर्वमिदं वशे ।
यो भूतः सर्वस्येश्वरो यस्मिंत्सर्वं प्रतिष्ठितम् ॥ अथर्व ११-४-१
प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते ।
प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥ अथर्व ११-४-१५

सर्वकमेतत् सूक्तं प्राणस्य व्याख्यानं, तत् सूरयः स्वयमनुशीलयन्तु, निदर्शनमात्रमुक्तमस्माभिः ।

भवन्ति चात्रास्माकम्—

प्राणः स विष्णुः स उ वस्तुमात्रं युनक्ति सूर्यस्य कलाभिरन्तः ।
सूर्यो यथा विश्वमिदं दधाति प्राणस्तथा विश्वमिदं दधाति ॥ १०७ ॥

प्राणः—३२०

प्राण शब्द प्रपूर्वक प्राणनार्थक अन धातु से पचाद्यच् प्रत्यय करने से सिद्ध होता है । वहाँ अन धातु अन्तर्गभित ण्यर्थ है । सूत्रात्मा प्राणरूप भगवान् विष्णु इस समस्त विश्व को प्राणन क्रिया के द्वारा जीवन के लिये समर्थ बनाता है ।

जिस प्राणी को भगवान् जितनी सूर्य की गति से युक्त करता है वह प्राणी उतनी सूर्य की गति के बीत जाने पर मृत्यु को प्राप्त हो जाता है, यह नियम सृष्टि से लेकर प्रलय पर्यन्त सर्वत्र व्याप्त देखने में आता है, और इसीलिये ज्योतिषियों ने मनुष्य की आयु का मान किया है । इस प्रकार से यह प्राण नाम भगवान् विष्णु का वाचक है । इस भगवान्नाम में 'प्राणाय नमो यस्य" इत्यादि अथर्व ११।४।१ मन्त्र प्रमाण है । यह सम्पूर्ण सूक्त ही प्राण शब्द का व्याख्यान करता है, विद्वान् पुरुष स्वयं इसका अनुशीलन करें । उदाहरण मात्र हमने दिखाया है ।

इसी अर्थ को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम प्राण है क्योंकि वह वस्तुमात्र को सूर्य की गतिरूप कलाओं से युक्त करता है, तथा जैसे सूर्य इस समस्त विश्व को धारण करता है उसी प्रकार प्राण भी समस्त विश्व को धारण करता है ।

१कफ ढकाभ्यामनुयन्ति केचिद् यथा मनुष्याः पशवो वयश्च।
त्वचा परे प्राणमुषन्ति लोके मीनादयो वारिचरा यथा के ॥ १०८ ॥
त्वक्फुफ्फुसाभ्यां बलमर्हयन्ति केचिद् यथा दर्दुरकोऽत्र लोके।
एवं त्रिधा प्राणिति सर्वजन्तुः प्राणात्मके ब्रह्मणि वर्त्तमानः ॥ १०९ ॥
१कफोढकौ फुफ्फुसौ।

प्राणदः—३२१

पूर्वं प्राणद-नाम-व्याख्याने प्रकृतिप्रत्ययाभ्यां व्युत्पादिततरं तत्र द्रष्टव्यम्।
प्राणान् ददाति द्यति खण्डयति वा स प्राणदः।
मन्त्रलिंगं च—

नमस्ते प्राण प्राणते नमो अस्त्वपानते। अथर्व ११-४-८

प्राणो मृत्युरपि, तद्यथा—

प्राणो मृत्युः तक्मा प्राणं देवा उपासते।
प्राणो ह सत्यवादिनमुत्तमे लोक आदधत्॥ अथर्व ११-४-११

एतेन प्राणद-नाम्ना विज्ञायते यत् सर्वं प्राणाख्येन भगवता प्राणदेन जीवन-मरणात्मकेन गुणेन व्याप्तमस्ति। अतः प्राणदो मृत्युरिति विष्णोर्नाम प्रपदं सर्वं लोक व्यश्नुवानमास्ते।

भवति चात्रास्माकम्—

स प्राणदो भूतविकारयुक्तान् प्राणेन जीवान्, किमु लोकमात्रम्।
चिराय १वस्तुं कुरुते, पृथक् च मृत्युश्च प्राणान् द्यति सर्वकस्य ॥ ११० ॥
१वस्तुम्=वसनाय।

कोई मनुष्य पशु पक्षी आदि फुफ्फुसों से प्राणन क्रिया करते हैं तथा दूसरे वारिचर मीन आदि त्वचा से प्राण लेते हैं। कुछ जैसे मेंढक आदि त्वचा और फुफ्फुस दोनों से प्राण—श्वास प्रश्वास करते हैं, इस प्रकार प्राणात्मक ब्रह्म में बर्तमान प्राणी तीन प्रकार से प्राणन करते हुये जीते हैं।

प्राणदः—३२१

प्राण शब्द का प्रकृति प्रत्यय प्रदर्शन पूर्वक व्युत्पादन पहले किया जा चुका है।

प्राणों को जो देता है, अथवा प्राणों का जो खण्डन करता है उसका नाम प्राणद है।

इस अर्थ में 'नमस्ते प्राण प्राणते" इत्यादि अथर्व ११।४।८। तथा खण्डनार्थ में "प्राणो मृत्युः" इत्यादि अथर्व ११।४।११। मन्त्र प्रमाण है। इस प्राणदः नाम से भगवान् प्राण नाम विष्णु के जीवन तथा मरणात्मक गुण व्याप्ति की सर्वत्र प्रतीति होती है। इसलिये भगवान् का प्राणद नाम मृत्यु रूप से सकल विश्व का व्यापन करता है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

वह भगवान् प्राणद नामा विष्णु इन भौतिक सकल शरीरों को प्राण के द्वारा चिरकाल तक जीने में समर्थ करता है तथा मृत्युरूप से सब के प्राणों का खण्डन करता है।

वासवानुजः - ३२२

निवासार्थक आच्छादनार्थको वा भौवादिक आदादिकश्च धातुस्ततः "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" इत्युणादि १-१ सूत्रेण बाहुलकादुण् प्रत्ययो, वसति सर्वत्र, वस्ते वा सर्वमिति वासुरीश्वरः। वासोरिदं वासवं सर्वं जगत्। वासवं जगदनुजातो=ऽनुप्रविष्टो वासवानुजः। अजातोऽपि जगदनुप्रविष्टत्वाज्जात इव प्रतीयमान इत्यर्थः। भगवतोऽभीद्धतपसो ब्रह्मण ऋतसत्यरूपं द्वन्द्वमजायत, अत एव सर्वमिदं जगदृतसत्यरूपद्वन्द्वरूपम्। इह हि सर्वं युग्मरूपमुपलभ्यते तथा हि, स्त्रीपुरुषौ, नक्तन्दिनं, दक्षिणोत्तरायणे, सव्यापसव्ये, नेत्रे, जंघे, नासिके, तथा हस्तौ, पादौ, बाहू च। द्वे दन्तपंक्ती, द्वे जिह्वोपजिह्वे, द्वौ (कफोढौ=फुप्फुसौ), हृदयमपि-उभयपार्श्वस्थितेभ्यश्चतुर्भ्यः प्रकोष्ठेभ्यश्चतुर्धाविभक्तं युग्मकद्वयरूपं, तथा हि हृदये चत्वार, प्रकोष्ठा द्वौ वामभागे, द्वौ च दक्षिणभागे तेषाञ्चोभयपार्श्वयोरौत्तराधर्येण स्थितानां क्रमशो दक्षिणालिन्दः १, दक्षिणनिलयः २, वामालिन्दः ३, वामनिलयः ४ इत्येतानि नामानि, तेषाञ्चैकः प्रकोष्ठोऽशुद्धं रक्तमाकर्षत्यपरस्तद्रक्तं फुप्फुसयोः प्रक्षिपति, तृतीयः फुप्फुसाभ्यां प्रत्याकर्षति, चतुर्थश्च तद् रक्तं महाधमन्या सर्वस्मिञ्छरीरे व्यापयति। यकृत्प्लीहानौ द्वौ, ग्रहण्यामाशयौ द्वौ। दोषदुष्टो ह्यामाशयो

वासवानुजः—३२२

निवासार्थक भ्वादिगणपठित यद्वा आच्छादनार्थक अदादिगण की वस धातु से 'कृवापाजिमीत्यादि उणादि सूत्र से उण् प्रत्यय होने से वासु शब्द सिद्ध होता है, जोकि सर्वत्र बसता है अथवा सब का आच्छादन करता है, इस व्युत्पत्ति के अनुसार ईश्वर का नाम होता है, तथा वासु का जो है उसका नाम वासव है, यह जगत् का नाम हुआ, इसी प्रकार वासव में अनुप्रविष्ट होकर जो 'अज' भी पैदा=उत्पन्न हुआ सा प्रतीत होता है उसका नाम वासवानुज है यह भगवान् विष्णु का नाम हुआ।

सब प्रकार से प्रवृद्ध भगवान् के तेजोरूप तप से ऋत सत्य रूप एक युगल (जोड़ा) उत्पन्न हुआ, इसलिये यह सकल जगत् ऋतसत्यरूप द्वन्द्व मय है, अर्थात् यह सम्पूर्ण जगत् ऋत तथा सत्यरूप है तथा सर्वत्र ही यह द्वन्द्वता देखने में आती है, जैसे कि– स्त्री पुरुष—रात दिन दक्षिणायन उत्तरायण—वामदक्षिण—नेत्र—जङ्घा - नासिक तथा वामदक्षिण हस्त पाद और भुजा, दो दन्तपंक्ति, दो जिह्वा और उपजिह्वा, दो फुप्फुस, वाम दक्षिण भागस्थित चतुर प्रकोष्ठों से चतुर्धाविभक्त हृदय भी युगल द्वयरूप है, जैसे हृदय में चार ४ भाग जो कि प्रकोष्ठ नाम से कहे जाते हैं, दो वाम भाग में और दो दक्षिण भाग में उन दोनों पार्श्वों में उत्तर और अधर अर्थात् ऊपर नीचे स्थित हुये उन प्रकोष्ठों के नाम क्रम से दक्षिणालिन्द १ दक्षिण-निलय २ तथा वामालिन्द ३ वामनिलय ४ इस प्रकार हैं। उन में से एक अशुद्ध रक्त का आकर्षण करता है दूसरा उस रक्त का फुप्फुसों में प्रक्षेप करता है, तीसरा फुप्फुसों से रक्त का प्रत्याकर्षण करता है, चतुर्थ उसको सम्पूर्ण शरीर में पहुँचाता है। दो यकृत् और प्लीहा तथा दो

ज्वरं जनयति, क्षुधाञ्च नाशयति। ग्रहण्यां स्थितो दोषो वायुना रसरक्तमांसमेदोऽस्थि-मज्जाशुक्रेषु यदा प्रक्षिप्यते तदा तद् धातुजलक्षणा विकाराः प्रादुर्भवन्ति। धातवश्चानु-लोम्यप्रातिलोम्याभ्यामन्यत्र धातुषु प्रक्षिप्ता विविधान् विकारान् जनयन्ति। विस्तर-श्चरकाद्यार्षसंहितासु द्रष्टव्यः। मनोविकाराणां जन्मभूमिश्च ग्रहणी, दुष्टा ग्रहणी मनो विकरोति मनश्च विकृतं प्रवृद्धैश्चिन्ता—शोकभयक्रोधकामलोभमोहादिभि-र्ग्रहणीं विकरोति, ततो विक्षिप्तचित्तो ह्रसति, शोचति, रोदिति, हसति, करोति चातिमानुषाणि कर्माणि। लघुष्वन्त्रेषु सामदोषमलसञ्चयो विषमज्वराणां मूलम्। आक्षेपकम्पार्द्धाङ्गवातप्रभृतीनां विकाराणामधिष्ठानं सामदोषमलैर्योगोवृहदन्त्राणाम्। शरीरोत्तमाङ्गे नासिका, शरीराधोभागे च शिश्नमिति शिश्नसम्बन्धिनो विकाराः प्रमेहसंज्ञिनो भवन्ति, नासिकासम्बन्धिनश्च प्रतिश्यायपीनसनासाक्षयादि-संज्ञिनः। अत एव प्रवृद्ध उपदंशे नासाक्षयः। मुखमन्नग्रसनद्वारम्। मलविसर्जनद्वार-श्चपायुः। शिश्नप्रसारो बाह्यो भवति, योनिश्चान्तर्गह्वरा भवति। दृढधातुप्रधानो हि पुरुषः, कोमलधातुप्रधाना च स्त्री। पुरुषहृदयापेक्षया स्त्रीहृदयमल्पभारं भवति—अत एव स्त्रीहृदयं न चिराय रहस्यं रक्षितुं प्रभवति। यथा प्रत्यृतुं स्त्रीणामार्तवं न तथा पुरुषस्य, शुक्रस्य सर्वकालं शुद्धत्वात्। स्त्री क्षेत्रं, पुरुषो वीर्यरूपस्य बीजस्य वप्ता,

---

ही ग्रहणी और आमाशय, आमाशय के दुष्ट हो जाने से ज्वर की उत्पत्ति तथ क्षुधा का नाश होता है। ग्रहणी में स्थित दोष वायु के द्वारा रस रक्त मांस मेदा अस्थि मज्जा तथा शुक्र धातु में पहुंचकर तत् तत् धातु सम्बन्धी विकारों को उत्पन्न करता है। धातु भी वायु के द्वारा दूसरे धातुओं में आनुकूल्य या प्रातिकूल्य से पहुँचकर विविध विकारों को उत्पन्न करते हैं। इस विषय का सविस्तर वर्णन चरक आदि आर्ष ग्रन्थों में देखना चाहिये। सब प्रकार के मनोविकारों की जन्मभूमि ग्रहणी है, यह ही ग्रहणीकला दुष्ट होकर मन को विकृत कर देती है, तथा विकृत हुआ मन अपने बढे हुये चिन्ता शोक भय आदि विकारों से ग्रहणी को विकृत कर देता है, जिस से विक्षिप्त चित्त होकर मनुष्य कृश होने लगता है, कभी शोक करता है, कभी रोता है, कभी हंसता है तथा साधारण मनुष्य से असम्भव कार्य करता है। छोटी अन्तड़ियों (आन्त) में आमदोष सहित मल का एकत्र होना विषम ज्वरों का मूल है तथा बृहत् (बड़ी) अन्तड़ियों में आम दोष सहित मल का एकत्र होना कम्प अर्द्धाङ्गवात प्रभृति रोगों का कारण है। शरीर के ऊर्ध्वभाग में नासिका का स्थान है तथा अधोभाग में गुह्येन्द्रिय का, शिश्न सम्बन्धी विकारों को प्रमेह नाम से कहते हैं तथा नासिका सम्बन्धी विकारों को प्रतिश्याय (जुकाम) पीनस नासाक्षय आदि नामों से कहते हैं। इसीलिये उपदंश के बढ जाने पर नासिका का क्षय हो जाता है। अन्न ग्रहण करने का द्वार मुख है तथा मल को विसर्जन करने का द्वार गुदा है। शिश्न का प्रसार (फैलाव) बाहर को है तथा योनि का प्रसार भीतर को होता है। पुरुष का शुक्ररूपधातु दृढ होता है, तथा स्त्री का रजो धातु कोमल होता है पुरुष के हृदय की अपेक्षा स्त्री का हृदय ह्रस्व (हल्का) होता है इसीलिये स्त्री के हृदय में गुप्त बात बहुत दिन नहीं ठहर सकती। जैसे स्त्रियों के प्रतिमास रजःप्रवृत्ति होती है, उस प्रकार पुरुष के नहीं। क्योंकि शुक्र सर्वदा शुद्ध होता है। स्त्री क्षेत्र रूप है और पुरुष उस में वीर्य रूप बीज का वपन करता

पुरुष एकोऽपि बह्वीषु स्त्रीषु बीजमाधातुं प्रभवति, न तथा स्त्री प्रसवान्तं बहूनां बीजानां धात्री=धारयित्री भवति, पुरुषो हि लोकसम्मित इति हेतोः। गर्भाशयगतं बीजं वायुर्यावद्धा भिनत्ति तावानेव प्रसवभेदो भवति युग्मकस्ततोऽधिको वा, अनेकप्रसवे चायमपि नियमः—यदा यस्य जन्मनि सूर्यराशेर्वर्गे शनिर्भवति, तदा भवति युगलप्रसूतिर्यदि च नवांशेऽपि शनिः सूर्यवर्गराशिमधितिष्ठति, तदा युगलादधिकानामपि प्रसवः। रूपाणामधिष्ठानं स्त्री तस्यां रूपाणामाधापयिता च पुरुषः। यथा सूर्यश्चन्द्रमसं सुषुम्णाख्येन रश्मिना विद्योतयति, तथा सर्गादारम्भाद, द्यपर्यन्तं पुरुषः स्वां प्रेयसीं विविधालङ्कारैर्विभूष्य विद्योतयति। इत्येतदृतसत्यद्वन्द्वरूपं जगत् प्रतिपदं भगवन्तं वासवानुजं व्याचष्टे। य एवं वेद स तत्त्वतो विष्णुं वेद। इदं सर्वं भगवतो विष्णोर्लीलामात्रमिति जानन्ना न ग्लायति न हृष्यति, न रोदिति, न हसति, न रमते, न विरमति, न युध्यते, न सन्दधाति, न परुषं वक्ति, न मृदुवचनैः सन्तोषयति। एवं विविधमूहनीयं भवति। इति दिङ्मात्रमुक्तम्।

भवतश्चात्रास्माकम्—

वासुर्हि विष्णुः स उ चान्तरङ्गः स्वाभीद्धतापस्य विकारभूते।
ऋतञ्च सत्यञ्च पृथग् जनित्वा ताभ्यां प्रपञ्चं कुरुते समस्तम् ।।१११।।

है। पुरुष एक प्रसव काल में बहुत स्त्रियों में गर्भाधान कर सकता है, स्त्री एक प्रसव में एक से अधिक बीज को धारण नहीं कर सकती। क्योंकि पुरुष लोक सम्मित है। गर्भाशय गत बीज का यदि वायु द्वारा भेदन हो जाये तो जितने प्रकार से भेदन होगा उतने ही दो या दो से अधिक बच्चों का जन्म होगा, तथा अनेक प्रसव में, जन्म समय सूर्यराशिवर्ग में या सूर्यराशि नवांशक में शनि का होना भी कारण है। रूपों का अधिष्ठान=आधार स्त्री है, तथा रूपों का अधिष्ठापयिता=स्थापना करनेवाला पुरुष है, जैसे सूर्य अपनी सुषुम्णा रश्मि के द्वारा चन्द्रमा को प्रकाशयुक्त=कान्तियुक्त करता है, इस ही प्रकार सृष्टि के आदिकाल से लेकर अब तक पुरुष अपनी प्रिय पत्नी को विविध अलङ्कारों से भूषित करके शोभित करता है। इस प्रकार से यह ऋतसत्यरूप द्वन्द्वमय जगत् प्रतिपद भगवान् का व्याख्यान कर रहा है, जो इस प्रकार जानता है वह तत्त्वरूप से विष्णु को जानता है। यह सब कुछ भगवान् की लीला है, ऐसा जाननेवाला पुरुष न कभी उदास होता है, न खुश होता है, न रोता है, न हंसता है, न रमण करता है, न विराम करता है, अर्थात् अपने कर्तव्य कर्म से विरत होता है। न किसी से युद्ध करता है, न किसी से मेल करता है, न किसी को कटुवचन कहता है, तथा न किसी को मधुर वचनों से सन्तुष्ट करता है। यह हमने कल्पनाओं का मार्गदर्शन करवाया है, इसी प्रकार अन्यान्य कल्पनायें भी विज्ञपुरुष स्वयं कर सकेंगे।

इस उपरोक्त भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम वासु है, और वह ही इस अपने वासव जगत् में अन्तरङ्ग=अन्तर्गत अर्थात् व्याप्त होकर विद्वानों द्वारा वासवानुज नाम से स्तुत किया जाता है, तथा वह ही अपने अभीद्ध=अत्यन्त प्रवृद्ध तपोरूपतेज के विकारभूत ऋत और सत्य के युगल को पृथक्-पृथक् उत्पन्न करके उनके द्वारा इस समस्त विश्व का निर्माण करता है।

एवं हि यो वेत्ति स वेत्ति विश्वं विष्णुं स वा पश्यति सर्वयालम् ।
तं वासवानू१जमनन्तशक्तिं तातन्यमानं कवयः स्तुवन्ति ॥ ११२ ॥
१अनूजशब्दे दीर्घश्छन्दोऽनुरोधात् ।

अपांनिधिः—३२३

अप—शब्दो व्याप्त्यर्थकादाप्लृधातोः—"आप्नोतेर्ह्रस्वश्च" इत्युणादि सूत्रेण क्विपि धातोर्ह्रस्वत्वे च सिध्यति नित्यं स्त्रियां बहुवचनान्त आप्यन्ते जीवनायेत्यापो जलानि ।

निधिशब्दश्च निपूर्वाद्धधातेरधिकरणे कि—प्रत्ययेन निधीयतेऽस्मिन्निति निधिः सिध्यति ।

एवञ्चापां=जीवनसाधनानां भौमानामान्तरिक्षाणाञ्चाम्भसां निधिः=स्थानं भगवान् विष्णुरपान्निधि शब्देनोच्यते ।

मन्त्रलिंगञ्चात्र—

"यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ऋग् १०-१२१-४
"आपो ह यद् बृहती विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्तासुरेकः कस्मै देवाय हविषा विधेम ॥ ऋग् १०-१२१-७

भवति चात्रास्माकम्—

अपां निधिर्विष्णुरशेषबन्धुर्द्धं स पाथांसि ससर्ज चैकः ।
स पार्थिवानां निधिरम्भसां वा स खेशयानाञ्च निधिर्जलानाम् ॥११३॥

इस प्रकार से जो अनन्तशक्ति सर्वत्र प्रसृत सर्वगत वासवानुज नाम विष्णु को सम्यक् देखता या जानता है वह ही इस समग्र विश्व को तत्त्वरूप से जानता है । वासवानुज इस पद्यगत नाम में छन्दोऽनुरोध से नू दीर्घ किया गया है ।

अपान्निधिः—३२३

व्यापनार्थक स्वादिगण पठित आप्लृ धातु से उणादि क्विप् प्रत्यय तथा धातु के आकार को ह्रस्व होने से अप् शब्द सिद्ध होता है, यह अप् शब्द नित्यबहुवचनान्त स्त्रीलिङ्ग है । जीवन के लिये जिन्हें प्राप्त किया जाता है उनका नाम अप् है नि पूर्वक "डुधाञ् धारण-पोषणयोः" धातु से अधिकरण में कृत् कि प्रत्यय तथा धातु के आकार का लोप होने से निधि शब्द सिद्ध होता है, जिसमें कुछ रक्खा जाता है उसका नाम निधि है । इस प्रकार से जीवन के मुख्य साधनभूत पृथिवी तथा अन्तरिक्ष में होनेवाले जलों का जो स्थान है उसका नाम अपांनिधि है, भगवान् विष्णु का नाम है । इस अर्थ में यह मन्त्र "यस्येमे हिमवन्तो महित्वेति" तथा 'आपो ह यद् बृहती विश्वमायन्नित्यादि ऋक् १०।१२१ ७ प्रमाण है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है—

सबको व्यवस्था में बांधनेवाले भगवान् विष्णु का नाम अपांनिधि है, क्योंकि वह स्वसृष्ट पार्थिव तथा आन्तरिक्ष जलों का निधि अर्थात् स्थान है ।

अधिष्ठानम्— ३२४

ष्ठा गतिनिवृत्तौ भौवादिकः, तस्मादधिपूर्वादधिकरणार्थे करणाधिकरणयोश्च, पा० ३-३-११७, सूत्रेण ल्युट् प्रत्ययः। युवोरनाकौ, पा० ७-१-१, सूत्रेणानादेशे आदेश-प्रत्यययोः, पा० ८-३-५९, इत्यनेन षत्वे कृते, ष्टुना ष्टुः, पा० ८-४-४१. सूत्रेण टवर्गादेशे कृतेऽधिष्ठानम्।

यस्मिंश्चराचरं तिष्ठति तदधिकरणम्, तमक्षरमधिकरणीकृत्य सर्वं तिष्ठतीत्यधिष्ठानं ब्रह्म, तस्य च ब्रह्मणोऽधिष्ठानात्मको गुणः सर्वं व्यश्नुवानो दृश्यते, तद्यथा लोकेऽपि च पश्यामः—गर्भो मातरमधितिष्ठति, गर्भे च तस्य गर्भस्य स्वानि शरीराङ्गानि तं गर्भस्थदेहमधिकरणीकृत्य तिष्ठन्ति, तत्रस्थं हृदयमधिकृत्य शुभाशुभभावोदया अधितिष्ठन्ति, शुभाशुभभावोदयमधिकरणीकृत्य जातकस्य सर्वा मरणान्ताः क्रिया अधितिष्ठन्ति, एवं कृत्वा सर्वत्राधिष्ठानपरंपरा दृश्यमाना तं अधिष्ठान-नामानं व्यापकधर्मेण व्यश्नुवानं विष्णुमेव व्याचष्टे।

मन्त्रलिंगं च—

यत्रेमा विश्वा भुवनानि तस्थुः। ऋग् १–१६४–२
यस्मिन् विश्वानि भुवनानि तस्थुः। यजुः–१७–३०
प्रजापतिश्चरति गर्भे अन्तर्जायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।
यजुः-३१-१९

अधिष्ठानम्—३२४

गतिनिवृत्ति=गति के अभावरूप अर्थ में विद्यमान भ्वादिगण पठित अधिपूर्वक ष्ठा धातु से "करणाधिकरणयोश्च" इस पा० ३।३।११७ सूत्र से अधिकरण अर्थ में ल्युट् प्रत्यय तथा यु को अनादेश करने से अधिष्ठान शब्द की सिद्धि होती है। जिसमें यह समस्त चराचर जगत रहता है उसको अधिकरण, अथवा अधिष्ठान रूप से कहा जाता है, यह सकल विश्व उस परब्रह्म में ही रहता है, इसलिये परब्रह्म का नाम अधिष्ठान है। उस ब्रह्म का यह अधिष्ठानात्मक गुण सर्वत्र व्यापकरूप से देखने में आता है, जैसा कि हम लोक में देखते हैं, गर्भ माता में रहता है, गर्भ में उसके गर्भस्थ शरीर सम्बन्धी अवयव रहते हैं, उसके हृदय में शुभ अशुभ भाव रहते हैं, तथा शुभ अशुभ भावों में उस गर्भस्थ जीव की जन्म से लेकर मरणपर्यन्त की सब क्रियायें रहती हैं। इस प्रकार से दर्शनगोचर होती हुई अधिष्ठानों की परम्परा, उस अधिष्ठान नामक भगवान् विष्णु की व्यापकता का आख्यान=कथन करती है। इस उपरोक्त अर्थ में 'यत्रेमा विश्वा भुवनानि तस्थुः' ऋग् १।१६४।२ 'प्रजापतिश्चरति गर्भे ... तस्मिन् ह तस्थु-

शश्वद् विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः, ऋग् १-३५-५
ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः । ऋग्
योऽस्याध्यक्षः, ऋग्

इति दिङ् मात्रं निदर्शितम् ।

भवति चात्रास्माकम्—

स एव विष्णुः प्रपदं समग्रं स्वस्मिन्नधिष्ठापयते ह विश्वम् ।
तस्मादधिष्ठानमिति गृणन्तो गायन्ति देवास्तमचिन्त्यशक्तिम् ॥११४॥

अप्रमत्तः—३२५

अप्रमत्तः प्रमादरहितः । प्र-पूर्वान्मदी हर्षे धातोः क्त-प्रत्यये प्रमत्तः, स प्रतिषेधार्थकेन नञा युक्तोऽप्रमत्तः ।

भगवान् स्वकव्यवस्थात्मकर्मणो न प्रमाद्यति तस्मादप्रमत्तः स विष्णुरुक्तो भवति । लोकेऽपि च पश्यामः—स्वस्थस्य प्राणिनः समनस्केन्द्रियाणि स्वानि कर्माणि कुर्वन्ति न प्रमाद्यन्ति, न वोपरमन्ते, तथैव च श्वासप्रश्वासौ न प्रमाद्यतः । हृदयं च वा यावज्जीवं न प्रमाद्यति । अमुथैव सूर्यादयो ग्रहोपग्रहा भ्रमन्तो न प्रमाद्यन्ति यतो हि तेषां ग्रहोपग्रहाणां व्यवस्थापनं भगवताप्रमत्तेन विष्णुना कृतमास्ते । एवं लोकं दृष्ट्वा विविधमूहानमूहनीयं भवति ।

भुवनानि विश्वा" यजु० ३१।१६ "यस्मिन् विश्वानि भुवनानि तस्थुः" यजु० १७ ३० इत्यादि मन्त्र प्रमाण हैं । यह केवल उदाहरणों का मार्ग स्पष्ट किया गया है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार स्पष्ट करता है--

इस समग्र विश्व को भगवान् अपने में स्थापित किये हुये है, इसलिये उस अचिन्त्यशक्ति भगवान् विष्णु की स्तुति करते हुये देवजन उसका अधिष्ठान नाम से गान करते हैं ।

अप्रमत्तः—३२५

जो किसी प्रकार का और कभी भी प्रमाद नहीं करता, उसका नाम अप्रमत्त है । प्रपूर्वक हर्षार्थक दिवादिगणपठित मदी धातु से क्त प्रत्यय करने से प्रमत्त शब्द सिद्ध होता है. तथा प्रतिषेधार्थक नञ् से तत्पुरुष समास करने से अप्रमत्त शब्द बन जाता है ।

भगवान् अपने व्यवस्थात्मक कर्म से कभी भी प्रमाद नहीं करता इसलिये विष्णु का नाम अप्रमत्त है ।

लोक में भी देखा जाता है, स्वस्थ प्राणी की इन्द्रियां अपने २ कर्मों को नियत रूप से करती हुई कभी भी प्रमाद नहीं करती, तथा न कर्म से ही विरत होती हैं ।

अपने व्यवस्थित क्रम से चलते हुये श्वास प्रश्वास कभी प्रमाद नहीं करते, इसी प्रकार भ्रमण करते हुये सूर्य आदि ग्रह उपग्रहों सहित प्रमाद नहीं करते, क्योंकि उनकी व्यवस्था भगवान् अप्रमत्त नामक विष्णु के द्वारा की गई है । इस प्रकार लोक को देखकर नाना प्रकार

मन्त्रलिंगं च—

महांस्त्वेन्द्रो रक्षत्यप्रमादम् । अथर्व १२-१-१८

भवतश्चात्रास्माकम्—

स विश्वबन्धुर्न पुरा न पश्चात् प्रमादमैच्छत् न करिष्यते वा ।
तथा यथा भानुरचिन्त्यवीर्यः प्रमादमन्वेति न दृश्यमानः ॥११५॥
तं चाप्रमत्तं प्रपदं ह विष्णुं विश्वेऽथ देहेऽथ नियुक्तमात्रम् ।
सन्नद्धकर्मानुरतं ह विश्वं दृष्ट्वा प्रसीदन्ति नमन्ति तं वा ॥११६॥

प्रतिष्ठितः—३२६

ष्ठा गतिनिवृत्तौ, भौवादिकः, तस्मात् क्तः तस्मिन् परे द्यतिस्यतिमास्थामित्ति किति, पा० ७-४-४०, इत्यनेनेकारादेशः । प्रति-उपसर्गः, तस्मादुत्तरस्य तिष्ठतेः षकारादेशः, उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् पा० ८-३-६५, इत्यनेन सूत्रेण, । यद्वा सर्वं प्रत्यादरभावेन स्थितिः प्रतिष्ठा, सा सञ्जातास्येति तारकादेराकृतिगणत्वादितच्प्रत्यये प्रतिष्ठितशब्दः सिध्यति ।

यो हि यं प्रति आदरभावेन स्थितो भवति स हि तं प्रति स्थितः सन् प्रतिष्ठित उक्तो भवति, तद्यथा समां प्रति आदरभावेन स्थितः पुरुषः सभापतित्वे प्रतिष्ठाप्यते, स हि तावन्तं कालं सभायां विष्णुरिव प्रकाशते, सभां व्यवस्थापयति वा, सभाया

की कल्पनायें कर लेनी चाहियें । इसमें "महांस्त्वेन्द्रो रक्षत्यप्रमादम्" इत्यादि मन्त्र प्रमाण है ।

इस भाव को अपने पद्यों द्वारा भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विश्वबन्धु अर्थात् समस्त विश्व को व्यवस्था में बद्ध करनेवाले भगवान् ने न कभी पहले प्रमाद किया और न आगे करेगा, जैसे प्रत्यक्ष दीखता हुआ अचिन्त्यशक्ति सूर्य कभी भी प्रमाद नहीं करता ।

समस्त विश्व या शरीर में नियमित कर्म करते हुये इस विश्व को देखकर महापुरुष प्रसन्न होते हैं, तथा पद पद पर अप्रमत्त नामक विष्णु को नमन करते हैं ।

प्रतिष्ठितः—३२६

गति निवृत्यर्थक भ्वादिगणपठित ष्ठा धातु से क्त प्रत्यय तथा "द्यतिस्यतिमास्थामित्ति किति" पा० ७।४।४० सूत्र से धात्वाकार को इकारादेश और प्रति के संयोग से उपसर्गात् सुनोतिसुवतिस्यतीत्यादि पा० सू० ८।३।६५ से षत्व करने से प्रतिष्ठित शब्द सिद्ध होता है ।

यद्वा-सबके प्रति आदरभाव से स्थिति प्रतिष्ठा, वह जिसकी बन गई है, उसका नाम प्रतिष्ठित है, प्रतिष्ठा शब्द से तारकादि के आकृतिगण होने से इतच् प्रत्यय से प्रतिष्ठित शब्द सिद्ध होता है । जो जिसके प्रति आदर भाव से स्थित होता है वह उसके प्रति स्थित ही प्रतिष्ठित नाम से कहा जाता है । जैसे सभा में आदर भाव से स्थित पुरुष सभापति पद पर प्रतिष्ठित किया जाता है, वह सभाकाल पर्यन्त सभा में विष्णु के समान प्रकाशमान रहता है,

गुणदोषौ च तं प्रतिष्ठितं पुरुषं लिम्पतः, विसृष्टायां सभायां तस्य पुरुषस्य तेजस्विता न कार्योपयोगिनी मान्या च भवति। एवं शरीरेऽपि शारीरकर्मणि शरीरं यावज्जीवं प्रवर्तयितुं जीवो देहे प्रतिष्ठितो भवति, यस्मात् स जीवः प्रतिष्ठितो भवति तस्मात् स जीवो देहं परित्यजति मृत्युना चोदितः सन्। एवं हि भगवान् चराचरं विश्वस्य सर्जनं प्रति विश्वस्य नियमनं प्रति वा स्थितः प्रतिष्ठित उक्तो भवति, अत एव च सर्वत्र सदा वा स विष्णुः स्वकेन प्रतिष्ठित-गुणेनात्मानं व्यञ्जन् सन् प्रतिष्ठित उक्तो भवति, एवं विविधमुदाहरणानामूहनीयं भवति।

मन्त्रलिंगं च—

असति सत् प्रतिष्ठितं सति भूतं प्रतिष्ठितम्।
भूते ह भव्य आहितं भव्यं भूते प्रतिष्ठितं तवेद्विष्णो बहुधा वीर्याणि।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन्॥

अथर्व १७-१-१९

भवति चात्रास्माकम्—

सनातनो विष्णुरिदं[1] सिसृक्षुः प्रतिष्ठितः पश्यति विश्वमात्रम्।
यावन्तमन्वेति सभा स्वकालं तावत्सभेशोऽपि[2] प्रतिष्ठितः स्यात्॥११७॥
प्रवाहतोऽनादिमदस्ति विश्वं विश्वव्यवस्थाकृतबन्धहेतोः।
प्रतिष्ठितो विष्णुरिहास्ति गीतो दिग्देशकालानतिवर्त्तमानः॥११८॥

१ इदं=जगदित्यर्थः। २ प्रे ह्ले वेति छान्दसनियमेन लघुत्वमिह ज्ञेयम्।

तथा सभा को सुव्यवस्थित रखता है, सभा में होनेवाले गुण या दोष का उत्तरदायित्व प्रतिष्ठित पुरुष पर ही रहता है। सभा के विसर्जित होने पर उस पुरुष की तेजस्विता=प्रभावशालित्व स्वरूप से होती हुई भी कार्योपयोगी न होने से सभाकाल के समान मान्य नहीं होती। इसी प्रकार शरीर में भी शरीर को जीवन पर्यन्त शारीरिक कर्मों में प्रवृत्त करने से जीवात्मा प्रतिष्ठित होता है, तथा वह प्रतिष्ठित जीव शरीर काल पूर्ण होने पर मृत्यु से प्रेरित होकर शरीर को छोड़ देता है। इसी प्रकार इस चराचर विश्व के सर्जन या नियमन के प्रति स्थित भगवान् प्रतिष्ठित नाम से कहा जाता है। तथा वह सकल विश्व में व्याप्त अपने प्रतिष्ठात्मक गुण से ही अपने आपको प्रकट कर रहा है। इसी प्रकार और और उदाहरणों की भी कल्पनायें कर लेनी चाहियें। इस अर्थ का पोषक "असति सत्प्रतिष्ठितं सति भूतं प्रतिष्ठितमित्यादि" अथर्व १७।१।१९ मन्त्र है।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

विश्व का स्रष्टा सनातन भगवान् विष्णु इस सकल विश्व को नियमित करता हुआ इसका द्रष्टा अर्थात् सकल जगत् को देखता रहता है, तथा प्रतिष्ठित है। इसी प्रकार सभाकाल में सभा का नियमनकर्ता अथवा द्रष्टा होने से सभापति भी प्रतिष्ठित होता है।

यह सकल विश्व प्रवाहरूप से अनादि है, और इस विश्व को अपनी व्यवस्था में निबद्ध करने के कारण तथा दिग् देश काल से परिच्छिन्न न होने के कारण भगवान् विष्णु प्रतिष्ठित नाम से स्तुत होता है।

तं सर्ववन्द्यं प्रपदं ह विष्णुं पश्यन्ति सर्वत्र ततं जगत्यास् ।
तथा यथात्मा स्वरथे१ स्थितःसन् शक्त्या स्वयास्थापयते ह कायम् ॥११६॥

१ रथे=शरीरे ।

स्कन्दः—३२७ स्कन्दधरः—३२८

स्कन्दिर् गतिशोषणयोः, भौवादिकः, तस्मात् सामान्येन अच् प्रत्ययः पचादिलक्षणः, "सर्वधातुभ्योऽच्" इत्यनेनौणादिसूत्रेण वाच् प्रत्ययः । यः स्कन्दति गच्छति शुष्यति च स स्कन्दः, अथवा यो गमयति शोषयति च स स्कन्दः । ण्यन्ताद् वा "अच्" प्रत्ययं कृत्वा स्कन्द इति रूपं साधुत्वाय कल्पते ।

लोके चापि पश्यामः—गतिर्हि वायौ दृश्यते, जले च सरणता दृश्यते, समुद्रे जलानां विविधरूपगुणधर्मवतां वीचीनां नियोगात् सततं गतिमत्ता दृश्यते, तत्रैव च समुद्रे महाकायवतां मीनादीनां पिण्डशरीरवतां गमनं दृश्यते । तत्रैव च समुद्रे महाकायवतां पाषाण-गुणवतां शुष्कानां पर्वतानामुद्गमो दृश्यते । तथैव लोकसाम्यमुपगतेऽस्मिन् प्राण-शरीरेऽपि रसादिषु सप्तधातुषु सत्सु तत्रास्थि-धातुं शुष्कं पाषाणमिव दृढं कुरुते । सौषिर्येण च योजयति, तत्र वायुः प्रकोपं माऽऽपद्येतेति कृत्वा तस्मिन्नस्थिन् मज्जानं निवेशयति । अमुथैव वानस्पत्ये जगत्यपि ज्ञातव्यं भवति । तस्य भगवत एषा व्यवस्था नित्य विश्वं व्यश्नुवाना दृश्यते ।

उस सर्ववन्द्य भगवान् विष्णु को विद्वान् महापुरुष पद पद पर सर्वत्र व्याप्त हुआ देखते हैं, जैसे कि 'शरीर में' प्रतिष्ठित अपनी शक्ति से शरीर का नियमन करते हुये जीवात्मा को । रथ का नाम शरीर है ।

स्कन्दः—३२७ स्कन्दधरः—३२८

गति तथा शोषणार्थक भ्वादिगणपठित स्कन्दिर् धातु से इरित् होने पर पचादिलक्षण अच् प्रत्यय होने से स्कन्द शब्द की सिद्धि होती है, अथवा ण्यन्त स्कन्दि धातु से पचाद्यच् प्रत्यय और णि का लोप करने से स्कन्द शब्द बन जाता है । जो जाता है या शुष्क होता है, अथवा जो सबको गति देता है या शुष्क करता है, उसका नाम स्कन्द है । गतिशील जङ्गम जगत् में तत्तद् पदार्थ रूप होने से भगवान् स्वयं गन्ता तथा सबका गमयिता है, अर्थात् सकल जगत् को गति देनेवाला है, और शोषण करनेवाला है, जैसे हम लोक में देखते हैं—वायु गतिशील है, सलिल=जल सरणशील है, विविध प्रकार के तरङ्गों के सम्बन्ध से समुद्र में निरन्तर गतिशीलता देखने में आती है, तथा उस ही समुद्र में महाकाय वाले मत्स्य आदि गमन करते हैं, और बड़े २ शुष्क धर्म वाले पर्वतों का भी उद्गम=प्रादुर्भाव देखने में आता है ।

इसी प्रकार लोकसम्मित प्राणिशरीर में भी रसादि सप्त धातुयें हैं, उनमें अस्थि धातु पाषाण के समान दृढ है, और सुषिर=पोली है, उसमें वायु कुपित न हो एतदर्थं उस अस्थि में मज्जा का निवेश किया है । इसी प्रकार वनस्पतियों के विषय में भी समझना चाहिये । यह भगवत्कृत व्यवस्था नित्य तथा सर्वव्यापक दीखती है ।

एवं भगवान् विष्णुः स्वकेन व्यापकगुणेन विश्वं बिभ्राणः स्कन्दः सन् सकलं स्वात्मनि धारयतीति कृत्वा स स्कन्दधरश्चाप्युक्तो भवति।

मन्त्रलिंग च—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः। यजु०

अत्र दृढेति पदं पृथिव्या विशेषणम्।

"नारायणः" इति नामव्याख्यायां च विशेषं द्रष्टव्यम्। सलिलात् पृथिव्या उद्गम इति।

अत्र व्याख्याने-स्कन्दः, स्कन्दधरश्चापि व्याख्यातं भवति।

स्कन्द-नामाधिकृत्यास्माकम्—

स्कन्दः स विष्णुः प्रतिजन्तुनिष्ठः शुष्कद्रवाभ्यां कुरुते शरीरम्।
तं सर्वदृश्यं मुनयः पुराणं गायन्ति नित्यं भुवने त्रिनेत्रम्॥१२०॥

स्कन्दधरमधिकृत्यास्माकं भवतः—

स्कन्द-व्यवस्थाकृतविश्वरूपं यश्चाप्रमत्तो धरते स विष्णुः।
लोके नराः स्कन्दधरं पुराणं गायन्ति पश्यन्ति च तं गुहास्थम्॥१२१॥

गुहास्थम्=हृदयस्थितम्।

यस्तत्त्वतः शोष-गती विदित्वा यन्त्राणि कर्तुं यततेऽप्रमत्तः।
शिल्पी स विश्वं विविधोपकारैर्युंजन् स्वयं याति च शर्म दिव्यम्॥१२२॥

इसी प्रकार भगवान् अपने व्यापक गुणों के द्वारा सर्वव्यापक होकर सबका धारण करता हुआ स्कन्द ही स्कन्दधर नाम से कहा जाता है। इसमें "येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः" इत्यादि मन्त्र प्रमाण है। इस मन्त्र में दृढ पद पृथिवी का विशेषण है। सलिल से पृथिवी का उद्गम प्रकार नारायण नाम के व्याख्यान में देखना चाहिये।

यहां स्कन्द शब्द से ही स्कन्दधर शब्द का भी व्याख्यान होजाता है।

स्कन्द नाम के भावार्थ को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम स्कन्द है, क्योंकि वह शुष्क और तरल पदार्थों से इस शरीर का निर्माण करके सर्वत्र व्यापक रूप से स्थित है, उस पुरातन त्रिनेत्र भगवान् विष्णु का मुनिजन निरन्तर गान करते हैं।

स्कन्दधर शब्द का भावार्थ प्रकाशन इस प्रकार है—

व्यवस्था से बनाये हुये सुव्यवस्थितरूप विश्व को जो अप्रमत्तता से धारण कर रहा है, वह विष्णु स्कन्द रूप विश्व को धारण करने से स्कन्दधर कहा जाता है, लोक में महापुरुष उस स्कन्दधर का गान करते हुये उसे अपने हृदय में देखते हैं। जो मनुष्य इस प्रकार से शोष और गति का ज्ञान प्राप्त करके सावधानी से यन्त्रों का निर्माण करने का प्रयत्न करता है, वह शिल्पी (कारीगर) विश्व का बहुत बड़ा उपकार करता है तथा स्वयं अलौकिक सुख को प्राप्त होता है।

धुर्यः—३२९

धूरिति प्रत्येकं वस्तुनो मुखस्याग्रभागस्य वा नाम, तां धुरं वहति प्राप्नोति वा स धुर्यः। एकत्र धुर् शब्दाद् "धुरो यड्ढकौ" इत्यनेन पा० सूत्रेण यत् प्रत्ययोऽन्यत्र च धूरूपकर्मोपपदाद् या प्रापणे धातोः "आतोऽनुपसर्गे कः" इति पा० सूत्रेण कः प्रत्ययः। आल्लोपः। हलि चेति पा० सूत्रेण प्राप्तो दीर्घश्च "न भकुर्छुराम्" इति सूत्रेण निषिध्यते। धुर्य इति विष्णोर्नाम यतो हि स एव सर्वस्याग्रभागं याति=प्राप्नोतीत्यर्थः। न हि कश्चिन्निरवलम्बं यातुं प्रभवति, किमन्यत् वातादयोऽपि सावलम्बं वान्ति। यश्च कश्चिन्निरवलम्बं गन्तुं यतते सोऽवश्यं पततीति प्रत्यक्षं दृश्यते। अवलम्बश्च सर्वस्यान्तर्यामित्वात् सर्वव्यापकः सर्वेषां पुरोगो भगवान् विष्णुरेवेति सोऽतो धुर्य उच्यते। यद्वा धुर्य इति श्रेष्ठस्य मुख्यस्य वा नाम, मुखेति चाग्रस्य नाम, मुखे भवो मुख्यः पुरोगामी=मार्गनिर्देष्टा। यथा च लोके विदुषां मार्गनिर्देष्टा विद्वद्धुर्यः, शिल्पिनां मार्गनिर्देष्टा शिल्पिधुर्य इत्युच्यते, तथा सर्वेषां मार्गनिर्देष्टृत्वाद् भगवान् सर्वशेषेण निर्विशेषणेन धुर्यशब्देनोच्यते।

भवति चात्रास्माकम्—

सर्वाग्रगामी भगवान् स विष्णुः सङ्कीर्त्यते धुर्यपदेन विज्ञैः।
निर्दिश्य मार्गं सकलस्य नेता, स सर्वमुख्यः सकलान्तरात्मा ॥१२३॥

धुर्यः— ३२९

प्रत्येक वस्तु के मुख या अग्रभाग का नाम धुर् है, उस धुर् को जो वहन या प्राप्त करता है, उसका नाम धुर्य है। वहन करने अर्थ में धुर् शब्द से ताद्धित यत् प्रत्यय होकर धुर्य शब्द बनता है, तथा प्राप्त करने अर्थ में धुरुपपद प्रापणार्थक या धातु से कर्ता में कृत् क प्रत्यय तथा आकार का लोप होने से धुर्य शब्द बनता है। धुर्य नाम भगवान् विष्णु का है, क्योंकि वह ही सबके अग्रभाग में रहता है। प्रत्येक गतिशील व्यक्ति, किसी प्रकार के आश्रय के बिना गमन करने में असमर्थ है, और तो क्या वायु आदि समर्थ शक्तियाँ भी किसी के आश्रित होकर गमन में प्रवृत्त होती हैं। जो बिना किसी आश्रय के चलता है, वह अवश्य पड़ता है यह प्रत्यक्ष देखने में आता है। सबकी गति का आश्रय, सर्वान्तर्यामी होने से सर्वव्यापक तथा सर्वाग्रगामी भगवान् विष्णु ही है; इसीलिये भगवान् का नाम 'धुर्य' है।

अथवा श्रेष्ठ या मुख्य का नाम है धुर्य, मुख नाम अग्रभाग का है, मुख में अर्थात् अग्रभाग में, सब से आगे जो रहता है, उसका नाम है मुख्य, यह मार्ग को बतानेवाले का नाम है, जैसे लोक में विद्वानों के श्रेयोमार्ग का -बोधक विद्वद्धुर्य तथा शिल्पियों (कारीगरों) को मार्ग बताने वाला शिल्पिधुर्य कहा जाता है; उसी प्रकार सबका मार्ग निर्देशक भगवान् सर्वशेष निर्विशेष धुर्य शब्द से कहा जाता है।

इस नाम के भाव को भाष्यकार अपने पद्य से इस प्रकार व्यक्त करता है—

भगवान् विष्णु सबके आगे रहता है, अर्थात् जगत् के एक पार से दूसरे पार तक कण-कण में उसकी सत्ता है, इसीलिये विद्वान् पुरुष उसका धुर्य नाम से सङ्कीर्तन करते हैं। वह ही सर्वान्तर्यामी सर्वमुख्य अर्थात् सबके आगे रहनेवाला सबके मार्ग का निर्देशक होने से सबका प्रवर्तक है।

धूरिति भारस्यापि नाम तद् वोढृत्वेन वृषभोऽपि धुर्यं उच्यते।

वरदः—३३०

व्रियते=प्रार्थ्यंत इति वरोऽभीप्सितोऽर्थस्तं ददातीति वरदो=अभीप्सितार्थदः। सर्व एव शुभमाप्तुमिच्छति नाशुभमत आयातं वरेति शुभस्य कल्याणस्य वा नाम।

वृञ् वरण इति धातो'र्ग्रहवृदृनिश्चिगमश्च" इति ३-३-५८, पा० सूत्रेण कर्मणि घञि वरशब्दः सिध्यति। वरशब्दोपपदाद् दा-धातोः "आतोऽनुपसर्गे कः" इति कः प्रत्यय आल्लोपः। वरदत्वादेव च स वरेण्यो=वरितुं योग्यः। तत्र मन्त्रः— "तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि"। यजुः। तुष्टो हि वरं ददाति, तुष्यति च भगवान् प्रार्थनाभिरत एव स वराकाङ्क्षिभिः प्रार्थ्यते। तथा च मन्त्रलिङ्गानि—

"तेजोऽसि तेजो मयि धेहि" यजुः।
"भूरिदा असि भूरि देहि नो मा दभ्रं भूर्याभर। भूरि घेदिन्द्र दित्सति" ऋग्
"अग्निर्नो वनते रयिम्" यजुः।
"मा न आयुः प्रमोषीः" तथा "अग्ने, नय सुपथा राये। यजुः

"मेधाम्मे वरुणो दधातु" "अग्ने वर्च्चोदा असि वर्च्चो मे देहि"।

इत्यादीनि। भवति चात्रास्माकम्—

विष्णुर्वरेण्यो वरदस्तथास्ति वरेप्सुभिः स व्रियते वदान्यः।
विपश्चितस्तं बहुधा स्तुवन्ति वर्च्चः प्रजाः सम्पदमाप्तुकामाः ॥१२४॥

धुर् नाम भार (बोझे) का भी है, भार का वहन करने से बैल का नाम भी धुर्य है।

वरदः—३३०

मनोवाञ्छित अर्थ का नाम वर है, वर को देनेवाले का नाम वरद है। प्रत्येक जीव का अभीष्ट पदार्थ शुभ अथवा कल्याण होता है, इसलिये वर नाम से इन ही का ग्रहण है। वर शब्द की सिद्धि वरणार्थक वृञ् धातु से पा० ३।३।५८ से कर्म में घञ् प्रत्यय करने से होती है। वर शब्द के उपपद रहने पर दा धातु से क प्रत्यय कर्ता में तथा धातु के आकार का लोप होने से वरद शब्द सिद्ध होता है। वरद होनेसे ही भगवान् वरण करने योग्य अर्थात् वरेण्य है, जैसा कि "तत्सवितुर्वरेण्यमित्यादि" मन्त्र से सिद्ध है। कोई भी हो सन्तुष्ट होकर ही वर देता है। भगवान् विष्णु भी प्रार्थनाओं से सन्तुष्ट होकर प्रार्थकों को मनोवाञ्छित वर देता है, इसीलिये वर चाहनेवाले महापुरुष भगवान् की प्रार्थना करते हैं जैसा कि—'तेजोऽसि तेजो मयि धेहि" भूरिदा असि भूरि देहि इत्यादि मन्त्रों से सिद्ध है।

इस भाव को भाष्यकार अपने पद्य से इस प्रकार व्यक्त करता है—

भगवान् विष्णु वरेण्य तथा वरद नाम से कहा जाता है क्योंकि वह वदान्य अर्थात् बहुत देनेवाला है, इसीलिये वर चाहनेवाले उसको वरते हैं, अर्थात् अपनाते हैं। विद्वान् पुरुष उसकी बहुत प्रकार से स्तुतियां करते हैं तेज सन्तति तथा सम्पत्ति प्राप्त करने की इच्छा से।

वायुवाहनः—३३१

वायुशब्दो वा गतिगन्धनयोरिति धातोः "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" इत्युणादिसूत्रेण उणि प्रत्यये सिध्यति। वाहनशब्दश्च 'वह प्रापणे' धातोर्ण्यन्ताल्ल्युटि सिध्यति। यद्वा ण्यन्ताद् वाहिधातोर्बाहुलकात् कर्तरि ल्युटि -वाहनशब्दः सिध्यति। एवञ्च वायुर्वाह्यते=प्रवर्त्यतेऽनेनेति, वायुं वा वाहयति=सञ्चारयति सर्वत्रेति वायुवाहनो भगवान् विष्णुः। इत्थञ्चास्य नाम्न उपपत्तिः—

वायुर्हि भगवतो विष्णोः प्रवर्तिकारूपां शक्तिमधिगम्य प्राणादिभेदमापन्नः सर्वं प्रवर्तयति। तथा हि, प्रलयकाले स्वान्तर्निस्तब्धं शयानस्य स्वादृष्टवशाच्छुभाशुभकर्मफलभोगप्राप्तसमयस्य जीववर्गस्य फलभोगे भुञ्जनाथ स वायोः सञ्चारार्थाकाशरूपमवकाशं सृष्ट्वा वायुं सृजति, तेन च प्राणादिबहुभेदमाप्तेन वायुना वाहयति =सञ्चारयति सर्वमिदं दृश्यवर्गमतः स वायुवाहन इत्युच्यते। लोके चापि पश्यामः, सर्वोऽपि यन्त्रगणो वायुना वाह्यते=प्रवर्त्यते, वायुः स्वयं गतिमापद्य सर्वं गतिमद् विधत्त इत्यर्थः। सूर्योऽपि विष्णुरूपो वायुवाहनशब्दाभिधानीयः-यतो हि सोऽपि क्वचित् प्रभञ्जनाख्यं महावातं वृष्टिमिश्रं झञ्झावातं वा, क्वचिच्च मन्दं मन्दं गन्धवहं प्रवाह्य सङ्क्लेशयति सुखयति वा जीवान् तत्तत् शुभा-शुभकर्मानुसारं, नियामिका च तत्र काचित् सर्वान्तर्यामिनी शक्तिः, त्रिविधं हि कर्म जीवस्य शुभमशुभं शुभा-

---

वायुवाहनः—३३१

वायु शब्द गत्यर्थक भ्वादिगण पठित वा धातु से उणादि उण् प्रत्यय करने से बनता है। तथा वाहन शब्द प्रापणार्थक णिजन्त वह धातु से करण में अथवा बाहुलक से कर्ता में ल्युट् प्रत्यय करने से सिद्ध होता है इस प्रकार जो वायु का प्रवर्तक=गतिदाता है, अथवा जो सर्वत्र वायु का सञ्चार करता है, उसका नाम वायुवाहन है। इस नाम की उपपत्ति इस प्रकार है, भगवान् विष्णु के द्वारा प्रवर्तित वायु गतिशील होकर, प्राणादिरूप से सकल चराचर वर्ग का प्रवर्तक होता है। जैसे कि, प्रलय काल में निष्पन्दरूप से प्रकृति माता के गर्भ में शयन करते हुये इस जीववर्ग का जब अदृष्टवश से शुभाशुभ कर्मों के फलभोग का समय आता है, तब इसको कर्मफल भुगताने के लिये, पहले वायु के सञ्चार के लिये आकाश रूप अवकाश की सृष्टि करके वायु को उत्पन्न करता है और प्राणादि रूप को प्राप्त हुये उस वायु से इस समस्त दृश्यवर्ग का सञ्चालन करता है, इसलिये उसका नाम वायुवाहन है। लोक में भी हम देखते हैं, यावन्मात्र यन्त्रसमूह वायु से ही प्रवृत्त=गतिशील होता है, अर्थात् वायु स्वयं गतिशील होकर सबको गतिशील बनाता है। विष्णुरूप सूर्य भी वायुवाहन नाम से कहा जाता है, क्योंकि वह भी कहीं पर प्रभञ्जन नामक महावायु, कहीं पर वर्षायुक्त झञ्झावात तथा कहीं पर मन्द मन्द वायु का सञ्चार करके अपने २ शुभाशुभ कर्मों के अनुसार जीवों को सुख या दुःख देता है, तथा इसमें नियामिका कोई अदृष्टरूप अन्तर्यामिनी शक्ति है, जीवों के कर्म भी शुभ अशुभ तथा शुभाशुभरूप तीन प्रकार के हैं।

शुभमिश्रश्च । स एव च सूर्यः सर्वात्मभूतो जीवात्माभिधानीयः स चापि वायुवाहनो, यतो हि स जीवात्मापि स्वस्थं वायुं यथेच्छं प्रवर्त्य कदाचिन्मन्थरं चलति, कदाचिच्च वेगितं धावति, यथा-अश्वो बहु धावति न च श्राम्यति न तथा मनुष्यः । सिंहादयो हिंस्रा जीवा उत्कटं कूदन्ते । मनुष्योऽपि यथाशक्ति कूदते, तत्र नियामिका भगवच्छक्तिर्जीवादृष्टं वा ।

भवन्ति चात्रास्माकम्—

वायुवाहननामायं लोकानां सुखदुःखदः ।
प्रवर्त्य बहुधा वात लोककर्मानुसारतः ॥१२५॥
क्वचित् महावातमथापि मन्दं वायुं प्रवर्त्यातियाति त्रिलोकीम् ।
स [1]सातसंक्लेशयुगं दधानो जीवेषु जीवात्मकृतानुसारम् ॥१२६॥
स एव सूर्यो जगदात्मरूपः स एव जीवः प्रतिवर्ष्मनिष्ठः ।
स एव प्राणादिभिदाप्रभिन्नः प्रवर्तको जीवगणस्य विष्णुः ॥१२७॥

[1] सातम्=सुखम्

मन्त्रलिंगं च—

कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥ ऋग् १०-५१-७

वह सूर्य ही सब स्थावरजङ्गमरूप जगत का आत्मा होने से जीवात्मा है, तथा इस व्यष्टिरूप जीवात्मा का नाम भी वायुवाहन है, क्योंकि वह भी अपने में स्थित वायु को इच्छानुसार प्रेरित करके कभी धीरे चलता है, तथा कभी वेग से दौड़ता है । जैसे घोड़ा बहुत वेग से भागता है किन्तु श्रान्त नहीं होता, मनुष्य अश्व के समान दौड़ भी नहीं सकता तथा थक भी जाता है । सिंह आदि हिंसक जीव बहुत लम्बे कूदते हैं, मनुष्य भी कूदता है, किन्तु सिंह आदि की अपेक्षा बहुत कम, इसमें नियामिका कोई ईश्वरीय शक्ति या जीव का अदृष्ट है ।

इस नाम के भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम वायुवाहन है, क्योंकि वह लोकों के कर्मानुसार वायु को प्रेरित करके लोकों को सुख या दुःख रूप फल देता है ।

वायु को गतिशील बनाकर, त्रिलोकी का वायु के द्वारा सञ्चालन करता हुआ, जीवों के कर्मानुसार कहीं महावात तथा कहीं मन्द सुगन्धि वायु का सञ्चार करता हुआ जीवों को सुख या दुःख से युक्त करता है ।

वह विष्णु ही स्थावरजङ्गम जगत का आत्मरूप सूर्य है, वह ही प्रतिव्यक्ति शरीर में जीवरूप है, वह ही प्राणादिरूप से विभिन्न होकर सकल जीवगण का प्रवर्तक है ।

वासुदेवः—३३२

वासुशब्दो वस निवासे धातो,वस आच्छादन इति वा ण्यन्ताद्धातोर्बाहुलका-दौणादिक उणि प्रत्यये सिध्यति। वसति सर्वत्र, वासयति=आच्छादयति वा सर्व-मात्मनेति वासुः। दीव्यति, क्रीडति, विजिगीषते, व्यवहरति, द्योतते, मोदते, स्तूयते वा सर्वैः स्वलीलाक्षेत्रे जगतीति देवः। वासुश्चासौ देवो वासुदेवो भगवान् विष्णुः।

सर्वत्र प्रसृतैः सूर्यांशुभिरिवेदं सर्वं जगदध्युष्य सर्वमात्मनाच्छादयतीति वासु-रुच्यते, स एव च वासुः स्वलीलाक्षेत्रेऽस्मिञ्जगति स्वतोऽन्यान् विजिगीषून् विजिगीषु-स्तथा व्यवहरति यथा स तान् दृढं नियम्य द्योतमानः स्तूयमानश्च मोदतेऽतः स देव उच्यते।

सर्वमिदं जगद् वासेनाच्छादनेन, नियमरूपेण व्यवहारेण, मोदेन, द्योतनेन वा व्याप्नोतीति सङ्गतार्थनामा वासुदेव इति। लोकेऽपि पश्यामो, नास्ति कश्चिदेव-म्विधो यो न वीप्सेत् सर्वं, न विजिगीषेत स्वविजिगीषु, न व्यवजिहीर्षेत सर्वं स्वायत्ती-कर्तुं, न विवसिषेत सर्वं, न विवत्सेत् सर्वत्र, न दुद्योतिषेत सर्वदा, तथा न मुमुदिषेत स्तूयमानश्चेति। मन्त्रलिंगम्—

वासनाद् वासुदेवोऽसि वासितं ते जगत्त्रयम्।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते॥ ऋग्वेदपरिशिष्टे श्रीसूक्तस्यान्ते।

वासुदेवः—३३२

वासु शब्द, निवासार्थक भौवादिक वस धातु से अथवा आच्छादनार्थक अदादिक णिजन्त वस धातु से, औणादिक उण् प्रत्यय करने से बनता है। जो सर्वत्र वसता है या सबको अपने से आच्छादित करता है, उसका नाम वासु है। जो चमकता है अर्थात् दीप्तिमान्, क्रीडा करता है, अपने से भिन्न को जीतना चाहता है, व्यवहार करता है, सदा आनन्द स्वरूप होने से प्रसन्न होता है, तथा अपने से भिन्न सबका स्तुत्य होता है, उसका नाम देव है।

जो वासु भी है और देव भी है, उसका नाम वासुदेव है। सर्वत्र प्रसृत (फैली हुई) सूर्य किरणों के समान इस समस्त विश्व में प्रसृत अर्थात् व्यापकरूप से रहता हुआ या इस विश्व का आच्छादन करता हुआ भगवान् वासु शब्द से कहा जाता है, तथा वह ही अपने लीलाक्षेत्र इस जगत् में अपने से भिन्न स्पर्द्धियों के जीतने की इच्छा करता हुआ इस प्रकार से व्यवहार करता है; जिस से कि वह उन स्पर्द्धियों का दृढरूप से नियन्त्रण करके, अपने स्वभूत प्राणिवर्ग से स्तुति किया हुआ मुदित होता है, इसलिये देव है। वह इस सकल जगत् को अपने अन्तर्या-मित्व, आच्छादन, नियमनरूप व्यवहार, मोद=आनन्द, तथा कान्ति से व्याप्त करता है, इस लिये यथार्थनामा वासुदेव है। लोक में भी हम देखते हैं, कोई प्राणी, विशेष करके मनुष्य, ऐसा नहीं है जो सर्वत्र अपना प्रसार न करना चाहे, दूसरों को जीतना न चाहे, विश्व की समस्त सम्पत्ति को अपनी बनाने के लिये जो व्यवहार न करना चाहे, जो सबको आच्छन्न न करना चाहे, जो सर्वत्र व्यापक भाव से न रहना चाहे, जो सर्वदा प्रकाशशील न होना चाहे, तथा दूसरों के द्वारा की हुई प्रशंसा से प्रसन्न न होना चाहे।

भवति चात्रास्माकम्—

सर्वं वसानो नित्रसन्नशेषे नियम्य सर्वं विजिगीषया च।
विद्योतमानः स्तुतिमोदमानः स वासुदेवेति बुधैः प्रदिष्टः ॥१२८॥

बृहद्भानुः—३३३

बृहच्छब्दो वृद्ध्यर्थकाद् बृह-धातोः 'वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च" इत्युणादिसूत्रेण, अतिप्रत्ययान्तो निपात्यते, गुणाभावोऽपि निपातनादेव।

भानुशब्दश्च भा दीप्ताविति धातो"र्दाभाभ्यां नुः" इत्युणादिसूत्रेण नु-प्रत्यये सिध्यति। एवञ्च बृहन्तो=भूयांसो वृद्धाः=दीर्घा वा भानवो=दीप्राः किरणा यस्य स बृहद्भानुर्विष्णुः। इत्यमस्य नाम्न उत्पत्तिः—

ये हि प्रत्यक्षं दृश्यमाना ज्योतिष्मन्तः सूर्यादयो ग्रहाः सनक्षत्रास्तेषु सर्वव्यापकस्य ज्योतिःस्वरूपस्य भगवत एव दीप्रा भानवो भान्ति। न केवलं सूर्यादिष्वेव तस्य भा अपि तु प्रत्येकं वस्तु यत् स्वरूपेण प्रकाशते, तत्र सर्वत्र तस्यैव प्रकाशः। परमा च तस्य भा वाग्रूपा या सर्वं चराचरं व्याप्य स्थिता। वागिघ परमं ज्योतिर्यतो हि प्रत्यक्षादि सर्वं प्रमाणागोचरमपि वस्तु वाग्ज्योतिषा ज्ञानगोचरं भवति। तथा च पश्यामो लोकेऽपि—

सर्वथा घनान्धकारावच्छिन्ने निशीथेऽपि समये मनुष्यो मनुष्येतरो वा जीवः

इस नाम के भावार्थ को भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विष्णु सर्वत्र व्यापकरूप से रहता हुआ सबका आच्छादन करता हुआ, सबको जीतने की इच्छा से सबका नियन्त्रण करता हुआ, प्रकाशमान होता हुआ तथा दूसरों द्वारा कृत स्तुति से प्रसन्न हुआ विद्वानों के द्वारा वासुदेव नाम से कहा जाता है।

बृहद्भानुः—३३३

बृहत् शब्द वृद्ध्यर्थक बृह धातु से उणादि अति प्रत्यय तथा गुण के अभाव के निपातन से सिद्ध होता है। भानु शब्द दीप्त्यर्थक भा धातु से उणादि नु प्रत्यय करने से सिद्ध होता है।

बृहत्=वृद्ध अथवा बहुत तथा दीर्घ हैं, प्रकाश रूप किरणें जिसकी उसका नाम है बृहद्भानु, यह विष्णु का नाम है। यह भगवान् का नाम इस प्रकार उपपन्न होता है। प्रत्यक्ष दीखनेवाले सूर्यादि तथा नक्षत्रादि में भगवान् विष्णु की ही ज्योति का प्रकाश है। ग्रह नक्षत्र आदि के अतिरिक्त जो भी विश्व में वस्तुयें हैं, वे सब ही अपने स्वरूप से प्रकाशमान हैं, और उनमें वह प्रकाश भगवान् का ही है, तथा भगवान् की एक सबसे उत्कृष्ट ज्योति वाक् अर्थात् शब्दरूप है, जो सब स्थावर जङ्गमरूप जगत् में व्यापकरूप से स्थित है, तथा जो वस्तु प्रत्यक्षादि सब प्रमाणों से अज्ञेय है, उसका वाक् रूप ज्योति से ज्ञान होता है, जैसा कि हम लोक में देखते हैं, अत्यन्त अन्धकार से आच्छन्न आधी रात में भी, किसी के शब्द को सुनकर मनुष्य या इतर

कुतश्चिदुद्भूतां वाचं श्रुत्वोद्बुध्यते झटिति जानाति च कुतः किमिति। यद्यपि सर्वाणीन्द्रियाणि तज्ज्योतिषा सामान्येन व्याप्तानि, तथापि पात्रस्य पात्रानुरूपं गुणग्राहित्वं व्यञ्जच्चक्षुरिन्द्रियं सूर्यदेवतत्वात्तैजसमत एव विशेषतस्तेजोग्राहि सत् सर्वं स्पष्टं चष्टे। एवं सर्वत्र प्रसृतभो भगवान् बृहद्भानुरित्युच्यते।

मन्त्रलिङ्गञ्च—

"बृहद्भानो! यविष्ठ्य" ऋग् इत्यादि।

भवति चात्रास्माकम्—

विष्णुर्बृहद्भानुपदाभिधानः प्रसार्य तेजांसि बृहन्ति विश्वे।
वागादिरूपाणि समिन्धरूपः ज्योतिर्मयं सर्वजगद् विधत्ते ॥१२९॥

आदिदेवः—३३४

देवशब्दो व्याख्यातः। आदत्त इत्यादिः। आ इत्युपसर्गः। तदुपसृष्टाद् दा-धातोः "उपसर्गे घोः किः" इति पा० सूत्रेण किप्रत्यय आल्लोपः। यथोर्णनाभः कीटः स्वान्तःस्थितेनाव्यक्तरूपेणोपादानोर्णातन्तून् विस्तार्य पुनस्तानादत्ते स्वस्मिन् समावेशयति, तथायं भगवान् विष्णुरुपादानभूताव्यक्ताख्यया प्रकृत्या सृष्ट्वेदं सर्वं पुनराददानः=उपसंहरन् आदिरित्युच्यते स चासौ देव इत्यादिदेवः।

जीव जान लेता है, यह क्या है और किस ओर कहां है। यद्यपि भगवान् की ज्योति सब इन्द्रियों में समानरूप से व्याप्त है, तथापि गुणग्राहिता पात्र की योग्यता पर आधारित है, इस सिद्धान्त को पुष्ट करती हुई चक्षु इन्द्रिय उस भगवज्ज्योति को स्पष्टरूप से देखती या ग्रहण करती है, क्योंकि उसका देवता सूर्य है, इसलिये तैजस होने से वह तेज को विशेषरूप से ग्रहण करती है। इस प्रकार ज्योतिरूप से सर्वत्र व्याप्त भगवान् बृहद्भानु नाम से कहा जाता है। इसमें "बृहद्भानो! यविष्ठ्य" ऋग् इत्यादि मन्त्र प्रमाण है।

इस नाम के भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम बृहद्भानु है, क्योंकि वह स्वयं ज्योतिस्वरूप है, तथा अपनी ज्योति को वह वाक् आदि रूप से विश्व में प्रसारित (फैलाकर) करके इस समस्त विश्व को ज्योतिरूप बना रहा है।

आदिदेवः—३३४

देव शब्द का व्याख्यान पहले किया जा चुका है। जो आदान=ग्रहण करता है उसका नाम है आदि। आ उपसर्गपूर्वक दा धातु से कि प्रत्यय और आकार का लोप करने से आदि शब्द सिद्ध होता है। जैसे मकड़ी नाम का कीड़ा, अपने में स्थित अव्यक्त उपादान से ऊर्णातन्तुओं को बाहर फैलाकर फिर अपने में लीन कर लेता है, अर्थात् फिर उन तन्तुओं का आदान=ग्रहण करके उन्हें अपने में समाविष्ट कर लेता है, उस ही प्रकार भगवान् विष्णु उपादानभूत अपनी अव्यक्त प्रकृति से इस सकल जगत् का सर्जन करके पुनः इसका आदान, अर्थात् अपने में लय कर लेता है, इसलिये आदि है, जो आदि तथा देव है उसका नाम आदिदेव

लोकेऽपि च पश्यामः, सर्वो हि मनुष्यः स्वतः स्वीयं कार्यं विस्तार्य पुनरुपसंहरति, सूर्यः प्रातरुद्यन् स्वकिरणान् विकिरति, निलाययति चास्तं यन् स्वस्मिन्निति ।

एवं सर्वत्रादिदेवाभिधस्य भगवतो विष्णोरादिदेवत्वं व्याप्तं दृश्यते ।

मन्त्रलिङ्गञ्च—

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ ऋग् १-१-१
न त्वद्धोता पूर्वो अग्ने यजीयान् । ऋग् ५-३-५

भवति चात्रास्माकम्—

यथोर्णनाभोऽथ यथा च सूर्यस्तन्तूंस्तथांशून् पुनराददाते ।
सृष्ट्वा तथैवत् पुनराददानो विष्णुर्बुधैरुक्त इहादिदेवः ॥१३०॥

पुरन्दरः—३३५

पॄ पालनपूरणयोरिति जौहोत्यादिको धातुस्ततः "भ्राजभास०" इत्यादि पा० ३-२-१७७ सूत्रेण क्विप् प्रत्ययस्तस्य च सर्वस्यापहारः, तत "उदोष्ठ्यपूर्वस्य" इति पा० ७-१-१०२ सूत्रेण रपरमुत्वं, गुणाभावः, प्रातिपदिकसंज्ञायां स्वादिकार्ये पूरिति सिध्यति ।

पिपर्ति=पालयति पूरयति वा पूरिति तदुपपदाण्ण्यन्ताद्दारि-विदारणार्थका-द्धातोः "पूःसर्वयोर्दारिसहोः" इति पा० ३-२-४१ सूत्रेण खच् प्रत्ययः "खचि ह्रस्वः" इति पा० ६-४-८४ सूत्रेण दारेर्ह्रस्वः, णिलोपः, "वाचंयमपुरन्दरौ च" इति पा०

है । लोक में भी हम देखते हैं, सब ही मनुष्य अपने कार्य का विस्तार करके फिर उसका आदान अर्थात् उपसंहार कर लेते हैं । सूर्य उदय होता हुआ अपनी किरणों को फैलाकर, अस्त होता हुआ फिर उनका उपसंहार अपने ही में कर लेता है । इस प्रकार भगवान् आदिदेव का आदि-देवत्व सर्वत्र व्याप्त हुआ प्रतीत होता है । इस नाम के भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

जैसे ऊर्णनाभ कीट तथा सूर्यदेव, अपने तन्तु और किरणों को फैलाकर फिर अपने ही में सम्मित (समेट) लेते हैं, इस ही प्रकार इस सकल जगत् का सर्जन=विस्तार करके भगवान् फिर इसे अपने ही में निलीन कर लेते हैं, इसलिये विद्वानों ने भगवान् को आदिदेव नाम से कहा है ।

पुरन्दरः—३३५

पुर शब्दवाच्य शरीर का भेदन करनेवाला । पालन तथा पूरणार्थक जुहोत्यादिगण पठित पॄ धातु से "भ्राजभास०" इत्यादि पा० ३।२।१७७ सूत्र से क्विप् प्रत्यय तथा उसका सर्वापहरण करने पर "उदोष्ठ्यपूर्वस्य" इस पा० ७।१।१०२ सूत्र से रेफपरक उत्व तथा गुण का अभाव होने से, और प्रातिपदिक संज्ञा तथा स्वादिकार्य करने से पुर् शब्द सिद्ध होता है । पुर शब्दो-पपदण्यन्त विदारणार्थक दारि धातु से "पूःसर्वयोर्दारिसहोः" इस पा० ३।२।४१ सूत्र से खच् प्रत्यय "खचि ह्रस्वः" पा० ६।४।८४ सूत्र से ह्रस्व, णिलोप "वाचंयमपुरन्दरौ च" इस पा०

६-३-६९ सूत्रेण पुरोऽमन्तत्वनिपातः, अनुस्वारपरसवर्णौ, प्रातिपदिकसंज्ञा, स्वादिकार्यं-ञ्चेति सिद्धः पुरन्दरशब्दः पुरं दारयतीति । पूरिति शरीरस्य-आवरणस्य वा नाम, यतो हि जरायुजाण्डजस्वेदजादिजीवानामावरकं, पालकं, पूरकं वा शरीरं भवति, शरीरेणैव सम्पृक्तः पूर्ण आत्मा भोगभुक्तौ समर्थो भवति, तच्चान्ते भगवान् दारयतीति भगवान् पुरन्दर उच्यते । पुरश्शरीरवाच्यत्वे च प्रमाणम्—"अष्टाचक्रा नवद्वारा देवानां पूरयोध्या" इत्यादि । यथा चेदं स्थूलं शरीरमात्मन आवरणभूतमेवं धातुष्वपि पूर्वः पूर्वो धातुः स्वोत्तरस्य धातोः पूरक आवरको वा भवति, तथा च रसधातू रक्तधातोः पूरको भवति—अत एव रक्तातिसारेण म्रियते नरो, यदि तस्य रक्तधातो रसधातुः पूरको न भवति । अमुथैव फलादिष्वपि ज्ञेयम् तथा च यथेद शरीरं त्वग्रूपया पुरा पूर्णं भवति, तथैव फलेऽपि तत्त्वक् पूरित्युक्ता भवति ।

एवञ्च वक्तुं शक्यते यद् फलबीजस्य पूः फलमज्जा, मज्जायाश्च पूः फलत्वक्, त्वचावृतञ्च तत् फलं पिपर्त्यात्मानं भोक्तृंश्च । यथा च भगवान् पुरं दारयति, तथा मांसमादित्सुर्जीवोऽपि त्वचं विदार्य मांसमादत्तेऽपरस्य जीवस्य । फलं जिघत्सुरपि प्राक् तत्त्वचं विदारयति, पुरुषोऽपि भगवतोऽनुकरणमात्रं कुरुते । पशवश्च हिंस्रा अहिंस्रा वा हस्तराहित्यान्न त्वचं पृथक्कर्तुं क्षमा इति सत्वचमेवाखेटं फलं वाश्नन्ति-

६।३।६९ सूत्र से अमन्त निपातन तथा प्रातिपदिक संज्ञा सम्बन्धी कार्य करने से पुरन्दर शब्द सिद्ध होता है, जिसका अर्थ होता है पुर का विदारण करनेवाला । पुर नाम आवरण या शरीर का है, क्योंकि जरायुजादि चतुर्विध जीवों का पालक या पूरक शरीर ही होता है, तथा शरीर से संयुक्त होकर ही जीवात्मा अपने शुभाशुभकर्मजन्य भोग भोगने में समर्थ होता है । उस शरीर का भगवान् अन्त में विदारण कर देता है, इसलिये भगवान् का नाम पुरन्दर है । पुर शब्द का वाच्यार्थ शरीर है, यह इस "अष्टाचक्रा०" इत्यादि मन्त्र से प्रमाणित होता है ।

जिस प्रकार वह स्थूल शरीर आत्मा का आवरक या पूरक है, उस ही प्रकार शरीरान्तर्गत धातुओं में भी प्रथम धातु दूसरे धातु का आवरक या पूरक होता है। उदाहरणरूप में रसधातु रक्तधातु का पूरक होता है, रक्तातिसार होने पर यदि रसधातु रक्तधातु को पूरण न करे तो मनुष्य मर जाता है । इस ही प्रकार फलादि में भी जानना चाहिये ।

इस प्रकार से जैसे यह शरीर त्वचारूप पुर से पूर्ण होता है, उस ही प्रकार फलादिकों में भी उनके ऊपर का छिलका पुर शब्द से कहा जाता है । यह सब इस प्रकार से भी कहा जा सकता है कि, फलों के बीजों का पुर फलों की गिरी (गुद्दा) तथा फलों की गिरी का पुर फलों की त्वचा, त्वचा से आवृत फल अपने आपको तथा भोक्ताओं को पूर्ण करता है । जैसे भगवान् पुर का विदारण करता है, उस ही प्रकार मांसभोजी जीव भी दूसरे जीव की त्वचा का भेदन करके उसके मांस को ग्रहण करता है । फलों को खानेवाला भी प्रथम फलों की त्वचा का भेदन करता है । इस प्रकार पुरुष भी प्रायः परमात्मा का ही अनुकरण करता है । हिंस्र पशुओं के हाथ न होने से वे अपने शिकार या फलादि को त्वचा सहित ही खा जाते हैं, जैसे सिंह

यथा सिंहः विडाल इत्यादयः । इक्षुदण्डे रस आत्मा, दण्डश्च तस्य रसस्य पूः । गुडं प्रेप्सुस्तद्दण्डरूपं पुरं निष्पिष्य प्राप्तरसो गुडं निर्मांति । एवं भगवान् स्वकीन पुरन्दरत्वधर्मेण सर्वं व्याप्य सर्वत्रात्मानं व्यनक्ति । एतच्चात्र सूक्ष्मतया ज्ञेयं यद् गोधूमयवादिधान्यानां तुषं तथाऽग्यशिम्बाधान्यानां चणक—मुद्गादीनाञ्च शिम्ब्येव पूरुक्ता भवति । एतानि च धान्यानि त्वचं विदार्यैव व्यवह्रियन्ते । एवं भागवतं दृश्यात्मकं लोकं काव्यं दृष्ट्वा सुधीभिर्विविधमुन्नेयम् उक्तञ्च वेदे देवस्य "पश्य काव्यं न ममार न जीर्यति" अथर्व ३०.८ ३२ भगवतो दृश्यं काव्यं जगत्तथा श्रव्यं काव्यं वेदो भवति । इति दिङ्मात्रमुक्तम्—

मन्त्रलिङ्गञ्च—

"इन्द्रो *मन्थतु मन्थिता शक्रः* पुरन्दरः" अथर्व ८-८-१

एवं पुरभिदित्यपि, तत्रापि मन्त्रलिङ्गम्—'*पुरभित्*" ऋग् ८-३३-५

भवति चात्रास्माकम्—

पुरन्दरो विष्णुरनन्तशक्तिः पुरं स दत्त्वा प्रभिनत्त्यथोऽन्ते ।
पूरेव चात्रास्ति वपुर्हि वेद्यं तद्दारकश्चात्र पुरन्दरोऽस्ति ॥१३१॥
पुरन्दरं तं सकलानुसृप्तं जीवोऽनुकुर्वन् कुरुते तथैव ।
विचित्रचित्राभरणं विराजं दृणाति कालेन पुरन्दरः सः ॥१३२॥

बिलाव आदि । इक्षुदण्ड (गन्ने) में रस जो कि, दण्ड के अन्दर व्यापकरूप से स्थित है, आत्मा है, तथा उस रस का आवरक ऊपर का दृश्य रूप दण्ड पुर् है, गुड़ बनाने के लिये ऊपर के दृश्य दण्ड का निष्पीडन (भेदन) करके रस ग्रहण किया जाता है । पूर्वोक्त प्रकार से सर्वत्र व्याप्त भगवान् विष्णु पुरन्दरत्वरूप धर्म से अपने आपको पद पद पर व्यक्त कर रहे हैं । सूक्ष्म रूप से यह भी जान लेना चाहिये कि, जो गेहूं, जौ, आदि धान्य हैं उनका तुष, तथा जो फली से निकलने वाले चणे या मूंग आदि धान्य हैं, उनका फली ही पुर होता है, त्वचा का विदारण करके ही इन सबको व्यवहार में लिया जाता है । भगवान् के दृश्यरूप लोककाव्य को देखकर अन्यान्य भी इस प्रकार की कल्पनायें कर लेनी चाहियें । हम ने यहां दिग्दर्शन मात्र करवाया है । इस में "इन्द्रो मन्यतु मन्थिता" इत्यादि मन्त्र प्रमाण है । तथा पुरभित् शब्द में भी "पुरभित्" इत्यादि ऋक् ८।३३।५ मन्त्र प्रमाण है ।

इस पूर्वोक्त भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार संक्षेप से व्यक्त करता है—

अनन्तशक्ति भगवान् विष्णु का नाम पुरन्दर है, क्योंकि वह सब प्राणियों के शरीर रूप पुर को देकर अन्त में उसे विदीर्ण कर देता है । शरीर का ही नाम पुर है, तथा उसका विदारक होने से भगवान् पुरन्दर है । उस सर्वव्यापक भगवान् पुरन्दर का सब प्रकार से यह जीव अनुकरण करता है । विराट् पुरुष के इस समष्टि ब्रह्माण्ड रूप विविध चित्रों से चित्रित शरीर को भी वह समय प्राप्त होने पर विदीर्ण कर देता है, अर्थात् व्यष्टि समष्टिरूप सब ही शरीरों का विदारण करने से वह पुरन्दर है ।

पुरन्दरं विष्णुमिदं समस्तं जगत् सदानक्ति शरीरमूलम्।
तथा यथा लिङ्गिनमन्तरस्थं व्यनक्ति गात्री निजलक्ष्यलिङ्गैः। ॥१३३॥
भगवतो विराड् वपुरपि महाप्रलयकाले प्रलीयते।

अशोकः— ३३६

शुच शोके भौवादिकः। ईशुचिर पूतीभावे दैवादिकः। ताभ्यामकर्तरि कारके घञि शोकशब्दसिद्धिः। तथा चेत्थं द्वयोरपि धात्वोरर्थसङ्गतिः, न विद्यते शोको यस्य सोऽशोकः, यद्वा न शुच्यति=क्लिद्यति, आर्द्रीभवति नासाक्षिस्वेदजलैरिति सोऽशोकः। तथा हि यथा कश्चिल्लौकिकः साधारणो जीवः सत्यामापदि भयकारणे वा कदाचिद् रोदिति, कदाचिन्मुह्यति, कदाचित् स्विद्यति, एवं नासाक्षिजलैरार्द्रीभवति न तथा भगवान्, तस्य भयशोकादिराहित्याज्ज्ञानस्वरूपत्वाच्च। यश्चेहत्यो मनुष्यो रागद्वेषक्रोधमोहलोभमानापमानादिद्वन्द्वैरप्रभावितः प्रज्ञामलिनकरैर्विचार्य कार्यं कुरुते न स शोकमाप्नोति। भगवांस्तु केवलो ज्ञानरूपस्तस्मान्न तस्मिन् शोकलेशोऽप्यतोऽशोकः स उच्यते। लोकेऽपि च पश्यामो न हि सर्वं वस्तु सर्वदा शोकयुक्तं दृश्यतेऽपि तु सर्वदा स्वस्याशोकत्वं दर्शयति। कुत एतद्? अशोकरूपस्य ब्रह्मणः सार्वत्रिक्या व्याप्तेः।

यह समस्त जगत् अपने मूलभूत भगवान् पुरन्दर को इस प्रकार व्यक्त कर रहा है, जैसे अपने गमन निवर्तन आदि लिङ्गों से गाड़ी अपने अन्तःस्थित चालक को व्यक्त करती है।

अशोकः—३३६

शोक शब्द भ्वादिगणपठित शोकार्थक शुच तथा दिवादिगणपठित पूतिभावार्थक=क्लेदार्थक ईशुचिर धातु से घञ् प्रत्यय करने से सिद्ध होता है। दोनों धातुओं के अर्थ की सङ्गति इस नाम में इस प्रकार होती है, शोक नाम किसी प्रकार के अनिष्ट से उत्पन्न चिन्तारूप मनोव्याधि का है, वह जिसके नहीं है उसका नाम अशोक है। दिवादिगणीय धातु के अनुसार शोक नाम क्लेद (गीला होने का) है, तथा यह क्लेद नासाजल-अक्षिजल=अश्रु और अत्यन्त सन्ताप से उत्पन्न पसीने आदि के जल से हुआ करता है, किन्तु यह सब नासाजल अश्रु आदि किसी भय या दुःख विशेष से साधारण लौकिक जीव के है, भगवान् के नहीं क्योंकि वह सब प्रकार के क्लेश तथा भय आदि से रहित है, इसलिये उसका नाम अशोक है, तथा ज्ञानस्वरूप होने से भी भगवान् अशोक है। लौकिक पुरुष भी यदि प्रज्ञा को मलिन करनेवाले राग द्वेष क्रोध मोह लोभ मान अपमान आदि द्वन्द्वों से प्रभावित नहीं होता, तथा विचारपूर्वक कार्य करता है तो वह शोक को प्राप्त नहीं होता, इसलिये वह भी अशोक होता है। भगवान् विष्णु सर्वथा असङ्ग तथा ज्ञानरूप है, इसलिये उससे शोक का अंश से भी सम्बन्ध नहीं है। लोक में भी हम देखते हैं, प्रत्येक वस्तु प्रतिक्षण अपने आपको शोकरहित रूप से प्रकट करती है। ऐसा क्यों होता है। इसलिये कि भगवान् अशोक सर्वत्र व्याप्त है।

भवति चात्रास्माकम्—

तमोगुणे शोक उदेति नित्यं ज्योतिःस्वरूपे च न शोकलेशः।
क्लेदोदयो यश्च यथा मनुष्ये सज्ज्ञानरूपे न तथास्ति विष्णौ ॥१३४॥

शोको ह्युत्पन्नो ग्रहणीं प्राप्य विकरोति बुद्धिमुद्बोधयति च प्रियवियोगं तथा लब्धप्रणाशस्मृतिम्। ततश्च प्रकुपितो वायुरणुकालेन रसवहानि स्रोतांसि प्राप्य शोकेन ग्रहणीस्थं रसधातुविकारभूतं कफं विद्राव्य पित्तसाहाय्येन च सन्ताप्याश्रुरूपेण वहिर्निःसारयति, नासिकया स्रावयति। एवञ्च तस्य मुखाभा म्लायति दैन्यञ्चापद्यते। जिह्वा श्रथ्नाति, धैर्यं च्यवते, क्षुत्पिपासे शाम्यतः, बुद्धिर्विपर्येति, विरक्तिरुदेति, काया क्षायति, मनो भ्राम्यति, अयं शोकपरिवारो न भगवति सत्त्वमुपलभते. क्लेश-कर्म-विपाकाशयैरस्पृष्टत्वाद् भगवतो ज्ञानमयत्वाच्च।

भवति चात्रास्माकम्—

यः क्लेशकर्माशयबद्धजन्तुर्लोकेऽस्ति दृष्टः स हि याति शोकम्।
यथा मनुष्याः पशवोऽपि तद्वत् क्लिश्यन्ति शोकेन निपीडिताङ्गाः ॥१३५॥

तथा—परन्तु नैतत्सकलानुयाते सन्दृश्यते ब्रह्मणि वीतशोके।
अतोऽस्ति लोके कथितः पुराणैः विष्णुर्ह्यशोको न कुतश्चनोनः ॥१३६॥

इस अर्थ को भाष्यकार अपने पद्य से यों प्रकट करता है—

शोक का उदय तमोगुण से होता है, किन्तु भगवान् में तमोगुण का सर्वथा अभाव है, क्योंकि वह ज्योतिःस्वरूप है, इसीलिये वह शोकरहित होने से अशोक है।

क्लेद भी जैसे भयादिजन्य होते हैं मनुष्य में होता है वैसे निर्भय होने से विष्णु में नहीं होता। किसी कारणवश उत्पन्न हुआ शोक ग्रहणी नाम की नाड़ी को प्राप्त करके बुद्धि को विकृत कर देता है, तथा कालान्तर में हुये प्रियवियोग और नष्ट वस्तु की स्मृति का उद्बोधन करता है। इसके पश्चात् प्रकुपित हुआ वायु शीघ्र ही रसवह स्रोतों (नाड़ियों) में प्रवेश करके शोक के द्वारा ग्रहणी में स्थित रसधातु के विकारभूत कफ को तपाकर (पिघलाकर) आंसुओं के रूप में उसे बाहर निकाल देता है, यद्वा नासिका द्वारा उसे बहा देता है। इस प्रकार से उसकी मुखकान्ति मलीन हो जाती है, मुखाकृति में दीनता आजाती है, जिह्वा शिथिल हो जाती है, धैर्य छूट जाता है, भूख प्यास बन्द हो जाती हैं, बुद्धि विपरीत हो जाती है, किसी में प्रेम नहीं रहता, शरीर क्षीण हो जाता है, चित्त में भ्रान्ति हो जाती है। यह सब शोकपरिवार क्लेश-विपाकादिकों से असंस्पृष्ट तथा ज्ञानरूप भगवान् में अपनी सत्ता नहीं रखता।

इस भाव को संक्षेप में भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

शोक के कारण क्लेश कर्म विपाक आशय आदिकों से युक्त प्राणी को ही शोक होता है, जैसे मनुष्य वैसे ही पशु भी क्लेश आदि से युक्त होने से शोकयुक्त हुये दुःख भोगते हैं। किन्तु क्लेश कर्म विपाक आशय आदि से रहित सर्वव्यापक भगवान् विष्णु में इन सबके न होने से शोक भी नहीं होता इसलिये सब प्रकार से पूर्ण परमात्मा को पुरातन पुरुषों ने अशोक नाम से कहा है।

तथा—यस्तत्त्ववित् पश्यति देवकाव्यं शृणोति देवस्य च वेदकाव्यम् ।
स शोकसन्तानवितानभावं नाप्नोति, शान्तो रमतेऽमृते स्वे ॥१३७॥

देवस्य दृश्यं काव्यं जगत्, श्रव्यञ्च वेद इति । तत्र मन्त्रलिङ्गमशोकनाम्नि—
"तत्र को मोहः कः शोक एकत्वमनुपश्यतः । यजुः ।

तारणः—३३७ तारः—३३८

तॄ प्लवनसन्तरणयोरिति भौवादिको धातुस्तस्माण्णिजन्तान्नन्द्यादिल्युर्बाहुलकाल्ल्युड्वा योरनः, णत्वम्, तारणः । तारयतीति । यथा सेतुर्नद्या अपरतटाज्जीवं परतटं नयत्यतः स तारण उच्यते । एवं विश्वे विविधविषयविषक्तचेतसस्तथा तद्रामणीयकविमोहितमनसो जीवाः केवलं तदादानसततप्रयत्ना एव सर्वमायुः क्षपयन्त्यात्मन इति ।

तेषाञ्चेतस्ततो भ्राम्यतां विमूढमनसां सूत्ररूपो भगवानेव तारयिताऽतः स तारणः । वेदे सूत्रशब्देन भगवानभिहितः सूक्ष्मत्वात् सर्वत्रानुस्यूतत्वाच्च, तथा हि "सूत्रं सूत्रस्य यो वेद स वेद ब्राह्मणं महत्" अथर्व० । सूत्रस्य सूत्रमित्यस्य सम्यग्ज्ञानाय "भूतभव्यभवत्पति"नाम्नो व्याख्या द्रष्टव्या । तथा चतुर्भुजेति नाम्नो व्याख्यानमपि द्रष्टव्यम् । सूत्रयति=ग्रन्थयति=बध्नाति सूत्ररूपं जगदिति सूत्रं ब्रह्म । यश्च

जो तत्त्ववित् पुरुष भगवान् के जगत् रूप दृश्य काव्य को, श्रव्यरूप वेद काव्य को तत्त्व से देखता और सुनता है, वह किसी प्रकार के शोक समूह को प्राप्त नहीं होता तथा शान्त मन होकर अपने अमृत स्वरूप में रमण करता है । भगवान् का दृश्य काव्य जगत् है, तथा श्रव्य काव्य वेद है । भगवान् के इस अशोक नाम को "तत्र को मोहः कः शोकः" इत्यादि मन्त्र प्रमाणित करता है ।

तारणः—३३७ तारः—३३८ पार करनेवाला ।

तॄ यह किसी नद्यादि को तिरकर पार करने अर्थ में वर्तमान भ्वादिगण पठित धातु है, णिजन्त इस धातु से नन्द्यादि ल्यु प्रत्यय अथवा बाहुलक से ल्युट् प्रत्यय करने से तथा यु को अन आदेश और णत्व करने से तारण शब्द सिद्ध होता है, जो तारता है अर्थात् पार करता है उसका नाम तारण है । जैसे सेतु (पुल) नदी या समुद्र के एक पार से दूसरे पार ले जाता है, इसलिये वह तारण नाम से कहा जाता है । इस ही प्रकार इस विश्व में विविध प्रकार के रोचक विषयों में आसक्त मन वाले उन विषयों को प्राप्त करने में निरन्तर प्रयत्नशील ही अपनी समस्त आयु को व्यतीत कर देते हैं, उन इधर उधर भटकते हुये विषय निमग्न मन पुरुषों का सूत्ररूप भगवान् ही पार करनेवाला है इसलिये उसका नाम तारण है । वेद में भगवान् को सूक्ष्म तथा सर्वत्रानुस्यूत होने से सूत्र नाम से कहा है जैसा कि "सूत्रं सूत्रस्य यो वेद" इत्यादि अथर्व वेद वचन है । सूत्र का सूत्र क्या है । इसे समझने के लिये भूत भव्य भवत्पति तथा चतुर्भुज नाम की व्याख्या देखनी चाहिये । जो इस सूत्र रूप जगत् का सूत्रण= ग्रन्थन या बन्धन करता है, उसका नाम सूत्र है यह ब्रह्म का नाम है । जो ब्रह्म की नियमन

ब्रह्मणो नियमनव्यवस्थां वेत्ति स तरति। इहोक्तायां सृष्टौ यद्यद् यथाविधं विविध-भेदप्रभिन्नं वस्तु तदेव यः सत्यं मन्यते विकृतिमन्तरा स तरति, तथा च यो विकृत-मपि विकृतत्वेन सम्यग्जानाति सोऽपि यथार्थज्ञानित्वात्तरति एवंविध एव नियमः सर्वत्र। यथा च सेतुः पूर्वतटादपरं ततश्च पुनः पूर्वतटं नयति तथा भगवान् जन्ममरण-व्यवस्थया कर्मापेक्षं परलोकरूपात्तटादैहिकलोकरूपं तटं प्रापयति तथास्माल्लोकतटा—न्मृत्युमाध्यमेन परलोकरूपं तटं प्रापयति। प्राप्ततटश्च जीवो यथाकर्मजातसंस्का-रानुसारं कर्मकर्तुमारभते। तथा च पश्यामो वयं लोकेऽपि पूर्वतटादपरं तटं यियासुः पादाभ्यां हस्ताभ्याञ्च जलमास्कन्दन् प्राप्नोति तटमारभते च यथेप्सितं कर्म, स्नानं, जपं, पठनं, व्यायामं, यात्रां, गानं, युद्धं वा। तथैव परलोकतटाददृष्टसहाय इह लोके-आगत्य जीवः यथापेक्षं कर्माण्यारभते संस्कारानुगानि। ततश्चास्माद् पारयिता भगवान् तारण उच्यते तारो वा। यथा हि तरणे जलस्य माध्यममनिवार्यं, तथा जीवोऽपि तितीर्षुर्मातृगर्भजरायुजलमनिवार्यत्वेनापेक्षते। तस्मान्मातृगर्भसं-मूढान्धकूपात् पारावाररहितात् समुद्रादिव भगवानेव तारयति तमत एव स तारक—स्तारणस्तार उद्धारको वोक्तो भवति। उद्=ऊर्ध्वं नयतीत्युद्धारको यथा सेतुः। चतुर्विधायाः सृष्टेर्जननं मरणञ्च प्रतियोनि भिन्नभिन्नप्रकारकं यथा, तथा सेतु-सम्बद्धमम्भोऽपि भिन्नभिन्नप्रकारकमिति विविधमूहितव्यं भवति।

व्यवस्था को तत्त्व से जान लेता है, तथा जो विकृतिरहित प्रकृतिसिद्ध स्वरूप नानाविध पदार्थ को सत्यरूप से जानता है, और विकृत पदार्थों को भी जो विकृतरूप में सत्य जानता है वह पार हो जाता है, क्योंकि वह यथार्थ ज्ञानी है। सर्वत्र ऐसा ही नियम है। जिस प्रकार सेतु इस तट से उस तट को और उस तट से फिर इस तट को लाता ले जाता है, उस ही प्रकार भगवान् जन्म मरण के माध्यम से जीवों को उनके कर्मानुसार परलोक रूप तट से इस लोक रूप तट को तथा इस लोक तट से परलोक तट को प्राप्त करवाता है, तथा जन्म माध्यम से इस लोक रूप तट को प्राप्त करके जीव अपने कृतकर्मजन्य संस्कारानुसार कर्म करना आरम्भ कर देता है। जैसा कि हम लोक में भी देखते हैं, कोई भी इस तट से दूसरे तट को जाता हुआ, हाथ और पैरों से जल को निकालता (फेंकता) हुआ दूसरे पार चला जाता है और वहां जाकर वह जैसा चाहता है, स्नान, व्यायाम, जप, पठन आदि कार्य करता है। इस ही प्रकार जीव अदृष्टानुसारी परलोक से इस लोक में आकर पूर्वकृतकर्मज संस्कारानुसार तथा आवश्यकतानुसार कर्मों का आरम्भ करता है। यहां से भगवान् इसे पार करता है, इसलिये वह तारण वा तार है। जैसे सन्तरणरूप कार्य जल के बिना नहीं होता, क्योंकि तिरना जल से ही होता है, उस ही प्रकार परलोक से तिरकर इस लोक में आने के लिये जीव को भी माता के जरायुज जल की अनिवार्य आवश्यकता है। उस माता के गर्भाशयरूप पारावार रहित अन्धकारमय कूप से भगवान् ही इस जीव को पार करता है, इसलिये उस भगवान् को तारण, तार, उद्धारक आदि नामों से कथन करते हैं। उद्धारक नाम ऊपर को ले जानेवाले का है, जैसे सेतु ऊपर को ले जाने करके उद्धारक नाम से भी कहा जाता है। जैसे चतुर्विध सृष्टि का जन्म या मरण प्रत्येक योनि में भिन्न २ प्रकार का होता है, उस ही प्रकार प्रत्येक सेतु का जल भी भिन्न २

मन्त्रलिङ्गञ्च—

"उदुत्तमं वरुण पाशमस्म०" इत्यादि । अथर्व ७।८३।३ तथा
"अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम ।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आक्षियेम ॥ अथर्व
जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

तटात्तटान्तरमुत्प्लुत्यापि गम्यतेऽतो धातोः सन्तरणप्लवनार्थौ तारणनाम्नि युक्तं सङ्गच्छेते । एकस्मिंश्च काले घटनैषा श्रुता दृष्टा च समीपस्थैस्तथा हि, मृतः कश्चित् पुरुषोऽपरस्मिन् मृतशरीरे प्रविष्टः सजीवः स्वजन्मान्तरभव सर्वं वृत्तं संस्मृत्याब्रूत, पर्यचिनोच्च स्वजन्मान्तरसम्बन्धिनः । एवञ्च तारणस्तारस्तारक उद्धारक उत्प्लावकश्चेत्युक्तो भवति । तथा च कश्चित् प्लवनानभिज्ञमसमर्थं तरणे, कश्चित् सबलः पुरुषः स्वस्कन्धं क्रोडं वारोप्य तारयति तदा स पुरुषोऽपि तारणादि-शब्दवाच्यो भवति । एवं विविधा ऊहाः कर्तव्या भवन्ति ।

तथा च वेदो वदति "पश्यं देवस्य काव्यमिति । देवस्य दृश्यं काव्यं जगत् तस्य च दृढनियमनिबद्धस्य जरामरणे न भवतोऽत उक्तं "न ममार न जीर्यति" ।

भवति चात्रास्माकम्—

स तारणो विष्णुरनन्तशक्तिः सदा जराजन्मनिबद्धजीवम् ।
परादिदं दृश्यतटं तथास्मात् तटात् स जीवं नयते परञ्च ॥ १३८ ॥

प्रकार का होता है । इस ही प्रकार और २ भी कल्पनायें कर लेनी चाहियें । इसमें "उदुत्तमं वरुण" अनृणा अस्मिन्ननृणाः परस्मिन् तथा "सुनवाम सोममरातीयतो" इत्यादि मन्त्र प्रमाण हैं । एक तट से दूसरे तट पर कूदकर भी जाया जा सकता है, इसलिये तारण नाम में सन्तरण तथा प्लवनरूप दोनों ही अर्थ संगत होते हैं । एक समय एक घटना सुनने में आई तथा पास वालों ने उसे देखा भी है, मृत पुरुष दूसरे मृत शरीर में प्रवेश करके सजीव होगया उसने अपना पूर्वजन्म का वृत्तान्त सुनाया तथा अपने सम्बन्धियों को पहचान लिया । इस प्रकार भगवान् तारण, तार, तारक, उद्धारक, उत्प्लावक आदि नामों से कहा जाता है । उस पुरुष को भी तारण कहते हैं, जो तिरने में असमर्थ किसी अन्य पुरुष को अपने कन्धे या गोद में बिठाकर पार कर देता है । इसी प्रकार अन्यान्य ऊहायें करनी चाहियें । इसी प्रकार वेद कहता है "पश्य देवस्य काव्यमिति" भगवान् का दृश्य काव्य है जगत्. और यह भगवान् के दृढ नियमों से बन्धा हुआ है, इसीलिये इसका जरा या मरण नहीं होता, इसी अर्थ को वेद इस प्रकार कहता है "न ममार न जीर्यति" इत्यादि ।

इस पूर्वोक्त भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

अनन्तशक्ति भगवान् विष्णु का नाम तारण है, क्योंकि वह जरा जन्म आदि विकारों से निबद्ध जीव को इस लोक रूप तट से परलोक तट को तथा परलोक रूप तट से इस लोक को लाता ले जाता है ।

तथा—यथात्र लोके कवयः पुराणा नवं नवं पारमवाप्तुकामाः।
वाञ्छन्ति नित्यं गहनानुकूल्यं तितीर्षुरेवं च सदात्र जीवः ॥ १३९ ॥
गहनो = विष्णुः ।

शूरः—३३९

शु सौत्रो धातुर्गत्यर्थकस्ततः "शुसिचिमीनां दीर्घश्च" इत्युणादि २-२५ सूत्रेण क्रन् प्रत्ययो धातोरुकारस्य च दीर्घः । शवति=गच्छति सर्वत्राप्रतिबन्धमिति शूरः । यद्वा ण्यर्थग्रहणे शवति=प्रापयति सर्वमभीष्टमिति शूरः । यद्वा चौरादिकात्, शूर वीर विक्रान्ताविति धातोरच् प्रत्यये शूर इति तस्य च विक्रमणशीलो=विक्रमितेत्यर्थः । विक्रमणशीलत्वात् सूर्यः शूरस्तथा विष्णुरपि । सूर्यो हि त्रिधा विक्रमते । तथा च—

उदयमानो मित्रसंज्ञां लभते, मध्याह्न इन्द्रसंज्ञां लभते, अस्तञ्च यन्नग्निसंज्ञां लभते । अत्र चैतदर्थकं मन्त्रलिंगं "मित्रपदं प्रथमं विक्रमणम् । इन्द्रेति द्वितीयं विक्रमणम् । अग्निरिति तृतीयं पदम् । एवञ्चैष उक्तिसिद्धोऽर्थो यत्, सूर्यं हि प्राणी त्रिधा पश्यति, यथा च सूर्यः स्वकैः क्रमणैः किरणैश्च त्रिधा व्याप्नोति, तथा सर्वेश्वरो विष्णुरपि स्वकैः क्रमणैरुत्पादन—स्थापन—विलापनरूपैः समस्तं विश्वं व्याप्नोति ।

जैसे इस लोक में बड़े २ पुरातन कवि पुरुष नित्य नूतन २ अर्थों का पार पाना चाहते हैं, अर्थात् नूतन २ अर्थों को प्राप्त करना चाहते हैं, उस ही प्रकार यह जीव भी सदा गहन नाम भगवान् के आनुकूल्य से इस भवाब्धि से पार होकर परमार्थ को प्राप्त करने का प्रयत्न करता है ।

शूरः—३३९

शूर शब्द गत्यर्थक शु धातु से उणादि क्रन् प्रत्यय तथा धातु के उकार को दीर्घ करने से सिद्ध होता है । जो सर्वत्र अप्रतिबन्ध रूप से जाता है, उसका नाम शूर है । यद्वा प्रेरणार्थ लेने से जो सबको अपना अभीष्ट प्राप्त करवाये उसका नाम शूर है । अथवा शूर इस विक्रान्ति अर्थ वाले चौरादिक धातु से अच् प्रत्यय करने से शूर शब्द सिद्ध होता है । जो विक्रमशाली या पराक्रम शील है, उसका नाम शूर है । शूर नाम सूर्य तथा विष्णु दोनों का है । सूर्य का विक्रमण तीन प्रकार से होता है, वह मित्र रूप से उदय होता है, इन्द्ररूप से मध्याह्न में आता है, तथा अग्निरूप से अस्त होता है । अर्थात् उदय होता हुआ सूर्य मित्र, मध्याह्न में गया हुआ सूर्य इन्द्र, तथा अस्ताचल को प्राप्त हुआ सूर्य अग्निसंज्ञा को धारण करता है । यह मन्त्र से प्रतिपादित अर्थ है—

सूर्य का प्रथम विक्रमण मित्ररूप है, द्वितीय विक्रमण इन्द्ररूप है, तृतीय विक्रमण अग्नि रूप है । इसी प्रकार यह भी उक्ति परम्परा सिद्ध है, सूर्य को प्राणी तीन प्रकार से देखता है, सूर्य अपने विक्रमण तथा किरणों से तीन प्रकार से जगत् का व्यापन करता है, इसी प्रकार भगवान् विष्णु भी अपने उत्पादन, स्थापन तथा प्रलयरूप विक्रमणों से समस्त संसार को व्याप्त

यद्वा बाल्ययौवनवार्धक्यरूपैरवस्थाविशेषैः सर्वत्राक्रामतीति स सर्वव्यापको भगवान् सर्वस्येष्टं गमयन् शूर इत्युक्तो भवति ।

भवति चात्रास्माकम्—

शूरो हि विष्णुः स ददाति वर्यं पदैस्त्रिभिर्विश्वमिदं मिमानः ।
स कालदिग्देशविभागमुक्तः त्रिधा स्थितं विश्वमिदं बिभर्ति ॥ १४० ॥

शौरिः—३४०

शूर विक्रान्ताविति चौरादिको धातुस्ततो बाहुलकाद्-"वसिवपियजीत्यादिनोणादिसूत्रेण, इञ् प्रत्ययो, वृद्धिः शौरिः सुबन्तः सिध्यति । शूरयत इति शौरिर्विक्रान्तिकारी । शूरशौरिनाम्नोः प्रायः समानार्थता । चतुर्विधयोनिविभक्तमिदं विश्वं सर्वदा विक्रान्तिमाददानं दृश्यत उत्पत्तिक्षणादारभ्य यावत् प्रलयं, न हि किञ्चिदपि क्षणमपि चैकामक्षुण्णां दशामधितिष्ठतीति । अतो भगवान् शौरिः सर्वं व्यश्नुवानो व्यनक्त्यात्मानमिति ।

भवति चात्रास्माकम्—

शौरिर्हि विष्णुः स्वकृतेऽत्र कल्पे न कञ्चिदप्येकरसं विधत्ते ।
वृद्धिक्षयाभ्यां किमुतांशरूपैर्नित्यं युनक्त्येकरसः स्वयं सः ॥ १४१ ॥

करता है, यद्वा बाल्य, यौवन, वार्द्धक्य रूप अवस्था विशेषों से सर्वत्र आक्रमण करता है, तथा सबका इष्ट साधन है इसलिये शूर नाम से कहा जाता है ।

इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम शूर है क्योंकि वह तीन प्रकार के विक्रम से इस विश्व का मान करता हुआ सबको उन उनका अभीष्टार्थ देता है वह स्वयं दिक् देश काल आदि विभाग से मुक्त है, तथा इस तीन प्रकार से स्थित सकल विश्व का धारण पोषण करता है ।

शौरिः—३४०

विक्रान्त्यर्थक चुरादिगणपठित शूर धातु से बाहुलक से "वसिवपियजी"त्याद्युणादि सूत्र से इञ् प्रत्यय तथा वृद्धि करने से सुबन्त शौरि पद सिद्ध होता है, जो विक्रान्ति करता है उसका नाम शौरि है । शूर और शौरि नाम प्रायः समानार्थक हैं । चार प्रकार की सृष्टि के भेद से विभक्त यह समस्त विश्व सृष्टि के आद्य क्षण लेकर प्रलय तक विक्रमण शील ही देखने में आता है, कभी भी यह एकरूप अर्थात् क्रान्तिरहित निश्चल स्थिति में नहीं रहता, क्योंकि भगवान् शौरि विश्व में व्याप्त होकर अपने विक्रमणस्वरूप गुण से अपने आपको प्रकट कर रहा है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम शौरि है, वह स्वयं एकरस होता हुआ भी किसी सांसारिक पदार्थ को एकरस अर्थात् समानावस्थ नहीं बनाता, परन्तु प्रत्येक पदार्थ को वृद्धि क्षय विपरिणाम आदि भाव विकारों से युक्त ही करता है, जिस से पदार्थ में प्रतिक्षण परिवर्तन हुआ रहता है ।

अत्र किञ्चित् प्रासङ्गिकम्—

वीरयते=विक्रान्तिं करोतीति वैरिरित्यप्यनुक्तं व्याख्यातं भवति, वीरयते—बाहुलकादौणादिक इञ् प्रत्ययः।

शूरजनेश्वरः—३४१

शूराणां=विक्रान्तिशीलानां जनानाम्=जन्मिनामीश्वरः=ईशिता—ऐश्वर्यस्य दातेति शूरजनेश्वरो विष्णुरुक्तो भवति।

एतदेवाभिप्रेत्य शूरजनेश्वरं भगवन्तं संस्मरन् जीवः प्रार्थयते "मा न आयुः प्रमोषीः" तथा "तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्" इत्यादि।

तथा च भवति चास्माकम्—

स सर्ववित् सर्वविधानकर्ता विश्वस्य विक्रान्तिमितस्य भर्ता।
अतोऽस्ति लोके मुनिभिः स गीतः सदा सदा शूरजनेश्वरः सः॥ १४२॥

प्रसङ्गतोऽनुक्तमपि वीरजनेश्वर इति विष्णोर्नाम व्याख्यातं भवति।

अनुकूलः—३४२

कूल आवरण इति भौवादिको धातुस्तत "इगुपधज्ञाप्रीकिरः कः" इति पा० सूत्रेण कः प्रत्ययो, गुणाभावः, गतिसमासः, "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" पा० २-४-२६

यहां प्रसङ्गानुसार विक्रान्तिरूप अर्थ की समानता से सहस्र नामों में अपठित वैरि शब्द का व्याख्यान भी हो जाता है। वीर विक्रान्त्यर्थक धातु से बाहुलक से उणादि इञ् प्रत्यय करने से वैरि शब्द सिद्ध होता है।

शूरजनेश्वरः—३४१

विक्रमणशालीजनों के विक्रम अर्थात् ऐश्वर्य के देनेवाले का नाम शूरजनेश्वर है, यह भगवान् का नाम है। इस ही अर्थ के अभिप्राय से जीव शूरजनेश्वर भगवान् से प्रार्थना करता है, जैसो कि "मा न आयुः प्रमोषीः" तथा "तमीशानं जगतस्तस्थुषस्पतिमित्यादि" मन्त्रों में की गई है।

इसी भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है—

लोक में ऋषि मुनि महापुरुषों ने भगवान् विष्णु की शूरजनेश्वर नाम से स्तुति की है, क्योंकि वह सर्वज्ञ सब प्रकार के विधान=नियमों का कर्ता तथा विक्रमशील विश्व का पालन-पोषण करनेवाला स्वामी है।

प्रसङ्गानुसार अपठित वीरजनेश्वर नाम का भी इसी नाम के व्याख्यान से व्याख्यान हो जाता है।

अनुकूलः—३४२

कूल आवरणार्थक भ्वादिगण पठित धातु है, इस से इगुपध लक्षण क प्रत्यय तथा गुण का अभाव होने से कूल शब्द सिद्ध होता है। अनु उपसर्ग के साथ गति-समास होने पर परवल्लिङ्गमित्यादि पा० २ ४।२६ सूत्र से परवल्लिङ्ग अर्थात् नपुंसकलिङ्ग प्राप्त था उसका

सूत्रेण परवल्लिङ्गतायां प्राप्तायां "द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु प्रतिषेधः" इति २-४-२६ सूत्रस्थवार्तिकेन निषिध्यते। कूलति=आवृणोति, प्रतिबध्नाति जलादिकमिति कूलं तटादि। कूलशब्द इह तटपर्यायो, यथा नद्याः कूले जपति। कूलमनुवर्तत इत्यनुकूलं नद्या जलम्। यथा च नद्या जलं कियन्तमप्यध्वानं प्रवहत् कूले निर्माति। तथा चेयं जलस्य प्रवृत्तिर्विज्ञापयति यत् स्वप्रवहणे जलं कूलद्वयमपेक्षते। अर्थात् कूलानुस्यूतं जलं रक्षितं भवति। तथेयं सृष्टिरपि स्वसंचलने कूलद्वयमपेक्षते। तथा च वेदः "द्यौष्पिता पृथिवी माता" अनेनैव तटद्वयेन नियन्त्रिता चतुर्विधजरायुजोद्भिज्ज-स्वेदजाण्डजभेदभिन्ना सृष्टिः प्रवहति। अस्मिंश्च पार्थिवशरीरे पादौ पृथिवीस्थानीयौ शिरश्च द्योस्थानीयम्। यथा दिवि ज्योतिःस्वरूपाणां ग्रहाणां निवेशस्तथा शिरसि प्रकाशप्रधानानां ज्ञानेन्द्रियाणां निवेशः। द्यौरेकं कूलं पृथिवी च द्वितीयमनयोश्च मध्यवर्तिहृदयं नदीस्थानीयं, तत्र चोरसि महाधमनी हृदययन्त्रेण सम्पृक्ते महासिरा-मुखे चलमिव रक्ताख्यं रसं प्रवाहयति। सर्वत्र लोकेऽपि च पश्यामः सर्वमिदं द्वन्द्वेन निबद्धं कूलरूपेण तथा च—द्वे नेत्रे, द्वे मस्तिष्के, द्वौ कर्णौ, द्वे जिह्वे, द्वे नासिके, द्वे दन्तावल्यौ, द्वौ फुफ्फुसौ, द्वौ हस्तौ, द्वौ यकृत्प्लीहानौ, अन्त्राणि द्विविधानि, बृहल्ल-घुभेदभिन्नेऽन्तर्गुह्येन्द्रियछिद्रे द्वे, वृषणौ द्वौ, सक्थिजङ्घे द्वे, पादौ द्वौ, विश्वञ्चेदं स्थावरजङ्गमभेदभिन्नं द्विविधं, बीजे द्वे। यथा नदी तटद्वयमध्यगा प्रवहति, तथेदं सर्वं

द्विगुप्राप्तापन्नेति वार्तिक से निषेध हो गया। जो आवरण करता है उसका नाम कूल है तथा जो कूल का अनुवर्तन करे उसका नाम अनुकूल है नदी आदि का जल। कूल शब्द यहां तट का पर्यायवाची है, जैसे नदी के कूल पर जप करता या रहता है। जल जब बहता है तो थोड़ी दूर चलने में ही अपने कूलद्वय का निर्माण कर लेता है। यह ही जल की प्रवृत्ति सूचित करती है कि जल को अपने सनियम बहने के लिये दो कूलों=तटों की जरूरत=आव-श्यकता है अर्थात् कूलद्वय से बन्धा हुआ जल सुरक्षित रहता है। इसी प्रकार यह जगत् प्रवाह रूप सृष्टि भी अपने चलने के लिये दो कूल चाहती है, जिन कूलों का कथन वेद ने इस प्रकार किया है "द्यौष्पिता पृथिवी माता" इसी द्यावापृथिवीरूप तटद्वय से नियन्त्रित जरायुजादि चतुर्भेदभिन्न सृष्टि चल रही है। इस पार्थिव शरीर में पाद पृथिवी रूप तथा शिर द्योरूप है। जैसे द्योलोक में ज्योतिःस्वरूप ग्रहों का स्थान है, उस ही प्रकार शिर में ज्ञानज्योतिप्रधान ज्ञानेन्द्रियों का स्थान है। एक कूल द्यौ है दूसरा कूल पृथिवी है तथा दोनों के मध्य में वर्तमान हृदय नदी है, और वहां पर स्थित महाधमनी हृदययन्त्र से सम्बद्ध महासिरामुख में जल के समान रक्तरूप रस का सञ्चार करती है। लोक में भी हम देखते हैं—यह सब दृश्यवर्ग द्वन्द्वरूप कूलद्वय से बन्धा हुआ है जैसे कि—

दो नेत्र, दो मस्तक, दो कान, दो जिह्वा, दो नासिका, दो दन्तपंक्ति, दो फुफ्फुस, दो हाथ, दो यकृत प्लीहा दो प्रकार का अन्त्रजाल गुप्तेन्द्रिय के छोटे बड़े छिद्र दो, दो अण्डकोश, स्थावर और जङ्गम भेद से दो प्रकार का यह विश्व, तथा दो प्रकार का बीज। जैसे नदी दो तटों के बीच में बहती है उस ही प्रकार यह सकल जगत् द्वन्द्व से अनुस्यूत अर्थात् द्वन्द्व के

जगद् द्वन्द्वानुस्यूतं युगलमध्यगं वा आदितोऽन्तपर्यन्तं प्रवहति=चलतीत्यर्थः। एवं सर्वत्रानुकूलता रूपेण गुणेन व्याप्तो भगवाननुकूलः सर्वमनुकूलं विधत्ते। अत एव च तस्यानुकूलेति नाम।

यच्चोक्तं "सूर्य आत्मा जगतस्तस्थुषश्चे"ति तत्रात्मा हृदये निवसति, हृदयञ्चान्तराले द्यावापृथिव्योरुत्तमाङ्गपादरूपयोः। अत एव निर्विवादमेतद् यद्हृदयं चेतनास्थानमिति। एवञ्च वक्तुं युज्यते, यदियं मनोनदी, जगद्रूपा नदी वा द्युलोकस्य तथा पृथिवी लोकस्य मध्यवर्तिनो सती प्रवहति। यथा च जले बहूनां पदार्थानां स्थितिस्तथा मनस्यपि प्रजानां सर्वं शुभमशुभञ्च विचारजालमोतं प्रोतञ्च भवति। तथा च वेदे "सर्वमोतं प्रजानाम्" मनसीति, प्रमज्यते, यस्मिंश्च मनसि ज्ञानमिदं सर्वं निहितमस्ति, तथा च वेदः "यस्मिन्नृचः साम यजूꣳषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः—तन्मे मनः शिवसङ्कल्पमस्तु" यथा च नदो न कदाचिद्विरमति रात्रिन्दिवञ्च प्रवहति तथेदं मनोऽपि जाग्रति स्वप्ने सुषुप्तौ च सर्वदा गतिशील न कदाचिद् गतिनिवृत्ति भजते। एवं लोकमवलोक्यानुकूलपदव्याख्यानुकूलान्युदाहरणान्यूहनीयानि।

मातृपितृरूपे द्वे तटे तयोर्मध्य इदं जन्मि जगत् प्रवहति। एवं सर्वं सव्यवस्थं कूलमनुवर्तमानं दृश्यते।

भवन्ति चात्रास्माकम्—

माध्यम से चल रहा है। इस प्रकार अनुकूलतारूप गुण से सर्वव्यापक अनुकूल—नाम भगवान् विष्णु सकल इस विश्व को अनुकूल बना रहा है। इस ही लिये उसका अनुकूल नाम है। और सूर्य को इस स्थावर जङ्गमात्मक जगत् का आत्मा वेद ने बतलाया है, आत्मा का स्थान व्यापक होते हुए भी प्रधान रूप से हृदय है, तथा हृदय पाद रूप पृथिवी और शिररूप द्युलोक के बीच में है, इसीलिये यह हृदय चेतना स्थान है, इसमें कोई विवाद नहीं। इसे इस प्रकार भी कह सकते हैं, यह मनोरूप जगद्रूप वा नदो द्युलोक और पृथिवीलोक के बीच में होकर बहती है। जैसे जल में बहुत प्रकार के जलचर जन्तु वा स्थावर पदार्थ रहते हैं, उस ही प्रकार मन में भी शुभ अशुभ रूप विचारों का जाल फैला हुआ रहता है, जैसा कि सर्वमोतं प्रजानामित्यादि वेद मन्त्र कहता है, तथा "यस्मिन्नृचः" इत्यादि मन्त्रानुसार सब प्रकार के ज्ञान भी मन में ही स्थित हैं। जिस प्रकार नदो बहती हुई रात्रि या दिन में किसी समय भी विश्राम नहीं लेती, अर्थात् प्रतिक्षण चलती ही रहती है, उसी प्रकार यह मन भी जाग्रत स्वप्न सुषुप्ति इन तीनों अवस्थाओं में चलता ही रहता है, कभी भी गतिहीन होकर नहीं रहता। इस प्रकार लोक को देखकर अन्यान्य उदाहरणों की कल्पनायें कर लेनी चाहियें। माता पिता रूप दो तटों के बीच में होकर यह सकल जन्मशील जगत् बह रहा है। इस प्रकार यह सकल जगत् कूल का अनुवर्तन करता हुआ दीखता है।

भाष्यकार का अपने पद्यों द्वारा भावप्रकाशन इस प्रकार है—

यथा जलं कूलयुगानुसृप्तं नदीति संज्ञां लभतेऽनवद्याम्।
तथा नगं गच्च जगत् समस्तं द्यावापृथिव्योरनुयाति कूलम् ॥ १४३ ॥
यथा नदी कूलमलङ्करोति तथान्तराले दहरं विभाति।
मनो निवासो हृदये सदुक्तश्चित्ते निवासो हृदयस्य चोक्तः ॥ १४४ ॥
सर्वत्र बीजेषु वितत्य यौग्म्यं धाता सना शास्ति च विश्वमात्रम्।
पितोपरिष्टादधरा च धात्री द्यौरूर्ध्वमूर्ध्वा: पृथिवी ह्यधस्तात् ॥ १४५ ॥

अथ च शरीरमध्यभागावयवानधिकृत्य किञ्चिदुच्यते—यथा समुद्रोऽन्तरिक्ष—स्थानीयस्तथा शरीरमध्यभागावलम्बित्वात् सहस्तौ भुजावन्तरिक्षस्थानीयौ तयोः समकक्षश्च हृदयमान्तरिक्षसमुद्र इव—उरःस्थम्। पार्थिवसमुद्रस्थानीया च मूत्राधिष्ठानभूता वस्तिः पार्थिवसमुद्रस्याधोभागवर्तित्वात्। अभ्रवच्चापि फुफ्फुसा-वुरोगुहागतौ हृदयसमकक्षौ! वस्तिसहायौ च वृक्कौ अधस्तात् कृतौ। एतदेवाभि-प्रेत्य लोकसम्मितः पुरुष इत्युक्तम्। तथा च भवतोऽत्रास्माकम्—

अधः शयानो जनको न वामामलं भवेत्तर्पयितुं कदाचित्।
उच्चैः पिता द्यौः कथितोऽस्ति वेदे धरा ह्यधस्ताद्धरणीव योषा ॥ १४६ ॥
वेद्यञ्च यो वेत्त्यनुकूलसंज्ञं तं विघ्नबाधा न विहन्ति मर्त्यम्।
सुखं शयानः पदमप्रमेयं पश्यन् सदा नन्दति वीतशोकः ॥ १४७ ॥

वेद्यम्=विष्णुम्।

जैसे दोनों तटों से सम्बद्ध होकर वहता हुआ जल नदी नाम से कहा जाता है, उसी प्रकार द्यावापृथिवी रूप तटद्वय से सम्बद्ध होकर चलता हुआ स्थावर जङ्गमरूप जगत्, जगन्नदी या मनोनदी नाम से कहा जाता है।

जैसे नदी के दोनों तटों के मध्य में दहर अर्थात् अवकाश विशेष रहता है, उसी प्रकार हृदय में मनका निवास तथा हृदय का चित्त में निवास सत्पुरुषों ने कहा है।

विधाता बीजों के युग्मभाव से संसार को बनाकर इसका सदा शासन करता है, पिता जो द्योरूप है, उसका स्थान ऊपर है तथा मातृरूप पृथिवी का स्थान नीचे है।

यहां कुछ शरीर के मध्यभाग के अवयवों क विषय में कहा जाता है—समुद्र जैसे अन्त-रिक्ष स्थानी होता है उसी प्रकार शरीर के मध्य भाग में होने से हस्तसहित भुजायें अन्तरिक्ष स्थानी है। तथा उन का समकक्ष होने से हृदय अन्तरिक्ष में होनेवाले समुद्र के समान है। पार्थिव समुद्र के अधोभाग में स्थित होने से मूत्राशय वस्ति पृथिवी के समुद्र के समान है। हृदय के समकक्ष उरोगुहागत फुफ्फुस मेघों के समान है। वस्ति से सम्पृक्त वृक्कों का स्थान इन सबसे नीचा है।

इस भाव को भाष्यकार पद्यों द्वारा इस प्रकार व्यक्त करता है—पुरुषरूप जीव, स्त्रीरूप जीव के नीचे रहकर, उसकी मनस्तुष्टि नहीं कर सकता, इसलिये वेद ने द्युलोक के समान पुरुष-रूप पिता का स्थान ऊपर तथा पृथिवी के समान स्त्रीरूप माता का स्थान नीचे कहा है।

जो पुरुष इस प्रकार परमवेद्य भगवान् अनुकूल को तत्त्व से जानता है, वह सब प्रकार की विघ्नबाधाओं से पृथक् रहता हुआ, शोकरहित आनन्दरूप अप्रमेय परमपद को प्राप्त करके, सदा आनन्द से रहता है।

शतावर्तः—३४३

शतशब्दो वहुपर्याय आवर्तशब्दश्च चक्रपर्यायः। शतं=बहूनावर्तयति=चक्रवद् भ्रमयतीति शतावर्तः। यद्वा शतेन=वहुरूपेण विविधेन पदार्थगणेनावर्तत इति शतावर्तो भगवान्। तथा हि स सूर्य-चन्द्र-नक्षत्रादिरूपं ज्योतिर्गणं जीवात्मानञ्च वहुश आवर्तयति=भ्रमयति प्रतिक्षणमित्यतः शतावर्तः। यद्वा स एव प्रत्येकं पदार्थरूपेण समन्ताद् वर्तत इति शतावर्त उच्यते। तथा चोच्यते वेदे "सूर्यस्यावर्त-मन्वावर्ते" तथा "यं सुपर्णः परावत श्येनस्य पुत्र आभरत्। शतचक्रं योऽह्योवर्तनिः ऋग् १०-१४४-४ इत्यादि। यद्वा शतं=वहव आवर्ताश्चक्राणि यस्मिन् स शतावर्तोऽयं संसारः स चास्यास्तीति मत्वर्थीयोऽच्। तथा च पश्यामो लोके यथास्मिन् भौतिके शरीरे मूलाधारचक्रम्-गुदाचक्रम्-नाभिचक्रम्-अन्त्रचक्रम्-इत्यादीनि वहूनि चक्राणि सन्ति। तथा लोकेऽपि समष्टिरूपे ग्रहचक्र, राशिचक्र, नक्षत्रचक्रादीनि बहूनि सन्ति चक्राणि, लोकश्चायं भगवत एवेत्यतः स शतावर्त उच्यते। शिरोनिर्माणन्तु चक्रवत् सर्वेषां प्रत्यक्षमेव। यन्त्रञ्चापि वहुचक्रयुक्तं निर्मीयते तन्निर्मात्रा। एवं भगवान् स्वकीयेन शतावर्ताख्येन गुणेन सर्वं जगद् व्याशयन् प्रतिपदं व्यनक्त्यात्मानम्। य एवं भगवन्तं शतावर्ताख्यं वेद स उन्मीलितलोचनो दिवि सूर्यमिव प्रत्यक्षं तत्त्वरूपं विष्णुं पश्यति सम्यक्, तथा च मन्त्रः-"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्" यजुः।

शतावर्तः—३४३ अनन्तचक्रोंवाला।

शत शब्द का अर्थ बहुत है तथा आवर्त शब्द का अर्थ चक्र है। जो बहुतों को चक्र के समान भ्रमण करवा रहा (घुमारहा) है उसका नाम शतावर्त है। यद्वा विविध पदार्थ रूप से जो स्वयं आवर्तन (पुनः पुनः रूपपरिवर्तन) कर रहा है, उसका नाम शतावर्त है। यह सब प्रकार से सङ्गतार्थ है, क्योंकि वह सूर्य चन्द्र नक्षत्रादिरूप ज्योतिसमुदाय को तथा ज्योतिरूप जीवात्मा को बार २ चक्र की तरहं घुमाता है। यद्वा वह प्रत्येक पदार्थरूप से बार बार स्वयं तत्तद् रूप में भासमान होता है, इसलिये उसका नाम शतावर्त है।

इसी भाव को "सूर्यस्यावर्तमन्वावर्ते" तथा "यं सुपर्णः परावत" इत्यादि वेदमन्त्र पुष्ट करता है। अथवा बहुत हैं आवर्त=चक्र जिसमें उसका नाम शतावर्त, यह संसार का नाम हुआ, तथा इससे मत्वर्थ अच् प्रत्यय करने से बहुत चक्रोंवाला संसार जिसका है, उसका नाम शतावर्त, यह विष्णु का नाम हुआ। संसार में बहुत चक्र कैसे हैं यह हम प्रत्यक्ष लोक में देखते हैं, जैसे कि—इस भौतिक शरीर में मूलाधार चक्र, गुदा चक्र, नाभिचक्र तथा अन्त्रचक्र आदि बहुत चक्र हैं। उस ही प्रकार समष्टि लोक में भी ग्रह चक्र, राशि चक्र, नक्षत्र चक्र आदि बहुत चक्र हैं और यह लोक भगवान् का अपना है, इसलिये भगवान् का नाम शतावर्त है। शिर की बनावट तो स्पष्ट ही चक्र के समान दीखती है। यन्त्र का निर्माण करनेवाला यन्त्र में भी बहुत से चक्रों का निर्माण करता है। इस प्रकार भगवान् विष्णु अपने शतावर्ताख्य गुण से सर्वत्र व्याप्त होता हुआ पद पद पर अपने आप को व्यक्त कर कर रहा है। जो इस प्रकार भगवान् शतावर्त को जान लेता है वह आकाश में सूर्य के समान तत्त्वरूप विष्णु को प्रत्यक्ष देखता है।

भवतश्चात्रास्माकम्—

विष्णुः शतावर्तपदप्रसिद्धो, विश्वं सचक्रं कुरुतेऽनवद्यम् ।
यो वेत्ति विश्वं स उ वेत्ति कायं, यो वेत्ति कायं स उ वेत्ति वेदम् ॥१४८॥
निर्दोषमुक्तं श्रुतिनिष्ठतत्त्वं जगच्छ्रुती कूलयुगं स्वयम्भोः ।
जगत् सदुक्तं श्रुतिभाष्यमानं, श्रुतिश्च विश्वस्य समाससूत्रम् ॥१४९॥

पद्मी—३४४

पद्यते, पदनं वा पद्म=ज्ञानम् । पद गतौ धातोरौणादिके मनि पद्मशब्दसिद्धिः । गत्यर्थानां धातूनां गतिज्ञानप्राप्त्यर्थत्वनियमाच्चात्र ज्ञाने वृत्तिः । एवञ्च पद्म ज्ञानमस्यास्तीति पद्मी मत्वर्थीय इनिः । ज्ञानीत्यर्थः । यद्वा-यथा हि पङ्कसारभूतं जलोद्भवं विविधदलानुस्यूतं पद्म जले तिष्ठन्नपि जलेनासम्पृक्तं चक्षूरमं मनोज्ञं च भवति तथैवेयं जलोद्भवा, विविधद्वीपरूपदलानुस्यूता, जलस्थिता जलासम्पृक्ता च, पद्माकारा पृथिवी पद्मेव भाति । एतच्च पृथिवीरूपं पद्मास्तीत्यस्य स भगवान् पद्मी । एवञ्च पद्मशब्देनेह नैर्मल्यासंसर्गित्वरूपधर्मसामान्यात् ज्ञानं, कमलं, पृथिवी चाभिधीयत इति ।

इस भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम शतावर्त है, क्योंकि वह इस समस्त प्रशस्त विश्व को बहुत चक्र युक्त बनाता है, जो इस विश्व को अच्छी प्रकार जानता है, वह इस शरीर पिण्ड को जानता है, तथा शरीर को जाननेवाला वेद को समुचित रूप से जानता है ।

श्रुति प्रतिपादित निर्दोष शुद्धस्वरूप स्वयम्भू रूप परम तत्त्व के श्रुति और जगत् दो कूल हैं, क्योंकि वह रस रूप से इन दोनों में अनुस्यूत है, जगत् को श्रुति तथा भाष्य सत् मानते हैं, तथा श्रुति इस विश्व का संक्षिप्त सूत्र रूप है ।

पद्मी—३४४ ज्ञानी ।

पद्म नाम ज्ञान का है । पद्म शब्द गत्यर्थक पद धातु से औणादिक मन् प्रत्यय करने से सिद्ध होता है । गत्यर्थक धातुओं के नियम से गति ज्ञान तथा प्राप्ति ये तीन अर्थ हुआ करते हैं, यहां पद धातु का अर्थ ज्ञान है । इस प्रकार पद्म नाम ज्ञान जिसका या जिसमें है उसका नाम पद्मी है, यह ज्ञानी का नाम है, इस में मत्वर्थीय इनि प्रत्यय हुआ है । अथवा जैसे पङ्क (कीचड़) का सार अंश, जल से उत्पन्न हुआ विविध दलों से युक्त पद्म, जल में रहता हुआ भी जल से निर्लिप्त चक्षु तथा मन को आनन्द देनेवाला सुन्दर है, उस ही प्रकार जल से उत्पन्न होनेवाली, विविध प्रकार के द्वीपरूप दलों से युक्त, जल में स्थित तथा जल से पृथक्, पद्म के आकार वाली यह पृथिवी भी पद्म के समान है । यह पृथिवी रूप पद्म जिसका है, उसका नाम पद्मी है । इस प्रकार यहां नैर्मल्य और असंसर्गित्व रूप धर्म की समानता से पद्म शब्द ज्ञान, कमल तथा पृथिवी को कहता है । वह पद्म पितृरूप से रक्षा

तच्च पद्म पितृरूपः पाति, मातृरूपो निर्मिमीते, धर्तृरूपो धारयति, हर्तृरूपो हरति, जनयितृरूपो जनयति, रेतः वरूपः सर्वविधवीजानभिषिञ्चति, बन्धुरूपो बध्नाति, अहोरूपः प्रकाशकौ सूर्याचन्द्रमसौ व्यवस्थापयति, सन्धातृरूपः पद्मदलानीव पृथिवीं सन्दधाति, मनुरूपश्च सर्वं मनुते बोधयतीत्यर्थः। एवं विविधमूहनीयम्।

भवति चात्रास्माकम्—

पद्मी स शर्म्मुर्विविधानुसृप्तं, ज्ञानं स्वकं ज्ञापयतेऽवदात्तम्।
एवञ्च यः पद्मिनमन्तरस्थं, जानात्यसौ तुष्यति युग्ममुक्तः॥१५०॥

पद्मनिभेक्षणः—३४५

पद्मम्=ज्ञानं, कमलञ्च, निभशब्दः सादृश्याभिधायी, ईक्षणं=दर्शनं, ईक्षण-शब्देनेह जगल्लक्ष्यते, ईक्षणसहकृतापोमूलत्वाज्जगतः, यदुक्तं तत्त्वदर्शिभिः—

"स ऐक्षत""स तपोऽतप्यत""सोऽसृजते"त्यादि। तच्चेक्षणं भगवतः सङ्कल्परूपं, कामरूपं वा, सङ्कल्पप्रभवत्वात् कामस्य, यदुक्तं गीतोपनिषत्सु "सङ्कल्पप्रभवान् कामा"नित्यादि। तथा च स ऐक्षत, स ऐच्छत्, सोऽकामयतेत्याद्येकमेव सङ्कल्परूप-मर्थमुद्दिश्य वहुधोच्यते स्पष्टप्रतिपत्त्यर्थम्। सिध्यति चैवं सङ्कल्पमूलिकेयं सृष्टि-रीक्षणमूलिका, काममूलिका वा। पद्मशब्देन स्वस्य संकोचविकासरूपौ धर्मौ लक्ष्येते।

करता है, मातृरूप से निर्माण करता है, धातृरूप से धारण करता है, हर्तृरूप से हरण करता है, जनयिता वनकर उत्पन्न करता है रेतोरूप होकर सब प्रकार के बीजों का सिञ्चन करता है, बन्धुरूप से बान्धता है, अहोरूप से प्रकाशक सूर्य और चन्द्रमा की व्यवस्था करता है, सन्धातृरूप से पद्मदलों के समान इस समस्त पृथिवी का सन्धान (मिलान) करता है, तथा मनुरूप से सब ज्ञानोपदेश करता है। इसी प्रकार अन्य कल्पनायें करनी चाहियें।

इस भाव को भाष्यकार पद्य से इस प्रकार व्यक्त करता है—

भगवान् का नाम पद्मी है, क्योंकि वह विविध विषयक अपने शुद्ध ज्ञान का सर्वत्र बोधन कर रहा है, इस प्रकार जो सर्वान्तिर्यामी भगवान् पद्मी को जानता है, वह सब प्रकार के द्वन्द्व जाल से मुक्त होकर परम सन्तोष रूप शान्ति को प्राप्त करता है।

पद्मनिभेक्षणः—३४५

पद्म यह ज्ञान तथा कमल का नाम है। निभ शब्द सादृश्य का वाचक है। ईक्षण यह देखना, या ज्ञान सामान्य का नाम है। यहां ईक्षण शब्द जगत् का उपलक्षण है, क्योंकि जगत् ईक्षण सहकृत आपमूलक है, अर्थात् भगवदीक्षणरूप सङ्कल्प की सहायना से यह जगत् जल से उत्पन्न होता है। जैसा कि तत्त्वदर्शियों ने कहा है, उसने देखा, उसने ज्ञानरूप तप किया, तथा उसने सृष्टि की, इत्यादि। भगवान् का सङ्कल्प या काम ही ईक्षण है, संकल्प से ही काम की उत्पत्ति है, जैसा कि गीतोपनिषद् में कहा है "सङ्कल्पप्रभवान् कामानित्यादि"। इस प्रकार एक सङ्कल्परूप अर्थ ही स्पष्ट बोध के लिये 'स ऐक्षत' 'स ऐक्षत्' 'सोऽकामयत' इत्यादि अनेक क्रियाशब्दों से कहा गया है। इस प्रकार से यह सृष्टि, सङ्कल्पमूलक ईक्षणमूलक तथा काममूलक सिद्ध होती है। पद्म शब्द से लाक्षणिक संकोच तथा विकासरूप

एवञ्च पद्मनिभं=पद्मसदृशं संकोचविकासशीलमीक्षणं=जगद् यस्य स पद्मनिभेक्षणो भगवान् विष्णुः। जगच्चेदं भगवदीक्षातः सृष्टिरूपेणाविर्भवति=विकसति, यथाकालं स्थित्वा भगवदीक्षातः प्रलीयते चेति पद्मवत् सङ्कोचविकासौ भजते। लोके च पश्यामः, प्रत्येकं वस्तु स्वरूपत आविर्भूय=विकासमेत्य प्रलीयते। प्रत्यक्षमेतत् सर्वत्र दृश्यते। सूर्यादयो ग्रहा उदेत्य विकसन्ति, सायङ्काले यथासमयं वा सङ्कोचरूपमस्तं यान्ति। सूर्यकिरणाश्चात्र प्रात्यक्षिको दृष्टान्तस्तथा हि ते सूर्योदये विकसन्ति सायङ्काले च संकुचन्ति। एवमेतद्द्विविधेन धर्मेण सर्वत्र व्याप्तो भगवान् पद्मनिभेक्षणनाम्नोच्यते।

भवति चात्रास्माकम्—

विष्णुः स सङ्कोचविकासशीलं, जगत् सृजन् पद्मनिभेक्षणोऽस्ति।
तदीक्षणोद्भूतमिदं समस्तं, तमेव विष्णुं प्रपदं व्यनक्ति ॥१५१॥

पद्मनाभः—३४६

पद्मनाभशब्दो व्याख्यातः प्रकृतिप्रत्ययविभागेन। इह किञ्चिदान्तर्येण पुनर्व्याख्यायते—

पद्मेति पुष्पनाम, नाभशब्दश्च न भातीति नभः, नभ एव नाभः स्वार्थेऽण् प्रत्ययः। पद्मश्चासौ नाभश्च पद्मनाभः। पद्मशब्दस्य प्रकाशरूपोऽर्थो लक्ष्यो, नाभशब्दश्च तद्विरुद्धमर्थमाह, एवञ्च यः प्रकाशते न प्रकाशते च, स पद्मनाभ इत्युच्यते

धर्म का बोध होता है। पद्म के समान सङ्कोचविकासशील है ईक्षण=जगत् जिसका उसका नाम है पद्मनिभेक्षण, यह भगवान् विष्णु का नाम है। भगवान् के ईक्षण से ही जगत् का सृष्टिरूप से आविर्भाव तथा विकास होता है, नियत समय तक रहने के बाद भगवान् के ईक्षण से ही इस जगत् का प्रलय होता है, इस प्रकार पद्म के समान जगत् में सङ्कोच विकास होते रहते हैं। लोक में भी हम देखते हैं, प्रत्येक वस्तु अपने रूप से प्रकट होकर अर्थात् विकसित होकर लीन हो जाती है, यह सर्वत्र प्रत्यक्ष देखने में आता है। सूर्य आदि ग्रह उदित होकर विकसित होते हैं, तथा फिर सङ्कोचरूप अस्त को प्राप्त हो जाते हैं। स्पष्ट दृष्टान्त यहां सूर्य की किरणें हैं, क्योंकि सूर्योदय में उनका विकास होता है, तथा सूर्यास्त में सङ्कोच। इस तरह इस द्विविध धर्म से सर्वत्र व्याप्त भगवान् विष्णु पद्मनिभेक्षण नाम से कहा जाता है। भाष्यकार इस भाव को अपने पद्य से इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम पद्मनिभेक्षण इसलिये है कि, वह इस जगत् को सङ्कोच विकासशील बनाता है, यह सब कुछ भगवान् के ईक्षण से प्रकट होकर पद पद पर भगवान् विष्णु को ही प्रकट कर रहा है।

पद्मनाभः—३४६ ज्ञाताज्ञातरूप

प्रकृति और प्रत्यय के विभाग से पद्मनाभ शब्द का व्याख्यान किया जा चुका है। यहां कुछ भिन्नता से फिर व्याख्यान किया जाता है। पद्म नाम पुष्प का है, तथा जो प्रकाशित नहीं होता उसका नाम नभ है, नभ ही नाभ है स्वार्थ में अण् प्रत्यय हुआ है। जो पद्म भी हो और नाभ भी उसका नाम पद्मनाभ है। पद्म शब्द का लक्ष्यार्थ प्रकाश है, तथा नाभ शब्द

भगवान् विष्णुः । प्रत्येकं वस्तुनो ज्ञानाज्ञानापेक्षमवस्थाद्वयं भवति । तथा कस्यचिद् वस्तुनोऽवस्थाभेदेऽन्यदपि निमित्तं भवति, पद्मस्यावस्थे द्वे विकासरूपा मुद्रारूपा च, तत्र पूर्वस्यां सूर्योदयो निमित्तमपरस्यां च सूर्यास्तः, सूर्योदये तस्य पद्मरूपता, तस्मिंश्चास्तमिते नाभरूपता, अर्थात् सति सूर्यास्ते तस्य भाः दीप्तिर्न भवति । सूर्यश्चायं प्रत्यक्षं दृश्यमानो भवति पद्मरूपो ज्ञातत्वान् नाभरूपश्चास्तंगतोऽज्ञातत्वात्तदानीमिति । एषा हि सर्वस्य गतिः । मनुष्योऽपि जीवितः पद्मनिभो, मृतश्च नाभसदृश इति । इत्थं सर्वस्यान्तर्यामी भ्राजिष्णुर्भगवान् सूरिभिर्ज्ञातः सन् पद्मरूपः प्रकाशतेऽज्ञातश्च तदितरैर्नाभो न प्रकाशत इति पद्मनाभनाम भजते, न हि पश्यन्तोऽप्यज्ञानिनः पृथुदृशो भगवद्विभूतिं, भगवन्तं तत्त्वतः परिचिन्वन्ति । इयं हि वैष्णवीव्यवस्था द्विरुपात्तेनैतेन पद्मनाभनाम्ना विज्ञाप्यते ।

मन्त्रलिङ्गञ्च—

"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् । तथा "अक्षंण्वान् न विचेतदन्धः" ॥

व्याख्यायते च पुनरपरथा—पद्मनाभशब्दस्यैवार्थः—

"तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ॥ ऋग्

का अर्थ अप्रकाश प्रकाश का अभाव है । इस प्रकार जो प्रकाशाप्रकाशोभयरूप है उसका नाम पद्मनाभ है । प्रत्येक वस्तु की दो प्रकार की स्थिति होती है ज्ञातरूपा तथा अज्ञातरूपा । किसी वस्तु का अवस्था भेद किसी अन्य निमित्त से भी हो जाता है, जैसे पद्म की विकासरूप और मुद्रारूप (सङ्कोचभाव) दो अवस्थायें होती हैं, उनका निमित्त क्रम से सूर्योदय तथा सूर्यास्त होता है, सूर्य के उदय होने पर वह पद्मरूप अर्थात् ज्ञातावस्थापन्न है, तथा सूर्य के अस्त होने पर वह नाभरूप अर्थात् अज्ञातावस्थापन्न है, क्योंकि सूर्य के अस्त होजाने पर उसका प्रकाश नहीं रहता । इसी प्रकार प्रत्यक्ष दीखता हुआ सूर्य पद्मरूप है, ज्ञातावस्थापन्न होने से और अस्त होनेपर अज्ञातावस्थापन्न होने से नाभरूप है । इसी प्रकार सकल विश्व में अन्तर्यामी रूप से विद्यमान भगवान् विद्वानों के ज्ञान का विषय होने से पद्मरूप तथा सर्वसाधारण जनों से अज्ञात होने से नाभरूप है । यह ही सब की साधारण स्थिति है । मनुष्य भी जीता हुआ प्रकाशमान पद्मरूप तथा मरने पर अप्रकाशमान नाभरूप है । सदाप्रकाशरूप विष्णु की विभूति को प्रत्यक्ष देखते हुये भी स्थूलदृष्टि अज्ञानी मनुष्य विभूतिमान् भगवान् को नहीं जानपाते, इसी अभिप्राय से पद्मनाभ नाम द्वारा भगवान् की दो प्रकार की स्थिति का निरूपण किया है । इस भाव को "तद्विष्णो परमं पदमित्यादि" तथा "अक्षण्वान् न विचेतदन्धः" इत्यादि मन्त्र पुष्ट करता है ।

इसी नाम का अन्य प्रकार से भी व्याख्यान किया जाता है—

जिसका मूल "तम आसीत्तमसा गूढमग्रे०" इत्यादि ऋग्वेद मन्त्र है । मन्त्र में भगवान् को मूलरूप में तमोरूप या गूढरूप से वर्णन किया है, अर्थात् जो मूल में तम या गूढ अर्थात्

इत्यनेन मन्त्रेण प्रकाश्यते। अर्थात् य एव सृष्टेः प्राक् अप्रकाशरूपः=अव्यक्तरूपो मूलत आसीत्, स एव स्वमहिम्ना व्यक्तरूपतां लभते, अर्थात् स मूलतो नाभरूपोऽपि ज्ञातः सन् पद्मरूपतां प्रतिपद्यते। यथा पद्मोऽज्ञायमानेन नालेन नाभो ज्ञायमानेन पत्रकेसरादिना च पद्मः प्रकाशरूप इत्यस्ति स पद्मनाभः। अमुथैव भगवान् स्वरूपेण नाभो जगद्रूपेण च पद्म, एवञ्च तस्य या भासमानावस्था सा सदित्युच्यते, या चाव्यक्तावस्था सा-असदित्युच्यते।

असत् शब्दो हि वर्तमानकालस्य निषेधको न तु भूतकालस्य, तथा कस्यचित् पिता जीवन् सन्नित्युच्यते मृतश्चासन् तत्र मृताभिधायके नासच्छब्देन स इदानीं नास्तीत्येषोऽर्थोऽभिधीयते। अमुथैव यन्त्रस्याविष्कर्ता यावज्जीवति तावत् सच्छब्देनाभिधीयते मृतश्च त्यक्तवर्तमानकालिकसत्त्वादसच्छब्देन, किन्तु तस्य सार्वकालिकं कारणत्वं न निषिध्यते। एवं भगवान् विष्णुरपि "न सदासीत् नोऽसदासीत्" इति श्रुत्यनुसारं सदसद् दृश्यादृश्यकार्यकारणरूपो युग्मगुणैर्विश्वं बिभ्राणः पदमनाभ इत्युक्तो भवति।

भवन्ति चात्रास्माकम्—

स पद्मनाभोऽनुपमप्रकाशो, दृश्यः सदा कर्मभिरस्ति विज्ञैः।
तं पद्मनाभं सनमोवचोभिः, स्तुवन्ति विज्ञाः स्वहृदासनस्थम् ॥१५२॥

अप्रकाशरूप था, वह ही महिमा=ऐश्वर्य से प्रकाश रूप में आगया। प्रकाशरूप में आना ही उसकी पद्मरूपता है तथा तम=अप्रकाशरूप मूलावस्था में स्थित रहना ही नाभरूपता है। पद्म स्वयं भी पद्मनाभ है, क्योंकि वह जल में निमग्न, इसीलिये अज्ञातरूप से स्थित नाल के रूप में अज्ञात होने से नाभ है, तथा पत्र केशरादि के रूप में ज्ञात होने से पद्म है। इसी प्रकार भगवान् विष्णु अपने मूलरूप से स्थित नाभ है, तथा जगद्रूप से पद्म है। उसकी इस अप्रकाशमान मौलिक अवस्था को असत्, तथा प्रकाशमान सर्गावस्था को सत् नाम से भी कहा जाता है। असत् शब्द केवल उसकी वर्त्तमान अवस्था का निषेधक है, सृष्टि से आद्यावस्था का निषेधक नहीं है। अर्थात् असत् शब्द सृष्टिकालिक अवस्था से सृष्टि से पहले की अवस्था भिन्न तथा विपरीत है, यह सूचित करता है। जैसे किसी के मरजाने पर उसे असत् तथा जीते रहने पर उसे सत् कहा जाता है, यहां मृत के अर्थ में प्रयुक्त असत् शब्द उसकी जीवित अवस्था से भिन्न, विपरीत अवस्था को सूचित करता है। इसी प्रकार किसी यन्त्र का आविष्कार करनेवाला वर्तमान सत्ता को छोड़ देने से मृत हुआ असत् शब्द से कहा जाता है, और जीवित सत् शब्द से, असत् शब्द से उसके सार्वकालिक यन्त्राविष्कर्तृत्व का निषेध नहीं होता। उपर्युक्त प्रकार से न सदासीत् नोऽसदासीत् इत्यादि श्रुति के अनुसार सत् असत्, दृश्य अदृश्य, तथा कार्यकारणरूप भगवान् विष्णु अपने युग्मगुणों से विश्व का भरण पोषण करता हुआ पद्मनाभ नाम से कहा गया है।

इस पूर्वोक्त भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

जिसके प्रकाश की कोई अन्य प्रकाशरूप पदार्थ तुलना नहीं कर सकता, ऐसा वह अनुपमप्रकाशशाली भगवान् पद्मनाभ नाम विष्णु, अपने कर्मों के द्वारा विद्वान् पुरुषों के ही

येऽतर्क्यमेतद् भगवत्स्वरूपं, तर्कप्रमाणेन तदाप्तुकामाः ।
वृथाप्रयासा न सदुक्तवन्तः, क्लिश्यन्ति ते सूर्यदृशो व रात्रौ ॥१५३॥
एवं य विद्वाँस्तमु सर्वकालं, सन्तं तथासन्तमभीष्टदोहम् ।
ज्ञानत्रिनेत्रं सकलाधिवासं, पश्यत्यनिन्द्यं स भवत्यशोकः ॥१५४॥

अनेनैव व्याख्यानेन सदसती व्याख्याते भवतः ।

अरविन्दाक्षः—३४७

ऋ गतिप्रापणयोरिति भौवादिको धातुस्ततो भावे अपि प्रत्यये अर इति सिध्यति । अरणम्=अरः सा च गतिः तां विन्दति=प्राप्नोतीत्यरविन्दः सूर्यश्चन्द्रोऽग्निर्वा । अरेत्युपपदाद् विद्लृ लाभे धातोश्शे प्रत्यये नुमि चारविन्दशब्दसिद्धिः । विश्वं व्यश्नुवानौ सूर्याचन्द्रमसावक्षिणी यस्य सः—अरविन्दाक्षो भगवान् विष्णुः । तत्र मन्त्रे स्तुतिर्यथा "त्वं विष्णुरुरुगायो नमस्यः" ऋग्-२-१-३ ।

भगवतः सर्वनियन्तुर्ज्येष्ठाख्यस्य विष्णोः सूर्याचन्द्रमसावक्षिरूपौ तावेव च प्राणिषु चक्षुर्मनोरूपौ, पश्यामश्चात एव लोकेऽपि, उन्मीलितञ्चक्षुर्मनश्च दिवि दविष्ठमपि सूर्यादिकं नक्षत्रमण्डलं वा, अरम्=शीघ्रं झटिति व्याप्नुतः । एवं

ज्ञान का विषय होता है, तथा विद्वान् पुरुष अपने हृदय रूप आसन पर विराजमान भगवान् पद्मनाभ की नमस्कार पूर्वक वचनों से स्तुति करते हैं।

जो मूढ पुरुष भगवान् के तर्क आदि प्रमाणों के अगोचर स्वरूप को अनुमानादि प्रमाणों से प्राप्त करना=जानना चाहते हैं, वे नास्तिक अपने प्रयास में इस प्रकार विफल हो जाते हैं, जैसे रात्री में सूर्य को देखनेवाले ।

इस प्रकार सर्वव्यापक सब के अधिष्ठान रूप ज्ञाननेत्र सब के अभीष्ट के साधक सत् असत् रूप तथा शुद्धस्वरूप परमात्मा को जो विद्वान् सर्वत्र देखता है वह शोकरहित हो जाता है ।

इसी व्याख्यान से सत् तथा असत् नामों का भी व्याख्यान हो जाता है ।

अरविन्दाक्षः—३४७

गत्यर्थक तथा प्रापणार्थक ऋ इस भौवादिक धातु से भाव में अप् प्रत्यय, रेफपरक गुण करने से, अर पद सिद्ध होता है । अर नाम गति का है । उस गति को जो प्राप्त करता है, उस का नाम अरविन्द है । यह सूर्य चन्द्र तथा अग्नि का नाम हुआ । अर शब्द के उपपद होने पर तुदादिगणपठित विद् धातु से श प्रत्यय और नुम् का आगम होने से अरविन्द शब्द बनता है । अपने गति धर्म से विश्व को व्याप्त करते हुए सूर्य और चन्द्रमा हैं, अक्षि= नेत्र जिसके, उसका नाम अरविन्दाक्ष है । इसी अभिप्राय से भगवान् की "त्वं विष्णुरुरुगायो नमस्यः" इत्यादि मन्त्र में स्तुति है । सर्वनियन्ता ज्येष्ठनाम भगवान् विष्णु के, सूर्य और चन्द्रमा दोनों नेत्र रूप हैं । इसलिए हम लोक में भी देखते हैं, उन्मीलित "खोला हुआ" चक्षु और मन, आकाश में दूर स्थित सूर्यादि तथा नक्षत्र समूह को बहुत शीघ्र व्याप्त कर लेते हैं ।

भगवानरविन्दाक्षः प्रतिपदं चक्षुषा मनसा च स्वं रूपं व्यनक्ति, तत्त्ववेदितृभिश्चैतदेवाभिप्रेत्यासावरविन्दाक्षेति नाम्ना व्यवह्रियते। अथर्वणि 'यस्य सूर्यश्चक्षुश्चन्द्रमाश्चे'त्यादौ ज्येष्ठवर्णने सूर्याचन्द्रमसोर्भगवतो नेत्रत्वेन वर्णितत्वात्।

भवति चात्रास्माकम्—

अरविन्दाक्षः स वै विष्णुर्यो ज्योतींषि नियच्छति।
चक्षुर्हि वारविन्दाक्षं मनो वा देवतानुगम् ॥१५५॥

तथा—सूर्यानुगं चक्षुः। चन्द्रानुगं मनः।

एवं हि यो वेत्ति वरेण्यमीशं, लोकेऽरविन्दाक्षपदप्रसिद्धम्।
स एव विष्णुं परितोऽभ्युपैति, मनश्च चक्षुः शुचि संविधत्ते ॥१५६॥

मन्त्रलिङ्गम्—

"तवेदं विश्वमभितः पशव्यं यत् पश्यसि चक्षसा सूर्यस्य।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः॥" ऋग् ७-९८-६

तथा—

"यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शन्नो भवतु भुवनस्य यस्पतिः। "क ईशानन्न याचिषत्" ऋग् ८।१।२०
इति मन्त्रद्वयमप्यत्र सङ्गच्छते।

इस प्रकार से भगवान् अरविन्दाक्ष चक्षु और मन के द्वारा प्रतिपद अपने स्वरूप को व्यक्त कर रहा है, इसी अभिप्राय से भगवान् को अरविन्दाक्ष नाम से व्यवहृत (पुकारा) जाता है। अथर्ववेद में ज्येष्ठ नाम के वर्णन में सूर्य और चन्द्रमा का भगवान् के नेत्ररूप से वर्णन किया है।

इस नामार्थ का प्रकाशन भाष्यकार इस प्रकार करता है—

भगवान् का नाम अरविन्दाक्ष है, क्योंकि वह गतिशील सूर्य आदि ज्योतियों का नियन्त्रण करता है। अपने अपने देवता सूर्य और चन्द्र का अनुगमन करने से चक्षु और मन का नाम भी अरविन्दाक्ष है। चक्षु सूर्यानुग, तथा मन चन्द्रानुग है। जो इस प्रकार अरविन्दाक्ष नाम से प्रसिद्ध सब के प्रार्थनीय तथा ऐश्वर्यशाली विष्णु को लोक में जानता है, वह अपने मन और चक्षु को शुद्ध रखता हुआ भगवान् को प्राप्त कर लेता है। इस नामार्थ की पुष्टि "तवेदं विश्वमभितः" "यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वाति" तथा "क ईशानन्न याचिषत्" इत्यादि वेदमन्त्रों से होती है।

पद्मगर्भः—३४८

पद्मनाभव्याख्याने पद्मशब्दस्तथा हिरण्यगर्भशब्दव्याख्याने गर्भशब्दश्च प्रकृति-प्रत्ययाभ्यां व्युत्पादितः।

पद्मशब्देन लक्षणया सङ्कोचविकासावुच्येते, तथा च यथा बीजभूतानां पद्म-केसराणां यथासमयं सङ्कोचविकासाववरोधं नाप्नुतस्तथामीषां चतुर्विधसर्गभाजां जीवानामपि सुप्तानां जागरितानां वा वृद्धिक्षयरूपः सङ्कोचविकासरूपो वा गतिप्रवाहो नावरोधमाप्नोति, न कदाचित् प्रतिबन्धमेतीत्यर्थः। अमुथैवैतत् सङ्कोचविकासशालि पद्मोपमं समस्तमपि विश्वं यस्य भगवतो विष्णोर्गर्भे स्थितं सर्वदा वृद्धिक्षयरूपं गतिप्रवाहं भजमानमास्ते। अर्थाद् यथा सुप्तोऽपि जीवः शुभाशुभाभ्यां युक्तस्तदनुसार-ञ्च सुखदुःखरूपं स्वाप्नं फलं भुञ्जानो भवति, एवं प्रलयावस्थायामपि काञ्चिदनिर्व-चनीयां गतिमाप्नोत्येव, न कदाचिद्गतिहीनस्तिष्ठतीत्यर्थः।

इममेव महार्थं पद्मगर्भेति नाम प्रकटयति भोगान् भुञ्जानानाञ्च सर्वेषां भोग-भुक्तौ प्रवर्तको भगवान् विष्णुरेव, तथा च सूर्योऽपि पद्मगर्भः।

मन्त्रलिङ्गञ्च—

"तस्मिन् ह तस्थुर्भुवनानि विश्वा"

पद्मगर्भः— ३४८

सङ्कोच विकाशसाली=गतिशील है गर्भ में जिसके प्रकृति प्रत्यय विभागद्वारा पद्म शब्द का व्याख्यान पद्मनाभ नाम में तथा गर्भ शब्द का व्याख्यान हिरण्यगर्भ शब्द में किया गया है। पद्म शब्द लक्षणा द्वारा सङ्कोच और विकास अर्थ को कहता है, जैसे समयानुसार बीजभूत पद्मकेशरों का सङ्कोच या विकास अवरुद्ध=बन्ध नहीं होता, इसीप्रकार इन चतुर्विध सृष्टि के जीवों का जाग्रत तथा सुषुप्ति दशा में भी सङ्कोच विकासरूप, यद्वा वृद्धिक्षयरूप गति-प्रवाह, बन्ध नहीं होता, अर्थात् किसी समय भी इनकी गति रुकती नहीं। इसी प्रकार पद्म के समान सङ्कोच विकासशाली यह सम्पूर्ण विश्व, उस भगवान् विष्णु के गर्भ में स्थित है, तथा प्रतिक्षण वृद्धिक्षयरूप से गतिशील रहता है। जैसे सोता हुआ भी यह जीवात्मा शुभाशुभ रूप अदृष्ट से युक्त हुआ उसके अनुसार स्वप्न में होनेवाले सुख दुःख रूप फल का भोग करता है, उसी प्रकार प्रलयावस्था में भी यह, किसी प्रकार की अनिर्वचनीय गति से युक्त ही रहता है, अर्थात् वह किसी समय भी गति से शून्य नहीं होता। इसी महत्त्वयुक्त अर्थ को पद्मगर्भ नाम से प्रकट किया गया है। यह ही भाव "तस्मिन् ह तस्थुर्भुवनानि विश्वा" इत्यादि मन्त्र से पुष्ट होता है। जीवों को भोग भोगने में भी भगवान् ही प्रवृत्त करता है, इसीलिये सूर्य का नाम भी पद्मगर्भ है।

भवति चात्रास्माकम्—

स पद्मगर्भो नियतायुरर्ह्यं, भोगैर्यथाकर्म युनक्ति जीवान् ।
विज्ञाः शुभं कुर्वत एव कर्म, शुभेप्सवस्तं नमसा गृणन्तः ॥१५७॥
बीजो यथा गर्भगतोऽप्यदृश्यः, समेधते मातरि कालबद्धः[1] ।
तथात्र विश्वं नियतायुरर्थ्यै, युञ्जन् समिन्धे ननु पद्मगर्भे ॥१५८॥

१—कालबद्धः=नियतकालावधि

यथा पृथक् पृथग् योनीनां गर्भपाककालः पृथक् पृथग् भवति, तथैव लोकलोकान्तराणामायुर्मानं पृथक् पृथग्भवति । इत्यवगन्तव्यम् ।

शरीरभृत्—३४९

शीर्यते=हिंस्यत इति शरीरं तद् बिभर्ति=पुष्णाति, दधाति वा स शरीरभृत् । शरीरशब्दः "कृशृपृकटिपटिशौटिभ्य ईरन्" इत्युणादिसूत्रेण ईरन् प्रत्यये, गुणे रपरे च सिद्धः । ब्रह्मणो विराडाख्याच्छरीरादारभ्य क्षुद्रतमकीटशरीरमपि यो बिभर्ति=पुष्णाति, यद्वा विश्वमनुप्रविश्य य इदं विश्वसंज्ञकं शरीरं दधाति स शरीरभृत् । यथा शरीरानुप्रविष्टो जीवः शरीरं पोषयति=क्रियायोग्यं कल्पयति, तथायं विष्णुरपि जगदनुप्रविष्टो जगत् पोषयत्यतः स शरीरभृदुच्यते ।

मन्त्रलिङ्गञ्च—

शरीरं ब्रह्म प्राविशत्, शरीरेऽधिप्रजापतिः । अथर्व० ११।८।३०

यदा च जीवः शरीरं त्यजति तदेदं शरीरं नश्यति । तथैव सविशेषतां परिजि-

---

इस भाव को भाष्यकार अपने पद्यद्वारा इस प्रकार प्रकट करता है—

भगवान् विष्णु वा सूर्य का नाम पद्मगर्भ है, क्योंकि वह उनकी नियत आयु तक जीवों को उनके कर्मानुसार भोगों से युक्त करता है । इसीलिये विद्वान् पुरुष शुभ भोगों की प्राप्ति के लिये भगवान् की नमस्कारपूर्वक स्तुति करते हुये शुभ कर्म करते हैं । जैसे स्त्री के गर्भ में न दीखता हुआ भी बीज नियत समय तक बढता रहता है, उस ही प्रकार यह विश्व नियत समय तक भगवान् पद्मगर्भ के गर्भ में यथार्ह भोगों को भोगता हुआ बढता=गतिशील रहता है । जैसे भिन्न २ योनियों का प्रसवकाल भिन्न २ होता है उस ही प्रकार लोक लोकान्तरों का आयुमान भी भिन्न २ होता है ।

शरीरभृत्—३४९ शरीर का धारण या पोषण करनेवाला ।

शरीर नाम शीर्ण=जीर्ण या नष्ट होनेवाले का है, अर्थात् जो नष्ट होता है उसका नाम शरीर है । शरीर शब्द "कृशृपृ" इत्यादि उणादि सूत्र से ईरन् प्रत्यय और रेफपरक गुण होने से सिद्ध होता है । ब्रह्मा के विराट् शरीर से लेकर लघु से लघु चींटी के शरीर पर्यन्त सब शरीरों का जो भरण=पोषण करता है. अथवा इस विश्व में प्रवेश करके जो इस विश्व संज्ञक शरीर को धारण करता है, उसका नाम शरीरभृत् है । जैसे इस व्यष्टि शरीर में प्रवेश करके जीवात्मा शरीर को पुष्ट अर्थात् कर्म करने में समर्थ करता है, उस ही प्रकार भगवान् विष्णु भी विश्व में प्रवेश करके विश्व को पुष्ट या व्यवहारक्षम करता

होर्षौ विष्णौ जगदिदं प्रलीयते। पार्थिवशरीरेषु जीवप्रवेशक्रमं विज्ञापयन् भगवान् विष्णुः स्वकीयं शरीरभृत्त्वं गुणं जगति व्यापयति, लभते च विष्णुसंज्ञाम्।

भवतश्चात्रास्माकम्—

शरीरभृद् विश्वमिदं समस्तं, स्वतेजसा दीपयते प्रसह्य।
तथा यथा जीव इदं शरीरं, बिभर्ति, युक्तञ्च शुभाशुभाभ्याम् ॥१५६॥
शरीरभृद् विष्णुरिदं समस्तं, विरच्य जीवान् गमयत्यजस्रम्।
शुभोदयाप्त्यै दुरितापसृप्त्यै, लीलायते सर्वखगानुबन्धुः ॥१६०॥

सर्वान् खगान्=ग्रहाननुबध्नातीति सर्वखगानुबन्धुः विष्णुः।

महर्द्धिः—३५० । ऋद्धः—३५१ । वृद्धात्मा—३५२

ऋधु वृद्धौ दैवादिकस्तस्मात् स्त्रियां भावे क्तिन् प्रत्ययः। महती ऋद्धिर्यस्य स महर्द्धिः। ऋध्यतेरेव क्त—प्रत्यये ऋद्ध इति साधुर्भवति। वृधु वृद्धाविति धातोः क्तप्रत्यये वृद्ध इति शब्दः सिध्यति। एवञ्च क्रमशः—

है, इसलिये भगवान् विष्णु का नाम शरीरभृत् है। इसी अर्थ को "शरीरं ब्रह्म प्राविशत्" तथा "शरीरेधि प्रजापतिः।" इत्यादि मन्त्र प्रमाणित करता है।

जिस प्रकार जीव के छोड़ने पर यह शरीर मृत हो जाता है, उस ही प्रकार विष्णु भगवान् के सविशेष भाव छोड़कर निर्विशेषभाव में आने पर यह विश्व भी प्रलीन हो जाता है। पाञ्च भौतिक शरीरों में जीवों के प्रवेशक्रम से ही सर्वत्र जगत् में व्याप्त भगवान् के शरीरभृत्त्व रूप गुण का बोध होता है, तथा इसी व्यापन रूप हेतु से भगवान् का नाम विष्णु है।

इस भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम शरीरभृत् है, क्योंकि वह इस समस्त शुभाशुभरूप अदृष्ट से युक्त विश्व को अपने तेज से दीप्त करके शुभाशुभयुक्त शरीर को धारण करनेवाले जीवात्मा के समान धारण करता है।

सब ग्रहों का अनुबन्धन=नियमन करनेवाला भगवान् इसलिये भी शरीरभृत् है कि वह समस्त जीवों की सृष्टि करके स्वयं लीला=क्रीड़ा करता हुआ उन जीवों को शुभप्राप्ति तथा दुरित परिहार के लिये निरन्तर गतिशील रखता है। समस्त खग=ग्रहों का अनुबन्धन= नियम करने से विष्णु का नाम सर्वखगानुबन्धु है।

महर्द्धिः—३५० समृद्धिशाली।
ऋद्धः—३५१ परिपूर्णकाम।
वृद्धात्मा—३५२ सब से महान्।

वृद्ध्यर्थक ऋधु इस दैवादिक धातु से स्त्रीत्व विशिष्ट भाव में क्तिन् प्रत्यय करने से ऋद्धि शब्द सिद्ध होता है, तथा ऋद्धि शब्द का महत् शब्द के साथ बहुव्रीहि समास करने से महर्द्धि शब्द सिद्ध हो जाता है। उस ही ऋधु धातु से क्त प्रत्यय करने पर ऋद्ध शब्द बन जाता है। वृद्ध्यर्थक वृधु इस भौवादिक धातु से क्त प्रत्यय करने पर वृद्ध शब्द सिद्ध होता है, तथा उसका

अखिलब्रह्माण्डरूपसम्पत्तिशालित्वेन महर्द्धिः। सर्वत आप्तकामत्वादत एव परिपूर्णत्वाद्-ऋद्धः। सर्वतो बृहत्त्वाच्च वृद्ध इति। आत्मशब्दः स्वरूपवचनो, वृद्ध-स्वरूप इत्यर्थः।

मन्त्रलिङ्गञ्च त्रिषु समानम्—

"वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।

तस्मिन्निदꣳ सञ्च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु॥

यजुः—३२-८।

स हि महर्द्धित्वर्द्धत्ववृद्धत्वरूपैर्गुणैः सर्वत्रानुस्यूतः। इदञ्च सर्वं विश्व—मेकनीडे तस्मिन् वसति, यथा मूलपुरुषे जीवति सति तस्य पुत्रपौत्रप्रपौत्रादयः स्वभावेन भिन्नाः, कर्मणा भिन्ना, निवासस्थानेन भिन्ना, वृत्तेन भिन्ना किमुत विभिन्ना-जंनमार्गगा अपि सन्त एकनीडमिवैकगृहमाश्रित्य वसन्ति। तथैवान्तर्बहिश्च सर्वतः परिपूर्णे ब्रह्मणि पृथक् पृथक् स्थिता अर्थात् सत्तया भिन्ना गत्या च भिन्ना लोका एकगृहीयन्ति विष्णौ। वृद्धं सृष्टिकाले विविधभावैः स्वरूपं यस्य स वृद्धात्मा। एवं भगवान् विष्णुः सकलं व्यश्नुवानः स्वरूपं व्यनक्तितराम्।

भवन्ति चात्रास्माकम्—

महर्द्धिरन्तः स उ वा बहिश्च, स एव चर्द्धस्तमु वा स्तुवन्ति।
वृद्धस्वरूपः सकलाप्तगर्भो, विश्वं भवत्येकगृहञ्च तस्मिन्॥१६१॥

स्वरूपार्थक आत्मा शब्द के साथ समास करने से वृद्धात्मा शब्द बन जाता है।

इस प्रकार अखिल ब्रह्माण्डरूप सम्पत्तिशाली होने से महर्द्धि, सब प्रकार से पूर्णकाम होने से ऋद्ध तथा सबसे बड़ा होने से वृद्ध नाम से भगवान् विष्णु को कहा जाता है। आत्मा शब्द यहां स्वरूप का वाचक है। इन तीनों नामों में "वेनस्तत्पश्यन्निहितं गुहेत्यादि" एक ही ३२।८। यजुर्मन्त्र प्रमाण है। वह अपने महर्द्धित्व, ऋद्धत्व तथा वृद्धत्वरूप गुणों से सर्वत्र अनुस्यूत=ओतप्रोत है। इस समस्त विश्व का वह एकनीड=एकगृह के समान है। जैसे कुटुम्ब के मूल पुरुष के जीते हुये उसके स्वभाव से भिन्न, कर्म से भिन्न-भिन्न स्थानों में रहते हुये, आचार से भिन्न, तथा भिन्न प्रकार की आजीविका करते हुए भी पुत्र पौत्र प्रपौत्र आदि एकनीड=एकगृह को आश्रित करके रहते हैं, उस ही प्रकार गति से तथा अपनी २ सत्ता से भिन्न भी सब लोक, अन्तर और बाहर सर्वत्र परिपूर्ण भगवान् में एक गृह के समान रहते हैं। सृष्टिकाल में विविध प्रकार के भावरूपों से वृद्ध होने के कारण, भगवान् का नाम वृद्धात्मा है। इस प्रकार भगवान् तत्तत् गुणों से संसार में व्याप्त होकर अपने आपको व्यक्त कर रहा है।

इन नामों के संक्षिप्त अर्थ को भाष्यकार अपने पद्यों द्वारा इस प्रकार प्रकट करता है—

इस सकल विश्व में अन्तर्बहिर्व्याप्त भगवान् की ही महापुरुष महर्द्धि तथा ऋद्ध नाम से स्तुति करते हैं। वह ही सकल विविध भावरूप पदार्थों में व्यापक रूप से स्थित वृद्धात्मा नाम से कहा जाता है, और उसमें यह समस्त विश्व एक गृह के समान स्थित है।

मूले यथा जीवति वृद्धरूपे, पुत्रादितज्जञ्च पृथक्स्वभावम् ।
रूपेण वृत्त्या च तथैव भिन्नं, तस्मिन् भवत्येकगृहं समस्तम् ॥१६२॥
एवं खगोले शतशोऽथ गोलान्, गत्या च भिन्नान् किमु धामभिन्नान् ।
बध्नाति वृद्धात्मनि सूत्रवत्तान्, वृद्धस्वरूपः स हि बन्धुदृष्टिः ॥१६३॥

महाक्षः—३५३

अक्षशब्दः प्रकृतिप्रत्ययाभ्यां व्याकृतचरः ।

महाँश्चासावक्षः—महाक्षः । सर्वतो महान् सर्वस्याशयिता व्यापयिता वा महाक्ष इत्युक्तो भवति । अक्ष इति चक्रस्यापि नाम, तच्च यथा शकटादेर्गमयिता=प्रवर्तकः तथायं सूर्यः सर्वस्य गतिदः=सञ्चालकः—अतः सूर्यस्यापि नाम महाक्ष इति । यावत्यां भकक्षायां सूर्यचन्द्रभौमबुधगुरुशुक्रशनैश्चराणां ग्रहाणां प्रभावसम्पदा वर्तते तत्रत्यानां सर्वेषां लोकानामक्षभूतः सूर्य एव । एवं सर्व एव स्वकानां भावानामाशयितारो=गमयितारः, प्रापयितारो, व्यापयितारो वा भवन्ति । दृश्यते च प्रत्यक्षं ग्रहे स्थानभ्रष्टे सति तद्भाव्येऽपि भ्रष्टता । एवञ्चापि बहुव्रीहिसमासमाश्रित्य वक्तुं शक्यते, महान्तो भूयांसो जगतः प्रवर्तकाः सन्ति यस्य स महाक्ष इति । तथा हि लोकेऽपि दृश्यते न ह्येकेन चक्रेण किञ्चिद् यन्त्रादिकं चलति । एकमपि प्राणिशरीरं प्रवर्तयितुं तस्मिन् विविधानामक्षाभिधानामिन्द्रियाणां मनोबुद्धि-

---

जिस प्रकार कुटुम्ब के मूलपुरुष=प्रधान के जीवित रहते हुये पृथक् पृथक् स्वभाव, निवास, तथा जीविका वाले भी उसके पुत्र, पौत्र आदि उसे एकगृह के समान आश्रित करके रहते हैं ।

उस ही प्रकार भगवान् बन्धुदृष्टि, अपनी २ गति तथा सत्ता से भिन्न, खगोल में स्थित सैकड़ों लोकों को अपने वृद्धात्मरूप स्वरूप में सूत्र के समान बांधे हुये रखता है, इसलिये वह वृद्धात्मा है ।

महाक्षः—३५३ सबको गति देनेवाला ।

अक्ष शब्द प्रकृति प्रत्यय विभागपूर्वक सिद्ध किया जा चुका है । व्यापक या प्रवर्तक अर्थात् सबको गति देनेवाले का नाम अक्ष है । सबसे महान् सबमें व्याप्त तथा सबका जो प्रवर्तक हैं, उसका नाम महाक्ष है । अक्ष नाम शकट (गाडी) आदि को चलानेवाले चक्र का भी है । सूर्य भी सबका प्रवर्तक=गति देनेवाला होने से महाक्ष है । जितने राशिचक्र में चन्द्र भौम बुध आदि ग्रहों का प्रभाव है, उतने राशिचक्र में स्थित लोकों का प्रवर्तक सूर्य ही है क्योंकि वह उन सब लोकों का अक्षरूप है । दूसरे चन्द्र आदि ग्रह भी अपने २ भावों के सञ्चालक या व्यापक होते हैं, क्योंकि ग्रह के स्थान भ्रष्ट होने पर उसके भाव या भावजन्य फल में भ्रष्टता देखने में आती है । महाक्ष शब्द में बहुव्रीहि समास करने से, बहुत हैं जगत् के प्रवर्तक जिसके, ऐसा भी कहा जा सकता है, क्योंकि हम लोक में भी देखते हैं, कोई भी यन्त्र आदि एक चक्र से नहीं चलता । एक ही प्राणिशरीर को चलाने के लिये उसमें बहुसंख्यक अक्षों=इन्द्रियों की रचना की है, जिसमें मन बुद्धि चित्त अहङ्कार भी सम्मिलित हैं ।

चित्ताहङ्काराणाञ्च सन्निवेशो विहितः। एवं भगवान् स्वेन महाक्षत्वगुणेन विश्वं व्यश्नुवानो विष्णुरिति विद्भिरुच्यते।

मन्त्रलिङ्गञ्चात्र—

"नाक्षस्तप्यते भूरिभारः"। ऋग्

भवति चात्रास्माकम्—

विष्णुर्महाक्षो ग्रहगम्यगोले, स्थितान् ह लोकान् गमयत्यजस्रम्।
तथा यथा देहमिमं महाक्षं, जीवोऽश्नुते कर्मसु चार्थसार्थः॥१६४॥

अर्थसार्थः=प्राप्तव्यार्थसहायः।

कर्मसु-इमं देहमश्नुते, व्यापारयति, णिजर्थोऽत्राभिप्रेतः।

गरुडध्वजः—३५४

गरुडशब्दः—गॄ निगरणे धातोरौणादिके "गिर उडच्" इत्युडच्प्रत्यये सिध्यति, तथा ध्वजशब्दो ध्वज गताविति भौवादिकध्वजधातोः पचाद्यचि सिध्यति।

गिरतीति गरुडः, ध्वजतीति ध्वजः, गरुडश्चासौ ध्वज इति गरुडध्वजः सूर्यः। यतो हि स सर्वं जगन्निगिरन्=आददानो ध्वजति=गच्छतीत्यत एव स आदित्य इति संज्ञां लभते। इममेवार्थं धातुद्वयव्युत्पन्नो गरुडध्वजशब्दो व्याचष्टे। तथा चास्मिन् गारुडध्वजे विश्वे सर्वस्योत्पत्तिलयव्यवस्थाया व्यवस्थापयिता भगवान् गरुडध्वज

इस प्रकार अपने महाक्षत्वरूप गुण से सबका व्यापन करता हुआ भगवान् विद्वानों के द्वारा विष्णु नाम से कहा जाता है। इसी भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार स्पष्ट करता है—

भगवान् विष्णु का नाम महाक्ष है, क्योंकि वह सूर्य आदि ग्रहों से सञ्चालित गोल में स्थित लोकों का निरन्तर सञ्चालन कर रहा है, उस ही प्रकार जैसे कि अपने अभीष्टार्थ प्राप्ति के उद्देश्य से जीवात्मा इस शरीर को कर्मों में प्रवर्तित करता है। "देहमश्नुते" यहां णिजर्थ अभिप्रेत है। अक्ष नाम चक्र में स्थित धुरे का भी है। पूर्वोक्त भाव को "नाक्षस्तप्यते भूरिभारः" मन्त्र प्रमाणित करता है।

गरुडध्वजः—३५४ निगीर्ण करता हुआ जो चलता है।

गरुड शब्द निगरणार्थक गॄ धातु से "गिर उडच्" इस उणादि सूत्र से उडच् प्रत्यय करने से सिद्ध होता है। ध्वज शब्द भ्वादिगण पठित गत्यर्थक ध्वज धातु से पचाद्यच् प्रत्यय करने से सिद्ध होता है। जो निगीर्ण करे उसका नाम गरुड है, तथा जो गति करे उसका नाम ध्वज है। गरुड और ध्वज शब्द का कर्मधारय समास करने से गरुडध्वज यह एकपद नाम हुआ, जिसका निगीर्ण करता हुआ अर्थात् ग्रहण करता हुआ चलता है, ऐसा अर्थ होता है। यह सूर्य का नाम है, इसे ही आदान करने से आदित्य भी कहा जाता है। इस ही अर्थ को, धातुद्वय के सम्बन्ध से व्युत्पन्न हुआ गरुडध्वज नाम कहता है। इस समस्त विश्व के उत्पत्ति स्थिति तथा प्रलय का

उच्यते, स च गरुडध्वजो निगरणरूपेण गमनरूपेण वा धर्मेण विश्वं व्यश्नुते। वक्ष्यते च सर्गान्तम्।

गरुडः, गारुडो वा पुरुषोऽप्युच्यते यः सर्पविषस्य हन्ता।

सूर्यवंश्याः खे दृश्यमाणं गरुडं ध्वजमिव मन्यमानाः—गरुडोपेतं ध्वजं स्वचिह्नं मन्यन्ते। इतरो विहङ्गमोऽपि गरुड एतस्मादेव जीवितमपि सविषं निगिरति शीघ्रं गच्छतीति वा। वंशस्थोलक्तकोऽपि निरन्तरचलनाद् ध्वजसंज्ञां लभते।

भवति चात्रास्माकम्—

सूर्यो हि लोके गरुडध्वजोऽस्ति, विश्वं निगृह्णन् कलते. स सर्वम्।
उत्पाद–संहार–विकार–जातं, विश्वं नियच्छन् गरुडध्वजोऽसौ ॥१६५॥

मन्त्रलिङ्गञ्च—

"एकं सद्विप्रा बहुधा वदन्ति"। ऋग्

एकं सूर्यं, ब्रह्म वा।

अतुलः—३५५

नास्ति तुला=उपमा यस्य सोऽतुलः। यदिदञ्चतुर्भेदभिन्नं जगद् दृश्यते न तत्र किञ्चित् केनचित् समं दृश्यते, सर्वस्य हि परस्परं जात्याकृतिगुणादिभेदतो विषमता भवति। तथा च नाम्रवृक्षो, वटवृक्षेण, पिप्पलवृक्षेण, जम्बुवृक्षेण वापि साम्यं

व्यवस्थापक भगवान् गरुड़ध्वज नाम से कहा जाता है, तथा वह गरुड़ध्वज नाम भगवान् विष्णु, अपने निगरण और गमनरूप धर्म से इस समस्त विश्व का व्यापन कर रहा है, और सर्ग के अन्त तक करता रहेगा। सर्प के विष को मारनेवाले पुरुष का नाम गरुड़ या गारुड़ है। सूर्यवंशी आकाश में दीखते हुये गरुड़ को ध्वजरूप समझते हुये अपनी ध्वजा में गरुड़ का चिन्ह रखते हैं। गरुड़ नाम एक शक्तिशाली पक्षी का भी इसी कारण से है, क्योंकि वह सजीव तथा सविष सर्प आदि का निगीर्ण करता हुआ शीघ्र चलता है। वंश=वेणु आदि के ऊपर शिरे पर बंधा हुआ कपड़ा भी निरन्तर चलने से, ध्वज नाम से कहा जाता है। इस उपर्युक्त भाव का भाष्यकार अपने पद्य द्वारा इस प्रकार वर्णन करता है—

सूर्य का नाम गरुड़ध्वज इसलिये है कि, वह सबका निगीर्ण=उपसंहार करता हुआ चलता है, तथा भगवान् विष्णु भी उत्पत्ति स्थिति संहार आदि विकारों से विश्व का व्यवस्थापक होने से गरुड़ध्वज है। इस नानाविध नाम धारण की पुष्टि "एकं सद्विप्रा बहुधा वदन्ति" इत्यादि वेद मन्त्र करता है। यहां एक शब्द से सूर्य या ब्रह्म का ग्रहण है।

अतुलः—३५५

जिस की किसी के साथ तुला=समानता न हो, उसे अतुल कहते हैं। ऐसा लोक में देखा भी जाता है, जो यह चतुर्भेदों से विभक्त जगत् है, इस में कोई भी वस्तु किसी के समान नहीं दीखती, क्योंकि सब में ही आपस में, जाति, आकृति, गुण आदि कृत भेदों से विषमता होती है। जैसे आम्रवृक्ष की, किसी भी वट, पिप्पल, जम्बू आदि वृक्ष से समता नहीं होती।

भजति। एवं सर्वत्र शाकवर्गे वनस्पतिवर्गे प्राणिवर्गे च ज्ञयेम् । तथा च वानरो मनुष्येण, गौरश्वेन, महिषश्चाश्वेन समतां=तुलां न लभत इति। यतो हि सर्वत्रात्र भगवतोऽतुलस्य व्यवस्थैवातुलत्वसंपादिनी। अत्र च व्यापकत्वेन स्थितो भगवान् प्रतिपदं स्वातुलत्वं व्यनक्ति। जरायुजादिचतुर्भेदभिन्ने च जगति भगवान् सर्वेषां गुणवीर्यविपाकानां वयसां च पार्थक्यं विधत्ते, विधत्ते च ग्रहगतीश्चाप्यतुलाः स्वातुलत्वस्वभावानुसारम्। सति चैवं परस्परमतुलमिदं जगत् कथं भगवतस्तुलां भजेदिति भगवानतुल उच्यते। वक्ति च वेदः "न द्वितीयः, न तृतीयः, न चतुर्थः, न पञ्चम इत्यादि।

मन्त्रलिङ्गानि—

"न त्वदन्यः कवितरो न मेधया धीरतरो वरुण ! स्वधावन् ! अथर्व

"न हि नु ते महिमनः समस्य न मघवन् ! मघवत्त्वस्य विद्मः।
न राधसो राधस्ते नूतनस्येन्द्र नकिर्ददृशे इन्द्रियं ते ॥ ऋग् ६-२७-३

भवतश्चात्रास्माकम्—

स विश्वनाथोऽतुलवीर्यविद्यो, विश्वं ह्यतुल्यं कुरुते समस्तम्।
रसेन वीर्येण गुणेन किञ्चा-तुल्यं विधत्ते वयसा च सर्वम् ॥१६६॥
एवंविधे राजति विश्वमात्रे कः संमिमीत तुलया नरस्तम्।
शक्तातुलं तं संख्या न मेतुं, संख्या स्वयं भेदमियर्त्यतोऽतः ॥१६७॥

इसी प्रकार शाक वर्ग, वनस्पति वर्ग तथा प्राणी वर्ग में भी जानना चाहिये, जैसे कि वानर की मनुष्य से, गौ पशु की अश्व पशु से तथा महिष की अश्व से समानता नहीं होती है। भगवान् अतुल की व्यवस्था से ही सर्वत्र यह व्यवस्था विद्यमान है। व्यापक रूप से सर्वत्र स्थित भगवान् ही पद पद पर अपने अतुलत्व को प्रकाशित कर रहा है।

जरायुजादि चतुर्भेद से भिन्न जगत् में भगवान् सब के गुण वीर्य विपाक तथा आयु को भिन्न भिन्न करता है, तथा अपने अतुलभावानुसार ग्रहों की गतियों को भी अतुल करता है। ऐसा होने पर, आपस में भी तुलना करने में असमर्थ यह जगत् भगवान् से कैसे तुलना करे, इसलिये भगवान् का नाम अतुल है। वेद भी इसी प्रकार कहता है—" न द्वितीयः न तृतीयः न चतुर्थ" इत्यादि अथर्व।

इसी गद्योक्त नामार्थ को "न त्वदन्यः कवितरो मेधया" इत्यादि तथा "न हि नु ते महिमनः समस्य न मघवन्" इत्यादि ऋङ्मन्त्र सिद्ध करता है। इस नाम के भाव को भाष्यकार इस प्रकार अपने पद्यों द्वारा स्पष्ट करता है—

अतुल बलवीर्यविद्याशाली भगवान् सर्वेश्वर, इस समस्त विश्व को भी अपने ही समान अतुल बनाता है। प्रत्येक वस्तु का विधान परस्पर उसके, गुण, वीर्य तथा आयु की अपेक्षा से अतुल है। इस विश्व में मनुष्य तो भगवान् की तुलना करने में सर्वथा असमर्थ है ही फिर भी कोई कहे कि संख्या से उसका भेद=मान हो सकता है तो यह भी असम्भव है क्योंकि संख्या स्वयं उसी से मित होती है।

शरभः—३५६

शरः शृणातेः। यथा च धनुषो निर्गता इषवो हिंसासाधनत्वाच्छरा उच्यन्ते, तथा शाणान्निर्गताः स्फुलिङ्गाः शरा उच्यन्ते, तद्वद् भाः=दीप्तिर्यस्य स शरभः। एतेन सूर्यस्याग्नेर्वा सार्वत्रिकी व्याप्तिर्विज्ञायते। सा च दीप्तिर्यथा शाणेऽन्तर्हिता भवति, तथा सत्तारूपेण सर्वत्र विद्यमानोऽपि भगवान् जगत्यन्तर्हितोऽस्ति। अस्ति च भगवान् विद्योतनस्वरूप"स्तमसः परस्ता"दिति मन्त्रलिङ्गात्।

भवति चात्रास्माकम्—

शाणायसोर्घर्षणजा शराभा, या भा तयासौ शरभोऽत्र विष्णुः।
तं सर्वसंस्थं शरभं शरण्यं, नमन्ति पश्यन्ति च देवसंघाः॥१६८॥

भीमः—३५७

भयार्थकाद् भीधातोपादाने कारके मक् प्रत्यय औणादिके बिभेत्यस्मादिति भीमः सिध्यति, तथा "भियः षुग्वा" इत्यौणादिके वैकल्पिके षुकि मकि च प्रत्यये भीष्मः सिध्यति समान एवार्थ उभयोः।

शरभः—३५६ दीप्यमान

शॄ इस हिंसार्थक क्र्यादिगण पठित धातु से शर शब्द सिद्ध होता है, वह धनुष के द्वारा छोड़ा हुआ, लक्ष्य की हिंसा करता है, इसलिये उसका नाम शर है। उस ही प्रकार शाण नाम लवित्र आदि को तीक्ष्ण करने वाले पाषाण विशेष से निकलनेवाले स्फुलिङ्ग (अग्निकणों) का नाम भी शर है, उस के समान दीप्ति वाले का नाम शरभ है यहां केवल दीप्यमानता रूप समानता विवक्षित है, तथा सूर्य और तदंशभूत अग्नि की सार्वत्रिक व्याप्ति का बोधक है। जिस प्रकार सत्त्वरूप से सर्वत्र विद्यमान भी दीप्ति शाण में अन्तर्हित है, उस ही प्रकार सत्तारूप से सर्वत्र विद्यमान भगवान् विष्णु जगत् में अन्तर्हित है तथा वह "तमसः परस्तात्" इत्यादि मन्त्रानुसार ज्योतिःस्वरूप है।

इसी भाव को भाष्यकार अपने पद्यद्वारा इस प्रकार स्पष्ट करता है—

शाण नामक पाषाण और लोहे के घर्षण से उत्पन्न जो आभा=ज्योति-उस ज्योति से, अर्थात् वह पाषाण और लोहे के घर्षण से उत्पन्न ज्योति भी उसी की होने से भगवान् का नाम शरभ है। उस सर्वत्र स्थित सब के शरणत भगवान् विष्णु को देव समूह सर्वत्र देखता तथा नमस्कार करता है।

भीमः—३५७ जिस से भय होता है (भय का हेतु)

भयार्थक भी धातु से अपादानकारक में उणादि मक् प्रत्यय करने से भीम शब्द सिद्ध होता है। जिस से प्रत्येक भयभीत हो उसका नाम भीम है। इसी धातु से उणादि मक् तथा वैकल्पिक षुक् का आगम करने से भीष्म शब्द सिद्ध होता है। भीम और भीष्म इन दोनों नामों का अर्थ एक ही है। जिससे जो डरता है, वह भीत के प्रति भय का कारण होने से

भीमो भयहेतुरित्यर्थः । यस्माद् यो विभेति स भयस्य हेतुभूतस्तं विभ्यतं प्रति भीम इत्युच्यते । लोकेऽपि चायमेव नियमो दृश्यते, यथा बलवतोऽबलो विभेति सविषाच्च निर्विष इति प्रत्येकं वस्तु यत्संहर्तृ तत्संहार्यमुद्दिश्य भीमाभिधानं लभते । मृत्योः सर्वं विभेत्यतोऽत्यन्तं भयानकरूपिणं तं भीमं साक्षान्मृत्युरयमिति ब्रुवन्ति । एवं भीमरूपेण सर्वत्र भगवान् विष्णुरेव व्याप्त इति मन्यमानो जनो न विभेति न कञ्चिद् भापयते ।

मन्त्रलिङ्गञ्च—

मृगो न भीमः कुचरो गिरिष्ठाः । ऋग् १०-१८०-२
सिंहो न भीमो मनसो जवीयान् । ऋग् ९-९७-२८

भवतश्चात्रास्माकम्—

प्रकम्पयन् विष्णुरिदं समस्तं, विधानबद्धं त्वचलं विधत्ते ।
भीमाभिधो भीममनाश्च मृत्यु, मर्त्यं भयार्तं कुरुते स्वभोज्यम् ॥१६९॥
सर्वं जगद् भीमपदेन युक्तं, सद् भीमभीतं रमतेऽप्रमत्तम् ।
स्वयं भयन्नार्हति भीतभीतम्, शम्भुः स्वकान्न भयमेति भीमः ॥१७०॥

समयज्ञः—३५८

समः=समानः—अयो=गमनं समयः शकन्ध्वादेराकृतिगणत्वात् पररूपम् ।

भीम कहा जाता है । लोक में यह ही नियम देखने में आता है, जैसे सबल से निर्बल तथा सविष से निर्विष भयभीत होता है, अथवा यों कहिये कि जो वस्तु संहार=विनाश करने वाली है, वह प्रत्येक वस्तु अपने संहार्य=विनाश्य वस्तु के प्रति भीम शब्द से कही जाती है । मृत्यु से सब भय खाता है, इसलिये अत्यन्त भयानक रूप भीम को यह साक्षात् मृत्यु है ऐसा कहते हैं । इस प्रकार भगवान् विष्णु ही भीम रूप से सर्वव्यापक है, यह समझता हुआ मनुष्य न किसी से भीत होता है और न किसी को भय देता है ।

इसी भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु इस समस्त विश्व को अपने दण्ड विधान से भयान्वित करके अचल=अर्थात् नियमबद्ध रखता है, तथा भीम नामक मृत्यु भी अपने भोज्य मरणशील जीव को भयान्वित करता है, इसलिये दोनों ही भीम नाम से कहे जाते हैं ।

सम्पूर्ण जगत् ही अपने से निर्बल के प्रति भीम तथा सबल की अपेक्षा से भीत होकर अपने भोगों में सावधानी से रमण करता है । भयभीत स्वयं=बिना किसी दूसरे हेतु के भय को प्राप्त नहीं होता, भगवान् स्वयं= अपने आप आप से भयभीत नहीं होता, क्योंकि उसका भयोत्पादक कोई दूसरा नहीं है इसलिये वह केवल भीम है भीत नहीं ।

समयज्ञः—३५८ सम्यग् गमन रूप समय को जाननेवाला ।

समान गति का नाम समय है । सम और अय के सम्बन्ध से समय शब्द बनता है

यद्वा सम्यगयः=गमनं समयः तं जानातीति समयज्ञः।

प्रतिजानते ह्यस्य विश्वस्य चतुर्दशमन्वन्तराणि परमायुर्ज्योतिर्विदः। तस्मिन्नियतायुष्के विश्वे किं किं भविष्यतीति भगवन्तं समयज्ञं विना को ज्ञातुं शक्नुयादिति स भगवान् विष्णुरेव समयज्ञ इत्युक्तो भवति।

दिवानिशोः षष्टिघट्यात्मकः समयः कुतो व्यवस्थित इति स एव जानात्यतः स समयज्ञः।

ग्रहगतिभेदादुत्पन्नं मासक्षयं मासवृद्धिं वा तज्जनितं प्राणिहिताहितञ्च स वेत्तीति समयज्ञः स उक्तो भवति व्यवस्थापयिता सूर्यस्य।

इह च भूगोले सूर्यशैत्यौष्ण्यकृतदेशभेदानुसारं यादृक्काल आयाति प्राणिप्रलयोद्भवकरस्तस्य स एव व्यवस्थापयितातः स कालज्ञः काल इति चोच्यते।

मृत्युरपि कालः कालज्ञश्च, यतो हि स वेत्ति प्राणिनां जीवनाय नियतीकृतमायुषः प्रमाणं ग्रसते च तान् स यथाकालमितिं। लोकेऽपि च दृश्यते, स्वयङ्कृतव्यवस्थानो यन्त्राधिपतिः प्रत्येकं कर्मकराणां कार्यकालं जानाति, तस्मात् समयज्ञ उक्तो भवति। अमुथैव समयज्ञेन व्यवस्थापिते जगति यथानियतकालमाम्रमञ्जरीणामुद्गमो भवति। एवं लौकिकीं सरणिमनुसरद्भिर्विविधमूहनीयम्।

भवन्ति चात्रास्माकम्—

शकन्ध्वादि के आकृति गण होने से पररूप हो जाता है। यद्वा सम्यक्=अच्छे गमन का नाम समय है, उसे जो जानना है उसका नाम समयज्ञ है। ज्योतिर्विद् पुरुष इस विश्व की परमायु चतुर्दश मन्वन्तरात्मक बतलाते हैं। उस नियत आयु वाले विश्व में किस समय में क्या होगा, यह उस समयज्ञ भगवान् के विना दूसरा कौन जान सकता है, अर्थात् कोई नहीं, इसलिये भगवान् विष्णु का ही नाम समयज्ञ है। इसलिये भी वह समयज्ञ है कि ६० षष्टि घटीपरिमित दिन रात्री समय कहां से व्यवस्थित है, यह वह ही जानता है। तथा इसलिये भी वह समयज्ञ है कि, ग्रहगति के भेदसे उत्पन्न क्षयमास अथवा वृद्धिमास तथा तज्जन्य प्राणियों के हित और अहित को सूर्य का व्यवस्थापक वही जानता है। उस को कालज्ञ या काल नाम से भी कहते हैं, क्योंकि भूगोल में सूर्य के शीतोष्णादि कृत देशभेद के अनुसार जो काल आता है प्राणियों की हानि वा अभ्युदय करनेवाला, उसका व्यवस्थापक वह ही है। मृत्यु को भी कालज्ञ या काल नाम से कहते हैं, क्योंकि वह भी प्राणिजीवन के लिये नियतीकृत आयु प्रमाण को जानता है, और समय पूर्ण होने पर प्राणियों को खालेता है। लोक में भी ऐसा देखने में आता है, जैसे कि कोई स्वयं व्यवस्थापक किसी यन्त्र आदि का स्वामी, अपने अधिकार में कार्य करनेवाले सब के कार्यकाल को जानता है, इसलिये उसे भी कालज्ञ या समयज्ञ कहते हैं। इसी प्रकार समयज्ञ द्वारा कृतव्यवस्थ इस जगत् में अपने प्राप्त समय में ही आम्र वृक्ष में मञ्जरियों का प्रादुर्भाव होता है। इस लौकिक पद्धति के अनुसार और भी कल्पनायें कर लेनी चाहियें।

इस उपर्युक्त भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

विष्णुः स एकः समयज्ञ उक्तः, स एव जानाति शुभाशुभे च।
मन्वंन्तराणामित उत्तराणां, कल्पेऽह्नि जार्गति सदाप्रमत्तः ।। १७१ ।।
तञ्चानुकुर्वन् मनुजोऽपि तद्वत्, कालस्य सरणिं बध्नाति नित्यम् ।
परन्तु दोषोपहतस्वभावः, प्राप्नोति शैथिल्यकृतावरोधान् ।। १७२ ।।
नैवम्विधं दोषमुपैति शम्भु, विश्वं नियच्छन्निह कालरज्ज्वा ।
तं कालबन्धं स हि कालबन्धुः, सर्गान्तमित्वा विदधाति सर्वम् ।। १७३ ।।
अतः स लोके समयज्ञ उक्तो, गतिर्हि काले स पलैर्हि कल्पः ।
कालो गतिर्वा गणकेन शक्या, संख्यातुमत्राविरतं यतित्वा ।। १७४ ।।

हविर्हरिः—३५९

हुधातोरौणादिक इसि प्रत्यये हविः । हरतेरौणादिके इनिप्रत्यये हरिः । हवि-र्हरिणाहूतो विष्णुः स्वात्मानं प्रापयत्यतः स विष्णुर्हविर्हरिरित्युक्तो भवति ।

लोके चापि पश्याम आह्वानविधयाहूतः सर्वोऽपि स्वात्मानं प्रापयति=प्रकाश-यति, यथा समर्यादं गीतः शब्दः रागरागिणीषु निबद्धः स्वं स्वरूपं हरति=प्रापयति

जो चतुर्दश मन्वन्तरात्मक कल्परूप दिन में सृष्टि को सव्यवस्थ चलाने में सदा अप्रमत्त= सावधान रहता हुआ यहां से आगे भविष्य में होने वाले मन्वन्तरों के शुभ तथा अशुभ को जानता है, वह भगवान् विष्णु ही वस्तुतः समयज्ञ है ।

मनुष्य भी भगवान् का अनुकरण करता हुआ, सब प्रकार से सदा काल की गति को वान्धने का, अर्थात् जानने का यत्न करता है, किन्तु सहज दोषों के सम्वन्ध से आलस्य के कारण उसके इस कार्य में प्रतिवन्ध=रुकावटें आती रहती हैं इसलिये वह पूर्णरूप से समयज्ञ नहीं हो पाता ।

भगवान् विष्णु सब प्रकार के दोषों से रहित शुद्धस्वरूप होने के कारण, इस समस्त विश्व को कालरूपरज्जु से नियन्त्रित करता हुआ, सर्ग के अन्त में अर्थात् प्रलय में काल को भी वान्ध देता है, काल को या काल के द्वारा वान्धने के कारण से ही उसका नाम कालवन्धु भी है । काल में गति अथवा काल ही गतिरूप होता है, तथा उसकी गणना, उसके त्रुटि पल आदि औपाधिक भेदों से की जाती है, इस कालगति को कोई ज्योतिर्विद् ही निरन्तर परिश्रम करके जानने में समर्थ होता है ।

हविर्हरिः— ३५९ हवि के द्वारा प्राप्त होनेवाला ।

जुहोत्यादिगणीय हु धातु से उणादि इस् प्रत्यय करने से हवि शब्द सिद्ध होता है, तथा भ्वादिगणपठित हृ धातु से औणादिक इन् प्रत्यय करने से हरि शब्द सिद्ध होता है । हवि के द्वारा आह्वान करने से जो प्राप्त होता है, उसका नाम हविर्हरि यह विष्णु का नाम है, क्योंकि वह यज्ञ में हवि के द्वारा सविधि आहूत किया हुआ यजमान को प्राप्त होता है । हम लोक में भी देखते हैं, प्रत्येक ही मर्यादानुसार आदर सूचक शब्दों से बुलाया हुआ, पास में आजाता है । जैसे राग रागिणियों में मर्यादानुसार निबद्ध करके उच्चारण किया हुआ शब्द, अपने देवरूप

देवरूपं, तथा निर्मर्यादं संलग्नविकृतस्वरस्त्यक्तस्वरो वा गीतो देवमपाकरोति । अत एव वेदे बहुत्रोक्तम्—

"हविषा विधेम" "श्रद्धया हूयते" "सोम रारन्धि नो हृदि गावो न यवसेष्वा । मर्य इव स्व ओक्ये" । "गायत प्रगायत विप्रासो गायत" इत्यादि ।

मन्त्रलिङ्गञ्च—

"अया रुचा हिरण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः
सूरो न स्वयुग्वभिः । धारा सुतस्य रोचते पुनानो अरुषो हरिः ।

· ऋग् ९-१११-१

यथा च भृत्यः पुत्रः स्त्री राजा गुरुरभ्यागत इमे सर्वे भिन्न-भिन्नसम्बोधनपदै—राहूयमानाः प्रापयन्त्यात्मानमित्यतो विज्ञायते विष्णोरेवैष आह्वानसाधनात्मकप्रापण-रूपो गुणः सर्वजगद्व्यापक इति ।

भवति चात्रास्माकम्—

यदत्र विश्वे विभुना निबद्धं, तत्सर्वकं स्वैरभिधानमन्त्रैः १ ।
ह्वातारमभ्येति स विष्णुरुक्तो हविर्हरिर्विश्वमुखोक्षिबाहुः ।। १७५ ।।

१–स्वमर्यादितविधया ।

सर्वलक्षणलक्षण्यः—३६०

लक्ष दर्शनाङ्कनयोरिति चौरादिको धातुः । सर्वशब्दः साकल्यवचनः । अङ्क्यते, दर्श्यते वा येन तल्लक्षणं सर्वाणि च तानि लक्षणानि सर्वलक्षणानि तैर्लक्ष्यते=ज्ञायत

को प्रकाशित कर देता है, तथा वह ही शब्द मर्यादाहीन संलग्न विकृत स्वर आदि से गान किया हुआ, अपने देवरूप को तिरोहित कर लेता है, अर्थात् गायक को अपना ज्ञान नहीं होने देता । इसीलिये वेद में स्थान स्थान में कहा है, "हविषा विधेम" इत्यादि तथा "श्रद्धया हूयते" "सोम रारन्धि नो हृदि" "गायत प्रगायत विप्रासो गायत" इत्यादि । इस नामार्थ की "अया रुचा हिरण्या———— अरुषो हरिः" इत्यादि ९-१११-१ ऋग्वेद मन्त्र से पुष्टि होती है । जैसे भृत्य, पुत्र, स्त्री, राजा, गुरु आदि सब भिन्न भिन्न सम्बोधन पदों से बुलाये हुये आजाते हैं, इस से भगवान् के आह्वान रूप साधन के द्वारा प्राप्त होने रूप गुण की, सार्वत्रिक व्याप्ति का बोध होता है ।

इसी भाव को भाष्यकार अपने पद्य द्वारा यों व्यक्त करता है—

विश्व में भगवान् के द्वारा विरचित प्रत्येक सचेतन पदार्थ अपने नाम ग्रहण पूर्वक मर्यादा से बुलाया गया, बुलानेवाले के पास आजाता है, इसलिये सब ओर मुख नेत्र तथा बाहु हैं जिस के वह भगवान् विष्णु हविर्हरि नाम से कहा जाता है ।

सर्वलक्षणलक्षण्यः—३६०

दर्शन और अङ्कित=चिह्नित करने अर्थ में विद्यमान, लक्ष यह चौरादिक धातु है, इससे "बहुलमन्यत्रापि" इस उणादि सूत्र से कर्म में युच् प्रत्यय, अथवा उन सब प्रकार के लक्षणों से

इति लक्षणः । लक्षिधातोः "बहुलमन्यत्रापि" इत्युणादिसूत्रेण युच् प्रत्ययः कर्मणि । यद्वा तैर्लक्षयत्यात्मानमिति तेनैवौणादिकेन सूत्रेण कर्तरि युच् प्रत्ययः । एवञ्च जगति दृश्यमानैः सर्वैर्लक्षणैर्यो लक्ष्यते=ज्ञायते, ज्ञापयति वात्मानमिति सर्वलक्षण-लक्षणः, सर्वलक्षणलक्षणे साधुः सर्वलक्षणलक्षण्यः "तत्र साधु"रिति ताद्धितो यत् । एवञ्च लक्षणभूतेन जगता जगदन्तर्गतैश्च नानाविधैः=रङ्कैः,श्चिन्हैः स लक्षितो= बोधितो भवति, बोधयति वा स्वयमात्मानमित्यर्थं आयाति । लोकेऽपि च पश्यामो नश्वरेऽस्मिन् पार्थिवे शरीरेऽव्यक्तोऽस्त एवातीन्द्रियोऽपि जीवात्मा शरीरेहाजन्यक्रियामयै-र्भावैर्लक्ष्यते, लक्षयति वा जीवः स्वयं स्वसत्ताम् । इत्थमेव भगवान् विष्णुरपि देवमनुष्यादिशक्त्यगोचरैर्जगद्रचनाप्रकारैर्नानाविधैर्भावै,र्व्यवस्थानियमैश्चाप्रत्यक्षोऽपि लक्ष्यते=प्रत्याय्यते, लक्षयति=प्रत्याययति वा सर्वव्यापिकां स्वसत्तामिति । अपरञ्चोदाहरणं यथा—

सन्तप्तस्य पयसो यः 'सूं सूं' 'इत्याकारः, प्रज्वलतोऽग्नेर्यो धग्धगादिरूपस्तथा पच्यमानायाः कृशरायाश्च यः खडबड़ादिरूपोऽव्यक्तो ध्वनिस्तेन ध्वनिना तारत्व-मन्दत्वनिवृत्तिरूपैः स्वधर्मैः पय आदीनामुत्फाणौष्ण्यनैयुन्यादिरूपः प्रचण्डमन्द-ज्वालादिरूपस्तथा स्थाल्यासङ्गाधिकसन्तापादिरूपश्चान्तर्गतो विकारो लक्ष्यते ।

जो अपने आपको लक्षित करे, उस ही सूत्र से कर्ता में युच् प्रत्यय, तथा यु को अन आदेश होने से, लक्षण शब्द सिद्ध होता है । जिसके द्वारा जाना जाये, यद्वा अपने आप को जनाये, वह लक्षण होता है । सर्व शब्द के साथ लक्षण शब्द का समास होने से सर्वलक्षण शब्द बनता है । सब प्रकार के लक्षणों से जो अपने आप को जनाता है, उसका नाम सर्वलक्षणलक्षण होता है, तथा सब प्रकार के लक्षणों से लक्षित होने में जो साधु=अच्छा है, उसका नाम सर्वलक्षण-लक्षण्य है, साधु अर्थ में यत् प्रत्यय हुआ है ।

इस प्रकार लक्षणभूत जगत् या जगत् अन्तर्गत पदार्थों से जो कि चिह्नरूप हैं, वह लक्षित=जाना जाता है, यह अर्थ इस सर्वलक्षणलक्षण्य शब्द का हुआ, अथवा इन लक्षणों से वह स्वयं अपने आप को बोधित करता है, यह इस नाम का अर्थ होता है । हम लोक में भी देखते हैं, इस नश्वर पार्थिव शरीर में अव्यक्त=अर्थात् इन्द्रियागोचर रूप से स्थित जीवात्मा शरीर के चेष्टाजन्य क्रियारूप विकारों से जो कि लक्षणरूप हैं जाना जाता है, अथवा इन भावरूप लक्षणों से वह अपनी सत्ता को बोधित करता है । इसी प्रकार भगवान् विष्णु भी जो देव तथा मनुष्यादि से साध्य नहीं, ऐसे जगत् के रचना भेदों तथा नाना प्रकार के व्यवस्थानियमों से लक्षित होता है अथवा इन सब के द्वारा वह अपने आप को लक्षित करता है । इस का अन्य उदाहरण इस प्रकार है—

जैसे तपे हुये दुग्ध, प्रज्वलित अग्नि तथा पकती हुई खीचड़ी के क्रम से सूं सूं धक् धक्, खड़बड़ खड़बड़ आदि ध्वनि के वृद्धि मन्द तथा निवृत्तिरूप धर्मों से दुग्ध आदि के उफाण (उबाल) का कम या अधिक होना, अग्नि की ज्वाला की प्रचण्डता या मन्दता, तथा कृशरा (खीचड़ी) का स्थाली से लगना या अधिक सन्तापादि रूप विकार, जो कि इन सब के अन्तर्गत

एवमन्यत्राप्यूहनीयम् ।

अथापि च दृश्यते लोके मृत्युमाप्नुवति प्राणिनि मरणात् प्राग् अरिष्टानां मरणलक्षकानां लक्षणानां प्रादुर्भावो भवति, तत्रापि तैर्मरणसूचकैर्लक्षणैः कालरूपस्य भगवतः सत्ता लक्ष्यत इति मृत्युरपि सर्वलक्षणलक्षण्याभिधानार्हः । उक्तञ्च चिकित्साकोविदैराचार्यैः—मरणञ्चैव तन्नास्ति यन्नारिष्टपुरस्सरम् । अरिष्टलक्षणमपि तत्रैव चरके—

क्रियापथमतिक्रान्ताः केवलं देहमाश्रिताः ।
दोषाः कुर्वन्ति यल्लिङ्गं तदरिष्टं प्रचक्षते ॥

मन्त्रलिंगं च—

"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम्" । ऋग्

भवति चात्रास्माकम्—

विश्वं समस्तं सकलप्रसूर्भू, र्व्यनक्ति सा स्वात्मभवैर्विकारैः ।
स्वभावभिन्नैः क्षणभंगुरैश्च, विष्णुस्तथा लक्ष्मभिरस्ति गम्यः ॥१७६॥

लक्ष्मभिः=लक्षणैश्चिन्हैरित्यर्थः ।
सकलप्रसूः=सकलस्य चराचरस्य प्रसवित्री=जननी ।

तथा च – सर्वलक्षणलक्षण्य उक्तः शम्भुः सनातनः ।
सुकारैर्वा विकारैर्वा, चिह्नैरन्तः प्रकाश्यते ॥

है लक्षित होता है, उस ही प्रकार भगवान् भी जगदन्तर्गत जगत् के बाह्य विकारों से लक्षित होता है । इसी प्रकार अन्यान्य उदाहरणों की कल्पनायें कर लेनी चाहियें । लोक में भी देखने में आता है, मरते हुये प्राणी के मरने से पूर्व, जो मरणसूचक अरिष्टलक्षण प्रकट होते हैं, उन से तदन्तःस्थित भगवान् कालरूप की सत्ता लक्षित होती है, इसलिये मृत्युदेव को भी सर्वलक्षणलक्षण्य नाम से कहा जा सकता है । चिकित्सा के जानकार आचार्यो ने कहा है, तब तक मृत्यु नहीं जब तक मृत्यु के सूचक अरिष्ट लक्षण उत्पन्न नहीं होते, तथा उन्होंने "क्रियापथमतिक्रान्ताः" इत्यादि अरिष्ट का लक्षण किया है । यह पूर्वोक्त नामार्थ "तद्विष्णोः परमं पदमित्यादि" मन्त्र से पुष्ट होता है । इस नामार्थ को भाष्यकार संक्षेप से अपने पद्यद्वारा इस प्रकार प्रकट करता है—

जसे परस्पर भिन्न, क्षणभंगुर, अपने विकारों से सब की जननी पृथिवी, इस समस्त विश्व को प्रकट करती है, अथवा इन सब विकारों से अपने आप लक्षित होती है, उस ही प्रकार भगवान् भी जगत् के विकारों से लक्षित होता है । लक्ष्म नाम चिह्न का है । सकलप्रसूः=नाम सब को उत्पन्न करनेवाली का है ।

इसी प्रकार सनातन=अविनाशी शम्भु भगवान् सर्वलक्षणलक्षण्य नाम से कहा गया है, क्योंकि वह सब के अन्तःस्थित सुकृत या विकृत रूप भावों से लक्षित होता है ।

लक्ष्मीवान्—३६१

लक्ष्मीशब्दो व्याख्यातचरः। लक्ष्मीरस्यास्मिन् वास्तीति लक्ष्मीवान्। लक्ष्मीति विभूतेः सम्पदो विष्णुपत्न्या वा नाम।

लक्ष्मीनाम्नि मन्त्रलिङ्गम्—

ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले ॥ अथर्व–११-७-२७

सूर्योऽपि लक्ष्मीवानुच्यते तथा च मन्त्रलिङ्गम्—

भूरिदा भूरि देहि नो मा दभ्रं भूर्याभर। भूरि घेदिन्द्र दित्ससि ॥
भूरिदा ह्यसि श्रुतः पुरुत्रा शूर[1] वृत्रहन्। आ नो भजस्व राधसि ॥
ऋ० ४/३२/२०, २१

१—शूर! वृत्रहन्! इति सूर्यविशेषणे ज्ञेये, विष्णोर्वा।

राधो=धनम्। धनञ्चापि लक्ष्मीत्युच्यते, यतो हि भूमिष्ठमपि धनं स्वामिनो मस्तिष्केणाङ्कितं=दृश्यं भवत्यतो लक्ष्मीपदेनोच्यते। सर्वस्य भोगसाधन—भूताया लक्ष्म्याः स एव स्वामीति कृत्वा लक्ष्मीवानुक्तो भवति।

भवति चात्रास्माकम्—

लक्ष्मीर्यदङ्कं समुपैति लौल्यात्, तत्पार्श्वमभ्येति पदञ्च विष्णोः।
विष्णोर्हि लक्ष्मीः कथितास्ति पत्नी, तद्वान् तया विश्वमिदं बिभर्ति ॥१७७॥

तथा च मन्त्रो लक्ष्म्या विष्णुपत्नीत्वे—

"श्रीश्च ते लक्ष्मीश्च पत्न्यौ" यजुः ३१

बिभर्तीति क्रिया कालत्रयोपलक्षिका—बभार, बिभर्ति भरिष्यति च।

लक्ष्मीवान्—३६१ विभूतिवाला।

लक्ष्मी शब्द का व्युत्पादन पहले कर दिया गया है। जिस की वा जिस में लक्ष्मी है, उस का नाम लक्ष्मीवान् है। लक्ष्मी यह विभूति=ऐश्वर्य, सम्पत्ति तथा विष्णुपत्नी का नाम है।

लक्ष्मी नाम को प्रमाणित करने वाला "ऋतं सत्यं तपो राष्ट्रं" इत्यादि ११-७-२७ अथर्व मन्त्र है। लक्ष्मीवान् नाम सूर्य का भी है, इस अर्थ की पुष्टि "भूरिदा असि भूरि देहि" इत्यादि वेदमन्त्र से होती है। राध नाम धन का है, जो कि हिरण्यादि रूप है। लक्ष्मी को भी धन शब्द से कहा जाता है, या यों कहिये हिरण्यादि धन भी लक्ष्मी शब्द से कहा जाता है, क्योंकि वह भूमि में अन्तःस्थित, अर्थात् भूमि को खोदकर गाड़ा हुआ भी अपने स्वामी के मस्तक से अङ्कित=दृष्ट रहता है। सकल जगत् के भोगसाधनभूत लक्ष्मी का वह ही परमेश्वर स्वामी है, इसलिये वह लक्ष्मीवान् है।

इस भाव को भाष्यकार अपने पद्यद्वारा इस प्रकार व्यक्त करता है—

लक्ष्मी अपनी चञ्चलता के कारण जिसके पास आजाती है, वह मानो विष्णु पद को ही प्राप्त करलेता है। लक्ष्मी विष्णु की पत्नी है, इसलिये लक्ष्मीवान् विष्णु लक्ष्मी के द्वारा इस विश्व का भरण पोषण करता है।

समितिञ्जयः—३६२

समितिः=युद्धं तज्जयतीति समितिञ्जयः। समित्युपपदाद् जि अभिभवे धातोः "संज्ञायां भृतॄवृजिधारिसहितपिदमः" इति पा० ३-२-४६ सूत्रेण खचि प्रत्यये मुमि च समितिञ्जयः शब्दो निष्पद्यते । यद्यपि योद्धृणामयन्नियमो यत्समेन= स्वतुल्योपकरणबलेन युध्येत, यथा शस्त्री शस्त्रिणा, रथी रथिना, पदातिः पदातिना युध्येत, किन्तु न कश्चिद् भगवतो विष्णोः सम इति प्रतिद्वन्द्व्यभाव एव समितिञ्जयशब्देनोच्यते, तथाभूतश्च विष्णुरेव यस्य न कश्चित् प्रतिद्वन्द्वी अतो विष्णुरेव समितिञ्जयशब्दवाच्यः।

यद्वा लोकदर्शनानुसारं यथा व्यवसायी मनुष्यो नित्यं स्वेष्टसिद्ध्यै व्यवसायिनाऽन्येन युध्यते। विद्यार्थी विद्याप्त्यै पाठशालायामधीयानो विद्यया स्वसमानैर्विद्यार्थिभिश्च सह युध्यमान इव तिष्ठति, जयति चान्ततो विद्याम्। स्वसमानबलेन मल्लेन युध्यमानो जयत्यल्पबलमपरा बलवान् मल्लः।

बलवाँश्चैकोऽपि बहुभिर्युध्यमानस्तान् सर्वान् जयति स चात एव महाबल

समितिञ्जयः—३६२ युद्ध को जीतनेवाला।

समिति नाम युद्ध का है, उसको जीतने वाले का नाम समितिञ्जय है। समिति शब्द के उपपद रहने पर तिरस्कारार्थक जि धातु से "संज्ञायां भृतृ" इत्यादि पा० ३-२-४६ सूत्र से खच् प्रत्यय तथा मुमागम करने पर समितिञ्जय शब्द सिद्ध होता है। भगवान् विष्णु का नाम समितिञ्जय है, क्योंकि योद्धा अपने समान बल तथा समानोपकरण वाले के साथ युद्ध करे, इस योद्धाओं के नियमानुसार भगवान् के समान बल तथा उपकरण वाला दूसरा कोई है ही नहीं, तब युद्ध किस से किया जाये, जैसे जगत् में एक शस्त्रधारी दूसरे शस्त्रधारी से युद्ध करता है, एक रथी दूसरे रथी से, तथा एक पदाति दूसरे पदाति से। इस प्रकार भगवान् के समान बलवाला किसी अन्य के न होने से, यह प्रतिद्वन्द्वी का अभाव ही समितिञ्जय शब्द से प्रकट होता है। अथवा लोकदर्शन के अनुसार जैसे कोई व्यवसायी=व्यापारी प्रतिदिन एक दूसरे व्यापारी से युद्ध करता है, अपनी इष्टसिद्धि के लिये। पाठशाला में अध्ययन करता हुआ विद्यार्थी, अपने समान विद्यार्थी या विद्या प्राप्ति के लिये युद्ध करता है, तथा अन्त में विद्या को जीत लेता है। अपने समान बलवाले मल्ल से युद्ध करता हुआ एक अधिक बलशाली मल्ल दूसरे मल्ल को जीत लेता है। एक बलवान् युद्ध में अनेक अल्पबलों को जीत लेता है, इसलिए वह महाबल नाम से कहा जाता है। इसी प्रकार एक धार्मिक से सहस्रों पापी युद्ध करते हैं, किन्तु वह उन सब को पराजित कर देता है। इन सब जीतने वालों में भगवान् की ही शक्ति होती है, इसलिये भगवान् का नाम समितिञ्जय है। इस अर्थ की पुष्टि "यं यमहमुग्रं करोमि" इत्यादि वेदमन्त्र से होती है। सब प्राणी किसी प्रकार के उद्देश्य को लेकर जीवनपर्यन्त युद्ध करते हैं; किन्तु जयलक्ष्मी उन ही को प्राप्त होती है जिन पर भगवान् की कृपा होती है। कॢपू सामर्थ्ये धातु से निष्पन्न होने के कारण कृपा नाम सामर्थ्य का है। इस प्रकार भगवान्

इत्युक्तो भवति। एवमेकेन धार्मिकेण सहस्रमधार्मिका युध्यन्ते किन्तु स तान् सर्वान् पराजयते। एतेषु सर्वत्र जेतृषु भगवान् स्वशक्ति निधाय सर्वान् जयन् भगवानेव समितिञ्जय उच्यते। तथा च वेदः—

"यं यमहमुग्रं करोमि" ऋग्

एवं सर्वे प्राणिनो यावज्जीवं युध्यन्ते, किन्तु विजयन्ते भगवत्कृपाभाज एव। कृपा हि नाम सामर्थ्यं, क्लृपू सामर्थ्ये धातोर्निष्पन्नत्वात्। एवं भगवतः समितिञ्जयत्वं सर्वत्र व्याप्तं दृश्यते सनात्।

मन्त्रलिङ्गमत्र—

"जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः।
ऋक् ६।८।६ तथा "शतं सेना अजयत् साकमिन्द्रः"॥ ऋक्॥

भवन्ति चात्रास्माकम्—

समानमानाः स्वसमानमानै, र्युध्यन्त आत्मेष्टमवाप्तुकामाः।
एकेन साकं शतिनो यदा स्युः सहस्रिणो वा किमु वाप्यनल्पाः॥१७८॥
एको हि यस्तान् हतभान् विधत्ते, न तत्र मर्त्योद्भवमस्ति वीर्यम्।
तत्रास्ति शम्भोः समितिञ्जयस्य, बलं ह्यजय्यं हृदि सर्वभानोः॥१७९॥
स एव मर्त्ये किमु जीवमात्रे, सामर्थ्यमाधाय निजं ह्यधृष्यम्।
नित्यं विधत्ते समितिञ्जयन्तं, तं विश्ववन्द्यञ्च नमन्ति तस्मात्॥१८०॥

की समितिञ्जयिता सनातन काल से ही सर्वत्र व्याप्त देखने में आती है।

इस समितिञ्जय नाम की पुष्टि "जयेम शतिनं सहस्रिणं वैश्वानर" इत्यादि ऋग् ६-८-६ तथा "शतं सेना अजयत् साकमिन्द्रः" इत्यादि ऋङ्मन्त्र से होती है।

इस नाम के भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार प्रकट करता है—

अपने इष्टप्रयोजन की सिद्धि के लिए समान बल वाले ही परस्पर में युद्ध करते हैं तथा उन में जो युद्ध करने में कुशल होते हैं, वे विजयी होते हैं। किन्तु जहां एक के साथ बहुतों, सैकड़ों, वा सहस्रों का युद्ध होता है, और वह एक ही उन सब को पराजित कर देता है, वहां वह शक्ति उस मनुष्य की अपनी नहीं होती, किन्तु वह भगवान् की होती है। क्योंकि सब के प्रकाशक भगवान् समितिञ्जय का उस में अपराजेय बल निहित होता है। वह भगवान् समितिञ्जय नामक विष्णु ही मनुष्य या प्राणिमात्र में अपने सर्वोत्कृष्ट बल का निधान करके उसे समितिञ्जय और विश्ववन्द्य बना देता है, जिस से सब उसे नमस्कार करते हैं।

विक्षरः—३६३

क्षरति स्वरूपाच्च्यवत इति क्षरः, विगतः क्षरादिति विक्षरः, अच्युतस्वरूपोऽक्षरः। विक्षराक्षरौ शब्दौ समानार्थौ।

मन्त्रलिङ्गञ्च –

"अक्षन् व्योमन्" इत्यादि। अक्षन्-इति व्याख्यातचरः।

भवति चात्रास्माकम्—

स विक्षरः सर्वगुहानुसृप्तः, स्वाभाविकज्ञानबलक्रियाभिः।
न क्षीयते नान्यमुपैति भावं, तमक्षरं विष्णुमिहार्चयन्ति ॥ १८१ ॥

रोहितः—३६४

रुह बीजजन्मनि प्रादुर्भावे चेति धातुस्ततो "रुहे रश्च लो वा" इत्युणादिसूत्रेण इतन् प्रत्ययो रोहति=प्रादुर्भवतीति रोहितः। प्रादुर्भावो नामान्तर्हितस्य सतो व्यक्तीभावः। यद्वा रोहयति=प्रादुर्भावयतीति रुहेरन्तर्गर्भितण्यर्थः। एवञ्च यः स्वयं नानारूपेषु प्रादुर्भवति, प्रादुष्करोति वा नानाविधान् पदार्थान् स रोहित इत्युच्यते।

विक्षरः—३६३ जो अपने स्वरूप से च्युत नहीं होता।

जो अपने स्वरूप से च्युत होता है उसे क्षर कहते हैं तथा जो क्षरभाव से रहित है उस का नाम विक्षर है। अच्युत रूप भगवान् विष्णु का नाम है। जिसे अक्षर नाम से भी कहते हैं। अक्षर और विक्षर ये दोनों शब्द एकार्थक हैं। इस नामार्थ की पुष्टि "अक्षन् व्योमन्' इत्यादि मन्त्र से होती है। अक्षन् शब्द का व्याख्य न पहले किया गया है।

इस नामार्थ को भाष्यकार इस प्रकार व्यक्त करता है—

स्वभाव सिद्ध ज्ञानरूप बल से स्वयं होनेवाली क्रियाओं से युक्त तथा सब के हृदयरूप गुहा में अन्तर्यामिरूप से विराजमान भगवान् विष्णु एकरस होने से किसी समय भी अन्य-भाव=विकार को प्राप्त नहीं होता, इसीलिये वह क्षयधर्मा न होने से विक्षर या अक्षर नाम से कहा जाता है।

रोहितः—३६४

बीज के अंकुरित तथा प्रादुर्भाव=प्रकट होने अर्थ में वर्तमान रुह धातु से "रुहे रश्च लो वा" इस उणादि सूत्र से इतन् प्रत्यय होने से रोहित शब्द बनता है जो प्रकट होता है अथवा प्रेरणार्थ लेने से जो प्रकट करता है उसका नाम रोहित है। इस प्रकार जो स्वयं नाना रूपों में प्रकट होता है या नाना प्रकार के पदार्थों को प्रकट करता है उसको रोहित कहते हैं।

यथा हि सूर्यः स्वयमुदेत्य स्वोदयेन पृथिव्यन्तर्गतानि बीजानि-आरोहयति=प्रादुष्करोति, उत्पादयतीत्यर्थः। तथा च सर्वरोहहेतुभूतः सूर्यो रोहित इत्युच्यते। अमुथैव स्वाभीद्धेन तपसा सर्वसूर्यादिग्रहसहितजगत्प्ररोहहेतुभूतोऽथवा तत्तद्रूपैः स्वयं बहुधा व्यक्तो भगवान् विष्णुः—रोहितनाम्नोच्यते।

मन्त्रलिङ्गञ्च—

"कृष्णायाः पुत्रो अर्जुनो रात्र्या वत्सोऽजायत।
स ह द्यामधिरोहति रुहो रुरोह रोहितः॥ अथर्व १३-३-२६

भवति चात्रास्माकम्—

स रोहितो विष्णुरिदं समस्तं, युगे युगे रोहयतीह [1]दृश्यम्।
तथा यथा बीजमनन्तमन्तः, सुप्तं स्वभावेन भवेच्च दृश्यम्॥ १८२॥

१—चराचरम्।

बीजमिति जातावेकवचनम्। अनन्तं संख्यातुमशक्यम्। सुप्तं=मूर्च्छावस्थापन्नम्। स्वभावेन-प्रवाहतोऽनादिमद् भावेन। दृश्यं भवेत्=कार्यरूपतां, चक्षुरिन्द्रियविषयतां वा प्राप्नुयादिति। लोके च पश्यामः सर्वमुत्पद्यते—उत्पद्य च सर्वमन्यदन्यस्योत्पत्तिहेतु भवति।

मार्गः—३६५

मार्ग अन्वेषणे धातुश्चुरादावाधृषीयस्ततः कर्मणि घञि मार्ग्यत इति मार्गः।

जैसे सूर्य स्वयं प्रकट होकर अपने उदय से पृथिवी के अन्तर्गत बीजों को प्रकट अर्थात् उत्पन्न करता है। इस कारण सूर्य का नाम रोहित है क्योंकि वह सब के प्रादुर्भाव का हेतु है। इसी प्रकार अपने अभीद्ध तप के द्वारा सूर्य आदि सहित समग्र जगत् के प्रादुर्भाव का हेतु होने से अथवा स्वयं नानारूपों में व्यक्त होने से भगवान् विष्णु का नाम रोहित है। जैसा कि "कृष्णायाः पुत्रो अर्जुनो रात्र्या," इत्यादि अथर्व १३-३-२६ मन्त्र से सिद्ध है। इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम रोहित है, क्योंकि वह प्रत्येक युग में इस समस्त चराचर विश्व को प्रकट करता है, यद्वा स्वयं उस जगद् रूप में प्रकट होता है, वैसे ही जैसे कि, मूर्च्छावस्था में स्थित अनेकों बीज स्वयं दृश्यरूप में आजाते हैं।

बीज में एक वचन जाति के अभिप्राय से है। अनन्त जो गणना में न आये। सुप्त=जो मूर्च्छारूप में है। स्वभावेन=स्वाभाविक अनादिप्रवाह से। दृश्यं भवेत्=कार्यरूप में या इन्द्रियों के विषय में आजाता है। लोक में भी हम देखते हैं, सब दृश्य वर्ग उत्पन्न होता है, और उत्पन्न होकर परस्पर एक दूसरा एक दूसरे की उत्पत्ति का हेतु होता है।

मार्गः—३६५

चुरादिगण पठित अन्वेषणार्थक आधृषीय मार्ग धातु से कर्म में घञ् प्रत्यय करने से, मार्ग शब्द सिद्ध होता है।

आघृषीयत्वाण्णिज्भावपक्षे ण्यन्तात् "एरच्" पा० सू० अचि णेर्लोपे च मार्ग इति।

आनन्दरूपो हि भगवान् सर्वे च मार्गयन्त्यानन्दमिति सर्वैर्मार्ग्यमाणत्वान्मार्गो भगवान् विष्णुः। लोके च मार्गणसाधनभूतः पन्था अपि मार्गशब्देनाभिधीयते, तथा हि पश्यामो लोके—अन्वेष्टव्यमन्वेष्टुकामः पन्थानं मध्यमं करोति, तेन च पथा तदन्विष्य-अर्थात् प्राप्तव्यमधिगत्य विरमति। अमुथैव भगवन्तं प्रेप्सूनां भगवत्प्रापण-साधनत्वेन मध्यमभूतो भास्करो, जीवान् भगवन्तं प्रापयितुमाकल्पं यतते मार्गभूतोऽत एव स प्रत्येकं प्राण्यधिगन्तव्यत्वेन मार्गेति संज्ञां लभते।

मन्त्रलिङ्गञ्च—

"तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"

इत्यादि यजुः।

भवति चात्रास्माकम्—

अशेषलिप्साविषयः स एको मार्गाभिधानः सकलाध्वभूतः।
बह्वन्तरालव्यवधानसत्तं, स[1] ब्रह्मतत्त्वं कुरुतेऽधिगम्यम्॥ १८३॥

१—सः=सूर्यः।

हेतुः—३६६

हिनोति कार्यरूपेण वर्द्धत इति हेतुः, कारणं वा। हि गतिवृद्धचोरिति सौवादिका-द्धातोः "कमिमनिजनि" इत्याद्युणादिसूत्रेण तुः प्रत्ययो गुणश्चेति हेतु शब्दः सिध्यति।

भगवान् आनन्दरूप है. आनन्द को प्राप्त करने का सब ही प्रयत्न करते हैं, इसलिये सब के अन्वेषण का विषय होने से भगवान् विष्णु ही मार्ग नाम से कहा जाता है।

लोक में अन्वेषण (खोज) का साधन होने से अध्व का नाम भी मार्ग है। जैसा कि हम लोक में देखते हैं, किसी वस्तु का खोज करने वाला किसी पथ से ही अर्थात् रास्ते को साधन बनाकर ही खोज करता है, और उस पथ के द्वारा वस्तु को प्राप्त करके वह विरत होजाता है। इसी प्रकार भगवान् को प्राप्त करने वालों का माध्यमभूत मार्ग सूर्य है, इसलिये वह सब का अवश्य प्राप्तव्य होने से मार्ग है। इस नामार्थ की पुष्टि "तमेव विदित्वा," इत्यादि यजुर्वेद मन्त्र से होती है।

इस भाव का प्रकाशन भाष्यकार अपने पद्यद्वारा यों करता है—

भगवान् की प्राप्ति का साधन=सब का अध्वभूत साधन होने, से अत एव सब की प्राप्ति का विषय होने से, सूर्य का नाम मार्ग है, क्योंकि वह बहुत प्रकार से मध्य में स्थित व्यवधानों =प्रतिबन्धों से व्यवहित=अन्तर्हित सत्तावाले ब्रह्मतत्त्व को प्राप्त करवाता है।

हेतुः—३६६

जो कार्यरूप से बढता है उसका नाम हेतु या कारण है। गति तथा वृद्धयर्थक स्वादि-गणीय 'हि' धातु से "कमिमनिजनि" इत्यादि उणादि सूत्र से तु प्रत्यय और गुण होने से, हेतु

यथा गर्भाशयगतं कारणरूपं बीजं कार्यभावमापद्य वृद्धं सत्स्वलक्षणैरात्मानं व्यनक्ति तथैव जगद्बीजं भगवान् विष्णुः कामरूपतामापद्य तत्कार्यं जगत् सृजन् विचित्रैर्जगल्लक्षणैः स्वकामं प्रकाशयन् व्यनक्ति स्वस्य सार्वत्रिकीं व्यष्टिमिति स हेतुसंज्ञामाप्नोति ।

लोकेऽपि च पश्यामः उदरमध्यगतो भक्षितो मूलकनामा कन्दो दर्शनागोचरोऽपि वृद्धिमापन्नः स्वलक्षणैरात्मानं व्यनक्ति । योऽयं लक्षणकृतो व्यापारो यं व्यनक्ति स हेतुरिति । अत एव चादिकारणं हेतुरित्युक्तो भवति । एवं भगवान् विष्णुः सर्वलोकलोकान्तररूपेण कार्येण स्वस्यादिकारणत्वं व्यञ्जयन् हेतुरुक्तो भवति ।

भवति चात्रास्माकम्—

हेतुर्हि विष्णुः, स हि कामरूपो, विश्वं सृजन् तत्प्रभवैर्विकारैः ।
व्यनक्ति हेतुत्वमचिन्त्यरूपैस्, तथा यथा मूलकमात्मरूपैः ॥१८४॥

दामोदरः—३६७

दाम=रज्जुः, बन्धनं वा, तदुदरे यस्य तद्दामोदरं जगत् तदस्यास्मिन्निति वा दामोदरः, मत्वर्थीयोऽच् ।

सर्वेषामन्नाशिनां पेयपायिनां चोष्यचोषिणां चर्व्यचर्विणाञ्च प्राणिनामुदरेष्व-

---

शब्द सिद्ध होता है। जैसे गर्भाशय में प्रविष्ट कारणरूप बीज, कार्यरूप में परिणत होकर बढा हुआ, अपने लक्षणों से अपने आप को व्यक्त करता है, उसी प्रकार जगत् का बीजरूप कारण भगवान् विष्णु, कामरूप से काम के कार्य जगत् का सर्जन करके अपनी कामरूपता को प्रकाशित करता हुआ, सकल जगत् में अपनी व्याप्ति को प्रकट करता है। इसीलिये उसका नाम हेतु है।

लोक में भी हम देखते हैं, खाई हुई मूली उदर में जाकर न दीखती हुई भी वृद्धि को प्राप्त हुई, अपने ही लक्षणों से अपने आप को प्रकट करती है। यह लाक्षणिक व्यापार जिस को प्रकट करता है, उसका नाम हेतु है. इसीलिये आदिकारण का नाम हेतु है। लोकलोकान्तर रूप कार्य से अपने आदिकारणत्व को प्रकट करता हुआ भगवान्, हेतुसंज्ञक होता है।

भगवान् विष्णु का नाम हेतु है, वह कामरूप, कामजन्म विश्व को बनाकर जगत् के अचिन्त्य विकारों से अपने हेतुत्व को इसी प्रकार प्रकट करता है, जिस प्रकार भक्षित मूली अपने लक्षणों से अपने को प्रकट करती है।

दामोदरः – ३६७

दाम नाम रज्जु या बन्धन का है, वह बन्धन है उदर=मध्य में जिसके उसका नाम हुआ दामोदर,, यह जगत् का नाम हुआ, वह दामोदर है जिसका वह भी दामोदर हुआ यहां मत्वर्थीय अच् हुआ है। यह दामोदर रूप जगत् भगवान् का होने से दामोदर यह भगवान् का नाम हुआ। सब अन्न खानेवाले पेय=जलादि पीनेवाले, चोषण करनेवाले, तथा चर्वण करनेवाले प्राणियों के उदर में अन्त्रों (आन्तों) का जाल होता है, वह अन्त्रजाल ही पुष्ट

न्त्राणां सद्भावोऽस्ति। अन्त्राणामुपचितिरेव ज्ञानेन ज्ञानिनो बध्नाति, यथा शरीर-बलोपचित्या मल्लं मल्लोऽपरः। मूलानुसन्तताः क्षुपलतावृक्षादीनाञ्च स्थूलसूक्ष्मजटा-प्रताना रज्जुरिव भवन्ति, इत्थमिदं सकलं जगत्-रज्जुमत् सद्दामोदरनाम्नोक्तं भवति, यथा बहुसूत्रानुग्रथितः सूत्रराशी रज्जुनाम बिभर्त्ति तथा बहुत्रुटिपलादिग्रथितो दिना-द्युपचितो मासाभिधः कालो, विकलाकलांशादिभिरुपचितो ग्रहसङ्क्रान्तिमार्गो राशिश्च रज्जुसमतामापन्नो रज्जुनामा भवति। एवं भगवतो विराज उदरे दामरूपैः राशिभि-र्निबद्धान् दामोदरवद् भातः स्वव्यापकं दामोदरं स्तुवतश्च सूर्यादिग्रहाननुकुर्वन्तो, ग्राम-जनपदमण्डलप्रान्तदेशोपाधिका भूखण्डा अपि पथिततिरूपया रज्ज्वा निबद्धाः स्वस्य दामोदरत्वं विज्ञापयन्ति। एवमिद सर्वं जगद् भगवतः दामोदरस्य व्याख्यानभूतमस्ति।

भवन्ति चात्रास्माकम्—

सूत्रानुसूत्रैर्वलितं हि यत् स्याद्, दामेति संज्ञां लभते तदेव।
यथा तथा प्राणकलांशयुक्तो, राशिस्तथैवास्ति च मास उक्तः ॥१८५॥
ग्रहा निबद्धाः किल राशिभोगैः, कालो निबद्धो दिनरात्रिमासैः।
एवं हि जीवा रदनैर्निबद्धा, ये ते च बद्धा उदरान्त्रजालैः ॥१८६॥

होकर ज्ञानियों को ज्ञान के द्वारा बान्धता है, जैसे एक मल्ल अपने शारीरिक बल के पुष्ट होने से दूसरे मल्ल को बान्ध लेता है।

क्षुप (छोटे झाड आदि) पौधे लता वृक्ष आदि का मूल से सम्बद्ध होकर, पृथ्वी में प्रसृत जो स्थूल सूक्ष्म जटाओं का समूह है, वह भी रज्जु के समान इन सब को बान्धे रखने से रज्जु ही होता है। इस प्रकार यह सम्पूर्ण ही जगत् रज्जुवाला (बन्धनसहित) होने से दामोदर नाम से कहा जाता है, जिस प्रकार बहुसंख्यक सूत्रों से ग्रथित (गून्था हुआ) एक सूत्रसमूह रज्जु नाम से कहा जाता है। उस ही प्रकार बहुत से त्रुटि पल आदि से ग्रथित दिन पक्ष आदि से उपचित मासरूप काल तथा विकला कला अंश आदि का समूहरूप ग्रहों का सङ्क्रमण मार्ग मेष आदि राशि भी, रज्जु के समान होने से रज्जु नाम से कहा जासकता है। इस प्रकार से भगवान् विराट्रूप के उदर में दामरूप राशियों से निबद्ध, दामोदर के समान प्रतीयमान, अपने में दामोदर रूप से व्याप्त भगवान् का स्तवन करते हुये सूर्य आदि ग्रहों का अनुकरण करते हुये, ग्राम-जनपद-मण्डल-प्रान्त आदि देशोपाधिक भूभाग भी मार्गजालरूप रज्जु से निबद्ध होकर, अपने आप को दामोदर रूप से व्यक्त करते हैं। यह सकल विश्व ही भगवान् दामोदर का व्याख्यान समझना चाहिये।

इस दामोदर नामार्थ को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

जैसे बहुत से सूत्रों के परस्पर ग्रन्थन से ग्रथित हुआ जो सूत्रसमूह है, वह दाम=रज्जु नाम से कहा जाता है, उसी प्रकार प्राण कला अंश आदि का समूहरूप ग्रहसङ्क्रमण मार्ग मेष आदि राशि, तथा त्रुटि क्षण पल आदि का समूहरूप मास आदि काल भी दाम अथवा रज्जु नाम से कहा जाता है।

जैसे सब ग्रह राशिभोगों से बन्धे हुये हैं, काल दिन रात्रि पक्ष आदि उपाधियों से बन्धा हुआ है, इसी प्रकार रदन=दान्तों से निबद्ध=युक्त प्राणी, उदर स्थित अन्त्रों के जाल से बन्धे हैं।

अतः स विष्णुः कथितः सुविज्ञै, र्दामोदरः सर्वजगत्प्रसृप्तः ।
यथा सदन्तास्तरवस्तथैव, मूलैर्जटाभिश्च निबद्धपादाः ॥१८७॥
एवं जगद्दामनिबद्धमन्त, र्दामोदरं ख्याति च पुष्पहासम् ।
दामोदरस्यानुचरश्च शिल्पी, करोति यन्त्राणि सबन्धनानि ॥१८८॥

सहः—३६८

सहते सर्वमिति सहः पचाद्यच् । सहो हि भगवान् विष्णुः स हि सर्वदा समावस्थोऽविक्रियः पुण्याचारमपुण्याचारं वा सर्वं सहते नाशुभाचाराय क्रुध्यति, न च शुभाचाराय स्पृहयति, सर्वस्य साक्षी शुभाशुभफलदानप्रतिभूः । लोकेऽपि च पश्यामः सर्वेऽपि जीवाः समविषमभावं भजमाना अपि सहनशीलाः । इयं हि सहनशीलता तेषां सर्वव्यापकस्य भगवतः सर्वत्र व्याप्तं सहत्वरूपं गुणं व्यनक्ति ।

मन्त्रलिङ्गञ्च—

"सहोऽसि सहो मयि धेहि"

भवति चात्रास्माकम्—

सहो हि विष्णुः कुरुते च सर्वं, सहिष्णु दृश्यं किमु चाप्यदृश्यम् ।
यथाबलं यत् सहते तथा तज्-जगद् व्यनक्त्येव सह सनातनम् ॥१८९॥

इसी से सर्वत्र जगत् में व्याप्त भगवान् विष्णु को सुविज्ञपुरुषों ने, दामोदर नाम से कहा है, तथा जैसे सदन्त प्राणी उदरस्थित अन्त्रजाल से निबद्ध हैं, उसी प्रकार वृक्ष आदि भी अपने मूल या मूलानुगत जटासमूह से बन्धे हुये हैं । इसी प्रकार यह सम्पूर्ण विश्व, दाम से बन्धा हुआ अपने अन्तःस्थित पुष्पहास=अर्थात् भगवान् विष्णु का दामोदर रूप से व्याख्यान कर रहा है, तथा शिल्पी=कारीगर भी भगवान् दामोदर का अनुकरण करता हुआ, यन्त्र आदि का निर्माण बन्धन सहित करता है ।

सहः—३६८

जो सब को सहन करे उसका नाम सह है, सह धातु से पचादि अच् प्रत्यय करने से सह शब्द बनता है ।

यह भगवान् विष्णु का नाम है, क्योंकि वह सर्वदा समावस्थ=समरूप तथा अविक्रिय=विकार रहित रहता हुआ सब सदाचारियों वा दुराचारियों को सहन करता है, अर्थात् वह सब का साक्षी तथा सब को तत्तत् कर्मानुरूप फल देता हुआ, न किसी सदाचारी से प्रेम करता है, तथा न किसी दुराचारी पर क्रोध करता है ।

लोक में भी हम देखते हैं, सब ही प्राणी सम विषम भाव में रहते हुये भी सहनशील रहते हैं, यह उनकी सहनशीलता सर्वव्यापक भगवान् के सर्वत्र व्याप्त सहत्वरूप धर्म को प्रकट करती है । इस भगवान् के सह नाम में "सहोऽसि सहो मयि धेहि" इत्यादि मन्त्र प्रमाण है ।
इस नाम के भाव को भाष्यकार अपने पद्य से यों व्यक्त करता है—

भगवान् विष्णु का नाम सह है, क्योंकि वह सब दृश्य या अदृश्य जगत् को सहनशील बनाता है । यथाशक्ति सहन करता हुआ यह जगत्, सदा सह नामक भगवान् विष्णु का प्रकाश कर रहा है ।

महीधरः—३६९

मही पूज्या वेदवाणी तस्या धरो=धारयिता महीधर इत्युच्यते। यद्वा मही-शब्दः सामान्यवाणीवचनस्तस्या धरः।

मन्त्रलिङ्गञ्च—

"इडा सरस्वती मही तिस्रो देवी मयोभुवः।
बर्हि सीदन्त्वस्रिधः। ऋग् १·१३·९

सत्या हि वागग्न्याश्रया सूर्याश्रया वा, भौमोऽग्निः सूर्यांशत्वात् सूर्यरूप एव। सर्वत्र भगवता वाचोनिधानेन स्वस्य व्याप्तिर्दर्शिता, मेघेस्वपि विद्यते स्तनथुरूपा वाक्। ज्योतिर्विदाञ्चष समयः, प्राकृतगणनया राशीनां पञ्चमं स्थानं वाचो, विद्यायाः, ज्ञानस्य, सन्तानस्य वा सूर्यस्य पञ्चमराश्यधिपतित्वात्। यथाभूतञ्च यस्य पञ्चमं स्थानं तथाभूत तस्य तद्भावभवं फलं भवति। यथा च वाणीधरो भगवान् तथा वेदवागीशोऽप्युच्यते। एतेनेहानुक्तमपि सगुणं वेदवागीशेति नाम व्याख्यातं भवति

भवतश्चात्रास्माकम्—

महीधरो विष्णुरचिन्त्यशक्तिः, प्रजाः सवाचो विदधात्यशेषाः।
साम्ना स्तुवत्यो विविधेन वाचा, पदं तृतीयं गमयन्त्यनिन्द्यम् ॥१९०॥

महीधरः—३६९

मही नाम पूज्य वेदवाणी या सामान्य वाणी का है, उसे जो धारण करता है, उसका नाम महीधर है। भगवान् ही सब प्रकार की वाणियों का उद्गम स्थान तथा आधार रूप है, इस अर्थ की पुष्टि "इडा सरस्वती मही," इत्यादि वेदमन्त्र से होती है। सूर्य तथा अग्नि सत्य वाणी का आश्रय है, पार्थिव अग्नि सूर्य का अंश होने के कारण सूर्य रूप है।

सर्वत्र विश्व के पदार्थों में वाणी का सञ्चार करके भगवान् ने अपनी विश्वव्यापकता को प्रकट किया है, मेघों में भी स्तनथुरूप वाक् विद्यमान है। ज्योतिषियों का सिद्धान्त है कि सूर्य के पञ्चम राशि के अधिपति होने से प्राकृत=पूर्व पूर्व गणनाक्रम से वाणी-विद्या-ज्ञान तथा सन्तान का स्थान पञ्चम राशि है, शुभ या क्रूर ग्रहों से दृष्ट या युत होने के कारण पञ्चम स्थान जिसका जैसा शुभ या अशुभ है, उस ही प्रकार का शुभ या अशुभ उसका फल होता है। जिस प्रकार भगवान् वाणीधर है, उसी प्रकार वेदवागीश भी है। महीधर नाम के व्याख्यान से ही विष्णुसहस्रनामों में अपठित सगुण वेदवागीश नाम का भी व्याख्यान हो जाता है। इस नाम के भावार्थ को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

अचिन्त्य शक्ति भगवान् विष्णु का नाम महीधर है, क्योंकि वह सब प्रजा को वाणी से युक्त करता है, तथा सामवेद रूप वाणियां भी भगवान् की स्तुति करती हुई, अनिन्द्य=शुद्धरूप परमपद रूप तृतीय पद को प्राप्त करवाती हैं। विविध साम से स्तुति को "उप त्वाग्ने दिवे

यदुक्तं विविधेन साम्ना, तत्र मन्त्रः—

"उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् ।
नमो भरन्त एमसि । साम ।

यदुक्तं पदं तृतीयमिति, तत्र मन्त्रः—

"यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त" । (यजु)

भवति चात्रास्माकम्—

वाणीधरं ये भुवि भारभूता—स्त्यक्त्वा नरा मर्त्यमरं स्तुवन्ति ।
ते स्वप्रयुक्तां वृथयन्ति वाचं, मर्त्येन साकं म्रियते च वाक् सा ॥१६१॥

महाभागः—३७०

महान्=बृहन् भागोऽस्येति महाभागो विष्णुः ।
भज सेवायामिति भौवादिकाद्धातोः कर्मणि घञि भागशब्दः सिध्यति । केवलोऽपि भज धातुरिह विभजनार्थकः ।

एवञ्च महान्तो भागाः=विभागा आकाशादयो यस्य स महाभागो विष्णुः । स्वरूपत एकोऽपि भगवान् स्वयमाकाशादिरूपेणाविभक्तोऽपि विभक्त इव प्रतीयमानो महाभागाभिधानं लभते । तथा हि आकाशादयो महान्तो भागाः=अंशा इव ते च महतो राशिस्थानीयस्य तस्यैवेति । एको महान् राशिर्यावद्धा विभज्यते तावत्सु

दिवे" इत्यादि सामवेद मन्त्र पुष्ट करता है तथा तृतीय पद की पुष्टि "यत्र देवा अमृतमानशानास्तृतीये" इत्यादि यजुर्मन्त्र से होती है ।

जो पृथिवी के भाररूप होकर मूढपुरुष, भगवान् वाणीधर को छोड़कर किसी मनुष्य की स्तुति करते हैं, वे अपनी प्रयुक्तवाणी को व्यर्थ करते हैं तथा वह उनकी वाणी उनके साथ ही नष्ट हो जाती है ।

महाभागः—३७०

महान् नाम बड़े का है, बड़ा है भाग जिसका उसका नाम है महाभाग, यह विष्णु का नाम है । सेवार्थक भ्वादिगणपठित भज धातु से घञ् प्रत्यय करने से भाग शब्द सिद्ध होता है । यहां निरुपपद भी भज धातु विभजनरूप अर्थ का अभिधायक है । इस प्रकार बड़े बड़े हैं आकाश आदि विभाग जिसके उस विष्णु का नाम महाभाग है । अर्थात् भगवान् स्वरूप से एक तथा अविभक्त भी आकाश आदि रूप से विभक्त के समान प्रतीत होता हुआ महाभाग संज्ञक होता है । आकाश आदि उस ही महाराशिरूप भगवान् के बड़े बड़े विभाग=अर्थात् अंश हैं । एक एक महाराशि का जितने रूपों में विभाग किया जाये, वह महाराशि अपने उतने ही अंशों में व्यापक रूप से स्थित, उतने ही प्रकार से अपने आप को व्यक्त करता है जैसे एक दशकगण

भागेषु व्यापकरूपेण स्थितः सन्नात्मानं तावद्धा व्यनक्ति यथा पञ्चधा विभक्तो दशकः पञ्चधात्मानं प्रकाशयति. यतो हि स दशको राशिस्तेषु स्वविभागेषु स्वरूपेण व्याप्त । विभिन्नविविधपदार्थानां मूलभूतैकराशेर्भगवतो यावानंशो यस्मिन् प्रकाशते, तत् सा स वा तावता भागेन प्रकाशमानो महाभाग उच्यते। वस्तुतो मूलराशिरेव भागात्मना प्रकाशतेऽत उक्तं भवति—

भागो भाजकेन गुणितः शेषेण युक्तश्च भाज्यसमानो भवति, निश्शेषतायाः सूचकश्च तत्र गणितकोविदैः शून्यांको (०) निधीयते। अत एव नष्टे वस्तुनि तद्गुणः प्रकृतौ लीयते। प्रकृतिर्नाम मूलं कारणं जगतः। चैतन्यरूपो गुणश्च चैतन्ये।

तथा च मन्त्रः—

"चक्षुस्ते सूर्यं गच्छतु" इत्यादि मन्त्रलिङ्गञ्च—

"अह सूर्यस्य परियामि" ऋग् –१०।४९।७।

"अहं सा अस्मि यः पुरा" ऋग् – १।१०५।७।

"अह होना न्यमीदं" ऋग् – १०।५२।२।

"अहं केतुरहं मूर्धा" ऋग् –१०।१५९।२।

"अह ता विश्वा चकरं" ऋग् –४।५२।६।

"अहमस्मि महामहो" ऋग्—१।११९।१२

"अहमिन्द्रो न पराजिग्ये" ऋग्—१० ४८।५।

"अहमेव वात इव" ऋग्—१०।१२५।५।

"अहमेव स्वयमिन्द्रं" ऋग् १०।१२५।५।

'अहं मनुरभवं सूर्यश्चाहं' ऋग्—४।२६।१।

(पञ्च) पांच भागों में विभक्त किया हुआ अपने आप को पञ्च प्रकार से व्यक्त करता है,क्योंकि वह दशक राशि उन अपने भागों में स्वरूप से स्थित है, अर्थात् व्याप्त है। विविध पदार्थों के मूलभूत एक राशि रूप भगवान् का जितना अंश जिसमें प्रकाशित होता है, वह नपुंसकत्व स्त्रीत्व, पुरुषत्व विशिष्ट वा पदार्थ उतने ही अंश से महाभागरूप होता है। वस्तुतः मूल राशि ही अपने भागों से प्रकाशित होती है, इसीलिये ऐसा कहा गया है कि भाग, भाजक से गुणा करने तथा शेष के युक्त करने से भाज्य जो कि भाग करने से पूर्व राशि रूप था उसके समान हो जाता है। ज्योतिर्विद् शेष के अभाव को सूचित करने के लिये शून्य ० अङ्क रखते हैं। इसीलिये किसी वस्तु के नष्ट हो जाने पर उसके गुण का प्रकृति में लय हो जाता है, तथा उस के स्थान में शून्य रह जाता है। प्रकृति जगत् के मूल कारण का नाम है। चैतन्य रूप गुण का चेतन में लय हो जाता है।

इस उपर्युक्त भाव को पुष्ट करनेवाला "चक्षुस्ते सूर्यं गच्छतु" इत्यादि मन्त्र है। तथा "अहं सूर्यस्य परियामि" इत्यादि और "अहं मनुरभवं सूर्यश्चाहम्" ऋक् ४।२६।१ तक के सब मन्त्र इस भाव को प्रमाणित करनेवाले हैं।

ऋग्वेददशममण्डलस्य—अष्टचत्वारिंशत्तमस्य तथैकोनपञ्चाशत्तमस्य सूक्तस्य सर्वे मन्त्रा इह मन्त्रलिङ्गमिति बोद्धव्यम् ।

भवति चात्रास्माकम्—

स एव सूर्यः स हि सर्वगः सन्नंशैः स्वकैर्विश्वमिदं बिभर्त्ति ।
तं सत्यसन्धाः कवयः पुराणं स्तुवन्ति नित्यं बहुभागमर्कैः ॥१६२॥

१—बहुभागं=महाभागम् ।

वेगवान्—३७१

विजिर् भयसञ्चलनयोरिति धातोर्भावे घञि वेगशब्दः सिध्यति । अतिशयितो वेगोऽस्येत्यातिशायनिके मतुपि वेगवान् विष्णुः । वेगो=जवः । क्षिप्रागतिर्वा, सा च वाय्वादिषु प्रत्यक्षं दृश्यमाना, कारणगुणपूर्वकाः कार्यगुणा इति न्यायानुसारं सर्वेषां कारणभूते भगवति सिध्यति । अत एव स वेगो वायुमनुयन् तत्कार्येषु वायव्येष्वप्यन्वेति वातचराः पक्षिणोऽपि स्वतः सिद्धेन वेगेन यथेच्छमुड्डीयन्ते । वाताग्निसंयोगरूपा विद्युन्महावेगवती दृश्यते । चन्द्रमा वेगवान्-तज्जं मनोऽपि वेगवत् परन्त्वेतत्सर्वापेक्षया वेगवान् विष्णुः सर्वातिशायिवेगो, यतो हि सर्वत्र जगति तद्वेगस्यैव प्रसारः । सर्वत्र हि वायोः सत्ता अतः सर्वत्र न्यूनाधिकभावेन वेगो वर्तते । मन्त्रलिङ्गञ्च --

"अनेजदेकं मनसो जवीयः" यजुः ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

सर्वगामी भगवान् सूर्य अपने अंशों से इस समस्त विश्व का भरण पोषण करता है, तथा सत्यप्रतिज्ञ विद्वान् पुरुष उस पुराण महाभाग सूर्य की प्रशस्त नमः आदि बचनों से स्तुति करते हैं ।

बहुभाग=महाभाग का पर्याय है ।

वेगवान्—३७१

विजिर इस भय तथा सञ्चलनार्थक धातु से, भाव में घञ् प्रत्यय करने से वेग शब्द सिद्ध होता है । अतिशयित अर्थ में मतुप् प्रत्यय करने से वेगवान् शब्द बन जाता है । भगवान् विष्णु का नाम वेगवान् है । वेग नाम, बलपूर्वक शीघ्र चलने का है, और वह वायु आदि में प्रत्यक्ष दीखता हुआ, उनके कारण रूप भगवान् में सिद्ध होता है, क्योंकि कारण के गुण ही कार्य में आते हैं, ऐसा सिद्धान्त है । इसीलिये वह वेग वायु से अन्वित होकर वायुजन्य कार्यों में भी अन्वित होता है । वायु में विचरण करनेवाले पक्षी स्वतः सिद्ध अपने वेग से अपनी इच्छानुसार उड़ते रहते हैं । वायु अग्नि के संयोगरूप विद्युत (बिजली) में भी बहुत प्रबल वेग होता है । चन्द्र में वेग होने से उसके कार्य रूप मन में भी वेग की सत्ता है । किन्तु इन सब के वेगों का अतिशायी वेग भगवान् विष्णु में है, उसी का वेग इन सब में प्रसृत (फैला) हुआ है । वायु सर्वत्र है, इसलिये न्यून अधिक रूप से वेग भी सर्वत्र है । यह नामार्थ "अनेजदेकं मनसो जवीयः" इत्यादि यजुर्वेद मन्त्र से प्रमाणित है ।

भवति चात्रास्माकम्—

स वेगवान् विष्णुरनन्तवेगो, निजेन वेगेन जगत्समस्तम् ।
तथा विधत्ते गतिमद् यथा ना, स्वकोत्थवेगेन निजेयमर्थम् ॥१९३॥

प्राप्नुयादिति शेषः ।

अमिताशनः—३७२

न मितं=अमितम् । अश्यतेऽनेनेत्यशनः । अमितस्याशनोऽमिताशनः । यद्वा—अमितान् प्राणिन आशयति=भोजयतीत्यमिताशनः, ण्यन्तादश भोजने धातोर्नन्द्यादिलक्षणे ल्यौ आशनः । अमितस्याशनोऽमिताशनः । यतो हि स एवामितानां प्राणिनां भोजनस्य साधनः साधको वेति हेतोर्भगवान् विष्णुरमिताशन उक्तो भवति । अमितत्वञ्च जीवबुद्धया, भगवज्ज्ञानेऽनन्ते सर्वस्य मितत्वात् । मनुष्यो=जीवो हि नैकयोनिसम्भूतानां शरीराणमपि मानं कर्तुं प्रभवति । इममेवार्थं बोधयितुं भगवतो नाम्नि अमितपदनिवेशो, मनुः, वसुमना इत्यादि च भगवतो नाम । इयञ्चैतस्य नाम्न उपपत्तिः—इह हि जगति कियत्य पिपीलिकाः, कियन्तो मर्कोटकाः, (मकोड़े) कियन्तो मत्स्या मर्कटाश्चेति, सन्त्येवम्विधप्रश्नोत्तरणे मनुष्या मूकाः, परन्तु भगवतोऽमिताशनस्य व्यवस्थया लब्धभोजनाः सर्वं एते सूयन्ते, वर्धन्ते, म्रियन्त इति । इमं महार्थं विज्ञापयितुं भगवतोऽमिताशनेति नाम । मनुष्यैर्मनुष्या अपि न सम्यक् संख्यातुं शक्यन्ते, इति निर्विवादं वक्तुं शक्यते कुतः ? प्रतिक्षणं मरणोत्पत्तिरूपद्वन्द्वस्य सद्भावात् ।

इस नाम के भाव को भाष्यकार इस प्रकार व्यक्त करता है—

अतिशयवेगयुक्त होने से भगवान् का नाम वेगवान् है तथा वह अपने वेग से इस समस्त विश्व को वेगयुक्त या गतिशील बनाता है, इसलिये कि उस गति के द्वारा मनुष्य अथवा प्रत्येक प्राणी अपने प्राप्तव्य अर्थ को प्राप्त कर सके ।

अमिताशनः—३७२

अमित नाम उस का है, जिसकी इयत्ता न हो । अशन नाम जिसके द्वारा खाया (भक्षण किया) जाये अर्थात् इस अनन्त विश्व के संहारक का नाम अमिताशन है । यद्वा ण्यन्त भोजनार्थक अश धातु से नन्द्यादिलक्षण ल्यु प्रत्यय करने से, आशन शब्द सिद्ध होता है । इस अमित विश्व को जो अमित भोजन देता है, उसका नाम अमिताशन है, क्योंकि इस विश्व के अनन्त प्राणियों के भोजन का साधक या साधन भगवान् विष्णु ही है । यह अमितता भी जीव की अपेक्षा से है क्योंकि भगवान् की अपेक्षा से तो यह सब परिमित ही है । जीव एक योनि में उत्पन्न शरीरों का भी मान=संख्यान करने में असमर्थ है । इसी अर्थ को बोधित करने के लिये भगवान् के अमिताशन नाम में अमित पद का निवेश किया है तथा इसी अभिप्राय से भगवान् को वसुमना और मनु नाम से भी कहा है । यह नाम इस प्रकार उपपन्न होता है, इस संसार में कितनी चीटियां कितने मकोड़े मत्स्य तथा वानर आदि हैं इस के जानने में मनुष्य असमर्थ है, किन्तु भगवान् अमिताशन की व्यवस्था से इन सब का भोजन उत्पत्ति वृद्धि तथा मरण होता है इसी महत्त्वयुक्त अर्थ को बोधित करने के लिये भगवान् को अमिताशन नाम से कहा है । निर्विवाद विषय है कि, प्रतिक्षण जन्म मरण रूप

मन्त्रलिङ्गञ्च—

"मां हवन्ते पितरन्न जन्तवो ग्रहं दाशुषे विभजामि भोजनम्" ऋग्

भवति चात्रास्माकम्—

ग्रशक्यमानस्य च जीवराशेः कृतां व्यवस्थां स हि भोजनस्य ।
जानाति विष्णुर्न परोऽस्ति वेत्ता नमन्ति गायन्त्यमिताशनं तन् ॥१९४॥
सर्वे हि तृप्यन्ति यथा स्वशक्ति जीवा मृता वा किमु यद्गता वा ।
परन्तु मृत्युर्न हि याति तृप्तिं लोकेऽस्ति मृत्युर्ह्यमिताशनोऽतः ॥१९५॥

एवं कृत्वा सर्वव्यापकत्वममिताशनस्य ।

उद्भवः—३७३

उद्=उच्चैर्भवतीत्युद्भवः सूर्यः । सूर्यो ह्युच्चैर्भवन् सवण दृश्यते । अन्तर्भावितण्यर्थश्चायमुद्भवशब्दो भगवन्तमभिधत्ते, उच्चैर्भावयतीत्यर्थः । उद्भवत्यस्मादिति वोद्भवः । एवञ्च य उद्भवति, यस्मादुद्भवति यश्चोद्भावयतीति त्रयोऽर्थाः संगृह्यन्ते, तथा च प्रत्येकं वस्तु स्वोपादानादुद्भवद्यथाव्यवस्थं भगवताद्भाव्यत, इति भगवान् विष्णुरुद्भव उच्यते । लोकेऽपि च पश्याम उपस्थद्वारेण मातुरुद्भवन्तं गर्भमपानवायुरुद्भावयति धात्र्यादयो वोद्भावयन्ति=ग्राकर्षन्तीति । ग्रत एवं वक्तुं शक्यते यदुद्बुभूषुरपि गर्भो दशमासावधि भगवता सुरक्षितो नियन्त्रितश्च गर्भाशये

द्वन्द्व के चालु रहने से मनुष्य मनुष्यों का भी संख्यान=गणन नहीं कर सकता । इसमें "मां हवन्ते पितरन्न जन्तवो" इत्यादि मन्त्र प्रमाण है ।

भाष्यकार इस नामार्थ के भाव को इस प्रकार प्रकट करता है—

इस ग्रपरिमित जीवराशि के भोजनार्थ की हुई भोजन व्यवस्था को केवल भगवान् जानता है, दूसरा कोई जानने वाला नहीं है. इसलिये विज्ञ पुरुष इस ग्रमिताशन भगवान् का नमस्कार पूर्वक गान (स्तवन) करते है ।

उद्भवः—३७३

उद्भव नाम जो ऊंचे को (ऊपर को) जाता है उसका है । यह सूर्य का नाम इसलिये है कि वह ऊंचे ऊपर को जाता हुग्रा सब से देखा जाता है । किन्तु यहां उद्भव शब्द में ग्रन्तर्भावित ण्यर्थ भू धातु है, इस से भगवान् का ग्रभिधान होता है, यद्वा जिससे उद्भव हो ग्रर्थात् जिससे प्रकट हो, उसका नाम उद्भव है । इस प्रकार उद्भव शब्द के तीन ३ ग्रर्थ होते हैं, जो उद्भूत होता है, जिस से होता है, या जो उद्भव करता है । प्रत्येक वस्तु ग्रपने ग्रपने उपादान कारण से उद्भूत होती है तथा भगवान् विष्णु उद्भावन करता है, उद्भावन करने से ही भगवान् का नाम उद्भव होता है । लोक में भी देखते हैं हम ग्रपनी जननी की उपस्थेन्द्रिय द्वारा उद्भूत होते हुए गर्भ को, ग्रपान वायु उद्भावित करता है,यद्वा धात्री (धाई) ग्रादि उसका उद्भावन=ग्राकर्षण करती हैं । इसीलिये ऐसा भी कहा जा सकता है कि ऊपर को ग्रानेवाला भी गर्भ दश मास पर्यन्त भगवान् के द्वारा सुरक्षित तथा नियन्त्रित

तिष्ठति प्रलय इव । दशमे मासि चोद्भवति स्वमात्रिच्छाप्रेरितः । अतो यथोद्भवन् सूर्यं उद्भव उच्यते तथा प्रत्येकं वस्तु स्वयोनेरुद्भवति मातुरिच्छया भगवांश्चोद्भावयति । सार्वत्रिको ह्येष नियमस्तं भगवन्तं सर्वव्यापकं व्यनक्ति प्रत्यक्षिकमिव । यतो हि भगवान् लक्षणैर्लक्ष्यतेऽत एव च तस्य प्राग्व्याख्यातं सर्वलक्षणलक्षण्य इति नाम सूपपन्नं भवति । पृथिव्या उद्भवद्बीजं यावत्पृथिव्यामदृश्यं तिष्ठति, तावदव्यक्तधर्मा भगवान् तत् स्वकेन व्यवस्थापननियमेन गत्या युनक्ति, एतस्यैव नाम (कायकल्प) इति भवति, कायस्य कल्पः=सामर्थ्यं, तदुद्भवाय क्रियमाण उपचारो वा, बीजमेतेनोपचारेण स्वक्षुपात्मकमिव शरीरं प्राप्तं भवति—इति काये सामर्थ्याधानेन कायस्य नवनिर्माणमिव कायकल्प इत्युच्यते । यथा कश्चिद् भ्रमिनामा जन्तुः स्वनिसर्गज्ञानेन मृत्सद्म निर्माय तत्र कृतनिखाते कञ्चिज्जीवन्तं तृणजलौकोनामानं जन्तुमानीय निधत्ते मृत्सद्मनो मुखञ्च पुनः पिधत्ते । एवञ्च स तृणजलौकाजन्तुर्भ्रमिरूपगुणसम्पत्सम्पन्न उड्डयते । एवमाचार्योऽपि शिष्ये वर्चोरूपं सामर्थ्यमाधातुं स्वान्तःकरोति =उपनयतीत्यर्थः । तथा च वेदे 'आचार्यः कृणुते गर्भमन्तः'' 'तं जातं द्रष्टुमभिसंयन्ति देवाः'' इति च संगच्छते । अत एवेदमपि सङ्गतं भवति "तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमाः । तुच्छेनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम् । सर्वाङ्गसमुदितमेकमजायत=प्रकाशं प्राप्नवदित्यर्थः । तस्य च कृतव्यवस्थस्य सत्यधर्मपरायणस्य भगवतो महिमा सर्गादिद्यावधि गूढोऽभूदस्ति भविष्यति चासर्गान्तम् ।

प्रलय काल के समान गर्भाशय में रहता है और दशमे मास में माता की इच्छा से प्रेरित होकर बाहर आजाता है । इसलिये जिस प्रकार उद्भूत होता हुआ सूर्य, उद्भव नाम से कहा जाता है, उसी प्रकार प्रत्येक वस्तु अपनी योनि से उद्भूत तथा भगवान् के द्वारा उद्भावित=प्रकट किया हुआ उद्भव नाम से कहा जाता है । यह सार्वत्रिक नियम उस सर्वव्यापक भगवान् को प्रत्यक्ष के समान बोधित कर रहा है । भगवान् का बोध लक्षणों से होता है, इसीलिये भगवान् का सर्वलक्षणलक्षण्य नाम सङ्गत होता है । पृथिवी से उत्पन्न होने वाला बीज जब तक पृथिवी में अदृश्य रूप से रहता है, तब तक अव्यक्तरूप भगवान् ही उसे अपने व्यवस्था नियम से गतिशील बनाता है, इसी का नाम कायकल्प है । काय=शरीर के कल्प=सामर्थ्य का अथवा उसके लिये क्रियमाण उपचार का नाम है । इसी उपचार से बीज अपने क्षुपरूप शरीर को प्राप्त करता है । काय में सामर्थ्य का आधान=स्थापन करके,जिसके द्वारा शरीर का नवनिर्माण होता है,उस का नाम कायकल्प है । जैसे कोई भ्रमर नाम का जन्तु अपने स्वभावसिद्ध ज्ञान से मिट्टी का गृह बनाकर उस में किसी कीट को लाकर रख देता है तथा उस मृतिकागृह के द्वार को आच्छादित कर देता है, इस प्रकार वह तृणजलौक नाम जन्तु भ्रमि जन्तु के गुणरूपसम्पत्ति से सम्पन्न होकर उड़ जाता है । इसीप्रकार गुरु अपने शिष्य में सामर्थ्य का आधान करने के लिए उसे उपनीत करता है, अर्थात् उसे यज्ञोपवीती करके अपने पास रखता है । गुरु शिष्य विषयक यह भाव इस "आचार्यः कृणुते गर्भमन्तः" तथा "तं द्रष्टुमभिसंयन्ति देवाः" मन्त्र से प्रमाणित है । इसी से "तम आसीत्तमसा गूढमग्रे" इत्यादि मन्त्रोक्त भी सङ्गत होता है । अर्थात् वह सर्वाङ्गसमुदित रूप से प्रकाश में आगया । उस सत्यधर्मपरायण व्यवस्थापक भगवान् का महत्त्व, सृष्टि से आजतक गूढ रहा है, तथा सर्ग के अन्त तक इसी प्रकर गूढ

मन्त्रलिङ्गञ्च—

"उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥

भवति चात्रास्माकम्—

सूर्यो यथेहोद्भवतीह नित्यं जीवस्तथेहोद्भवतीह नित्यम्।
य उद्बुभूषोः कुरुते व्यवस्थां ण्यन्तार्थगम्यं तमनक्ति सर्वम् ॥१९६॥

अनक्ति=व्यनक्ति प्रकाशयतीत्यर्थः।

एतेन व्याख्यानेन विष्णोः सर्वभूतभवोद्भवोऽपि नाम व्याख्यातं भवति।

उक्तञ्चात्रैव—

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम ॥

विष्णुसहस्रनाम श्लोक ७

क्षोभणः—३७४

क्षुभ सञ्चलने धातोर्णिजन्ताच्छुद्धाद्वा बाहुलकात् कर्तरि ल्युट्, योरनः, क्षोभणः। क्षोभयतीति क्षोभणः। क्षोभयति सर्वं चराचरमिति क्षोभणो विष्णुः।

अत्र मन्त्रलिङ्गञ्च—

"क्षोभणश्चर्षणीनाम्"

तथा सूर्योऽपि क्षोभणः स हि दक्षिणोत्तरगत्या विश्वं क्षुभ्नाति। अथापि स सर्वस्य जगत आत्मा तथा च वेदः "सूर्य आत्मा जगतस्तस्थुषश्च"। लोकेऽपि च पश्यामः

रहेगा। नामार्थ के भाव में "उदु त्यं जातवेदस" मित्यादि मन्त्र प्रमाण रूप है।

भाष्यकार इस नाम के भाव को अपने पद्य द्वारा इस प्रकार प्रकट करता है=

जैसे सूर्य का नित्य उद्भव होता है उसी प्रकार जीव का भी नित्य नूतन रूप से उद्भव होता है। किन्तु इन सब सूर्य आदि उद्बुभूषुओं के उद्भव की व्यवस्था करके जो इन्हें उद्भावित करता है उसे ही यह सब उद्भूत प्रकट करता है। अनक्ति का अर्थ प्रकट करता है, ऐसा होता है। इसी व्याख्यान से विष्णु के सर्वभूतभवोद्भव नाम का भी व्याख्यान हो जाता है। सर्वभूतोद्भव नाम का 'निर्देश ब्रह्मण्यं सर्वधर्मज्ञ" मित्यादि विष्णुसहस्र नाम ७वें श्लोक में किया है।

क्षोभणः ३७४

सञ्चलनार्थक ण्यन्त अथवा शुद्ध क्षुभ धातु से बाहुलक से कर्ता अर्थ में ल्युट् प्रत्यय करने से क्षोभण शब्द सिद्ध होता है। जो सब चराचर का क्षोभण=सञ्चलन करता है, उसका नाम है क्षोभण। यह विष्णु का नाम है, क्योंकि समस्त विश्व का क्षोभ उसी से होता है जैसा कि "क्षोभणश्चर्षणीनाम्" इत्यादि वेद कहता है। सूर्य का नाम भी क्षोभण है, क्योंकि वह भी अपनी दक्षिणोत्तर रूप गति से विश्व का क्षोभ करता है। सकल संसार का आत्मा भी सूर्य ही है, जैसा कि "सूर्य आत्म जगतस्तस्थुषश्च" इत्यादि मन्त्र में वर्णन है।

समुद्रतरंगवत् सर्वमिदं विश्वं क्षोभि सत्परस्परं क्षोभयत् क्षोभणमुच्यते यथावस्थञ्च जीवनकालं निर्वहति। एवं भगवान् स्वक्षोभणरूपेण गुणेन सर्वं व्यश्नुवानो क्षोभण उक्तो भवति। लोकेऽपि च पश्यामः—

शरीरान्त्राणि जग्धमन्नं क्षोभयन्ति, सर्वशरीरेन्द्रियाणि पुष्णन्ति, जीवयन्ति च प्राणिनः।

भवति चात्रास्माकम्—

स क्षोभणो विष्णुरिमान् समग्रान् संक्षोभयन् लोकगणान् बिभर्ति।
तथा यथान्त्राणि च जग्धमन्नं संक्षोभ्य पुष्णन्ति समस्तगात्रम् ॥१९७॥

अन्त्राणां बहुत्वं स्थानभेदात्, तथा बहुविधकार्यप्रकाशकत्वाच्च भवति।

देवः—३७५

दिवु धातोः पचाद्यचि देवः।

दीव्यति=क्रीडति लोकोत्पत्तिक्षयरूपेण क्रीडनकेनेति देवः।

विजिगीषते वा समस्तं ग्रहोपग्रहयुक्तमिदमिति वा देवः।

व्यवहरति जगता, व्यवहारयति वा तदिति देवः।

यद्वा विद्योतते स्वसत्तया, सत्तावच्च विद्योतयति वा सः स्तूयमानः स्तुत्यो भवति सर्वगश्च सर्वं गमयति।

लोक में भी हम देखते हैं, खाये हुए अन्न को शरीर का अन्त्रजाल क्षुभित करता है, सब शरीर की इन्द्रियों को पुष्ट करता है तथा प्राणियों को जीवन देता है।

इस नाम के भाव को भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम क्षोभण है, क्योंकि वह समस्त लोकों का क्षोभ करके उन का भरण पोषण करता है, उसी प्रकार, जिस प्रकार अन्त्र जाल खाये हुए अन्न का क्षोभ करके समस्त गात्र का पोषण करता है।

अन्त्रों का बहुत्व, स्थानभेद से तथा बहुविध कार्यों का प्रकाशक होने से होता है।

देवः—

क्रीडाद्यर्थक दिवु धातु से पचादिलक्षण अच् प्रत्यय करने से देव शब्द सिद्ध होता है। लोकों की उत्पत्ति क्षय रूप खिलौनों से खेलता है उसका नाम देव है। अथवा इस समस्त ग्रहोपग्रहयुक्त विश्व को जो जीतना चाहता है, उसका नाम देव है। अथवा जो जगत् से व्यवहार करता है अर्थात् जगत् के शुभाशुभ कर्मानुसार शुभाशुभ फल देता है, या उसे व्यवहारसमर्थ बनाता है, उसका नाम देव है। अथवा जो अपनी सत्ता से स्वयं दीप्यमान होता हुआ इस सत्स्वरूप समस्त विश्व को दीप्त करता है, उसका नाम देव है। अथवा जो सब से स्तुत तथा सर्वगत हुआ सब को गति देता है, उसका नाम देव है।

मन्त्रलिङ्गञ्च—

"अज एकपाद्देवः" ऋग्।

तथा "देव ! सवित ! प्रसुव यज्ञं प्रसुव यज्ञपतिमित्यादि" ।

भवति चात्रास्माकम्—

देवः स्वयं स्वेन गुणेन युक्तो जगद् विधत्ते बहुभूतिमत् सः ।
तं देवमीड्यं सवितारमर्च्यं नरा नमोभिर्बहुधा स्तुवन्ति ॥१९८॥

श्रीगर्भः—३७६

श्रीशब्दो धनवचनो विभूतिवचनो वा । इदं हि विश्वं भगवतः सर्वान्तर्यामिनो विराड्रूपं शरीरमुक्तं भवति । स वेदं वैविध्येन राजमानं विश्वरूपं शरीरं गर्भमिव स्वान्तर्दधातीति कृत्वा स श्रीगर्भ उक्तो भवति । अथवान्तर्यामित्वादस्य श्रीरूपस्य विश्वस्य गर्भ इव श्रीगर्भो विष्णुरुक्तो भवति । तथा च मन्त्रलिङ्गम्—

"शरीरं ब्रह्म प्राविशत्" अथर्व ।

अमुथेदं भगवान् सूर्योऽपि उद्यन् विश्वस्य समस्तां श्रियं तिग्मतेजा गर्भं इव स्ववशे कुरुते, निगृह्य च तामन्तरिक्षेण याति । अत एव च रात्रौ श्री पद्म इव निःश्रीका भवति—अतः सूर्योऽपि श्रीगर्भ उच्यते, जगतश्चैतस्यात्मा सूर्य एव, तथा च मन्त्र—

"सूर्य आत्मा जगतस्तस्थुषश्च"

इस भगवत नाम को "अज एकपाद्देवः" इत्यादि ऋङ्मन्त्र प्रमाणित करता है तथा देवः सवितः प्रसुव" इत्यादि मन्त्र भी इस में प्रमाण हैं।

भाष्यकार इस नाम के भाव का प्रकाशन अपने पद्य द्वारा इस प्रकार करता है—

द्युति स्तवन विजिगीषा आदि गुणों से युक्त भगवान् देव नामक विष्णु इस जगत् को भी अपनी विविध प्रकार की विभूति=ऐश्वर्य आदि सम्पत्ति से युक्त करता है उस सब के पूज्य तथा स्तुत्य सविता देव की, महापुरुष नमस्कार पूर्वक वचनों से स्तुति करते हैं।

श्रीगर्भः—३७६

श्री शब्द हिरण्यादि रूप धन या विभूति=ऐश्वर्य आदि सम्पत्ति का वाचक है। यह सकल विश्व भगवान् सर्वान्तर्यामी विष्णु का विराट् शरीर है। भगवान् इस विविध प्रकार से भासमान विश्वसंज्ञक शरीर को गर्भ के समान अपने अन्दर धारण करता हुआ श्रीगर्भ नाम से कहा जाता है, अथवा सर्वान्तर्यामी होने से श्री रूप विश्व में गर्भ के समान रहता है, इसलिये उसका नाम श्रीगर्भ है। इस अर्थ की पुष्टि "शरीरं ब्रह्म प्राविशत्" अथर्व मन्त्र से होती है। इसी प्रकार प्रकृष्ट तेजवाला भगवान् सूर्य भी उदित होता हुआ विश्व की समस्त श्री=शोभा को अपने वश में कर लेता है तथा उसको अपने वश में करके अन्तरिक्ष मार्ग से जाता है। इसीलिये यह विश्व की श्री=शोभा रात्रि में पद्म के समान निःश्री=अर्थात् शोभा रहित, शोभा के अभाव रूप में परिणत हो जाती है इसीलिये सूर्य का नाम भी श्रीगर्भ है। इस सकल जगत् का आत्मा भी सूर्य ही है जैसा कि 'सूर्य आत्मा जगतस्तस्थुषश्च' इत्यादि

लोकेऽपि च पश्यामः—समनस्केन्द्रियशरीरस्य विभूतीर्गर्भे दधज्जीवात्मा श्रीगर्भो भवति, मृतशरीरे श्रियः क्षयस्य दर्शनात्।

मन्त्रलिङ्गञ्च—

"हिरण्यगर्भः समवर्त्तताग्रे"

इत्यादि। धनार्थिनो धनवन्तं श्रयन्त इत्यतो हिरण्यपर्यायेऽपि श्रीशब्दः। अग्निरपि श्रीगर्भ उक्तो भवति "अग्निर्नो वनते रयिम्" तथा श्रियमिच्छेद्-हुताशनात्" इत्यादिमन्त्रलिङ्गात्।

भवन्ति चात्रास्माकम्—

श्रीगर्भ उक्तः स उ विश्वयोनिः श्रीस्तत्र गुप्ता स उ वा कुबेरः।
स विश्वमात्रं नियतार्थबद्धं, युनक्ति तत् काम्यमनोविकारैः ॥१९९॥

तदिति विश्वम्।

यस्यास्ति सव्ये स उ विश्वमूर्तिः स एव दाता स उ वा धनेशः।
यथा सगर्भा यदुपैति धाम स्वगर्भगर्भं कुरुते गृहं तत् ॥२००॥
सहस्रिणो वाप्य लक्षिणो वा प्रवेशमात्रेण गृहं चकास्ति।
तथा स शम्भुः कमनीयकान्त्या श्रिया सदाभासयतीह विश्वम् ॥२०१॥

मन्त्र से प्रतिपादित है। लोक में भी हम देखते हैं, मन और इंद्रियों से युक्त शरीर की विभूतियों को गर्भ में धारण करता हुआ जीवात्मा, श्रीगर्भ होता है, क्योंकि मृतशरीर में श्री का अभाव हो जाता है। इस अर्थ की पुष्टि "हिरण्यगर्भः" इत्यादि मन्त्र से होती है। सब ही धन की इच्छावाले धनी का आश्रय लेते हैं, इसी से हिरण्य को भी श्री कहते हैं। "अग्निर्नो वनते रयिम्" तथा "श्रियमिच्छेद्धुताशनात्" इत्यादि मन्त्रों के प्रामाण्य से अग्नि को भी श्रीगर्भ नाम से कहा जाता है।

इस पूर्वोक्त भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

वह विश्व का योनि=कारणरूप भगवान् श्रीगर्भ नाम से कहा जाता है, क्योंकि उसमें श्री निवास करती है, यद्वा वह श्री का निवास होने से श्रीगर्भ होता हुआ, कुबेररूप है, वह ही इस नियतार्थों=अपने आवश्यक उद्देश्यों से बद्ध समस्त विश्व को, इच्छा के विषय=अर्थात् अभिमत मनोविकारों=मनोरथों से युक्त करता है। यहां तत् शब्द से विश्व का ग्रहण होता है।

वह विश्वमूर्ति=सर्वरूप भगवान् जिस के सव्ये=दायें अनुकूल है, वही दाता अथवा धनेश=धनी है। जैसे सगर्भा स्त्री जिस स्थान में जाती है, उस ही स्थान को अपने गर्भ से सगर्भ कर देती है

जैसे किसी लक्षपति आदि के केवल प्रवेश मात्र से गृह शोभान्वित हो जाता है उस ही प्रकार अन्तर्यामिरूप से प्रविष्ट भगवान् से, यह सम्पूर्ण विश्व भासमान है।

परमेश्वरः—३७७

परं मिमीत इति परमः, ईशनशील ईश्वरः "स्थेशभासपिसकसो वरच्" इति पा० ३-२-१७५। सूत्रेण वरच् प्रत्यय ईश्वरः। परमश्चासावीश्वरः परमेश्वरः। यद्वा परा=उत्कृष्टा, मा=शोभा यस्य स परमः स चासावीश्वरः परमेश्वरः।

अयमत्राभिप्रायः—

भगवान् स्वयमीश्वरः सन् परं=औपाधिकभेदभिन्नं जीवात्मानमपि तदायत्त-वस्तुन ईश्वरं विधत्त इति स परमेश्वर उच्यते। अर्थाद्येऽत्र स्वविषयाधिकृता अधीश्वरास्ते सर्वे भगवता विहिता, यद्वैवमवगन्तव्यं न हीश्वरत्वं प्रयत्नसाध्यं किन्तु भगवत्कृपालभ्यमिति। तथा च लोकेऽपि पश्यामः चक्षुर्दर्शनाधिपति, श्रवणेन्द्रियं श्रवणाधिपति, एवं शेषाणीन्द्रियाणि यथानियतविषयकमाधिपत्यं लभन्त इति। तथैव बुद्धिः सन्दिग्धविषयनिर्णायिकेति बोधनाधिपतिशब्दव्यवहार्या। षड्जस्वरस्य मयूरोऽधिपतिः। ऋषभस्वरस्याधिपतिर्वृषभ इत्यादि। अन्येषामपि स्वराणामधिपतयो नियताः सन्ति। जगतः समष्ट्यात्मा सूर्यो व्यष्ट्यात्मनो जीवस्याधिपतिः। जीवश्च शरीराधिपतिः। उक्तञ्च वेदे—"सूर्य आत्मा जगतस्तस्थुषश्च"। एवं सनातसमेषा-मीश्वराणामधिपतिभूतस्तथा तेषां नियन्ता सर्वव्यापको भगवान् विष्णुसंज्ञ एव

परमेश्वरः—३७७

दूसरे का मान=परिमिति करनेवाला, अथवा उत्कृष्ट शोभावाला परम शब्द से कहा जाता है। ईश्वर शब्द ईश इस ऐश्वर्यार्थक धातु से "स्थेशभासपिसकसो वरच्" इति पा० ३।२।१७२। से वरच् प्रत्यय करने से सिद्ध होता है। जो ईशनशील है अर्थात् दूसरों को अपने प्रभाव से आक्रान्त करने का है स्वभाव जिसका, उसका नाम है ईश्वर। जो परम है और ईश्वर है, उसका नाम परमेश्वर है। इस परमेश्वर नाम का वास्तविक अभिप्राय इस प्रकार है—

भगवान् स्वयं परमेश्वर है, और वह औपाधिक भेद से भिन्न पर=जीवात्मा को, उसकी अधिकृत वस्तुओं का ईश्वर बनाता है, अर्थात् जो यहां जगत् में अपने अपने विषयों में अधिकृत अधीश्वर हैं, उन सब को भगवत् शक्ति से ही अधीश्वरत्व प्राप्त हुआ है। अथवा यों कहिये, अधीश्वरत्व अपने प्रयत्न से साध्य नहीं, किन्तु भगवान् की कृपा=सामर्थ्य से प्राप्त होता है। ऐसा ही हम लोक में भी देखते हैं, जैसे चक्षु इन्द्रिय दर्शन का अधिपति तथा श्रोत्रेन्द्रिय श्रवण का अधिपति, तथा और सब ही इन्द्रियां अपने अपने विषय के अधिपति होते हैं। बुद्धि, सन्दिग्ध विषय की निर्णायिका होने से बोधनाधिपति शब्द से व्यवहृत होती है षड्ज स्वर का अधिपति मयूर होता है तथा ऋषभस्वर का अधिपति वृषभ (बैल) होता है और भी जितने स्वर हैं, उन सब के अधिपति नियत हैं। जगत् के व्यष्ट्यात्मा जीव का अधिपति, जगत् का समष्ट्यात्मा सूर्य है और जीव का आधिपत्य शरीर पर है। ऐसा ही "सूर्य आत्मा जगतस्तस्थुषश्च" इत्यादि वेद मन्त्र में अभिधान है। इस प्रकार सनातन काल से सब ईश्वरों का अधिपति इन सब का नियन्ता तथा सर्वव्यापक भगवान् विष्णु, परमेश्वर

परमेश्वरः। एवं सर्वत्रोहितव्यम्। यच्चेदं मनुष्याणां मनुष्यहेतुकमीश्वरत्वं, तस्मिन् भगवान् सत्यधर्मरूपेण सद्भावरूपेण वा यावत्तिष्ठति, तावन्न तद् विहृतं भवति। एवं सर्वस्य नित्यस्यानित्यस्य चेश्वरः स भगवान् परमेश्वर उक्तो भवति।

भगवता मृत्युतत्त्वमाध्यमेन शरीरादाकृष्यमाणस्य जीवस्याधिपत्यं च्यवते, किन्तु भगवत ऐश्वर्यंन्न ततः कदाचिच्च्यवत इत्यतः स परमेश्वरः।

मन्त्रलिङ्गञ्च—

"इन्द्रो राजा जगतश्चर्षणीनाम्"।

भवन्ति चात्रास्माकम्—

य ईश्वरो यस्य सनात् स्वकस्य यस्तं मिमीते परमेश्वरः सः।
एवं स विष्णुर्जगदश्नुवानो रूपं समञ्जन् सकलं बिभर्ति ॥२०२॥

तथा च वेदः—"तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।

करणम्—३७८

क्रियतेऽनेनेति करणम्। डुकृञ् करणे धातेः करणे ल्युटि करणपदसिद्धिः। सर्वविधप्राणिशरीरे सर्वविधक्रियासाधनीभूतानामिन्द्रियाणामेव प्राधान्यं, तान्यपि च सर्वाणि, विनेन्द्रियेशेन मनसा न क्रियासमर्थानि भवन्त्यतः प्रधानं करणं मन एव।

नाम से कहा गया है। इसी प्रकार सर्वत्र समझना चाहिये।

मनुष्य भी मनुष्यों के अधिपति होते हैं तथा उन मनुष्याधिपतियों में भगवान् सत्यधर्म रूप, या सद्भाव रूप से जब तक रहता है, तब तक उनका आधिपत्य अविचल रहता है, अर्थात् समाप्त नहीं होता। इस प्रकार नित्य या अनित्य सब पदार्थों का ईश्वर, वह भगवान् विष्णु ही परमेश्वर है। जैसे भगवान् के द्वारा मृत्यु माध्यम से शरीर से निकाले हुये जीवात्मा का आधिपत्य समाप्त हो जाता है वैसे भगवान् का आधिपत्य कभी समाप्त अर्थात् खतम नहीं होता। इस अर्थ का प्रतिपादक "इन्द्रो राजा जगतश्चर्षणीनाम्" इत्यादि मन्त्र है।

इस नामार्थ को भाष्यकार अपने पद्य द्वारा इस प्रकार प्रकट करता है—

चिरकाल तक अपने अधिकृत वस्तुओं के ईश्वरों का जो निर्माण करता है, अर्थात् जिस की कृपा से उन्हें ईश्वरत्व मिलता है उसका नाम परमेश्वर है।

इस प्रकार सब जगत् क व्यापन करता हुआ, तथा अपने परमेश्वर रूप को प्रकट करता हुआ, भगवान् सब का धारण पोषण करता है।

करणम्—३७८

जिस के द्वारा किया जाये, उसका नाम करण है। डुकृञ् करणे धातु से करण अर्थ में ल्युट् प्रत्यय करने से करण पद की सिद्धि होती है। सब प्राणी शरीरों में, सब प्रकार की क्रियाओं के साधनभूत, इन्द्रियों का प्राधान्य होता है, वे इन्द्रियां भी अपने नियन्ता मन के बिना क्रिया करने में समर्थ नहीं होती इसलिये प्रधान करण मन ही है, तथा मन की

मनश्च प्रत्येकं प्राणिषु स्थितं भवति। भगवता विधात्रा यथेन्द्रियाणि विविधानि विहितानि तदनुसारं तद्बोधोपपत्तये मनुष्याणां कार्यसिद्धिमुद्दिश्य तत्साधनभूतानि भूयांस्युपकरणानि निर्मितानि, तानि चोपकरणानि, पशुपक्ष्यादीनां मुखचञ्चुपाद-शृङ्गादिपर्यालोचनजेन ज्ञानेन मनस उपज्ञारूपाणि। मन्त्रलिङ्गञ्च—"कामस्तदग्रे समवर्तत" कामः=इच्छा च मनोधर्मो मन एव। अतो वक्तु शक्यते मनस्तदग्रे समवर्ततेति। एवं मन एव सर्वेषु करणेषु प्रधानमिति मनः करणं मनःप्रधानकरणके च जगति सर्वत्र व्याप्तो भगवान् विष्णुः करणाभिधानः तथा च

मन्त्रलिङ्गानि—"येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। "येन यज्ञस्तायते सप्त होता" तथा "येन द्यौरुग्रा पृथिवी चान्तरिक्षं येन पर्वताः प्रदिशो दिशश्च, येनेदं सर्वं जगद्व्याप्त—तन्मे मनः शिवसङ्कल्पमस्तु। ऋक्

भवतश्चात्रास्माकम्—

कामो मनः सर्वसमिहितार्थे प्रजाजनानां कुरुते सहायम्।
आत्मा नियुंक्ते तदु चार्थसिद्ध्यै लोके प्रसिद्धः करणेन विष्णुः ॥२०३॥
कामो हि सङ्कल्पविकल्पयुक्तं मनो, जगद्भेदभिदाप्रभिन्नम्।
व्यनक्ति विष्णुं करणेन नाम्ना व्याप्तं मनः स्यूतमिदं हि तेन ॥२०४॥

स्थिति प्रत्येक प्राणी में होती है। भगवान् विधाता ने जैसे इन्द्रियों का वैविध्य किया है, उस ही प्रकार उन की बोधसिद्धि तथा मनुष्यों की उद्देश्य सिद्धि के लक्ष्य से उपकरण=भोग्य विषय भी विविध प्रकार के बनाये हैं, वे विषय, पशु, पक्षी आदि के मुख चञ्चु पाद, शृङ्ग आदि के विषय में विशेष विचार करने से उत्पन्न हुआ मन का उपज्ञा रूप अर्थात् मन की ही प्राथमिक सूझ है।

इसी अर्थ को "कामस्तदग्रे समवर्तत" इत्यादि यजुर्वेद मन्त्र पुष्ट करता है। काम=इच्छा का नाम है, और वह मन का धर्म होने से मन ही है। इसलिये "कामस्तदग्रे" के स्थान में "मनस्तदग्रे" ऐसा भी कहा जा सकता है। इस प्रकार सब करणों में प्रधान करण मन ही है, और मनोरूप प्रधान करणवाले जगत् में सर्वत्र व्याप्त भगवान् विष्णु का नाम करण है। यहां "येन कर्माण्यपसो मनीषिणः' इत्यादि मन्त्र प्रमाण है।

इस नाम के भाव को भाष्यकार इस प्रकार व्यक्त करता है—

सब प्रजाजनों के अभीप्सित अर्थ की सिद्धि में काम=मन ही करण रूप से सहायता करता है, क्योंकि आत्मा उसे अर्थसिद्धि के लिये नियुक्त करता है, इसलिये भगवान् विष्णु करण नाम से प्रसिद्ध है।

सङ्कल्प विकल्पयुक्त काम ही मन है, तथा वह जगद् भेद से भिन्न भिन्न है, और सर्वत्र जगत् में ओत-प्रोत होकर सर्वत्र व्याप्त भगवान् को करण नाम से व्यक्त कर रहा है।

कारणम्—६७९

कारणं, हेतुर्निमित्तं, प्रयोजनमित्यनर्थान्तरम् । अथ च कार्यनियतपूर्ववृत्ति, कारणमिति न्यायोक्तकारणलक्षणानुसारं, कार्याज्जगतो नियता पूर्ववृत्तिता=पूर्वं—भावो यस्य स भगवान् कारणम् । अर्थाद् भगवद्रूपकारणावलम्बिकैव भगवद्रूपकार्योत्पत्तिरतो भगवान् विष्णुरेवैतस्य विविधविचित्ररचनस्य जगतः कारणमिति । लोके च कारणशब्दार्थे निमित्तहेतुप्रयोजनादिशब्दा अपि प्रयुज्यन्ते, तथा चेत्यमत्रोपपत्तिः—

जीवानां हितमुद्दिश्य ब्रह्मा, विचित्रमिदं जगद्रचितवान् । कार्याच्च प्राक् कारण—स्थितिरवश्यमभ्युपेतव्या, कारणञ्चेह जीवहितं तदेव च निमित्तं, हेतुः प्रयोजनादि । सर्वव्याकत्वाद् भगवानेव च निमित्तादिरूपेण सर्वत्र व्याप्त इति स एव सर्वस्य सर्वथा कारणं सत् कारणशब्देनाभिधीयते ।

मन्त्रलिङ्गञ्च—

याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः" यजुः ।

भवति चात्रास्माकम्—

निमित्तमुद्दिश्य समस्तभूतं मनःप्रचारं कुरुते क्रियासु ।
तत्कारणं सर्वजगत्प्रसृप्तं ब्रह्मैव तत् त्यं कुरुते च सार्थम् ॥२०५॥

कारणम्—३७९

कारण हेतु, निमित्त, प्रयोजन ये सब समानार्थक शब्द हैं तथा कार्य से पहले अवश्य होने रूप न्यायलक्षणानुसार कार्यरूप जगत् से पहले=पूर्ववर्ती होने से भगवान् का नाम कारण है, अर्थात् कारण रूप भगवान् को ही अवलम्ब=आश्रय बनाकर जगत् की उत्पत्ति होती है, इसलिये भगवान् विष्णु का नाम कारण है । लोक में कारण शब्द के ही अर्थ में निमित्त हेतु प्रयोजन आदि शब्द प्रयुक्त किये जाते हैं । इस की उपपत्ति इस प्रकार है, सब जीवों के हित के उद्देश्य से भगवान् ने इस विचित्र जगत् की रचना की है, और इस जगत् रूप कार्य से पूर्व कारण की स्थिति अवश्यंभावी है कारण जीवों का हित है, उसे ही निमित्त हेतु प्रयोजन आदि रूप से कहा है, तथा सर्वव्यापक होने से भगवान् ही निमित्त आदि रूप से सर्वत्र व्याप्त है । इसलिये भगवान् ही सब का कारण होने से, कारण शब्द से कहा जाता है । इस कारण नाम के अर्थ की पुष्टि "याथातथ्यतोऽर्थान्" इत्यादि यजुर्वेद मन्त्र से होती है ।

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है —

इस जगत् का सर्वस्वभूत मन, किसी प्रकार के निमित्त से ही विविध क्रियाओं में प्रचार भ्रमण करता है, अर्थात् नाना प्रकार की क्रियाओं को करता है, उसका कारण सर्वत्र व्यापक रूप से स्थित ब्रह्म ही है जो इस समस्त जगत् को सार्थक=अर्थों से युक्त करता है ।

कर्ता—३८०

करोतीति कर्ता। सामान्येन यः कश्चित् कार्यं करोति स तस्य कार्यस्य कर्ता भवति। यश्चापि कश्चिदन्यं प्रेर्य तेन किञ्चित् कारयति, सोऽपि कर्तृसंज्ञां लभते, यथा कश्चित् स्वयं पचनन्येन वा पाचयन् पाचकः पाककर्ता वाभिधीयते। एवम्मनोऽपि कामप्रेरितं तत्तदिन्द्रियस्रोतःसु वातं समुद्भाव्याणुना कालेन तास्ता नानाविधाः क्रियाः कारयति लभतेऽतः कर्तृसंज्ञाम्। तथैव भगवानपि प्रकृतिं प्रेर्य प्रकृत्या जगत् कारयन् कर्ता भवति स्वतन्त्रः सन्निति।

मन्त्रलिङ्गञ्च —

भवति चात्रास्माकम्—

स कारयन् सर्वमिदं प्रकृत्या कर्तेतिसंज्ञां लभते महेशः।
मनो विधत्ते विविधाः क्रियाश्च कामप्रणुन्नं करणैकबन्धु ॥२०६॥

विकर्ता—३८१

विशिष्टः कर्ता विकर्ता, विविधं वा करोतीति विकर्ता। सकल्पविकल्पात्मक हि मनस्तच्च स्वस्वरूपानुसारं विचित्रचित्ररमणीयं विविधं जगत् कल्पयति, प्रचारयति

कर्ता—३८०

स्वतन्त्रता से क्रिया को करने वाले का नाम कर्ता है। सामान्य रूप से जो कोई किसी कार्य को करता है, उस को उस कार्य का कर्ता कहते हैं। जो किसी अन्य के द्वारा भी कुछ कार्य करवाता है, उस को भी कर्ता कहते हैं। जैसे कोई स्वयं पकाता हुआ, अन्य से वा पकवाता हुआ पाचक या पाककर्ता नाम से कहा जाता है। इसी प्रकार मन, काम से प्रेरणा प्राप्त करके, इन्द्रिय स्रोतों में वायु का प्रादुर्भाव करके बहुत शीघ्र थोड़े ही समय में नाना प्रकार की क्रियाओं को करवाता है, इसलिये मन को कर्ता नाम से बोला जाता है। उस ही प्रककार भगवान् भी प्रकृति को प्रेरित करके प्रकृति से कार्य करवाता हुआ, स्वतन्त्र रूप से कर्ता होता है।

भाष्यकार इस भाव को अपने पद्य द्वारा इस प्रकार व्यक्त करता है।
सर्वेश्वर सर्वथा स्वतन्त्र भगवान् प्रकृति के द्वारा इस समस्त जगत् को करवाता हुआ, कर्तव्य को प्राप्त करता है इसी प्रकार काम से प्रेरित होकर मन भी इन्द्रियों की सहायता से नाना क्रियाओं को करता हुआ कर्त्तव्य को प्राप्त करता है, अर्थात् कर्ता नाम से कहा जाता है।

विकर्ता—३८१

किसी प्रकार की विशेषता से, या विविध रूप से कार्य को करता है, उसका नाम विकर्ता है।

मन का स्वरूप सङ्कल्प विकल्प रूप है और वह अपने स्वरूपानुसार विविध प्रकार के चित्रों, सौन्दर्यों या आश्चर्यों से युक्त इस जगत् को बनाता है तथा अपने विविध कर्तृत्व रूप

च स्वकं विविधकर्तृत्वरूपं धर्मं जगति। वैशिष्ट्यञ्च कर्तुरेतदेव यत्, स्वयमरूपोऽपि विलक्षणां बहुविधरूपसम्पन्नं जगद्विधत्ते। अत एव तद्विशिष्टकर्तृरूपं विविधकर्तृरूपं वा मनो, वृद्धिक्षययुक्तं स्वाधिष्ठानभूतं चन्द्रसंज्ञकं विष्णुं व्यनक्ति।

मन्त्रलिङ्गञ्च—

भवति चात्रास्माकम्—

मनो हि सङ्कल्पविकल्पयुक्तं विलक्षणं कर्म करोति नित्यम्।
कामानुविद्धो जगति प्रसृप्तो विष्णुर्विचित्रं कुरुते च विश्वम् ॥२०७॥

गहनः—३८२

गाहू विलोडने भौवादिको धातुस्ततो "बहुलमन्यत्रापि" इत्युणादिसूत्रेण युच् प्रत्ययो, योरनः, बाहुलकाद्ध्रस्वश्च गाह्यत इति गहनो, गाहत इति वा गहनः। सूर्यो ह्यन्तरिक्षेण गच्छन् प्रत्यक्षं सर्वं जगद्विलोडते।

मन्त्रलिङ्गञ्च—

"सविता भूत्वा गच्छति मध्यतो दिवम्" अथर्व।

यश्च यस्माद् बलवत्तरो दीर्घो वा भवति, स तं गाह्यं गाहते=विलोडयति, तथा च पश्यामो लोके बलवान् मनुष्यः पयः प्रमथति। अमुथैव सर्वव्यापको भगवान्

धर्म को जगत् में प्रचलित करता है। इस में कर्ता की विशिष्ठता यह ही है कि वह स्वयं रूपरहित होता हुआ भी, इस जगत् को विविध प्रकार के विलक्षण रूपों से सम्पन्न बनाता है इसीलिये विशिष्ट या विविध कर्तृरूप तथा वृद्धि क्षय युक्त यह मन अपने अधिष्ठानभूत चन्द्रसंज्ञक विष्णु को व्यक्त करता है—

इस भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है।

यह सङ्कल्प विकल्प रूप मन, सदा विलक्षण तथा विविध कार्यों को करता हुआ विकर्ता नाम से कहा जाता है। इसी प्रकार काम रूप प्रकृति शक्ति से अनुविद्ध=युक्त हुआ भगवान् विष्णु भी जगत् में व्याप्त होकर, नाना प्रकार के इस विलक्षण जगत् को बनाता है, इसलिये वह विकर्ता है।

गहनः—३८२

विलोडन=अवगाहनार्थक भवादिगणपठित गाहू धातु से "बहुलमन्यत्रापि" इस उणादि सूत्र से युच् प्रत्यय यु, को अन आदेश तथा बाहुलक से ह्रस्व करने से, गहन शब्द सिद्ध होता है। जिसका गाहन=विलोडन किया जाये या जो स्वयं कर्ता रूप से अवगाहन करे उस का नाम गहन है। अन्तरिक्ष मार्ग से जाता हुआ सूर्य सकल जगत् का विलोडन करता है, इसलिये सूर्य का नाम गहन है जैसा कि "सविता भूत्वा गच्छति मध्यतो दिवम्" इत्यादि अथर्व वेद मन्त्र में प्रतिपादित है। जो जिस से बलवान् होता है वह उस अपने से निर्बल का विलोडन करता है जैसा कि हम लोक में देखते हैं बलवान् मनुष्य दुग्ध का मन्थन=विलोडन करता है इसी प्रकार सर्वव्यापक भगवान् विष्णु विश्व का विलोडन करता हुआ गहन नाम से कहा जाता है।

विष्णुर्विश्वं गाहमानो गहन इत्युक्तो भवति, यद्वा सर्वस्य गाहनविषयोऽयं भगवान् तत्त्वरूपो गहन इत्युच्यते ।

भवति चात्रास्माकम्—

स गाहते विश्वमिदं समस्तं तथा यथा साधनसिद्धपाणिः ।
मथ्नाति मथ्यं बहुशोऽप्रमत्तो जन्यं मनोज्ञं कमनीयमीप्सुः ॥२०८॥

मनोज्ञम्=मनोभिन्नेन्द्रियागोचरमपि मनसा ज्ञातुमर्हमित्यर्थः । कमनीयम्=एषितव्यम्—इच्छाविषय इति । भूयश्च लोके पश्यामः- पृथिव्यां प्रसृतानि वृक्षमूलानि स्वगहनत्वरूपेण पृथिवीस्थपञ्चभूतसमुदायात् स्वगुणानुसारं रसं गृह्णन्ति स्वोद्गतपत्र-पुष्पफलादिभिरात्मानं विकासयन्ति । एष एव च क्रमः प्राणिशरीरान्त्राणां वर्तते । अन्त्राणि हि चतुर्विधं चर्व्यं पेयं चोष्यं लेह्यञ्चान्नं स्वेन गहनधर्मेण विलोड्य शरीरं पुष्णन्ति । य एष क्रमः सर्वत्र दृश्यते स सर्वव्यापकस्य भगवतोऽन्वाख्यानमात्रम् ।

यतो हि कार्यसमवायिनः कारणगुणा, अत एव भगवतो विष्णोर्गहनाख्यो गुणः समस्तविश्वसमवायी । एवम्बहुधा कविभिरूहनीयम् । तथा च समुद्रे वाडवाग्निः समुद्रमवगाहते । चक्षुर्दृश्यमवगाहते । शिल्पिकृतञ्च यन्त्रं यदुद्दिश्य विहितं, तदुद्देशम-

अथवा सब के अवगाहन का विषय होने से तत्त्वरूप भगवान् विष्णु को गहन नाम से कहते हैं ।

इस गद्योक्त भाव को भाष्यकार अपने पद्य से यों व्यक्त करता है—

भगवान् का नाम गहन इसलिये है कि वह इस समस्त विश्व का विलोडन=अवगाहन उसी प्रकार करता है, जिस प्रकार कोई साधनों में सिद्धहस्त बलवान् पुरुष किसी सुन्दर तत्त्वरूप वस्तु को प्राप्त करने की इच्छा से किसी वस्तु का सावधानी से मन्थन=विलोडन करता है । मनोज्ञ नाम उसका है जो मन से भिन्न अन्य इन्द्रियों से न जाना जा सके तथा केवल मन से ही जाना जा सके ।

कमनीय नाम इच्छा की विषयभूत वस्तु का है । फिर भी हम लोक में देखते हैं पृथिवी में प्रसृत=फैले हुये वृक्षों के मूल (जड़) अपने गहनत्व रूप धर्म से अपने गुणानुसार पृथिवीस्थ पञ्चभूत समुदाय से रस को ग्रहण करते हुये अपने को अपने पत्र पुष्प फलादिकों से विकसित करते हैं । यह ही क्रम प्राणियों के शरीरों में स्थित अन्त्रों (अन्तड़ियों) का है । अन्त्र (आन्तड़ियां) भी चर्व्य, पेय, चोष्य तथा लेह्य रूप अन्न को अपने गहन रूप धर्म से विलोडन अर्थात् मथित करके शरीर को पुष्ट करती है । यह इस प्रकार का जो सार्वत्रिक क्रम दीखता है यह सब भगवान् गहन नामक विष्णु का अनुकरण मात्र है, क्योंकि कारण के गुण ही कार्य में आते हैं इसलिये भगवान् विष्णु का ही गहनत्व रूप धर्म समस्त विश्व में समन्वित है । कवि पुरुष इसी प्रकार अन्यान्य ऊहायें भी कर सकते हैं, जैसे कि वाडव जो समुद्र में रहनेवाला अग्नि है वह समुद्र का अवगाहन करता है । चक्षु अपने दृश्य वस्तु का अवगाहन करता है । शिल्पी=कारीगर ने यन्त्र को जिस उद्देश्य से बनाया वह उस उद्देश्य

वगाहत इत्यादि। एवं भगवान् स्वकं गहनस्वरूपं धर्मं सर्वत्र व्यापयति। य एवं भगवन्तं गहनाख्यं सर्वत्र पश्यति, स्मरति वा, स भगवन्तं प्रत्यक्षं पश्यति, तल्लीलायित्ते जगति न च कदाचिन्मुह्यति, सुखं स्वदमानो मोदते पुष्पहासः सामभिर्गायँस्तमिति।

भवति चात्रास्माकम्—

नित्यः स विष्णुर्गहनः स्वभावाद् विश्वं समन्त्वात्मसमं विधत्ते।
तथा यथा मूलिन आत्मभृत्यै गाहन्त आप्यं समयानुकूलम् ॥२०६॥

आप्यम्=रसम्।

गुहः—३८३

गुहू संवरणे भौवादिको धातुस्तत इगुपधलक्षणः कः प्रत्ययो गूहति=संवृणोत्यात्मानं स्वलीलया, आत्मना वा सर्वमिति गुहः। भगवतो विष्णोर्गुहेति नाम, यतो हि सः स्वयं स्वलीलया संवृतः= गूढ आत्मना सर्वं विश्वं संवृणोति। तथा च लोकेऽपि पश्यामः–शासको हि स्वाधिकृतं सर्वं संवृणोति शासनविधानेन, जीवात्मा स्वचैतन्यगुणेन शरीरं संवृणोति, मृत्युरपि स्वेन मारणात्मकेन कर्मणा सर्वं संवृणोति। तथा च य एष संवरणात्मको धर्मो विश्वे दृश्यते, स तस्यैव भगवतो विष्णोः प्रकाशकः।

का अवगाहन करता है इत्यादि। इसी प्रकार भगवान् गहन नामक विष्णु अपने गहनस्वरूप धर्म को सर्वत्र जगत् में व्याप्त करता है। जो भाग्यशाली पुरुष इस प्रकार गहन नामक भगवान् विष्णु को सर्वत्र देखता या उसका स्मरण करता है, वह भगवान् को प्रत्यक्ष रूप में देखता हुआ, भगवान् के लीलाभूत जगत् में किसी समय भी मोहित नहीं होता तथा आनन्दरस को ग्रहण करता हुआ, पुष्पहास के समान प्रसन्न होता है, और सामरूप गीतियों से भगवान् का स्तवन करता है। इसी भाव को भाष्यकार इस प्रकार अपने पद्य से व्यक्त करता है–

सनातन रूप भगवान् विष्णु स्वभाव से ही गहनधर्मा होने से गहन है, तथा वह इस समस्त विश्व को अपने समान गहन ही बनाता है, उसी प्रकार जिस प्रकार से वृक्ष अपने विकास के या पुष्टि के लिये, समयानुकूल रस का पञ्चभूत समुदाय से विलोडन= मन्थन करते हैं।

गुह—३८३

संवरण=प्राच्छादनार्थक भ्वादिगणपठित गुह धातु से इगुपधलक्षण 'क' प्रत्यय करने से गुह शब्द सिद्ध होता है जो अपनी लीला=माया से अपने आपको, अथवा अपने से इस समस्त विश्व को आच्छादित करता है उसका नाम गुह है। गुह यह नाम भगवान् विष्णु का है, क्योंकि वह स्वयं अपनी लीला से आच्छन्न अपने आप से इस विश्व को आच्छादित= संवृत करता है। लोक में भी हम देखते हैं, शासक, अपने शासन विधान से, अपने अधिकृत विषय को संवृत करता है, तथा जीवात्मा अपने चैतन्य रूप गुण से सब को संवृत करता है, इसी प्रकार मृत्यु भी, अपने मारणात्मक गुण से सब का संवरण=विधान करता है। यह समस्त विश्व में दीखता हुआ संवरणरूप धर्म ही सर्वव्यापक भगवान् विष्णु का प्रकाशक है।

मन्त्रलिंगञ्च—

"प्राणतो निमिषतः......य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम" इत्यादि ।

भवति चात्रास्माकम्—

स लीलया संवृत एव विष्णुर्व्याप्त्यावृणोत्यत्र जगत्तु सर्वम् ।
गुहं स्तुवानाः कवयः पुराणाः संवृण्वते स्वं चपलं मनश्च ॥२१०॥

क्रियाभिरिति शेषः । इतरा गुहाप्येतस्मादेव यतो हि सा स्वान्तर्गतं पुरुषं पशुं पक्षिणं—अन्यद्वा किञ्चिद्वस्तु संवृणोति । मन्त्रलिङ्गञ्च—

उपह्वरे गिरीणां संगमे च नदीनाम् । धिया विप्रो प्रजायत ।

व्यवसायः—३८४

षिञ् बन्धने धातुः सौवादिकस्ततोऽधिकरणे घञ्, विशेषेण अवबद्धं=निबद्धमस्मिन्निति व्यवसायः । एतच्च सर्वं भगवता सम्यङ्निबद्धमपि, स्वात्मानमबद्धं=स्वतन्त्रमिवानुभवति । तथा चापादमस्तकमिदं शरीरं स्नाय्वस्थ्याशयादिभिर्निबद्धमस्ति, किन्तु जीवः स्वतन्त्रेणैवैतेन व्यवहरति । एतदेव वैशिष्ट्यं भगवतो विष्णोर्यत् स निबद्धमपि—अबद्धमिवानुभावयति । इतरोऽपि व्यवसाय उद्योगापरनामैतस्मादेव,

---

यह गुह नाम का अर्थ "प्राणतो निमिषतः...य ईशे अस्य" तथा "कस्मै देवाय हविषा विधेम" इत्यादि मन्त्रों से पुष्ट होता है । इसी भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु स्वयं अपनी लीला से आवृत्त हुआ, अपनी व्याप्ति से इस समस्त विश्व को आवृत करता है । क्रान्तप्रज्ञ पुरातन विद्वान् पुरुष, गुह नाम के अर्थ को स्मरण करते हुए अपने इस चञ्चल मन को संवृत=अर्थात् क्रियाओं के द्वारा नियन्त्रित करते हैं ।

यहां पर्वत आदि अथवा पृथ्वी के अन्दर स्थित गुहा (गुफा) का नाम भी गुहा इसीलिये है, क्योंकि वह अपने में स्थित वस्तु को आच्छादित करती है । इस अर्थ को "उपह्वरे गिरीणां सङ्गमे च नदीनाम्" इत्यादि मन्त्र पुष्ट क रता है ।

व्यवसाय—३८४

वि और अव उपसर्ग पूर्वक, बन्धनार्थक स्वादिगण पठित षिञ् धातु से घञ् प्रत्यय अधिकरण अर्थ में करने से व्यवसाय पद सिद्ध होता है । विशेष करके निबद्ध है जिसमें उसका नाम व्यवसाय है । सम्पूर्ण जगत् भगवान् के द्वारा अपने में, अच्छे प्रकार बान्धने पर भी अपने को स्वतन्त्र के समान समझता है जैसे कि शरीर के पैरों से मस्तक पर्यन्त, स्नायु अस्थि आदि आशय आदि से बन्धे रहने पर भी, जीव इस शरीर के साथ स्वतन्त्र के समान व्यवहार करता है । यह भगवान् विष्णु की विशेषता है जो कि वह, बन्धे हुए को भी स्वातन्त्र्य का

यतो हि जीवस्तस्मिन्निबद्धो भवति । यद्वा स जीवस्तेन वृत्तिकर्मणा निबध्यत इति ।
भवति चात्रास्माकम्—

व्यवसायनामा स हि शम्भुरेकः सर्वञ्जगत्तेन निबद्धमास्ते ।
वैशिष्ट्यमस्त्येव च तस्य विष्णोर्बद्धोऽप्यबद्धं मनुते निजं ना ॥२११॥

प्रतिपदं लोके पश्यामः समनस्कानि दशेन्द्रियाणि नियतविषयकाणि सन्ति तं प्रभुमन्वाचक्षते य एवं वेद स न मुह्यति । सूर्योऽपि दक्षिणोत्तरायणाभ्यान्निबद्धोऽबद्ध इव दृश्यते । एवं सर्वेऽपि ग्रहा निबद्धाः सन्तोऽबद्धा दृश्यन्ते । जगदिदं द्वादशसु भावेषु निबद्धमस्ति, तेषां द्वादशभावानां ग्रहा अपि स्वामित्वरूपेण निबद्धा, ग्रहाणां गतिरपि निबद्धा, ग्रहाश्च ते सर्वं जगन्निबध्नन्ति । एवं सर्वं निबद्धमपि, स्वात्मानं स्वतन्त्रं मन्वानं तन्यं कर्म तनुते । यथा द्वौ पटावेकं सूत्रं सिनोति=निबध्नाति, तथा स सूत्रभूतो भगवान् विश्वं बध्नाति । मन्त्रलिङ्गञ्च—

"सूत्रं सूत्रस्य यो वेद स वेद ब्राह्मणं महत्" अथर्व ।

यथा सम्वत्सरे ३६० दिनानि भवन्ति तथा शरीरेऽस्थ्नां त्रिशती षष्ठ्यधिका भवति । अस्ति वर्ष्मवर्षयोः समानता ।

अनुभव करवाता है । उद्योग आदि का वाचक भी व्यवसाय शब्द इसी से है, क्योंकि जीव उस में बन्धा हुआ रहता है । अथवा वृत्ति आदि कर्म के द्वारा जीव बन्ध जाता है ।

भाष्यकार का अपने पद्य द्वारा भाव प्रकाशन इस प्रकार है—

भगवान् विष्णु का नाम व्यवसाय है, क्योंकि वह भगवान् इस सकल विश्व को, अपने से ही अपने में बान्धे हुए है । इस बन्धन में भी भगवान् की विशेषता यह है कि वह इस मनुष्य आदि प्राणी को, इस प्रकार से बान्धता है जैसे कि वह प्राणी बन्धा हुआ भी अपने को स्वतन्त्र समझता है । लोक में पद पद पर हम देखते हैं, मन सहित दश इंद्रियां अपने अपने नियत विषयों को ग्रहण करती हुई उस सर्वेश्वर प्रभु का ही अन्वाख्यान=अभिधान कर रही हैं । सूर्य दक्षिण तथा उत्तर गति मे बन्धा हुआ भी अबद्ध=स्वतन्त्र के समान दीखता है, इसी प्रकार अन्य ग्रह भी यद्यपि बन्धे हुए हैं, किन्तु दीखते हैं स्वतन्त्र । सकल जगत् तनु आदि द्वादश भावों में बन्धा हुआ है, उन भावों के स्वामी अपने स्वामित्व धर्म से बन्धे हुए हैं, तथा उनकी गति भी बन्धी हुई है, तथा वे ग्रह इस सकल जगत् को बान्धते हैं । इस प्रकार यहां सब एक एक से बन्धा हुआ भी अपने आप को स्वतन्त्र समझता हुआ, कर्तव्य कर्म को करता है । जैसे एक सूत्र, दो वस्त्रों को सीलता है, उन्हें बान्ध देता है उसी प्रकार सूत्ररूप भगवान् इस समस्त विश्व को बान्ध देता है । भगवान् की सूत्ररूपता "सूत्रं सूत्रस्य यो वेद स वेद ब्राह्मणं महत्" इत्यादि अथर्व वेद से पुष्ट होती है । शरीर और वर्ष=सम्वत्सर में भी समानता है, क्योंकि जैसे सम्वत्सर में ३६० दिन होते है, उसी प्रकार शरीर में ३६० अस्थियां (हड्डियां) होती हैं ।

व्यवस्थानः—३८५

व्यवोपसर्गद्वयपूर्वा त्तिष्ठतेर्बाहुलकात् कर्तरि ल्युट् । प्रत्ययान्तरं युज्वा । व्यवतिष्ठत इति व्यवस्थानः । व्यवस्थापयतीति वा प्रेरणार्थः । तथा च स्वयं स्वरूपेण व्यवस्थितोऽच्युतत्वरूपेण स्थित एव व्यवस्थापयति=यथार्हस्थानमध्यासयति सर्वमिति । एतस्य विशदं व्याख्यानं स्थानदनाम्न द्रष्टव्यम्—तत्र व्याख्यास्यामः ।

संस्थानः—३८६

सम्यक् समाना वा स्थितिः संस्थानं, तदस्यास्तीति संस्थानः, मत्वर्थीयोऽच् प्रत्ययः । इहापि प्रेरणार्थग्रहणे समोचीना स्थापना यस्येति स संस्थानः । व्यवस्थापितस्य पुनः सम्यक् स्थापनं संस्थानं, तच्च यत्कर्तृकं स कर्ता संस्थानः । एतेन नाम्ना व्यवस्थापितस्य पुनः सम्यक् स्थापनं संस्थानं, तच्च यत्कर्तृकं स कर्ता संस्थानः । एतेन नाम्ना व्यवस्थाननामाभिधेयस्य दृढीकरणं समर्थ्यते । तथा च यथा लोकेऽपि पश्यामः—

इह हि शरीरेन्द्रियगणा यथा प्राग् भगवता व्यवस्थापितास्तथैवाद्यावधि कल्पान्तश्चायान्ति यास्यन्ति च । एष एव क्रमः स्थावरे जगत्यपि दृश्यते । मनुष्या अपि भागवतस्य व्यवस्थानस्य संस्थानस्य चानुकरणं कुर्वन्तः प्रथमं कीलकादिकं व्यवस्थापयन्ति=रोपयन्ति ततस्तत् संस्थापयन्ति=दृढीकुर्वन्ति । एवं व्यवस्थानसंस्थानरूपगुणधृग् भगवान् प्रत्यक्षं सर्वत्र विश्वे व्याप्तो दृश्यते ।

व्यवस्थानः—३८५, संस्थानः—३८६

वि और अव उपसर्ग पूर्वक स्था धातु से, बाहुलक से कर्ता में ल्युट्, अथवा युच् प्रत्यय करने से, व्यवस्थान शब्द सिद्ध होता है । जो व्यवस्थित है, उसका नाम व्यवस्थान है । अथवा प्रेरणा अर्थ लेने से, जो स्वयं व्यवस्थित हुआ अर्थात् अच्युत रूप से स्थित हुआ, सब की व्यवस्था करता है, अर्थात् सब को अपने अपने स्थान में स्थापित करता है, उसका नाम व्यवस्थान है । इस नाम का सविस्तार व्याख्यान, स्थानद नाम की व्याख्या में देखना चाहिये ।

समान स्थिति का नाम संस्थान है, वह जिसमें है, वह संस्थान है, यहां मतुप् अर्थ में अच् प्रत्यय किया है । यहां भी प्रेरणा अर्थ का ग्रहण करने से, समुचित है स्थापना जिसकी, उसका नाम संस्थान है । व्यवस्थित किये हुए का पुनःस्थापन संस्थान है, और वह जिस कर्ता के द्वारा किया गया है, उसका नाम भी संस्थान है व्यवस्थान नाम की सार्थकता का समर्थक संस्थान नाम है । लोक में भी हम देखते हैं, जैसे शरीर के इन्द्रिय आशय आदि भगवान् ने सृष्टि के आरम्भ में व्यवस्थित किये थे, उसी प्रकार से व्यवस्थित आज तक आरहे हैं, तथा कल्प के अन्त तक इसी प्रकार सुव्यवस्थित रहेंगे । यह ही क्रम स्थावर जगत् में भी दीखता है । मनुष्य भी भगवत् सम्बन्धी व्यवस्थान तथा संस्थान का अनुकरण करते हुए, प्रथम कीलक खूंटे आदि का व्यवस्थान=रोपण करते हैं, तथा फिर उसे ठोककर संस्थान (दृढ) करते हैं । इस प्रकार व्यवस्थान तथा संस्थान रूप गुण को धारण करनेवाला भगवान् प्रत्यक्ष ही सर्वत्र

भवति चात्रास्माकम्—

व्यवस्थानो महेष्वासो भगवान् विष्णुरूर्जितः ।
संस्थानः स्थानदश्चापि गुणैः सर्वत्र दृश्यते ॥
य एवं वेत्ति तं स्तुत्यं प्रत्यक्षं सर्वव्यापकम् ।
निर्ममो निरहङ्कारो ब्रह्मभूयाय कल्पते ॥२१२॥

स्थानदः—३८७

स्थानं ददातीति स्थानदः स्थानरूपकर्मोपपदाद्दाधातोः "आतोऽनुपसर्गे कः" पा० ३।२।२। सूत्रेण कः प्रत्ययः । आतो लोपः । तिष्ठन्त्यस्मिन् तत् स्थानं स्था धातोरधिकरणे ल्युट् द्यावापृथिव्यन्तरिक्षरूपं, सूर्यादयो ग्रहास्तेषामुपग्रहाश्च तथा नक्षत्रादयश्च नियतीकृतस्थाना द्यवि स्वके स्वके राशिवर्त्मान खगोले परिभ्रमन्ति ।

तथैवास्मिन् शरीरे ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाञ्च कृते स्थानं ददातीति स्थानद उक्तो भवति भगवान् विष्णुः । एवञ्च स सर्वं स्थानेन युनक्ति, तथा हि, ज्ञानेन्द्रियाणि, शरीरे द्युस्थानीयेन मस्तिष्कस्थानेन युनक्ति, द्यावापृथिव्योरन्तरालरूपेण स्थानेन माध्यमिकान् युनक्ति । एव शरीरे सहस्तं बाहुं वायुं तथा फुफ्फुसौ

विश्व में व्याप्त दीखता है । इस भाव का प्रकाशन भाष्यकार इस प्रकार करता है—

महेष्वास शक्तिशाली भगवान् विष्णु, अपने गुणों से कहीं पर व्यवस्थान, कहीं पर संस्थान, तथा कहीं पर स्थानद रूप से दीखता है । जो इस प्रकार स्तवनीय सर्वव्यापक भगवान् विष्णु को, प्रत्यक्ष देखता है, वह निर्मम और निरहङ्कार पुरुष, ब्रह्मभाव को प्राप्त होने योग्य होता है ।

स्थानदः - ३८७

स्थान को देनेवाला स्थानद नाम से कहा जाता है । स्थान रूप कर्म के उपपद रहते हुए, दा धातु से "आतोऽनुपसर्गे कः" इस पा. ३.३.२ सूत्र से क प्रत्यय तथा आकार का लोप करने से स्थानद शब्द सिद्ध होता है जिसमें रहते हैं, इस अधिकरण रूप अर्थ में, स्था धातु से ल्युट् प्रत्यय करने से स्थान शब्द बनता है । जिस प्रकार अपने अपने राशिसंक्रमण से खगोल में भ्रमण करते हुए सूर्यादि ग्रह, उनके उपग्रह, तथा नक्षत्र आदि को द्युलोक में नियत रूप से स्थान देता है, उसी प्रकार ज्ञानेन्द्रिय और कर्मेन्द्रियों के लिये इस शरीर में, नियत रूप से स्थान देता है, इसलिये उसका नाम स्थानद है, भगवान् विष्णु का नाम है । स्थान शब्द मे द्युलोक पृथ्वीलोक तथा अन्तरिक्षलोक का ग्रहण है । इस प्रकार भगवान् सब को स्थान से युक्त करता है, जैसे कि शरीर में ज्ञानेन्द्रियों को द्युस्थानीय मूर्धा स्थान से युक्त करता है. द्युलोक और पृथ्वी लोक के मध्यस्थित अन्तरिक्ष स्थान से माध्यमिक देवगणों को युक्त करता है । इसी प्रकार शरीर में हस्तसहित भुजाओं, वायु, फुफ्फुस तथा हृदय को तद् तद् स्थानों से

तत्तत्स्थानैर्युनक्ति हृदयञ्च । यथा पृथिव्यां समुद्रस्याधोदेशे स्थान, तथा शरीरे क्षारसमुद्रस्थानीयस्य मूत्राशयस्याधोदेशे स्थानम् । रक्तशोधनौ वृक्कावधिवृक्कौ च शरीरमधितिष्ठतः । यथा च नाभसं वारि नद्यः समुद्रं प्रति नयन्ति, तथैव धमनीभिः शिराभिश्च परिवर्त्यमानं रक्तं गवीन्यौ (एतन्नामिके नाड्यौ) वस्तिमुखं प्रापयतः प्रतिक्षणञ्च शरीरे स्रवत्तत् स्थानेनं युनक्ति । यथा च "द्यौष्पिता पृथिवी माता" तथा द्यवि स्थितेन मस्तिष्केन परिरक्षितं शरीरं, पृथवीव मलमूत्रे दधाति, मलमूत्रयोः कृते पृथिव्यां स्थानं दत्तमस्ति तेनातः स स्थानद इत्युक्तो भवति । सर्वेषां बीजानां सत्ता द्यवि, तानि च ततः पृथिवीं प्राप्य बहुधा भवन्ति । अतस्तेषां स्थानं पृथिवीत्युच्यते, यथा कामप्रेरितस्य पुरुषबीजस्य स्थानं स्त्री, स्त्रियं प्राप्य बीजं भेदं विकासञ्चैति । अत एव चोच्यते वर्षणाभावे सस्याभाव इति । उप्तायामपि भूमौ जलदानमन्तरेण सस्यं नोद्भवति । एवञ्च भगवान् विश्वाय विश्वविकार-भूताय च स्थानं ददात्यतः स स्थानद इत्युक्तो भवति, य एवं वेद स भागवते विश्वे सर्वथा व्यवहरन्नपि न कदाचिन्मुह्यति, न ग्लायति, न बिभेति कुतश्चित् । एवं हि विष्णोः स्थानदत्वरूपो गुणः सर्वव्यापको दृश्यतेऽतः स स्थानद उच्यते । स्थानदनाम्ना सङ्कीर्त्यमानश्च भगवान् प्रतिप्राणि तत्कर्मकरणार्हं स्थानं ददाति । तथा च लोके वादकाय गायकाय च पृथक्

युक्त करता है । जैसे समुद्र का पृथ्वी के अधोभाग में स्थान है, उसी प्रकार क्षारसमुद्र स्थानीय मूत्राशय का, शरीर के अधोभाग में स्थान है । रक्त को शुद्ध करनेवाले वृक्क तथा अधिवृक्कों का भी शरीर के अधोभाग में स्थान है । जैसे आकाश से पतित जल को नदियां समुद्र में ले जाती हैं, उसी प्रकार धमनी नाडियों तथा सिराओं से शरीर में सञ्चलित रक्त, जो कि शरीर में प्रतिक्षण स्रुत होता रहता है, अर्थात् झरता रहता है, उसको गवीनी नाम की नाडी वस्ति में ले जाती है, तथा उसे वह स्थान स युक्त करता है । इसलिये भी भगवान् स्थानद है, जैसा कि "द्यौष्पिता पृथ्वी माता" इत्यादि वेद वचनानुसार, द्युलोकस्थित मूर्धा के द्वारा परिरक्षित यह शरीर पृथ्वी के समान मल मूत्र को धारण करता है । मलमूत्र के लिये भगवान् ने पृथ्वी में स्थान दिया है, इसलिये उसका नाम स्थानद है । सब बीजों की सत्ता द्युलोक में है किन्तु वे द्युलोक से पृथ्वी में आकर बहुरूप बन जाते हैं । इसलिये पृथ्वी उनका स्थान कहा जाता है । जैसे काम से प्ररित पुरुष के बीज का स्थान स्त्री है, वह उस स्त्री को प्राप्त होकर, भिन्नता तथा विकास को प्राप्त करता है । इसीलिये ऐसा कहा जाता है कि वर्षा के अभाव में धान्य का अभाव होता है, पृथ्वी मे बीज का वाप (बिजाई) कर देने पर भी, यदि उस बीज को जल न मिले तो वह उत्पन्न नहीं होता । इस प्रकार भगवान् विश्व या विश्वान्तर्गत विकारों को स्थान देने के कारण स्थानद नाम से कहा जाता है । जो इस तत्त्व को जानता है, वह इस भगवदाश्रित विश्व में सब प्रकार से व्यवहार करता हुआ भी, विकलता आदि की प्राप्ति से, कभी किंकर्तव्यविमूढ नहीं होता, कभी ग्लान=उदास नहीं होता, तथा कभी किसी से डरता नहीं । यह भगवान् का स्थानदत्व रूप सर्वव्यापक देखने में आता है इसलिये उसका नाम स्थानद है । स्थानद नाम से सङ्कीर्तित=स्तुत भगवान् विष्णु,प्रत्येक प्राणी को उसके कर्म करने योग्य स्थान देता है, जैसा कि वादक और गायक के लिये उसके कर्मानुसार पृथक् २

पृथक् स्थानं धनञ्च दत्तं भवति। गुरुशिष्ययोरप्येव ज्ञेयम्। एवंव व्यवस्था पशुजगति, गौर्मेघ इव वर्षधाराभिर्दुग्धधाराभिः सिञ्चति जीवन्ति च प्राणिनस्ताभिर्धाराभिः। अश्वो हि नाम वातप्रधानः पशुः स च. वात इव, एकस्थानात् स्थानान्तरं प्रापयति। एवञ्च यद्वायोः स्थानं तदश्वस्य। तथा च वायुः सामः सन् बहून् भेदानाप्नोति, तथैव स्थानान्तरस्य प्रापकेषु—अश्वगर्दभाश्वतरोष्ट्रप्रभृतिषु गतीनां भगवता प्रत्तं पृथक् पृथक् स्थानमस्ति। समिन्धनभेदादग्नेरपि तीव्रातितीव्रत्वरूपस्थानस्य स एव दाता। नभोगेभ्योऽपि पृथक् पृथग्गन्तुमर्हां शक्तिं दत्त्वा तेषामन्तरिक्षे स्थानं बध्नाति। महाशरीरवतां मत्स्यानाञ्च कृते समुद्रे स्थानं कल्पितम्। दिङ्मात्रमुदाहृतं शेषा ऊहाः स्वयं करणीया विद्वद्भिः। तद्यथा महाक्रमः जगदिदं दक्षिणोत्तरायणाभ्यां यथा परिरक्षितं भवति, तथैवेदं शरीर तत्तद्द्वन्द्वैः परिरक्षितं भवति, यथा नेत्रद्वयं, नासिकारन्ध्रद्वयं; बाहुद्वयं, जङ्घाद्वयं, पादद्वयमिति। यथा च पञ्चभूतानामेष व्यापारस्तथा सोपकरणस्य पञ्चाङ्गुलिकस्य मनुष्यस्य व्यापार इति स्थानदस्य विष्णोर्व्याख्यानमात्रम्।

भवति चात्रास्माकम्—

> द्यावापृथिव्योरिह मध्यगं यत्, तत्स्थानदेनास्ति यथा विभक्तम्।
> तथा स धामानि ददाति गात्रे, तदाशयेभ्यो न च याति मोहम् ॥२१३॥

स्थान या धन मिलता है। इसी प्रकार गुरु और शिष्य के विषय में समझना चाहिए। यह ही व्यवस्था पशुजगत् में है, गो पशु मेघ के समान अपनी दुग्ध धाराओं से प्राणियों को सींचती है, जिससे प्राणियों को जीवनीय शक्ति मिलती है। अश्व नामक पशु, वायुप्रधान होने से, वह अपने आप को वायु के समान, कुछ ही क्षणों में एक स्थान से दूसरे स्थान को प्राप्त कराता है। इससे जो वायु का स्थान है, वह ही अश्व का है। जिस प्रकार वायु सामरूप से विविध भेदों वाला है, उसी प्रकार अश्व, गर्दभ अश्वतर (खच्चर) आदिकों में भगवान् का दिया हुआ गतियों का स्थान बहुभेदयुक्त है।

दीप्ति के भेद से अग्नि को भी तीव्र, अतितीव्र, आदि स्थानभेदों का वह ही देनेवाला है। गगनचारियों को भी उनकी उड्डयन शक्ति के अनुसार स्थान से युक्त वह ही करता है। तथा बड़े २ शरीरों वाले मत्स्यों के लिये. भगवान् ने समुद्र में स्थान बनाया है। मार्गमात्र हमने दिखलाया है। शेष कल्पनायें विद्वानों को स्वयं कर लेनी चाहिएं। इसी का बृहत् क्रम इस प्रकार है, जिस प्रकार दक्षिणायन और उत्तरायणरूप युगल से यह जगत् रक्षित है, उस ही प्रकार यह शरीर भी द्वन्द्व से, अर्थात् युगलभाव से रक्षित है। जैसे दो नेत्र दो नासिकाछिद्र, दो भुजायें, दो पैर इत्यादि। जिस प्रकार का पञ्चभूतों का व्यापार है उसी प्रकार का उपकरण सहित पञ्च अंगुलियों वाले मनुष्य का व्यापार है यह सब स्थानद नामक भगवान् विष्णु का व्याख्यानरूप है। इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—

जितना यह द्युलोक तथा पृथिवीलोक के मध्य में अवकाश प्रतीत होता है, वह सब भगवान् स्थानद के द्वारा जैसे विभक्त है, उसी प्रकार शरीर में, शरीरस्थित आशयों के लिये वह विभक्त करके स्थान देता है, तथा स्वयं निर्मोह रहता है।

प्रगण्डास्थिमूलमारभ्य कफोणिपर्यन्तं फुफ्फुसहृदययकृत्प्लीह्नां स्थानं मध्यममिवेति, स्थानदस्य सङ्गतार्थत्वस्य पोषक इति लोकायुर्वेदविदां "लोकसम्मितः पुरुषः" सिद्धान्तः पुष्टो भवति। यथा च दिवि ग्रहाणां विन्यासो, लोकस्य क्षेमाय क्षोभाय वा भवति, तथा द्युलोकसम्मिते मस्तिष्के कामक्रोधलोभमोहाहङ्काराणां विन्यासः प्रजानां क्षेमाय क्षोभाय वा भवति। एवं यः समष्टिरूपं लोकशरीरं, व्यष्टिरूप शरीरञ्च वेत्ति, स एव वास्तविकतत्त्वज्ञो युक्तिज्ञश्च भवितुमर्हं इति।

ऊरू द्युलोकस्थानीये। जङ्घेऽन्तरिक्षस्थानीये। पादौ च पृथिवीस्थानीयौ।

ध्रुवः—३८८

ध्रु गतिस्थैर्ययोरिति तौदादिको धातुस्ततः पचाद्यच् प्रत्ययो ध्रुव इति। स्वस्य ध्रुवत्वात् स्वधर्मानुसारमिदं प्रवाहतोऽनादिमज्जगद्यथा सर्गादौ प्रवर्तयति, तथा तद् ध्रुवति=व्यवस्थापयति, व्यवस्थया स्थिरं करोतीत्यर्थः, अर्थात् सर्गारम्भे यद्वस्तु यादृग्रूपमाविष्कृतं तत्सर्गपर्यन्तं तादृगेव व्यवस्थितं रक्षतीत्यर्थः। अतो विष्णुर्ध्रुव इत्युक्तो भवति। तथा च यथा बीजादंकुरोत्पत्तौ पञ्चभूतानि कारणं न केवला भूमिर्जलादिकं वा। ध्रुवश्चैष नियमः—एवम्विधा ध्रुवता च तस्य सर्वत्र दृश्यते। चले चास्मिन् जगति भगवत एषा व्यवस्थाचला=ध्रुवा वर्तते। अतः स भगवान् स्वभूत्वाद्ध्रुव इत्युक्तो भवति। लोके चापि पश्यामो—ध्रुवं जन्म। ध्रुवं मरणम्। सूर्य-

---

प्रगण्डास्थिमूल से लेकर कफोणि (कोहनी) पर्यन्त जो शरीर का भाग है, वह मध्यम=अन्तरिक्ष के समान है, इससे स्थानद नाम सङ्गतार्थ होता है, तथा इससे "लोकसम्मितः पुरुषः" यह लोकायुर्वेदविदों का सिद्धान्त पुष्ट होता है। जैसे द्युलोक में ग्रहों का विन्यास, लोकों के क्षेम=सुख या क्षोभ=दुःख के लिये होता है, उसी प्रकार द्युलोक से सम्मित मस्तिष्क में, काम, क्रोध, लोभ, मोह अहङ्कारों का विन्यास भी प्रजाओं के क्षेम या क्षोभ के लिये होता है। इस प्रकार जो पुरुष समष्टिरूप लोकशरीर, तथा व्यष्टिरूप शरीर को जानता है, वह ही वास्तविक तत्त्वज्ञ तथा युक्तिज्ञ होता है। उरु द्युलोक स्थानीय हैं, जङ्घा अतरिक्ष-स्थानीय है, तथा पैर पृथिवी स्थानीय है।

ध्रुव—३८८

गति और स्थैर्य=स्थिरता अर्थ में वर्तमान तुदादिगण पठित ध्रु धातु से पचाद्यच् प्रत्यय करने से ध्रुव शब्द सिद्ध होता है। ध्रुव नाम भगवान् का है, और वह अपने ध्रुव होने के कारण अपने ध्रुवत्व धर्मानुसार, इस प्रवाह रूप से अनादि-जगत् को जिस रूप से सर्ग के आरम्भ में प्रवृत्त=निर्मित करता है, सर्ग के अन्त तक उसी रूप में ध्रुव रखता है, अर्थात् अपनी व्यवस्था से स्थिर रखता है। इसलिये भगवान् विष्णु का नाम ध्रुव है। बीज जब अंकुर रूप में उत्पन्न होता है, तब उसकी उत्पत्ति में पञ्चभूत कारण होते हैं, केवल पृथिवी या अन्य जलादि से उसका उत्पन्न होना असम्भव है। यह नियम ध्रुव है। इसी प्रकार की ध्रुवता सर्वत्र देखने में आती है। इस परिवर्तनशील चल जगत् में भी भगवान् की व्यवस्था चल रूप से ध्रुव है। भगवान् स्वंभू है तथा स्वभू होने से ध्रुव है। लोक में जो हम देखते हैं, जन्म ध्रुव है। मरण ध्रुव है। सूर्य का उदय ध्रुव है, तथा अस्त होना भी ध्रुव है। इस

स्योदयो ध्रुवः ध्रुवञ्चास्तगमनम्। एवं भगवान् स्वयं ध्रुवोऽध्रुवेषु भावेषु ध्रुवत्वमिव स्थापयन् सर्वं व्याप्नोति।

भवति चात्रास्माकम्—

स्वयं ध्रुवो विष्णुरमेयकर्मा, ध्रुवत्वधर्मेण जगच्चलं सः।
प्रवाहसिद्धं कुरुतेऽचलं तत्, यथोदितं मृत्युरुपैत्यवश्यम् ॥२१४॥

मन्त्रलिङ्गञ्च—

आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥

ऋग् १०-७३-१

परर्द्धिः—३८९

ऋधु वृद्धाविति धातोः क्तिनि सिध्यति—ऋद्धिरिति शब्दः। ततश्च परा=उत्कृष्टा सर्वोत्तमा ऋद्धिर्यस्य स परर्द्धिरिति बहुव्रीहिसमासे परर्द्धिर्भगवतो नाम। ऋद्धिरिति वृद्धेः, सम्पत्तेर्विभूतेर्वा नाम। तथा च विविधेषु जात्यादिभेदभिन्नेषु वस्तुषु या विभिन्नप्रकारिका विभक्ता दृश्यते ऋद्धिस्तस्याः समूहालम्बनभूतं भगवान् विष्णुरेवैकमधिकरणम् अर्थात् प्रतिवस्तु यात्र विभिन्ना विभक्ता चर्द्धिर्दृश्यते सा सर्वा सर्वर्द्ध्याधारभूताद् भगवत एवायातेति भगवान् विष्णुः परर्द्धिरुच्यते। तथा च पश्यामो लोके—कश्चिद् बहुविधरागगानतत्त्ववित्पुरुषो विभज्य लोके रागान् गानानि

प्रकार भगवान् विष्णु स्वयं ध्रुव होता हुआ, अध्रुव भावों में ध्रुवत्व को स्थापित करता हुआ सब को अपने ध्रुवत्व धर्म से व्याप्त करता है। भाष्यकार इस नाम के भाव को अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

अनन्तकर्मा भगवान् विष्णु स्वयं ध्रुव है, और वह अपने ध्रुवत्व धर्म से प्रवाहसिद्ध, इस चल जगत् को, अचल=ध्रुव करता है, तथा समयानुसार इस जगत् का मरण भी ध्रुव रूप से अवश्य होता है।

परर्द्धि—३८९

वृद्ध्यर्थक ऋधु धातु से, क्तिन् प्रत्यय करने से, ऋद्धि शब्द सिद्ध होता है, उसका उत्कृष्टार्थक पर शब्द के साथ बहुव्रीहि समास करने से, परर्द्धि शब्द सिद्ध होता है।

परा=उत्कृष्टा सर्वातिशायिनी है ऋद्धि=ऐश्वर्य आदि सम्पत्ति जिसकी, उसका नाम है परर्द्धि। ऋद्धि यह वृद्धि सम्पत्ति या विभूति का नाम है। इस प्रकार जाति आदि भेदों से विविध वस्तुओं में जो भिन्न भिन्न प्रकार की विभक्त ऋद्धि देखने में आती है, वह सम्पूर्ण ऋद्धि समूहरूप से एक भगवान् विष्णु में रहती है। अर्थात् जो यहां प्रत्येक वस्तु में भिन्न २ ऋद्धि दीखती है, वह सब मूलरूप विष्णु से आई हुई है। इसलिये भगवान् विष्णु का नाम परर्द्धि है। ऐसा ही हम लोक में भी देखते हैं, जैसे कोई बहुत प्रकार के रागों के गान का तत्त्व जानने वाला पुरुष, राग तथा गानों को विभक्त करके बनाता हुआ, अपने आपकी रागगान

च निर्माय तद्विषयकबहुवित्त्वमात्मनः प्रकाशयति, तथा भगवानपि प्रतिवस्तु विभक्तयद्ध्यर्धा प्रतिपदमात्मानं प्रकाशयति सर्वव्यापकमिति ।

भवति चात्रास्माकम्—

> पर्द्धिनामा भगवान् स विष्णु, ऋद्ध्या समृद्धं कुरुते समस्तम् ।
> नैतद् विधातुं क्षमते तदन्यस्, ततं तयद्ध्र्येदमनन्तचक्रम् ॥२१५॥

परमस्पष्टः—३९०

परमम्=उत्कृष्टं दृढं वा स्पशति=बध्नातीति परमस्पष्टः । बन्धनार्थकात् स्पशधातोः "वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ता" इति पा० सूत्रेणेऽभावनिपातनेन सिध्यति स्पष्टशब्दः । एतेन च परमपूर्वपदेन स्पष्टशब्देन भगवान् विष्णुरभिधीयते, यतो हि स यथा प्रत्येकं वस्तु द्रढिम्ना स्पशति=बध्नाति, न तथा ततोऽन्यः कश्चित् । तथा च पश्यामो लोक इमानि सर्वाणि जान्तवानि शरीराणि, सन्धिबन्धनैस्तथा बद्धानि, यथा न तानि व्यसून्यपि[1] विश्लिष्यन्ति, ज्ञायतेऽतो यद्भगवता यथाविधं यन्निर्मितं तत्तथाविधमेव सुबद्धं तिष्ठति । इदमेव सर्वसुबद्धत्वं भगवतः सर्वव्यापकं परमस्पष्टत्वं व्यनक्ति ।

१—व्यसु = विगतासु मृतमित्यर्थः ।

भवतश्चात्रास्माकम्—

विषयक बहुवेदिता, अर्थात् जानकारी को प्रकट करता है, इसी प्रकार भगवान् भी प्रत्येक वस्तु में विभक्त ऋद्धि से, पद-पद पर अपने आपको सर्वव्यापक रूप से प्रकट करता है—

भगवान् विष्णु का नाम पर्द्धि है, क्योंकि वह अपनी ऋद्धि से सब को समृद्ध करता है यह समृद्धीकरण रूप कार्य किसी अन्य से नहीं हो सकता, यह समस्त विश्व भगवान् विष्णु की ही ऋद्धि से व्याप्त है ।

परमस्पष्ट—३९०

परम=उत्कृष्ट, या दृढ़ है, बन्धन जिसका, उसका नाम है परमस्पष्ट । बन्धनार्थक स्पश धातु से "वा दान्तशान्त" इत्यादि पा० सूत्र से इट् के अभाव के निपातन से स्पष्ट शब्द सिद्ध होता है । और इस परमपूर्वक स्पष्ट अर्थात् परमस्पष्ट शब्द से भगवान् विष्णु का अभिधान है, क्योंकि प्रत्येक वस्तु का दृढ़बन्धन जिस प्रकार वह करता है, उस प्रकार और कोई नहीं कर सकता । जैसा कि हम लोक में देखते हैं, ये सब जन्तुओं के शरीर सन्धिबन्धनों से, इस प्रकार दृढ़ बन्धे हुए हैं, जो कि शरीर से प्राणों के निकल जाने पर भी वियुक्त नहीं होते । इस से प्रतीत होता है कि भगवान् ने जो जैसा बनाया है, वह वैसा ही सुबद्ध रहता है । यह ही सब की सुबद्धता भगवान् के सर्वव्यापक परमस्पष्टत्व को प्रकट करती है । व्यसु नाम, विगतप्राण अर्थात् मृत का है ।

इस नाम के भाव को भाष्यकार अपने पद्यों द्वारा इस प्रकार व्यक्त करता है—

बध्नाति विष्णुः स जगद्यथा तन्निबन्धवद् भाति दृशा सुबद्धम् ।
तथा यथा कान्तमिदं शरीरं, बद्धं स्वतन्त्रञ्च मृतञ्च बद्धम् ॥२१६॥

तथा च—

दृढं स्पशानः परमेति पूर्वः, स्पष्टाभिधानः परमेश्वरोऽत्र ।
तथा शरीरं स्पशते स जन्तोर्यथा न विश्लिष्यति तन्मृतञ्च ॥२१७॥

च—इत्यप्यर्थे ।

तुष्टः—३९१

परिपूर्णसर्वकामत्वादतुषदिति तुष्टः. तुष्यतेः कर्तरि क्तः । तस्य चैष सन्तोषाख्यो गुणो विश्वं व्याप्नोतीति कृत्वा तद्गुणवद्विश्वमपि सर्वथा सन्तुष्टमिव दृश्यतेऽतः स्वगुणव्यापनद्वारा विश्वस्य तुष्टिं करोतीति कृत्वापि स तुष्ट इत्युच्यते । दृश्यते च लोके यद्दुर्गतिं प्राप्तं सदपि सर्वं स्वजीवने तुष्टं न मरणमिच्छति, तदेष भगवतस्तुष्टिगुणस्य व्याप्तेरेव प्रभावः ।

भवति चात्रास्माकम्—

तुष्टः स विष्णुः कुरुते ह तुष्टं, जगत् समस्तं परिपूर्णमर्थैः ।
यस्यां स्थितौ तुष्यति यच्च यत्र, तस्यां स्थितौ तुष्यति तच्च तत्र ॥२१८॥

भगवान् विष्णु इस जगत् को, इस प्रकार दृढ़ बन्धन से युक्त करता है, जैसे कि यह अच्छे प्रकार से बन्धा हुआ भी, दृष्टि के द्वारा निर्बन्ध अर्थात् (खुला हुआ सा) प्रतीत होता है, उसी प्रकार से यह सुन्दर शरीर मरने पर भी बन्धा हुआ, अत एव सुबद्ध तथा स्वतन्त्र प्रतीत होता है ।

इस प्रकार से जगत् को सुबद्ध करता हुआ भगवान् विष्णु, यहां परमस्पष्ट शब्द से कहा जाता है ।

यह परमस्पष्ट नामक भगवान्, जन्तुओं के शरीरों को इस प्रकार से बान्धता है, जैसे कि वे जीवरहित होने पर भी विश्लिष्ट अर्थात् वियुक्त=पृथक्-पृथक् नहीं होते ।

तुष्टः—३९१

सब प्रकार के नामों से परिपूर्ण होने से, भगवान् का नाम तुष्ट है । प्रीत्यर्थक दिवादिगणीय तुष्ट धातु से कर्ता अर्थ में, क्त प्रत्यय होने से तुष्ट शब्द सिद्ध होता है ।

भगवान् इसलिये भी तुष्ट है क्योंकि वह अपने इस तोषरूपगुण से व्याप्त हुआ, समस्त विश्व की तुष्टि करता है । लोक में देखा जाता है कि, अत्यन्त दुर्गति को प्राप्त हुआ भी प्रत्येक प्राणी, अपने जीवन में तुष्ट हुआ मरना नहीं चाहता, यह भगवान् की तुष्टिरूप गुण की व्याप्ति का ही प्रभाव है ।

इस गद्योक्त भाव को भाष्यकार इस प्रकार व्यक्त करता है ।

भगवान् विष्णु सर्वकामपरिपूर्ण होने से तुष्ट है तथा वह सब प्रकार के अर्थों से पूरित करके, इस समस्त जगत् को तुष्ट करता है, जो जिस स्थिति में तुष्ट होता है, उस स्थिति में तद् रूप से भगवान् स्वयं तुष्ट होता है ।

पुष्टः—३९२

सर्वदावाप्तसर्वकामत्वादेवापुषदिति पुष्ट इत्यर्थः । समानो हि गुणः समानं गुणं पुष्णाति, तथैव यस्य जीवस्य यद् भक्ष्यं, करोति तद्भक्ष्य तज्जीवशरीरं पुष्णाति । पोषणार्हस्य वीर्यस्य तत्र सद्भावात् । तस्य चायं पोषाख्यो गुणः सर्वमश्नुवानः प्रत्येक-मण्वणुपुष्टिं निदधातीति कृत्वा स वाताशेन वाताशिनं, मृदाशेन मृदाशिनं, पाषाण-कणाशेन पाषाणकणाशिनं पुष्णाति, परिपूर्णत्वादिति पुष्टः स उच्यते ।

भवति चात्रास्माकम्—

विष्णुर्हि पुष्टः कुरुते ह पुष्टं, जगत् समस्तं परिपुष्टिमत् सः ।
यद्भोजनो यश्च कृतोऽस्ति तेन, तद्भोजनः पुष्यति तत्र सक्तः ॥२१६॥

शुभेक्षणः—३९३

शुभम्—ईक्षणं=दर्शनं नेत्रस्थानीयौ, सूर्याचन्द्रमसौ वेक्षणे यस्य स शुभेक्षणः । भगवत ईक्षणे=नेत्रे सूर्याचन्द्रमसौ स्त इति वेदप्रतिपादितोऽर्थः ।

सूर्य आत्मा, मनश्च चन्द्रमा, यस्य च शुभे—आत्ममनसी वर्तेते, तस्य हृदि, शुभेक्षणत्वरूपधर्मेण विराजमानो भगवान्, स्वस्य शुभेक्षणत्वरूपं स्वधर्मं

पुष्टः—३९२

सर्वदा प्राप्त सब प्रकार के कामों से जो पुष्ट है, यह भगवान् का नाम है । समानगुण अपने समान गुण को पुष्ट करता है । जिस प्राणी के अनुकूल, जिस भक्ष्य का निर्माण हुआ है, वह ही भक्ष्य उस जीव को पुष्ट करता है, क्योंकि उस भक्ष्य में उस जीव के पोषणार्ह धातु की सत्ता होती है ।

भगवान् का यह पोषरूप गुण सर्वत्र व्याप्त होकर प्रत्येक अणु अणु को पुष्ट करता है । इस करके वह वायुभोजी को वायु से मृत्तिकाभोजी को मृत्तिका से तथा पत्थर के कण खाने वाले को, पत्थर के कणों से पुष्ट करता है । सर्वथा परिपूर्ण होने से वह पुष्ट नाम से कहा जाता है ।

भाष्यकार इस नाम के भाव को अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

सर्वथा परिपूर्ण होने से भगवान् स्वयं पुष्ट है तथा वह इस जगत् को अपने पुष्टत्वरूप गुण की व्याप्ति से पुष्ट करता है तथा जिस जीव के जिस प्रकार के भोजन का निर्माण किया है, वह जीव वह ही भोजन करता हुआ पुष्ट होता है ।

शुभेक्षणः—३९३

शुभ है, ईक्षण=दर्शन अर्थात् ज्ञान अथवा सूर्य चन्द्र रूप नेत्र जिसके, उसका नाम है शुभेक्षण । वेद ने सूर्य और चन्द्रमा को भगवान् के नेत्र बतलाया है सूर्य नाम आत्मा और मन नाम चन्द्रमा का है, ये दोनों आत्मा और मन शुभ=शुद्ध हैं जिसके उसका नाम भी शुभेक्षण है, क्योंकि उस के हृदय में शुभेक्षणत्व रूप से स्वयं विराजमान भगवान् अपने

व्यनक्ति । जन्मकुण्डल्यां शुभस्थानस्थौ सूर्यचन्द्रौ, जातकस्य सज्ज्ञानवत्त्वं सद्भाववत्त्वञ्च व्यङ्क्तः ।

एवं स भगवान् शुभेक्षणः शुभाशुभेक्षणयोगेन विविधं जगद्दर्शयति ।

भवति चात्रास्माकम्—

शुभेक्षणो विष्णुरिदं समस्तं, जगद्विधत्ते शुभनेत्रयोगी ।
यस्यास्ति सूर्यः शुभयोगयुक्तः, तथैव चन्द्रः स सुलोचनो ना ॥२२०॥

सूर्यचन्द्राभ्यां शुभदृष्ट्या दृष्टो भावः, शुभेक्षणस्य भगवतः शुभेक्षणत्वं प्रतिपदं व्यनक्ति । अथवा शुभदृष्ट्या यो ग्रहो यं ग्रहं पश्यति, तत्र स्वयं शुभेक्षणः स्थितः स्वकं रूपं व्यनक्ति, शुभदृष्टियुक्तञ्च भावं प्राप्य भगवन्तं स्मरति स्तौति च । शुभेक्षणः = निष्पापः । लोकेऽपि च पश्यामः, निष्पापस्य जनस्येक्षणे शुभे भवतः । या च ग्रहस्य ग्रहोपरि शुभा दृष्टिस्तस्यां स्वयं भगवान् विराजमानस्तं भावं स्वगुणेन समर्धयति ।

रामः—३९४

रमु क्रीडायां धातोरधिकरणे घञि रमते=क्रीडति विश्वमस्मिन्निति रामः । इदं हि सर्वं विश्वं तस्मिन्नेव ब्रह्मणि रममाणमुदयमस्तञ्च लभत इति ।

शुभेक्षणत्वरूप धर्म को प्रकट करता है । बालक के शुभ स्थान में स्थित सूर्य और चन्द्रमा उस बालक के सज्ज्ञानवत्त्व तथा सद्भाववत्त्व को प्रकट करते हैं । अपने शुभाशुभेक्षणरूप सम्बन्ध से ही भगवान् इस विषय को विविध भावों में दिखलाता है ।

इस भाव को भाष्यकार अपने पद्य द्वारा यों व्यक्त करता है—

शुभ ईक्षण=ज्ञान का नित्य सम्बन्ध है जिस में अथवा सूर्य चन्द्र रूप नेत्र हैं जिसके, उस का नाम शुभेक्षण है । शुभेक्षण नामक भगवान्, इस समस्त विश्व का विधान करता है । जिस बालक के जन्मलग्न में, सूर्य और चन्द्रमा शुभयोगयुक्त होते हैं, वह बालक भी सुलोचन=शुभेक्षण होता है । सूर्य और चन्द्रमा की शुभदृष्टि से युक्त भाव, भगवान् शुभेक्षण के शुभेक्षणत्व को, पद पद पर प्रकट करता है । अथवा जो ग्रह, जिस ग्रह को शुभ दृष्टि से देखता है, वहां स्थित स्वयं भगवान् शुभेक्षण अपने स्वभाव को प्रकट करता है । शुभदृष्टियुक्तभाव को प्राप्त करनेवाला मनुष्य भी, भगवान् का अनुग्रह करता हुआ, भगवान् का स्तवन और स्मरण करता है । शुभेक्षण नाम निष्पाप का भी है । हम लोक में भी देखते हैं, पापरहित मनुष्य के नेत्र शुभ होते हैं । और जो एक ग्रह की दूसरे ग्रह पर शुभ दृष्टि होती है उस में भगवान् स्वयं विराजमान होकर उस भाव को अपने गुण से समृद्ध करता है ।

रामः—३९४

क्रीडार्थक रमु धातु से, अधिकरण अर्थ में, घञ् प्रत्यय करने से, राम शब्द की सिद्धि होती है ।

जिस में वह समस्त विश्व क्रीडा करता है, उसका नाम राम है । यह सकल ब्रह्माण्ड उसी भगवान् विष्णु में, क्रीडन (खेला) करता हुआ, उदय और अस्त हो जाता है ।

इह राष्ट्राध्यक्षे राज्ञि, स्वायत्तस्वाध्यक्षे स्वामिनि वा सर्वत्रैष रामत्वरूपो गुणो व्याप्तोऽत एव राजा, राजसभास्वामी वा, स्वायत्तप्रदेशस्थाः प्रजा रमयति। एवं समस्तचराचरप्राणिवर्गस्य रमणस्थानं भगवान् राम इत्युच्यते।

भवति चात्रास्माकम्—

> रामः स विष्णुः सकलं हि विश्वं, प्रस्थाय तस्मिंल्लभते विरामम्।
> स्वतन्त्रवत्तद् रमयत्यजस्रं, बद्धं तथा भाति यथा स्वतन्त्रम् ॥२२१॥

सकलम्—कलया सहित विश्वमित्यर्थः।

विरामः—३९५

यथा रमन्तेऽस्मिन्निति रामस्तथा विरमन्त्यस्मिन्निति विरामः। एवञ्च यत्रेदं सर्वं विश्वं रममाणं विरमति=अवसानंल्लभते, स विरामो विष्णुरिति।

यत्र रमणं, तत्रैव रमणावसानम्। भगवत इद्धात्तपसा जातमत एव सुप्तोत्थितमिवेदं जगद्रमते ततश्च रमणाद्विरम्य तत्रैव लीयतेऽतः स विराम इत्युच्यते। प्रकृतिविकृतिविचयो हि जगत्, स्वनियतायुष्कं कालं व्यतीत्य पुनः प्रकृतिमापद्यत इति, यस्मादुद्भवो यत्र च प्रलयः स उभयाधारो विरामः।

यहां राष्ट्राध्यक्ष राजा, अथवा अपने आधीन किसी प्रदेश के स्वामी में, यह रामत्वरूप गुण व्यापक रूप ने रहता है इसलिये राजा, अथवा किसी राज्यसभा का स्वामी आदि अपने अधिकार में रहनेवाली प्रजा को रमण करवाता (खिलाता) है, अर्थात् उसे आनन्दित करता है। इस प्रकार से समस्त चराचर प्राणिवर्ग के रमण स्थान को, राम नाम से कहते हैं।

इस नाम के भाव को भाष्यकार इस प्रकार प्रकट करता है—

भगवान् विष्णु का नाम राम है, क्योंकि यह सकल विश्व उस ही में पहुंचकर (प्राप्त होकर) विराम = विशेष राम = रमण, अथवा शान्ति को प्राप्त करता है। वह भगवान् राम नामक विष्णु, इस सुनियन्त्रित विश्व को निरन्तर स्वतन्त्र के समान रमण करवाता=अर्थात् खिलाता है। कलाओं से युक्त का नाम सकल है।

विरामः—३९५

जिस प्रकार जिस में रमण करते हैं, उसका नाम राम है, उस ही प्रकार जिस में प्राप्त होकर विरत होते=अर्थात् शान्त हो जाते हैं, उसका नाम विराम है। इस प्रकार जिस में रमण करता हुआ यह सब विश्व, विरत हो जाता है उस भगवान् का नाम विराम है। जहां रमण होता है वहां ही रमण का अवसान=अन्त होता है। भगवान् के समिद्ध रूप तप से उत्पन्न हुआ, इसीलिये सोकर जागे हुए के समान यह जगत् रमण करता हुआ, रमण से निवृत्त होकर उस ही भगवान् में लीन हो जाता है, इसलिये भगवान् का नाम विराम है।

तथा च यथा पञ्चभूतोद्भूतमिदं पार्थिवं शरीरं, पञ्चभूतेष्वेव रममाण-मन्ततो रमणाद्विरम्य, पञ्चभूतेषु लीयते ।

भवतश्चात्रास्माकम्—

> विरामसंज्ञो भगवान् वरेण्यो, जगद्विधत्ते स विरामशीलम् ।
> सूर्योऽप्रमत्तो भ्रमणे प्रसक्तः कालात्यये खे रमते विरामे ॥२२२॥

तथा च—

> विष्णुर्विरामः कुरुते ह विश्वं, विरामधर्मं प्रलयेऽनिवार्ये ।
> यथोदितोऽलङ्कुरुतेऽस्तकालं, तथा विरामं लभते ह जन्तुः ॥२२३॥

विरतः—३९६

रामविरामशब्दाभ्यां प्रकृतेः प्रकृतिविकाराणाञ्च रमणस्थानं रमणाभावरूप-प्रलयस्थानञ्चोक्त्वा, विरतशब्देन तदुभयाभावरूपं जगतः पृथग्भावं ताटस्थ्यं कूटस्थत्व-ञ्च द्योत्यते ।

एवञ्च प्रकृतिं प्रवर्तयन् संहरंश्च स ततः पृथगपि कूटस्थरूपोऽवतिष्ठतेऽत एव च स विरत उच्यते । केचिदिह विरज इति नाम पठन्ति, तेषां मते विरजो=रजो-रहित इत्यर्थः ।

प्रकृति के विकारों का समूह ही जगत् है, वह अपने आयु के नियत समय को विताकर फिर प्रकृति को प्राप्त हो जाता है, इस प्रकार जिस से उत्पत्ति, तथा जिस में लय होता है, इन उत्पत्ति तथा लय दोनों का आधार ही विराम है । जिस प्रकार पञ्चभूतों से उत्पन्न यह पार्थिव शरीर, पञ्चभूतों में ही रमण करता हुआ, रमण से विरक्त होकर अन्त में पञ्चभूतों में ही लीन हो जाता है ।

इस नाम के भाव को भाष्यकार इस प्रकार व्यक्त करता है—

सब से श्रेष्ठ तथा सब का प्रार्थनीय भगवान् विष्णु स्वयं विराम है तथा जगत् को भी विरामशील बनाता है । सावधानीपूर्वक भ्रमण करता हुआ सूर्य, नियत समय को विताकर अन्त में इस विरामरूप अनन्त अन्तरिक्ष में ही विरत हो जाता है ।

भगवान् विष्णु का नाम विराम है तथा वह अवश्य होनेवाले प्रलय काल में, इस समस्त विश्व का विराम कर देता है, जैसे उदित हुआ सूर्य अस्त भी अवश्य होता है, उसी प्रकार उत्पन्न हुआ प्राणी अवश्य विराम को प्राप्त होता है ।

विरतः—३९६

राम और विराम शब्दों से प्रकृति और प्रकृति के विकारों के रमणस्थान, तथा रमणा-भावस्थान प्रलय को कहकर अब विरत शब्द से उन दोनों के अभावरूप जगत् से भगवान् की पृथक्ता, तटस्थता तथा कूटस्थता को कहता है । भगवान् विरतनाम से इसलिये उक्त होता है क्योंकि वह प्रकृति का प्रवर्तन तथा उपसंहार करके स्वयं उस से पृथक्, तटस्थ तथा कूटस्थ होकर रहता है। कुछ विद्वान् विरत नाम के स्थान में विरज ऐसा पाठ मानते हैं जिस का रजो गुण न रहित ऐसा अर्थ होता है। रजः शब्द तमोगुण का भी वाचक है जैसा कि "आदित्य

तत्र मन्त्रलिङ्गञ्च—

"आदित्यवर्णं तमसः परस्तात्" यजुः । ३१-१८

भवति चात्रास्माकम्—

रजो न तस्मिन्न तमश्च तस्मिन्, सत्त्वस्वभावो हि स विष्णुरुक्तः ।
सोऽस्ति स्वभावादमितप्रकाशो, वेदेऽस्ति गीतस्तमसः परस्तात् ॥२२४॥

मार्गः—३९७

मृजू शुद्धाविति धातुस्ततो घञि मार्गः । मृज्यन्ते शरणत्वेन स्वसम्पर्कमिताः प्राणिनो येन स मार्ग इति । यद्वा मार्ग अन्वेषण इति चौरादिकस्ततः कर्मणि घञ्, मार्ग्यते सुखरूपत्वेन सर्वैरन्विष्यत इति मार्गो, भगवान् विष्णुः । स स्वयं शुद्धरूपोऽन्येषां शोधनाद् भर्गोऽप्युच्यते ।

तथा च मन्त्रलिङ्गम्—

"भर्गो देवस्य धीमहि" यजुः । ३०-८

भवति चात्रास्माकम्—

मार्गः स विष्णुः स हि भर्ग उक्तः, शुचिः स विष्णुर्विरजाः स एव ।
स एव शुद्धस्तमु वा स्तुवन्ति, रामं विरामं सकलेशमर्च्यम् ॥२२५॥

वर्णं तमसः परस्तादित्यादि" यजुर्वेद मन्त्र से प्रतिपादित है ।

इस नाम के भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु में न रजोगुण है और न तमोगुण है, वह केवल सत्त्वस्वरूप है, वह स्वभाव से ही ज्ञानस्वरूप होने से अपरिमित प्रकाशशील है इसीलिये वेद में उसको "तमसः परस्तात्" रूप से कहा है

मार्गः—३९७

शुद्ध्यर्थक मृज् धातु से घञ् प्रत्यय करने से मार्ग शब्द सिद्ध होता है । जो शरणागत भाव से अपने सम्पर्क में आये प्राणियों को शुद्ध कर देता है, उसे मार्ग कहते हैं । अथवा अन्वेषणार्थक मृग धातु जो कि चुरादिगणपठित है, उस से कर्म में घञ् प्रत्यय करने से मार्ग शब्द बन जाता है । सुखरूप होने से. जिस का सब के द्वारा अन्वेषण किया जाता है, उस का नाम मार्ग है, भगवान् विष्णु का नाम है । भगवान् का नाम भर्ग भी इसलिये है कि वह स्वयं शुद्ध होने से, दूसरों को भी शुद्ध कर देता है ।

इस अर्थ का प्रतिपादक "भर्गो देवस्य धीमहि" इत्यादि यजुर्वेद मन्त्र है ।

इस नाम के भाव को भाष्यकार इस प्रकार प्रकट करता है—

भगवान् विष्णु का नाम मार्ग तथा भर्ग भी है, तथा वह ही शुचि और विरज तथा शुद्ध नाम से कहा जाता है । उस ही भगवान् सकलेश्वर की विद्वान् पुरुष राम, विराम तथा अर्च्य नाम से स्तुति करते हैं ।

नेयः—३९८

णीञ् प्रापणे धातोरर्हार्थे यति, गुणे च सिध्यति नेयः शब्दः। नेयः=प्राप्यः प्राप्तुं योग्य इत्यर्थः। अथवा सर्वप्रमाणाविषयत्वात् स मनसा नेतुमर्हो=मन्तुं योग्यो मननीयो भवति।

मन्त्रलिङ्गञ्च—

"तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। यजुः ३१।१८

भवति चात्रास्माकम्—

सर्वप्रमाणाविषयः स विष्णुर्नेयो मनोभिर्मननीय एकः।
तमन्तरा चेह न किञ्चिदाप्यं, यच्छ्रेयसे स्यात् सुतरां नराणाम् ॥२२६॥

नयः—३९९

णीञ् प्रापणे धातोरच् प्रत्ययो, नयतीति नयः। सर्वस्य नेतेत्यर्थः। भगवान् विष्णुर्हि सर्वमिदं विश्वं, यथोद्देशलक्ष्यं प्रापयन्, नयति=प्रापयति सर्वोत्तमं ज्योतिः-स्वरूपं स्वं रूपमिति नय उच्यते। यद्वा सच्चिदानन्दरूपो भगवान्, सदादितत्तदंशेना-

---

नेयः—३९८

नेय शब्द णीञ् इस प्रापणार्थक धातु से, अर्हार्थ में यत् प्रत्यय और गुण करने से सिद्ध होता है।

जो प्राप्त करने योग्य है, उसका नाम नेय है। अथवा वह सब प्रकार के प्रत्यक्ष आदि प्रमाणों का विषय न होने से केवल मन से ही मनन करने योग्य है, इसलिये उस का नाम नेय है।

इस नाम में "तमेव विदित्वातिमृत्युमेति" इत्यादि मन्त्र प्रमाण है।

इस नाम के भाव को भाष्यकार अपने पद्य द्वारा इस प्रकार व्यक्त करता है—

भगवान् विष्णु किसी प्रत्यक्षादि प्रमाण से प्राप्ति का विषय न होकर केवल मन के मनन का विषय होता है। भगवान् के बिना संसार में कोई भी वस्तु ऐसी नहीं है जिसके प्राप्त करने से मनुष्य का कल्याण हो सके।

नयः—३९९

प्रापणार्थक णीञ् धातु से कर्ता अर्थ में पचाद्यच् प्रत्यय करने से नय शब्द सिद्ध होता है। सबको लेकर चलनेवाले का नाम नय है। भगवान् विष्णु का यह नाम इसलिये है कि वह इस समस्त विश्व को इसके उद्देश्य की प्राप्ति करवाता हुआ अपने सर्वोत्कृष्ट ज्योतिर्मय स्वरूप को प्राप्त कर देता है। अथवा भगवान् सच्चिदानन्दरूप होने से अपने सच्चिदानन्दरूप को अंशरूप से प्रकृति में ले जाता है, इसलिये उसका नाम नय है। भगवान् स्वयं विशोक होने

त्मानं प्रकृतौ नयति=प्रापयतीत्यर्थः। स्वयं विशोको जीवमपि विशोकं कुरुते। एवं स नयनामा भगवान् स्वनाम्ना स्वस्य विष्णुत्वं=सर्वव्यापकत्वं प्रथयति।

भवति चात्रास्माकम्—

नयः स विष्णुः स्वकृते ह विश्वे, रूपं निजं प्रापयते हि नित्यम्।
स सच्चिदानन्दमयः प्रकृत्या, सच्चिन्मयं चापि जगद् विधत्ते ॥२२७॥

अनयः—४००

नयति=प्रापयत्यात्मानं विविधेषु भावेषु, विविधं वेदं जगदात्मनीति, नय इति प्रागुक्तम्। इदानीं तस्यानयत्वं प्रतिपाद्यतेऽनय इति नाम्ना। अर्थात् स नयः सन्ननयोऽपि भवति, यतो हि स आत्मानं विविधरूपतामापादयन् यद्वा विविधमिदमात्मरूपतां नयन्नपि, तद्व्यतिरिक्तकूटस्थाविचालिरूपेणापि तिष्ठत्यतोऽनयोऽपि स उच्यते।

यद्वा—एतीत्ययो गतेः कर्ता, गत्यर्थादिण् धातोरच् प्रत्ययः, न-एतीत्यनयः, गतिरूपक्रियारहितो, व्यापकत्वात् कूटस्थत्वाच्च।

से जीव को भी विशोक कर देता है। इस प्रकार नय नाम वाला भगवान् विष्णु इस नय नाम के द्वारा अपने सर्वव्यापकत्व रूप विष्णुत्व को प्रकट करता है।

इस नाम के भाव को भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विष्णु का नाम नय है क्योंकि वह अपने से निर्मित इस विश्व में सब को अपने स्वरूप की प्राप्ति करवाता है, अथवा स्वयं स्वभाव से सच्चिदानन्द होने से इस विश्व को भी सच्चिदानन्दरूप ही बनाता है।

अनयः—४००

जो अपने आप को विविध भावों में, अथवा इस विविधरूप जगत् को अपने में ले जायें, उसका नाम नय है, यह प्रथम नय नाम में कहा जा चुका है। अब इस अनय नाम से उसका नय विपरीत अर्थ प्रतिपादित होता है। अर्थात् वह जैसे नय है, उसी प्रकार अनय भी है। क्योंकि वह अपने आप को विविध भावों में अथवा इन विविध भावों को अपने में प्राप्त करता हुआ भी इस से विपरीत कूटस्थ अविचालिरूप से भी रहता है इसलिये उस का नाम अनय भी है। अथवा 'अय' नाम है चलनेवाले का। गत्यर्थक इण् धातु से अच् प्रत्यय करने से, अय पद सिद्ध होता है, जो व्यापक और कूटस्थ होने से गतिरहित है उसका नाम "अनय" है।

भवति चात्रास्माकम्—

विष्णुर्नयः सन्ननयः स उच्यते, कूटस्थनित्यो गमको जगत्याः ।
यथाविधानं गमयत्यजस्रं, जातोऽमरो नास्ति यथात्र तद्वत् ॥२२८॥

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते महाभारता-
नुशासनपर्वान्तर्गतस्य (अ० १४६) विष्णुसहस्र-
नामस्तोत्रस्य सत्यभाष्ये चतुर्थं नाम-शतकं
सम्पूर्णम् ।

काश्चन सूक्तयः—

१—'घृतेन त्वां मनुरद्या समिन्धे' अथर्व० ७-८२-६

२—'गावो घृतस्य मातरः' अथर्व० ६-६-३

यज्ञियं घृतं गोदुग्धोत्थमेव नान्यत्, घृतशब्देन गव्यं घृतं ग्राह्यं पवित्रत्वात्, 'गोषु पाप्मा न विद्यते' इति प्राञ्चः ।

३—'ब्राह्मणो न हिंसितव्यः' अथर्व० ५-१८-६

४—''अहं भूयासमुत्तमः'' अथर्व० ६-१५-३

इस भाव को भाष्यकार इस प्रकार व्यक्त करता है—

भगवान् विष्णु जगत् का गमक = चलानेवाला होने से नय तथा कूटस्थ नित्य होने से अनय नाम से कहा जाता है । वह इस सकल जगत् को विधानानुसार चला रहा है, कोई भी देव या मनुष्य उसकी समानता करने में समर्थ नहीं है ।

व्याख्यातमेतच्छतकं चतुर्थं मनोरमं विष्णुसहस्रनाम्नः ।
अनूदित राष्ट्रगिरा च भूयाद् भव्याय दिव्यं भुवि भावुकानाम् ॥

कुछ वैदिक सूक्तियां—

१—हे यज्ञाग्ने ! मैं आज आपको बुद्धिपूर्वक प्रदीप्त करता हूँ ।

२—गौवें घी की उत्पादयित्री हैं गव्यघृत-आग्नेय होने से पवित्र है—गौवों में विकार नहीं है । भैंस-बकरी आदि का घृत यज्ञिय नहीं है ऐसा वेद का यह ज्ञापन समझें ।

३ ब्राह्मण का वध, कभी नहीं करना चाहिये ।

४—हे ईश्वर मैं सबसे उत्कृष्ट बनूं ।

वीरः—४०१

वीरशब्दो विविधं व्याख्यातचरो १६६ वीरहानाम्नो व्याख्यानावसरे तत्र द्रष्टव्यम् तत्र अजेर्वीभावः स्फायितञ्चीत्यादिना रगन्तश्च साधितः।
यद्वा—विपूर्वक-ईरगतौ कम्पने चेत्यस्मात् पचाद्यचि कप्रत्यये वा साधितः।
यद्वा—वीर विक्रान्तौ, धातुनापि शक्यसाधनः।
एवञ्च वीरयते, विक्रमतेऽमित्रेषु, वीरयति कम्पयति वामित्रानिति वीरः।
मन्त्रलिङ्गम्—

"स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः।
सोमो हिनोति मर्त्यम् ॥ ऋग् -१८४

भवन्ति चात्रास्माकम्—

वीरः स विष्णुः प्रपदं जगत्यां गतिं दधानः क्रमतेऽविरामम्।
यस्मिन् हि यावान् क्रमते तदंशः, स मर्त्यभूतोऽपि न रिष्यतेऽर्थात् ॥२२९॥
सूर्यो हि वीरः स निजांशयोगाद्, ग्रहान् यथास्थानगतान् युनक्ति।
बलेन दीप्त्या निजराशिवर्गे, स्थितांस्तथा दीप्ततमान् करोति ॥२३०॥
हिनस्ति तेजः स सधस्थयातु, वीरो यथा शत्रुगणान् क्षिणोति।
अतोऽस्ति वीरः परमादरार्हः, पदञ्च विष्णोः कवयः स्तुवन्ति ॥२३१॥

वीरः—४०१

वीर शब्द का व्याख्यान, वीरहा १६६ नाम की व्याख्या में किया जा चुका है। वहां पर वीर शब्द को गतिक्षेपणार्थक अज धातु को वीभाव तथा उणादि रक् प्रत्यय करके सिद्ध किया है। अथवा वीर शब्द ईर गतौ कम्पने च, धातु से भी सिद्ध होता है। इसी प्रकार वीर विक्रान्तौ धातु से भी वीर शब्द सिद्ध होता है। इस प्रकार जो अपने पराक्रम से शत्रुओं को दबावे या कम्पावे वह वीर है, यह लोक में वीर शब्द का अर्थ है। इसमें "स घा वीरो न" इत्यादि मन्त्र प्रमाण है।

भाष्यकार ने श्लोकों द्वारा इस कथन को इस रूप में व्यक्त किया है—

भगवान् विष्णु का नाम वीर है क्योंकि वह प्राणियों में गति को धारण करता हुआ निरन्तर गतिशील बना रहता है। जिस प्राणी में उसके जितने अंश का सङ्क्रमण होता है, वह प्राणी मरणधर्मा होता हुवा भी उतने अंश से सार्थक है अर्थात् स्थिर है।

सूर्य का नाम वीर है क्योंकि वह अपने अंशभूत बल तथा तेज से ग्रहों का सम्बन्ध करता है अर्थात् अपनी अपनी राशि में स्थित ग्रहों को तेजस्वी-दीप्तियुक्त करता है। वह अपने परम स्थान में स्थित ही जङ्गमशील ज्योतियों के तेज को पराभूत=तिरस्कृत करता है जैसे कि वीर पुरुष शत्रुगणों को तिरस्कृत करता है, इसलिये वह आदरणीय है और कविगण उस विष्णु की

मन्त्रलिङ्गञ्च—

"तद्विप्रासो विपन्यवो जागृवांसः समिन्धते
विष्णोर्यत्परमं पदम् ॥ यजुः ३४-४४

यत्त्वधिग्रहमुक्तं, तज्ज्योतिर्विद्ययावगन्तव्यम् ।

शक्तिमतां श्रेष्ठः—४०२

शक्तिः—शक्लृ शक्तौ, सौवादिको धातुस्तस्मात् "स्त्रियां क्तिन्" पा० ३-३-९४ सूत्रेण स्त्रियां भावे क्तिन् प्रत्ययः ततो मतुप् प्रत्ययो मतुबन्तात्षष्ठीबहुवचनम् ।

श्रेष्ठः—प्रपूर्वात् शंसु स्तुतौ, धातोः, क्यपि, नलोपे प्रशस्यः । अतिशयेन प्रशस्य इत्यर्थे—"अतिशायने तमबिष्ठनौ" पा० ५-३-५५ सूत्रेणेष्ठन् प्रत्ययः, तस्मिन् परतः "प्रशस्यस्य श्रः" इति पा० ५-३-६० सूत्रेण श्रादेशः । "प्रकृत्यैकाच्" पा० ६-४-१६३ इत्यनेन प्रकृतिभावात् "टेः" इति टिलोपाभावो गुणश्च श्रेष्ठ इति । शक्तिमतां श्रेष्ठ इति निर्धारणे षष्ठी, अतो—"न निर्धारणे" पा० २-२-१० इति समासनिषेधः । शक्तिमतां श्रेष्ठ इति विष्णोः सूर्यस्य वा नामसञ्ज्ञतार्थं भवति ।

मन्त्रलिङ्गञ्च—

"तव त्ये सोम शक्तिभि र्निकामासो व्यृण्विरे ।
गृत्सस्य धीरा स्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे
पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।
समाकृणोषि जीवसे वि वो मदे विश्वा संपश्यन् भुवना विवक्षसे ॥

ऋग् १०-२५-५

सारांशः—कस्तं शक्तिमतां श्रेष्ठं विष्णुं सूर्यं वा विना विश्वानि भुवनानि वोढुं क्षम इति ।

वीर पद से करते हैं । स्तुति इसमें 'तद्विप्रासो विपन्यव" इत्यादि मन्त्र प्रमाण है ।

ग्रहों के विषय में जो कहा है उसे ज्योतिःशास्त्र से समझ लेना चाहिये ।

शक्तिमतां श्रेष्ठः—४०२

शक्लृ धातु से क्तिन् प्रत्यय भाव में तदन्त से मतुप् प्रत्यय तथा मतुप् प्रत्ययान्त से, षष्ठी बहुवचन शक्तिमतां पद बनता है । प्र पूर्वक शंसु स्तुतौ धातु से योग्य अर्थ में कृत्य क्यप् प्रत्यय करने से प्रशस्य और प्रशस्य शब्द मे अतिशय अर्थ में "इष्ठन् प्रत्यय" और प्रशस्य प्रकृति को "श्र" आदेश करने से श्रेष्ठ शब्द सिद्ध होता है । शक्तिमतां श्रेष्ठः में शक्तिमतां यह निर्धारण षष्ठी है इसीलिये समास नहीं होता है ।

शक्तिमतां श्रेष्ठ, यह नाम विष्णु तथा सूर्य दोनों में सङ्गत होता है । इस में—तव सोम-शक्तिभिर्निकामासो—इत्यादि मन्त्र प्रमाण है । सारांश यह है कि उस परम शक्तिमान् परमेश्वर वा सूर्य के विना इन समग्र भुवनों को कौन धारण कर सकता है ।

भवति चात्रास्माकम्—

शक्तिर्हि या प्राणिनि वा जगत्यां, तामादिधाता स महान् सहिष्णुः।
स शक्तिमत्स्वाकथितः प्रशस्यः, श्रेष्ठं तमाहू रविमात्मसंस्थम् ॥२३२॥

शरीरस्थ आत्मा स्वाङ्गैर्यदा कर्षणविकर्षणे करोति तत्तस्यैव शक्तिमता श्रेष्ठस्यादिस्रोतस्वतोऽन्वाख्यानमात्रम्।

तत्र नियमः—यो हि यस्य विकारः स स्वप्रकृतिं प्रत्याकृष्टो भवति, यथा गोवत्सः स्वमातरं गां प्रति, मनुष्यशिशुश्च स्वां मातरं प्रति, पृथिव्या विकारो लोष्ठः पृथिवीं प्रति, सूर्यस्य विकारोऽग्निः सूर्यं प्रति, अन्तरिक्षविकारा आपो धूम्रतामापन्ना अन्तरिक्षं प्रति।

नियतोऽयं वैज्ञानिकसिद्धान्तो भगवता पतञ्जलिना "स्थानेन्तरतमः" पा० १-१-५० सूत्रे सम्यङ् निरूपितः, पुराणैराचार्यैराविष्कृतश्च।

धर्मः—४०३

धर्म इति—धृञ् धारणे, भौवादिको धातुस्तस्मात् "अर्तिस्तुसुहुसृधृक्षि" इत्यादिना औणादिको 'मन्' प्रत्ययः। धारयतीति धर्मः। धार्यते वा येन जगदिति

भाष्यकार ने इस का पद्यमय संकलन इस प्रकार किया है—

जो प्राणियों में अथवा सम्पूर्ण जगत् में शक्ति है, उसको सबसे आदिमें धारण करनेवाला, महान् सहनशील विष्णु सब शक्तिवालों में, श्रेष्ठ कहा गया है तथा उस का परमपद सूर्य भी शक्तिमतां श्रेष्ठ कहा जाता है।

शरीरस्थ आत्मा भी जब अपने अङ्ग हस्त आदि से आकर्षण अपनी ओर किसी वस्तु को खींचना वा लेना, विकर्षण किसी वस्तु को बाहर का फैंकना आदि करता है। यह सब उसी शक्ति के आदि स्रोत विष्णु का अनुकरण मात्र है।

आकर्षण विकर्षण में यह नियम है, कि जो वस्तु जिसका विकार होती है, वह उस अपनी विकारभूत वस्तु को अपनी ओर खींचती है तथा विजातीय का विकर्षण करती है, दूसरी ओर फैंकती है।

जैसे गाय के बछड़े तथा मनुष्य के बालकों का अपनी माता के प्रति आकर्षण होता है। पृथ्वी का विकार मिट्टी का ढेला या पत्थर पृथ्वी की ओर आता है। सूर्य का विकार अग्नि सूर्य की ओर उन्मुख होता है। अन्तरिक्ष का विकार जल वाष्परूप होकर अन्तरिक्ष की ओर ही जाता है। यह नियत और वैज्ञानिक सिद्धान्त है। प्राक्तन आचार्यों ने इसका आविष्कार किया और भगवान् पतञ्जलि ने "स्थानेऽन्तरतमः" पा.१-१-५० सूत्र में इसका निरूपण किया है।

धर्मः—४०३ श्रुति स्मृतिरूप धर्म।

भ्वादिगण की धृञ् धारणे धातु से अजादि मन् प्रत्यय करने पर धर्म शब्द सिद्ध होता है। जो जगत् को धारण करता है, अथवा जिस के द्वारा जगत् धारण किया जाता है वह धर्म है। यह भगवान् विष्णु वा सूर्य का नाम है।

धर्मः। विष्णुर्वा सूर्यो वा धर्मशब्दाभिधेयः।

अत्र मन्त्रलिङ्गम्—

"धर्मोऽस्मि विशि राजा प्रतिष्ठितः। यजुः २०-९

धर्मशब्दोऽयं, विविधविभक्तिवचनेषु, यथाप्रकरणं वेदे प्रयुज्यतेऽतस्तत्र वेद एव जिज्ञासुभिर्द्रष्टव्यम्।

भवति चात्रास्माकम्—

धर्मो हि विष्णुः स हि वास्ति सूर्यः, सूर्यात्मधर्मेण जगद्धृतं वै।
सूर्यञ्च यो धारयते स विष्णुः, तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥२३३॥

व्यवस्था वा धर्मः--

व्यवस्थितौ यो नियुनक्ति विश्वं, नक्षत्रसूर्यादिगणान् समस्तान्।
स विष्णुरेकः क उ तं विना स्याद्, धर्मोऽस्मि संख्यातुमिह प्रवृत्तः ॥२३४॥

धर्मविदुत्तमः—४०४

धर्मो=धारकः, धारकान् धर्मान् वेत्तीति धर्मवित्, धर्मविदां मध्ये य उत्तमः= उद्गततमः स धर्मविदुत्तमः। उत्तमशब्दे उदुपसर्गात् परस्य कस्यचिदपि क्तान्तधातु—रूपस्य लोपोऽवगन्तव्यो भवति।

कुतः—उपसर्गो हि धात्वर्थमाकर्षति, तस्मात्—उद्गततमः-उत्तमः। उद्भूततमः-उत्तमः। उद्यातमः- उत्तमः। उच्चैर्निःसृततमः- उत्तमः। अत्र वुद्धेर्वैशद्याय बहुधा

यहां "धर्मोऽस्मि विशि राजे"त्यादि मन्त्र प्रमाण है। धर्म शब्द का प्रयोग वेद में, विभक्ति वचन भेद से बहुधा आता है। इसलिये जिज्ञासुओं को वहां ही देखना चाहिये।

भाष्यकार के श्लोक का भावार्थ इस प्रकार है—

धर्म नाम भगवान् विष्णु वा सूर्य का है, धर्मरूप सूर्य के द्वारा जगत् धारण किया हुवा है जो सूर्य को धारण करता है वह विष्णु है और उसमें ही ये सब लोक स्थित हैं। अथवा व्यवस्था का नाम धर्म है –

इस समग्र विश्व नक्षत्र तथा सूर्यादिगणों को, जो अपनी व्यवस्था से नियमित रखता है, वह एक ऐसा भगवान् विष्णु ही है, उसके विना अपने आप को धर्म नाम से कहने में कौन समर्थ है, अर्थात् वह ही एक सब को धारण करनेवाला है।

धर्मविदुत्तमः=४०४ समस्तधर्मवेत्ताओं में उत्तम।

धर्म उसका नाम है जो धारण करे और जो धारण करनेवाले धर्मों को विशेष रूप से जानता हो उसको कहते हैं धर्मविदुत्तमः—धर्मविदुत्तम शब्द का विश्लेषण करते हुए भाष्यकार लिखते हैं कि जो धारक धर्मों का ज्ञान रखता हो वह धर्मवित् और जो धारक धर्मों

व्यासीकृत्योपन्यस्त उत्तमशब्दः ।

व्यासो हि विश्लेषः । तत्र व्यापकत्वं 'धर्मविदुत्तम' इति पदस्य लोकं दृष्ट्वा अमुना प्रकारेण व्याख्यातं भवति, तद्यथा—मानुषशरीरे किं वा पशु-पक्षिशरीरे यावन्तः सन्धयः सन्ति, ते प्रायशः परस्परं भेदमापन्नाः सन्ति । तद्यथा—सर्वकं शरीरं गुल्फसन्धिर्धारयति, स यथाविधः सन्धिरस्ति न तथाविधो जानुसन्धिरस्ति, यथा—विधो जानुसन्धिरस्ति न तथाविध ऊरूदण्डसन्धिः, यथाविध ऊरूदण्डसन्धिरस्ति न तथाविध ऊरूफलकसन्धिः, यथाविध ऊरूफलकसन्धिः, न तथाविधस्त्रिकास्थ्नां सन्धिरस्ति, यथाविधस्त्रिकास्थ्नां सन्धिः, न तथाविधः शेषाणां पृष्ठकशेरूकाणां सन्धिरस्ति ।

सन्धिमन्तरा स धर्मविदुत्तमो विष्णुरमोघधर्मा सन्, कशेरूकाणां स्वरूपमपि विविधं करोति, कुतः-एवम्,

स्वकं धर्मविदुत्तमत्वरूपं गुणं साकल्येन व्याचक्षाणः सन् यथाविधः कशेरू—काणां सन्धिरस्ति न तथाविधः शिरःकपालानां सन्धिरस्ति, यथाविधः शिरः-कपालानां सन्धिरस्ति, न तथाविधः सन्धिरस्ति शिरःकपालमध्ये वर्तमानाना—मस्थ्नाम् । अमुथैव हन्वोः सन्धिः-हनुमूलसन्धिश्च भिन्नः, दन्तानां सन्धिर्भिन्नः, बाहुमूलसन्धिर्भिन्न एव ऊरूदण्डास्थिसन्धिमपेक्षीकृत्य, उरः-पर्शुकानां सन्धिः परस्परं, मेरूदण्डेन च सन्धिः किञ्चिद् भेदमापन्न एव, कफोणीसन्धिर्भिन्नो जानु-सन्धेरपेक्षया, एवमेव मणिबन्धसन्धिर्गुल्फसन्धेरपेक्षया भिन्न एव । एवं कृत्वा मांस-सन्धिष्वपि वैशिष्ट्यं दृश्यतेऽस्थिसन्धीनामपेक्षया ।

का विशेष रूप से ज्ञाता हो वह उत्कृष्ट ज्ञानवाला होने से धर्मविदुत्तम है । यहां उत्तम शब्द में उत् उपसर्ग से तमप् प्रत्ययान्त रूप में उपसर्ग से परे किसी भी क्त प्रत्ययान्त(गम् या भू लभ् अथवा निर् पूर्वक सृ) धातु का लोप समझना चाहिये । क्योंकि—उपसर्ग धातु के अर्थ को परि-वर्तित कर देता है इसलिये उत्तम शब्द के ऊपर उठा हुआ, ऊपर गया हुआ, ऊपर निकला हुआ इत्यादि बहुत अर्थ होजाते हैं । यहां उत्तम शब्द का कई प्रकार से व्याख्यान केवल बुद्धि के विकास के लिये किया गया है । व्यास नाम विश्लेष का है, विश्लेष का दूसरा नाम विस्तार है ।

लोकानुसार 'धर्मविदुत्तम' शब्द की इस प्रकार व्याख्या की जाती है—

जैसे मनुष्य के अथवा पशु पक्षी आदिकों के शरीर में जितनी संधियां वा जोड़ हैं, वे प्रायः करके भिन्न भिन्न हैं जैसे घुटनों की सन्धि शरीर को धारण करती है वैसे जानुसन्धि नहीं । इसलिये जानुसन्धि और घुटनों की सन्धि समान नहीं । इसी प्रकार जानु सन्धि के समान जंघों की सन्धि नहीं ।

ऊरू दण्ड सन्धि के तुल्य ऊरूफलक सन्धि नहीं, जैसी ऊरूफलक में सन्धि है, वैसी त्रिका-स्थि सन्धि जो पृष्ठ के पीछे भाग में तीन हड्डियों का जोड़ है वह नहीं, जैसी त्रिकास्थि सन्धि है, वैसी पृष्ठ कशेरूकों की सन्धि नहीं । सन्धि के बिना वह धर्मविदुत्तम भगवान् विष्णु कशेरूकों की स्वरूप रचना भी कई प्रकार से करता है ।

धर्मो हि धारणालक्षण: सर्वं समुदितं मांससन्धि-धातुसन्धि—आशयसन्धि-अस्थि-सन्धिमयं शरीरं तमेव धर्मविदुत्तमं प्रतिपदं व्याचष्टे । नैतावतैवालम्, तत्र उष्ट्र-शरीरास्थ्नां निर्माणं सन्धानञ्च गोरपेक्षया भिन्नमेव, गो: शरीरसन्धानमश्वापेक्षया भिन्नमेव।

एवमेव, मयूरचटकादिषूत्प्रेक्ष्यम् । मत्स्ये समुद्रान्त:शायिनि सर्पशरीरे च स्फुट भेदो दृश्यते । अनेनैव विधिना-क्षुपलता-वीरुध्-वृक्षेष्वपि संयोजनीयं भवति । नैतावतैव, स भगवान् धर्मविदुत्तमोऽलमाश्रयति-परन्तु-नभश्चराणां ग्रहाणां गति—भेदं व्यवस्थाप्य तेषां सन्धीन् विविधं करोति, भावाभावाय लोकानाम् ।

ऋतुसन्धिरयनसन्धिस्तथोदयास्तसन्धिरेते सन्धय: परस्परं भिन्ना एव, तारकाणां सन्धिर्भिन्न:- तद्यथा-सप्तर्षयो दिवि दृश्यमाना न परस्परं विरुद्धयन्ति, कुत: सन्धीनां बहुत्वात् । अतो वेदवाक् स्पष्टयति स्वमात्मानम्, आत्मा-शब्दो निज-शब्दपर्याय:, निजं स्वरूपमिति ।

अपने धर्मविदुत्तमवत्ता रूप गुण को समग्र भाव या सम्पूर्ण रूप से दिखाता हुआ जैसी कशेरुकों की सन्धि है, वैसी शिर के कपालों की सन्धि नहीं, शिर के कपालों की जैसी सन्धि है वैसी शिर:कपालों के अन्दर होनेवाली हड्डियों की सन्धि नहीं। इसी तरह हनु (ठोडी) और हनुमूल की सन्धि भिन्न भिन्न हैं । दाँतों की सन्धि भिन्न है । भुजाओं के मूल की सन्धि मेरुदण्ड सन्धि की अपेक्षा भिन्न है । छाती के पार्श्वभागों की सन्धियां आपस में और मेरुदण्ड से भी कुछ भिन्न ही हैं । इसी प्रकार मणिबन्ध सन्धि भी गुल्फ सन्धि की अपेक्षा भिन्न है : इसी तरह मांस सन्धियों में भी विशेषत: दिखाई देती है। धारणा ही धर्म का स्वरूप है मांससन्धि-धातुसन्धि-आशय-सन्धि-अस्थिसन्धि रूप यह समग्र शरीर, उसी धर्मविदुत्तम का पद पद पर व्याख्यान कर रहा है। इतने से ही नहीं--किन्तु ऊंट की शरीरास्थियों का निर्माण तथा संधान गौ पशु की अपेक्षया भिन्न है, इसी प्रकार गौ का शरीर सन्धान अश्व के शरीर सन्धान से भिन्न है । मयूर चटका आदि पक्षियों में भी इसी तरह समझ लेना चाहिये । समुद्र के अन्दर रहनेवाले मत्स्य में तथा सर्प शरीर में स्पष्ट भेद दिखाई देता है। एवं क्षुप (छोटी शाखाओं के पौधे) लता 'वृक्ष आदिकों पर फैलने वाली बेलें' वीरुध्' पृथिवी पर चतुरस्र फैलनेवाली लता विशेष, आदिकों में भी मिलान कर लेना चाहिये । इतने ही से भगवान् विष्णु की धर्मविदुत्तमता की समाप्ति नहीं होती । किन्तु आकाश में चलनेवाले ग्रहों की विविध प्रकार से गतियों की व्यवस्था करके लोकों की उत्पत्ति और नाश के लिये उन्हीं की विविध सन्धियां करता है । ऋतु सन्धि, अयन सन्धि, उदस्त सन्धि ये सब आपस में भिन्न हैं। नक्षत्रों की सन्धियां भी भिन्न हैं जैसे जैसे आकाश में दीखते हुए सप्त ऋषियों का भी विरोध नहीं होता क्योंकि उनकी सन्धियां भिन्न हैं और वे अनेक हैं।

"स नो बन्धुर्जनिता" ३२-१० यजुः। यो यस्य जनिता भवति स एव तस्य बन्धुर्भवति, बन्धुः=बन्धनकर्ता सन्धाता वा समानार्थः। य एव जनिता भवति स एव च विधाता विविधरूपेण धारणकर्ता भवति।

लोकेऽपि च पश्यामः- परिवारे यो मूलः पुरुषो भवति, स स्वकं सपरिच्छदं परिवारं सन्दधाति पृथक् पृथक् रूपेण, तद्यथा-जामातरं, स्नुषां, पुत्रान्, नप्तॄन्, भृतकान्, पूज्यानतिथींश्चेत्यादि स्वयमूह्य लोकं दृष्ट्वा।

यो हि जनिता भवति, स एव हि विधाता भवति, स एव हि धामानि स्थानानि "लोके च पत्तनानि" इति ज्ञानक्रमः – एतस्यैव वैष्णवनियमस्य व्याख्यामात्रं परिपाटीमन्वियन् दृश्यते। वेद जानाति, भुवनानि-भवनानि प्राप्तसत्ताकानि त्यक्त-सत्ताकानि प्राप्यमाणसत्ताकानि च, विश्वानि=सर्वाणि-यत्र=यस्मिन् जनितरि देवाः साध्याः-ऋषयश्च येऽमृतं नाशरहितं धर्मम् 'आनशानाः' समन्ताद् गतिं प्रयच्छन्तः तृतीये धामनि=ऐरयन्त, तृतीयं धाम ज्ञानाधिष्ठानं तत्र विचरन्ति विचरिष्यन्ति वा, लोकेऽपि च पश्यामः पादादुर्वन्तमेकं पदमूरोः शिरः कपालसन्ध्यन्तं द्वितीयं पदं, शिरस्तृतीयं ज्ञानप्रधानम्। एवम्भूतं ज्ञानमार्गमनुनिशम्य, सुधीभि र्वेदमन्त्राणां विविधाः ऊहा ऊहितव्या भवन्ति। प्रसङ्गप्राप्तमत्र व्याख्यातमस्माभिः।

इसलिये वेदवाणी अपने स्वरूप को स्पष्ट करती है। आत्मा शब्द निज शब्द का पर्याय-वाचक शब्द है, 'स नो बन्धुर्जनिता' जो जिसका जनक (उत्पादक) होता है वही उसका बन्धु होता है। बन्धु नाम बांधनेवाले का है, जोड़नेवाला वा मिलानेवाला भी बन्धु कहा जाता है।

लोक में भी देखते हैं कि जो जनक होता है, वही विधाता विविध प्रकार से धारण करता है जैसे परिवार में जो मूल पुरुष वा प्रधान पुरुष परिवार का संयोजक होता है, वह सम्बन्ध सहित परिवार को अच्छी तरह पृथक् पृथक् रूप से धारण करता है। जैसे कुल का मूल पुरुष जामाता-पुत्रवधू-पुत्र-दुहिता-नोकर-पूज्य अतिथि आदिकों का सम्बन्धानुसार यथायोग्य धारक होता है। इसी प्रकार लोक व्यवहार को देखते हुए अपने आप समझ लेना चाहिये।

जो जनिता 'जनक' होता है, वही विधाता है, वही प्रभु सब स्थानों जिन को लोक में पता (ठिकाना) कहते हैं तथा भुवनानि 'भवन धर्म वाले' जो इस समय हैं जो हो चुके भूत-काल में और जो आगे होवेंगे हैं सब पदार्थों को जानता है। जिस धारक अथवा जनिता प्रभु-में देवता-साध्य तथा महर्षि अपने नाशरहित धर्म का व्यापन करते हुए पूर्ण रूप से समझते हुए तीसरे स्थान ज्ञानाधिष्ठान में विचरते हैं 'बिहार करते हैं' अथवा विचरेंगे।

लोक में भी ऐसा ही देखने में आता है—पैरों से जंघा तक एक स्थान, जंघा से कपाल संधि तक दूसरा स्थान, शरीर का तीसरा स्थान मस्तक ज्ञान प्रधान है।

इस प्रकार ज्ञान मार्ग का विचार करके वेद मंत्रों का सयुक्तिक बहुत प्रकार से विचार होना चाहिये, यहां हमने प्रसङ्ग से जो कुछ प्राप्त हुआ उसका अच्छी तरह से व्याख्यान

भवति चात्रास्माकम्—

स धर्मविद् धर्मविदां वरेण्यः, स एव सन्धीन् कुरुते विचित्रान्।
स एव तान् वेत्ति च सन्दधाति, स एव मर्त्येन च गेय एकः ॥२३५॥

गेयः स्तुत्यः स्तोतुमर्ह इत्यर्थः। य एव धर्मविदुत्तमं विष्णुं वेद, स एव कुशलः शिल्पी, प्रवन्धकः, व्याख्याता, ज्ञानदाता, उपदेष्टा, प्रभोः साक्षाद्द्रष्टा च भवति, स एव च सपरिच्छदे परिवारे ससुखं निवसति भवितुमर्हति। अत एव च—

तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। यजु ६-५

इति मन्त्रः सत्यापयति स्वकं भावम्।

मन्त्रलिङ्गञ्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त। यजुः ३२-१०

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥५७॥

वैकुण्ठः ४०५, पुरुषः ४०६, प्राणः ४०७, प्राणदः ४०८, प्रणवः ४०९, पृथुः ४१० हिरण्यगर्भः ४११, शत्रुघ्नः ४१२, व्याप्तः ४१३, वायुः ४१४, अधोक्षजः ४१५।

वैकुण्ठः—४०५

कुठि-प्रतिघाते भौवादिको धातुः। प्रतिघातो नाम संश्लेषविघातः। इदित्त्वान्नुम्-

किया है। भाष्यकार ने पद्य द्वारा इस कथन का संग्रह इस प्रकार किया है—

वही प्रभु—धारकत्व रूप धर्म का जाननेवाला तथा धर्मविदों में श्रेष्ठ है। वही विलक्षण नानारूप संधियों का कर्ता तथा जाननेवाला है, किसका किसके साथ सन्धान 'जोड़' या मेल करना चाहिये यह ज्ञान भी पूर्ण रूप से उसी अनोखधर्मा प्रभु में है इसलिये मरण धर्मक मनुष्य को उसी एक सर्वेश्वर प्रभु की स्तुति करनी चाहिये

जो मनुष्य ऐसे धर्मविदुत्तम विष्णु को जानता है—वही चतुर कारीगर, प्रबन्धक, व्याख्यान दाता, ज्ञान दाता, उपदेशक तथा प्रभु का प्रत्यक्ष द्रष्टा है, और वही अपने परिवार में सुख से रह सकता है।

'तद् विष्णोः परमं पदं' इत्यादि मन्त्र भी इसी दृष्टि से अपने भाव को सत्यरूप में प्रकट करता है और स नो बन्धु आदि मन्त्र इस में प्रमाण है।

वैकुण्ठः—४०५ परमधामस्वरूप।

भाष्य—कुठि-प्रतिघाते इस भौवादिक धातु से भाव में घञ् प्रत्यय होकर कुण्ठ शब्द

अनुस्वारपर-सवर्णौ, भावे घञ् प्रत्ययः । विपूर्वो बहुव्रीहिः, विकुण्ठः, समासान्तोऽत्र कप्रत्ययो न भवति तस्य वैकल्पिकत्वेन । कुण्ठा संश्लेषविघातो विगतो येषां ते विकुण्ठाः, त एव वैकुण्ठाः । महाभारतेऽपि—

मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना ।
वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम ।।

महाभारत शां. प.३४३-५०

घातो नाम यथाभूतस्य विकार आपादनम् । तद्यथा— गच्छतो गत्यवरोधनम् तस्य बन्धनम् । प्रतिघातः किम्:– अवरुद्धगतेः, अवरुद्धस्य मोक्षणम्

उदाहरणं यथा लोके—काष्ठपट्टद्वयं कीलकैः शिल्पिना प्रतिहन्यते प्रतिहतं बद्धं तत् काष्ठपट्टद्वयं शिल्पिना प्रतिहत्य पृथक् पृथक् क्रियते, तयोः काष्ठपट्टयोः स्वतन्त्रा गतिः प्रतिरुद्ध्यते प्रथमकल्पेन उद्घटनेन—द्वितीया गतिर्वस्तुधारणसामर्थ्यं प्रतिहतं-

---

सिद्ध होता है । वि के साथ समास होने पर विकुण्ठ शब्द बनता है । बहुव्रीहि समास में समासान्त कप्रत्यय विकल्प से होता है, इसलिये यहां क प्रत्यय नहीं किया गया है ।

इदित् धातु होने से नुम् और परसवर्ण होता है, इसका व्युत्पत्त्यर्थ, विगता कुण्ठा यस्य, इस समासानुसार जिसकी कुण्ठा अर्थात् गति की रुकावट "प्रतिबन्ध" चली गई, दूर हो गई है उसका नाम विकुण्ठ है । विकुण्ठ ही वैकुण्ठ है । स्वार्थ में अण् प्रत्यय किया है । वस्तुतः जिस की गति या सामर्थ्य का कहीं भी बाध नहीं होता और जो सब भूतों तथा भौतिककार्यों की गति का अवरोध "सङ्कोच" दूर करके उनको यथा नियम चलाने में समर्थ है, स्वतन्त्र है, वही विकुण्ठ है । इसमें महाभारत का वचन भी प्रमाण है—भगवान् कहते हैं, मैंने अपनी शक्ति से भूमि आदि पञ्चभूतों की इतस्ततः विकीर्ण अनियमित गति को नियमित किया है इस लिये मैं वैकुण्ठ हूं और यही मेरा वैकुण्ठत्व है ।

प्रतिघात शब्द का अर्थ विश्लेषण करते हुए भाष्यकार ने स्पष्ट किया है कि घात नाम है, वस्तु का अपने स्वरूप से विकृत होना अर्थात् अपने स्वाभाविक स्वरूप को छोड़ देना "त्याग देना" ।

जैसे—चलते हुए किसी प्राणी की गति को रोक देना 'बाँध देना' घात है और उस रुकी हुई, गति को पुनः खोल देना चालू कर देना यही प्रतिघात है ।

इसमें लौकिक उदाहरण इस प्रकार है—जैसे कोई काष्ठ का कारीगर 'शिल्पी' कीलों से दो काष्ठपट्टों को जोड़ देता है, यह घात है क्योंकि इससे उन की स्वतन्त्र गति रुक जाती है और फिर उन्हीं लकड़ी के पट्टों को जो प्रतिहत हैं, बंधे हुए हैं कीलें निकाल कर खोल देता है, पृथक् पृथक् कर देता है, तब उन में फिर से अपनी गति वस्तुधारण सामर्थ्य आजाती है,

विश्लिष्टं विकुण्ठितं वा भवति। लोकेऽपि च प्रतिपदं पश्यामः—कृषको बीजं वपति, स बीजः स्वात्मन्यवरुद्धक्षुपारोहणधर्मा सन्—भूमौ गत्वा स्वकं कुण्ठितं धर्मं जहाति, सोऽयं कल्पो बद्धस्य प्रत्याहारभूतस्य, स्वात्मलीनगतिकस्य वा, आरोहणधर्मा बीजो यावदारोढव्यं भवति तावदारुह्य कुण्ठितो भवति, गतिं परित्यजति, परिपाकमुपलभ्य शोषं याति-बीजभावाय कल्पते। एष एव क्रमः सर्वत्र स्थावरजङ्गमयोनिष्विति। जङ्गमे यथा—शुक्रशोणितौ गर्भाशयं गत्वा स्वकं प्रधानं कर्म त्यक्त्वा संमुदितौ गर्भपरिवृद्ध्यै गतिमन्तौ भवतः। गर्भशय्यायाञ्च जहत्स्वार्थवृत्तिको गर्भः प्रसवं लब्ध्वा जहत्स्वार्थ-वृत्तिकं धर्मं परित्यज्य, रोदिति, हसति, हदते, मूत्रयति, अङ्गानि चेष्टयति, स्तन्यं धयति चेति गर्भकुण्ठामपेक्षीकृत्य कुण्ठाप्रतिघातः। ततो वक्तुं शक्यते, विगता कुण्ठा 'गर्भभूता' अस्य जातकस्य स वैकुण्ठः स्वतन्त्र इति।

स एव च जीवो यावज्जीवं सर्वाणि लौकिकानि कर्माणि कुर्वन् मृत्युना पुनः स्वातन्त्र्येण कर्म कर्तुमनर्हः क्रियते, गत्यवरोधं प्रतिघातं वोत्पाद्य। एवं स शवोऽपि वैकुण्ठ उच्यते। वैकुण्ठस्य मृतस्य शवभूतस्य वहनाय यत् साधनं क्रियते तत् सम्बन्धनमपि वैकुण्ठं नाम तत्साधनञ्च स्त्रीलिङ्गान्तं यद्यस्ति, तदा वैकुण्ठी, इत्यु-च्यते। सारार्थत एवं वक्तुं शक्यते—

यही प्रतिघात है, यही विकुण्ठता है। हमें लोक में अन्यत्र भी स्थान स्थान पर ऐसा अनुभव होता है- एक कृषक 'खेतीहर' भूमि में बीज बोता है, यद्यपि केवल बीज में अंकुर उत्पादन की 'अंकुरित होने की शक्ति अवरुद्ध है, किन्तु वह भूमि में जाकर मिट्टी और जल से संयुक्त होकर अपने कुण्ठतत्व "घातरूप" धर्म को' छोड़ देता है। यह स्थिति उस बीज की है जो अव-रुद्ध गति संक्षिप्त संकुचित है, अथवा जिस की शक्ति उसमें छिपी हुई है, विकसित नहीं हुई है।

और जब वही बीज प्रतिघात रूप वैकुण्ठभाव से घात रूप कुण्ठित भाव को छोड़ कर विकासोन्मुख होता है, तब अंकुरित होकर जितना बढ़ना होता है बढ़ जाता है और फिर कुण्ठित होकर गति छोड़ देता है, पक कर सूख जाता है और बीजभाव को प्राप्त हो जाता है।

सब स्थावरजङ्गम योनियों में यही क्रम है—जङ्गम में जैसे शुक्र और शोणित गर्भाशय में जाकर अपना अपना प्रधान कर्म छोड़कर दोनों एकत्र हो गर्भ वृद्धि के लिये गतिशील बन जाते हैं, तथा बढ़कर वही गर्भ गर्भस्थान में स्वार्थहीन निश्चेष्ट पड़ा रहता है वहाँ उसका कोई स्वार्थ नहीं होता किन्तु प्रसूत होकर वही स्वार्थराहित्य धर्म को छोड़कर, रोता है, अङ्गों को हिलाता है, दूध पीता है, मूत्र-पुरीष करता है, सोता है, हंसता है। यह गर्भ कुण्ठा की अपेक्षा से कुण्ठा का प्रतिघात है। इसलिये कहा जासकता है कि जिस बालक की गर्भरूप कुण्ठा दूर होगई वह वैकुण्ठ है, स्वतन्त्र है।

वही जीव स्वतन्त्रता से जीवनभर कर्म करता हुवा जब मृत्यु चक्र में आजाता है, तब उसकी स्वतन्त्रता पूर्वक कर्म करनेवाली गति का फिर अवरोध हो जाता है, तब वह शव भी वैकुण्ठ होता है। उस शवभूत मृतक वैकुण्ठ के श्मशान में लेजाने के लिये जो साधन किया जाता है, उसका नाम भी वैकुण्ठ है। यदि वह साधन स्त्रीलिङ्गान्त है तब उसका नाम वैकुण्ठी कहना चाहिये।

यदेतद् गतिमज्जगत् प्रलयप्राप्तञ्च जगत्, यत्र विश्राम्यति स वैकुण्ठः। स च वैकुण्ठनामा विष्णुः प्रपदं जगद् व्यश्नुवानो दृश्यते, संश्लेषप्रतिघातधर्मेण, विश्लिष्टस्य गतिमतः संश्लेषधर्मेण च।

ते विकुण्ठां प्राप्ता, मृता, जीवा यत्र विश्राम्यन्ति, तत्स्थानं वैकुण्ठं नाम। लोकेऽपि च पश्यामः—

कृषको बीजं क्षेत्रे वपति, तं बीजं क्षेत्रं पुनः स्वात्मनि स्वापयति बहुधा परिणमयति च।

द्वितीयमुदाहरणम्—

स कृषकोऽन्नं भुक्त्वा स्वात्मनि लीनयति, हदित्वा च पुनर्बीजाय साहाय्यं प्रददाति, एष एव सर्वत्र नियमः, एवं लोकं दृष्ट्वा बहुधा ऊहा ऊहितव्या भवन्ति।

भवन्ति चात्रास्माकम् —

चराचरं विश्वमिदं समस्तं, यत्तेजसा याति गतेर्बहुत्वम्।
तत्तेज एवारभते च कुण्ठां, वैकुण्ठनामा स महान् वरेण्यः॥२३६॥
सदेकभावान्म्रियते न शम्भुः सदेकभावान्न स जायते वा।
सर्वत्र सद्भावमितः स शम्भुर्न कुण्ठते नापि विकुण्ठते वा॥२३७॥
इयं विसृष्टिर्विभुना प्रणुन्ना, वैकुण्ठ्यकुण्ठ्ये विजहाति याति।
रविर्यथा यात्युदयास्तहीनो, दिनं निशां वा कुरुते दिनेशः॥२३८॥

सारार्थ इसका यह है कि सारा जगत् गतिशील है, प्रलय होने पर जिसमें यह विश्राम करता है, वही इसका विश्रामस्थान वैकुण्ठ है। और वह वैकुण्ठ नामा विष्णु सङ्कुचित "अवरुद्धगतिक" का विकास तथा विकसित का सङ्कोच "गत्यवरोध" करण रूप दोनों धर्मों से जगत् में फैला हुवा है, कण कण में भरा हुवा है। विकुण्ठता को प्राप्त हुवा मृतक जीव जहां विश्राम करता है, उस स्थान का नाम भी वैकुण्ठ है। लोक में भी देखने में आता है-

किसान खेत में बीज बोता है, खेत उस बीज को अपने में एक से अनेक बनाने के लिये रख लेता है, दूसरा उदाहरण-वही किसान अन्नादिकों को खाकर अपने अन्दर लीन कर लेता है, और फिर पुरीषोत्सर्ग के द्वारा खेत में "मलरूप खाद से' उस बीज की सहायता करता है यही नियम सब जगह समझना चाहिये, इस तरह लौकिक अनुभवों से ही विचारणीय विषयों का विचार करना चाहिये।

संक्षेप में पद्यों द्वारा यह इस प्रकार कहा गया है—

यह सम्पूर्ण चरा-चर विश्व जिसकी इच्छा मात्र से नाना गतियों तथा गत्यवरोधों को प्राप्त होता है वही वैकुण्ठ नामा भगवान्—विष्णु स्तुत्य, है तथा सब से श्रेष्ठ है।

वह सब का कल्याण करने वाला विष्णु, सत्स्वरूप होने से न मरता है और न जन्म लेता है। सर्वत्र सद्भावयुक्त वह शम्भु सब की गतियों तथा गत्यवरोधों का कारण होने पर भी स्वयं गति तथा गत्यवरोधों से पृथक् है। प्रभु की प्रेरणा से यह सृष्टि ही विकुण्ठता तथा कुण्ठता को प्राप्त करती तथा छोड़ती है, जैसे सूर्य का उदय तथा अस्त नहीं है फिर भी वह रात्रि और दिन के उदय अस्त का करने वाला है।

पुरुषः—४०६

अत्र विष्णोर्नामसु पठितं पुरुषेति नाम बहुधा निर्वक्तुं शक्यते । यथा—

१. पूर्वोऽस्माद् विश्वात्तदादिकारणत्वादिति पुरुषः ।
२. "उष दाहे" पुरून् सर्वानोषति दहतीति वा पुरुषः ।
३. पिपर्ति पृणाति पालयति पूरयति, इति वा पुरुषः ।
४. "पुर अग्रगमने" पुरति अग्रगामी भवतीति वा पुरुषः ।
५. पुरि, देहे शेते-इति वा पुरुषः ।

तत्र पूर्वोऽस्मादिति निर्वचने लिङ्गम्-"इयं विसृष्टिर्यत आबभूव" ऋग् १०-१२९-७ यतः=आदिकारणादित्यर्थः । पुरून् सर्वानोषतीति यन्निरुक्तं तत्रापि—

"ऋतञ्च सत्यञ्चाभिद्धात्तपसोऽध्यजायत" ऋग् १०-१९०-१

अभितः सर्वत इद्धात्प्रवृद्धतेजसः सन्तप्तादत एव द्रवीभूतात्प्रकृतित्वादयं प्रपञ्चः पाञ्चभौतिकसमुदायरूपोऽजायतेत्यर्थः । अत्र प्रकृतितत्त्वस्य स्वतेजसा सन्तापयिता पुरुष एव विष्णुरूपः ।

अत्र दृष्टान्तो यथा—कश्चिच्छिल्पी, धातुं सन्ताप्य विद्राव्य मूषासु च सम्पात्य तस्य सुवर्णताम्रादिधातोर्यथा मन ईप्सितानि रूपाणि विधत्ते, तथा पुरुषोऽपि प्रकृति-तत्त्वं सन्ताप्य स्वेच्छारूपया मूषया जगदिदं नाना रूपं विधत्ते। "अद्भ्यः पृथिवी" पृथिवी-पृथुत्वादिति निगमः ।

पुरुषः—४०६ विश्वरूप शरीर में शयन करने वाले ।

परमेश्वर विष्णु के सहस्र नामों में पढ़े हुए पुरुष शब्द का निर्वचन-व्याख्या कई प्रकार से सम्भव है । जैसे—

१- विश्व का आदिकारण होने से वह विश्व से पूर्व है ।
२- वह सब को अपने तेज से सन्तप्त करता है ।
३- वह सब विश्वान्तर्गत पदार्थों को पूर्ण करता है अथवा पालन करता है ।
४- वह सब का अग्रगामी—आगे चलने वाला है ।
५- वह सब के शरीरों में सोता हुआ सा व्यापक रूप से निवास करता है इसलिये उसका सभी व्याख्याओं से पुरुष नाम सार्थक है । पुरुष शब्द की प्रथम व्याख्या में यह वेद वचन प्रमाण है । "इयं विसृष्टिर्यत आबभूव"

सब को सन्तप्त करनेवाली द्वितीय व्याख्या इस वेद वचन के अनुकूल है । "ऋतञ्चेति" सब ओर से जाज्वल्यमान तेज से सन्तप्त होकर पिघले हुए या तरल बने हुए प्रकृति तत्त्व से यह पञ्चभूतों का समष्टि रूप प्रपञ्च बना । प्रकृति तत्त्व का सन्तापक पुरुषरूप तेजोमय भगवान् विष्णु का तेज है । जैसे कोई कारीगर सुवर्णादि धातु को तपाकर गला लेता है अर्थात् उसका द्रव बना लेता है और उसको सांचे में डाल कर मनचाहे नाना रूप बना लेता है ।

अथ स भगवान् पुरुषनामा विष्णुः सर्वमिदं जड़चेतनवर्गं यथापेक्षितैर्यत्नैः स्वप्रत्तकालावस्थं पिपर्ति पृणाति पालयतीति। तस्य पालनपूर्णरूपा गुणाऽशेष— विश्वव्यापकः। सर्वे पदार्था जगति यथाप्रकृति विकसिताः पूर्णाश्च भवन्ति दृढोऽयं नियमः पारमेश्वरीय इति।

यथा च—गर्भे स्थितमर्भकं यथानियतकालं पालयति, पूरयति च, यथानियत— कालार्हैः सर्वविधै रसगुणवीर्यविपाकैराप्याययति। एवञ्च स एव विष्णुः पुरुष इत्युच्यते, शेते चाप्यसौ स्थावरजङ्गमशरीरेषु स्वविरचितेषु व्यापकत्वेन। पुरुष— शब्दो यथाक्रममागतो व्याख्यातचरः।

भवति चात्रास्माकम्—

सोऽभीद्धतेजाः पुरुषः, पुराणः, सूर्यादिकान् दीप्तिमतः करोति।
एवं स शिल्पी कुरुतेऽर्थवन्ति[1], धातूत्थरूपाणि निजार्थकानि ॥२३९॥

१ अर्थवन्ति=प्रयोजनवन्ति। निजार्थकानि=शिल्पिप्रयोजनकराणि।

गर्भेऽर्भकं पाति यथा स शम्भुः, तस्यार्ह्ययोगैर्विदधाति वृद्धिम्।
लोके तथैवास्य पथोऽनुगन्ता, कर्ता च कृत्यानि[2] सदा करोति ॥२४०॥

२ कृत्यानि=कर्तुमर्हाणि-कार्याणि।

प्राणः—४०७

प्रा—पूरणे-आदादिको धातुः, तस्माद्-गत्यर्थे ति कर्तरि क्तः संयोगादेरातो धातो- र्यण्वतः। ८-२-४३ पा० सूत्रेण नत्वम्, नस्य णत्वम्।

उसी प्रकार, पुरुष भी प्रकृतितत्त्व को अपने तेज से तपाकर, और अपनी इच्छारूप सांचे में ढालकर इस बहुरूप विश्व की रचना करता है और इस के पालन तथा पूर्णता के लिये जैसे समय अथवा अवस्था में जैसे साधन की आवश्यकता होती है उसी तत्कालावस्थापेक्षित साधनों से इस को पूर्ण करता है तथा सब प्रकार के प्रयत्नों से इस विश्व का पालन करता है।

जैसे गर्भ में स्थित बालक की यथा समय तत्तत्समयानुकूल रस, गुण, वीर्य आदि से पूर्णता तथा पालन करता है। इस प्रकार उस सर्वेश्वर विष्णु का ही पुरुष नाम है।

संक्षेप में भाष्यकार ने इस कथन को पद्यों में इस प्रकार कहा है—

जैसे कोई शिल्पी सुवर्ण ताम्र आदि धातुओं से अपने प्रायोजनिक प्रयोजन सिद्ध करने वाले नानारूप आभूषणादि बना लेता है। उसी प्रकार पुरातन पुरुष भी विश्व प्रयोजन के लिये अपने प्रवृद्ध तेज से तेजोमय सूर्यादि का निर्माण करता है। जैसे पुरुष नामा भगवान् विष्णु गर्भ में बालक की रक्षा तथा तदनुकूल योगों से उस को बढाता है। उसी प्रकार लोक में भी पुरुष के मार्ग का अनुसरण करनेवाला पुरुष वैसे ही करने योग्य कार्यों को सदा करता रहता है।

प्राणः—४०७ प्राणवायु रूप से चेष्टा करनेवाले।

प्रा-पूरणे धातु से प्राण शब्द सिद्ध होता है, जिसका अर्थ है पूर्ण। सर्वेश्वर विष्णु ही प्राण है,

प्राणः पूर्णः 'न कुतश्चनोनः' अथर्व १०-८-४३ इति श्रुतिः
मन्त्रलिङ्गञ्च—

"प्राणाय नमो यस्य सर्वमिदं वशे" अथर्व ११-२-४

प्राणाय=पूर्णायेत्यर्थः।
भवति चात्रास्माकम्—

न चास्ति किञ्चिद्भुवि दृश्यमानं, किं वापि चित्तेन विचिन्त्यमानम्।
न यत्र शक्त्या स भवेत् प्रपूर्णः, पूर्णात्मके पूर्णमिदं दधाति ॥२४१॥

इदं=सकलं जगत्।

प्राणदः—४०८

प्राणदः पूर्णदः पूर्णस्य दाता, कः पुनः पूर्णः। स एव व्यापको विष्णुः सर्वत्र पूर्णः। स्वकं पूर्णमात्मानं सर्वत्र समर्प्य सर्वं जगत्पूर्णं करोति, एतदेव तस्य प्राणदत्वं नाम। लोकेऽपि च पश्यामः-शरीरे शरीरधातवः सर्वत्र पूर्णाः सन्ति दुग्धे घृतवत्। क्षीरिवृक्षे क्षीरवत्। मनुष्योऽपि तमनुकुर्वन्, निजस्य शरीरस्य सर्वत आच्छादने समर्थकानि वासांसि करोति, मनुष्यो हि तस्य प्राणदस्य विष्णोरेव कर्माण्यनुकरोति। एवं लोकं विलोक्य विविधाः कल्पनाः कल्पयितव्या भवन्ति। तद्यथा-प्राणदेन पूर्णदेन

क्योंकि वह ज्ञान-ऐश्वर्य आदि से पूर्ण है, उस में कसी रूप से भी कमी नहीं, इसी अर्थ को श्रुति भी कहती है। "न कुतश्चनोनः" इति। तथा इसी अर्थ को यह मन्त्र भी प्रमाणित करता है—नमो "प्राणाय यस्य सर्वमिदं वशे" प्राणाय का यहां पूर्ण अर्थ है।

भाष्यकार ने एक पद्य से इसी अर्थ की पुष्टि की है। इस भूमण्डल में नेत्र या मन का विषय ऐसा कोई पदार्थ नहीं है, जिसमें यह अपनी शक्ति े पूर्ण नहीं अर्थात् सकल जगत् इस सर्वेश्वर की शक्ति से ही पूर्ण है इसलिये यह जगत् भी पूर्ण है। इस पूर्ण जगत् को वह अपने पूर्ण रूप से धारण कर रहा है।

प्राणदः—४०८ सर्ग के आदि में प्राण प्रदान करनेवाले।
प्राणद नाम पूर्ण को देनेवाले का है। पूर्ण कौन है ? स्वयं परम पिता परमात्मा विष्णु ही पूर्ण है और वही अपने पूर्ण रूप से संसार को व्याप्त करके अपने जैसा पूर्ण बना लेता है, यही उसका पूर्णत्व का दान है। लोक में भी स्पष्ट दीख रहा है कि शरीर को स्थिर रखनेवाली शरीर की धातुएं शरीर में सर्वत्र परिपूर्ण हैं। दुग्ध में कोई अंश ऐसा नहीं जहां घृत नहीं हो, क्षीर वाले वटादि वृक्षों में मूल से लेकर फल पत्रादिकों तक ऐसा कोई भी अंश नहीं जिस में क्षीर न हो।

मनुष्य भी भगवान् विष्णु का अनुकरण करता हुआ प्रत्येक वस्तु को पूर्ण बनाने की कोशिश करता है या बनाता है, जैसे अपने पूरे शरीर को ढकने योग्य वस्त्रों को पूर्ण बनाता है। मनुष्य सर्वथा भगवान् विष्णु के कर्मों का ही अनुकरण करता है। लोक के अनुभवों से ही बहुधा

परिपूर्णोपकरणा सर्वा प्राणिजातिः प्रसूयते ।

भवन्ति चात्रास्माकम्—

पूर्णः स्वयं शम्भुरचिन्त्यशक्तिः, विश्वं विधत्ते बहुशः प्रपूर्णम् ।
तथा यथा पूर्णमिदं शरीरं, दोषैर्मलैर्धातुभिरातनोति ॥२४२॥
तं प्रणवं पश्यति वीतशोको, निजे स्वरूपे स पुनर्बहिस्तम् ।
पश्यन् दृशा याति तथैव हर्षं, यथा शिशुर्मातरमत्र पश्यन् ॥२४३॥
को नाम मूढः परिहृत्य विष्णोरङ्कं सुखापूर्णमियादपूर्णम् ।
इयत्त्वमात्रं जगदस्ति सर्वं, तत्प्रणवेनाततमित्यबुद्ध्वा[1] ॥२४४॥

१ अविमृश्य ।

बहुशः=वैविध्येन-अनेकधा । सुखापूर्णम्=सुखेन आपूर्णम्=आसमन्तात्परिपूर्णम्=आनन्दघनमित्यर्थः । इयत्त्वमात्रम्—केवलमियदेव, इयत्तया परिच्छिन्नम्=परिमितमित्यर्थः ।

प्रणवः—४०९

विष्णुसहस्रनामस्तोत्रे प्रणवः प्रणम इति द्विविधः पाठ उपलभ्यते । तयोश्च प्रणव-प्रणम-शब्दयोः सिद्धिश्चेत्थं विज्ञेया- "णु स्तुतौ" प्रपूर्व आदादिको धातुः "णो नः" इति नत्वम् । नौतिरिहान्तर्भावितण्यर्थस्य नमेरर्थे वर्तते 'अनेकार्था हि धातवः' इति

विचार करना चाहिये । जैसे पूर्णद परमात्मा ने प्राणी जाति को सर्वतः सब भोग्य पदार्थों सहित पूर्ण बनाया है, पूर्णता का उपयोग प्राणियों पर निर्भर है ।

यहां भाष्यकारीय पद्यों का सारांश यह है—

भगवान् विष्णु स्वयं पूर्ण है, उसकी शक्ति अन्चित्य है और वह विश्व को भी अनेक प्रकार से पूर्ण ही बनाता है । जैसे कि स्वतः पूर्ण प्राणी शरीर को मल दोष रूप धातुओं से सर्वथा परिपूर्ण बनाता है । जैसे छोटा बच्चा अपनी माता को देखकर आनन्द का अनुभव करता है वैसे ही शोक मोह से रहित मनुष्य उस प्रणव प्रभु को अपने अन्दर और बाहर परिपूर्ण रूप में देखता हुआ अपार आनन्द का अनुभव करता है । कौन अपने परम पिता परमात्मा के सुखद अङ्क या सामीप्य को छोड़कर अपूर्ण सर्वथा दुःखाकीर्ण जगत् को चाहेगा ? यहां यद्यपि जैसे सर्वेश्वर विष्णु पूर्ण है इसी प्रकार उस का जगत् भी पूर्ण है, किन्तु जो मूढ प्राणी इस जगत् को भगवान् परिपूर्ण से अव्याप्त अर्थात् उस से पृथक् केवल परिच्छिन्न देखता है, इस दृष्टि से जगत् को अपूर्ण कहा है ।

प्रणवः—४०९ जिस को वेद भी प्रणाम करते है, वे भगवान् ।

विष्णु सहस्रनाम में, प्रणव और प्रणम यह दो प्रकार का पाठ मिलता है इन दोनों शब्दों की व्युत्पत्ति इस प्रकार है—स्तुत्यर्थक, णु धातु नम धातु का ही अर्थ देता है, क्योंकि वैयाकरणों के सिद्धान्तानुसार धातुओं के बहुत अर्थ होते है।

वैयाकरणसमयात् । ततः पचाद्यच् गुणावादेशौ णत्वञ्च 'उपसर्गादसमासेऽपि णोपदेशस्य' पा० सू० ८-४-१४ सूत्रेण । यद्वा प्रपूर्वात्-नौतेः "ऋदोरप्" पा० सू० ३-३-५७ इति सूत्रेण कर्मण्यण्प्रत्ययो, गुणावादेशौ णत्वञ्च पूर्ववत् । प्रणौति स्तौति यं स प्रणवः ओमित्येव ब्रह्मवाचकः शब्दः सिध्यति । प्रणमः—

प्रोपसृष्टो "णम प्रह्वत्वे शब्दे चे" ति भौवादिको धातुः "णो नः" इति नत्वे पा० सू० ६-१-६५ णिचि वृद्धिः । "नोदात्तोपदेशस्य मान्तस्यानाचमेः" पा० सू० ७-३-३४ इति सूत्रस्य नात्र प्रवृत्तिर्ञ्णितः कृतः परत्वाभावात् ।

तत्र "जनीजृष्क्नसुरञ्जोऽमन्ताश्च" इति घटादिगणसूत्रानुशासनाद्घटादिषु नमतेः सद्भावः "ज्वलह्वलह्मलनमामनुपसर्गाद्वा" इति गणसूत्रन्तु नात्र प्रवर्तते सोपसर्गत्वात् । तेन नित्यमेव मित्त्वातिदेशः । "घटादयो मितः" इति गणसूत्रेण "णौ मितां ह्रस्वः" पाणिनीयसू० ६-४-९२ इति ह्रस्वादेशः, पचाद्यचि णिलोपो णोपदेशतया "उपसर्गादसमासे"ति णकारादेशः, एवं प्रणमः शब्दः सिध्यति ।

प्रणवः—

अत्र विष्णोर्नामसु प्रणव इति नाम सङ्गतार्थम्—कुतः ? ओमित्यस्य प्रत्यायको हि प्रणवशब्दः, "प्रणवष्टेः" ८-२-८९ इत्यत्र सूत्रे तथैव दृष्टत्वात् प्रणवितुं स्तोतुमर्हत्वात् स विष्णुः प्रणव इत्युक्तो भवति । प्राञ्चोऽप्याहुः—

सर्वे वेदा यत्पदमामनन्ति, तपांसि सर्वाणि च यद् वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥

कठोपनिषत् । अ० १, वल्ली-२, ३५

सर्वे वेदाः किं वदन्ति, तमेव कर्तारं विष्णुमिति । उक्तञ्च, अथर्वणि—वदन्तीर्यत्र गच्छन्ति तद्वै ब्रह्मविदो विदुः" । वदन्तीः=वाचः स्तुत्यत्वाद्ब्रह्मण ओमित्येव पदं वेदमन्त्रैराक्षेप्स्यते । प्रणवादीनि मन्त्राणि इति च । अत्र विष्णोः सहस्रनामसु परिगण्यमानेषु नूनम्—'ओम्' पदपर्यायकेण प्रणवशब्देन भाव्यमिति । तस्मात् प्रणव

विष्णु के नामों में प्रणव नाम ही युक्तिसंगत है, क्योंकि यह ओ३म् नाम का बोधक शब्द है; जैसा कि "प्रणवष्टेः" ८।२।८९ इस पाणिनीय सूत्र से सिद्ध है, क्योंकि वहां प्रणव शब्द से ओङ्कार ही लिया है । स्तोतव्य होने से सर्वेश्वर विष्णु ही प्रणव है । प्राक्तन महर्षियों का भी यही कहना है कि सब वेद जिस पद का बार बार व्याख्यान करते हैं तथा सब प्रकार की तपस्याओं का ध्येय है । जिस पद की अभिलाषा से महापुरुष ब्रह्मचर्य व्रत को धारण करते हैं, वह पद तुम्हें संक्षेप से बताता हूँ, वही 'ओम्' है । अथर्व में भी कहा है कि वदन्ती नाम वाणी का है । ब्रह्म ही स्तुत्य होने से वेद मन्त्रों का अभिप्रेत पद ओम् ही है । प्रणव शिरस्क ही सब पद होते हैं, अर्थात् ओम् पद का उच्चारण करके ही वेद मन्त्रों का उच्चारण किया जाता है ।

यहाँ पर गणना किये हुये भगवान् विष्णु के सहस्र नामों में प्रणव शब्द ओम् शब्द का

एव सङ्कीर्त्यमानेषु नामसु युक्तियुक्तं सङ्गच्छतेतराम्। प्रणामोऽपि भवतु। उक्तञ्च मयैव—"को नाम शक्नोति नरो नियन्तुं तमच्युतं नामसहस्ररज्ज्वा" श्लोके १२ व्याख्याने। सर्वकमिदं जगत् तमेव विष्णुं प्रतिपदं प्रकटयति, ज्ञानदृष्टिमन्तं मनुष्यञ्च विवशयति, तं प्रति प्रणमितुं वा। उक्तञ्च वेदे—"पश्यदक्षवान्न विचेतदन्धः" ऋग् १-१६४-१६ इति।

उक्तमस्माभिर्नाम्नामारम्भे 'ओम्' पदमधिकृत्य तत्रैव जिज्ञासुभिर्द्रष्टव्यम्।
मन्त्रलिङ्गञ्च—"ओं प्रतिष्ठ" यजुः २-१३
भवति चात्रास्माकम्—

स एव नूनं प्रणवोऽत्र विष्णुर्यो व्याप्य विश्वं कुरुते विचित्रम्।
तमेव वेदास्तमु विश्वदेवा स्तुवन्ति गायन्ति नमन्ति यान्ति ॥२४५॥

यान्ति=प्राप्नुवन्ति। विश्वदेवाः=सर्वे देवाः। विचित्रम्=विविधसयोजनैश्चितमिति।
यथा जङ्गमे दशेन्द्रियाणां समनस्कानां, व्यवस्थापनम् प्रतियोनिभिन्नं भिन्नमेव। स्थावरेष्वप्येवमेवोह्यम्।

पृथुः—४१०

प्रथ, प्रख्याने चौरादिको धातुः, तस्मात् "प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च" इत्युणादिसूत्रेण, कुप्रत्ययः सम्प्रसारणम् ऋकारादेशश्च पृथुरिति। प्रख्यातः प्रसिद्धो भवति सर्वत्रेति पृथुः। प्रथ विस्तारेऽपि दृश्यते, भौवादिवच्च शपं लभते, प्रथते, विस्तीर्णा भवतीति पृथिवी स्वामिदयानन्दः स्वकीयोणादिवृत्तौ प्रयुंक्ते

ही पर्याय होना चाहिये। इसलिये सङ्कीर्त्यमान नामों में प्रणव शब्द ही युक्तियुक्त है। वास्तव में प्रणाम भी ठीक है, क्योंकि मैं पहले ही कह चुका हूं—ऐसा समर्थ कोई भी नहीं है, जो भगवान् विष्णु को सहस्रनाम रूप रस्सी से बांधकर रखदे। सम्पूर्ण संसार में पद पद पर वह प्रकट है। उसके प्राकठ्य को देखनेवाले ज्ञानी पुरुष विवश उसकी तरफ झुकते हैं या उस को प्रणाम करते हैं। हमने नामों के आरम्भ में ही कहा है, ओम् पद की व्याख्या में, इसलिये जिज्ञासु वहीं देख लें। मन्त्र भी इस में प्रमाण है "ओं प्रतिष्ठ" यजुः।

भाष्यकार ने पद्य द्वारा इस का कथन इस प्रकार किया है—

प्रणवनामा भगवान् विष्णु इस विश्व में व्यापक होकर विश्व को नानारूप प्रतिक्षण अद्भुत बना रहा है। वेद और सब देव उस को प्राप्त करने के लिये, उसी का नमन, स्तवन और गान करते रहते हैं।

पृथुः—४१० विरट् रूप से विस्तृत होनेवाले।

प्रथ=प्रख्याने, इस चुरादिगण के धातु से "प्रथिम्रदि-भ्रस्जेति" औणादिक सूत्र से कु प्रत्यय और रेफ को ऋकार सम्प्रसारण होकर पृथु शब्द सिद्ध होता है तथा प्रथ विस्तारे इस भौवादिक धातु से भी पृथु शब्द की सिद्धि होती है।

इस प्रकार पृथु शब्द का अर्थ प्रसिद्ध प्रख्यात या विस्तीर्ण—फैला हुआ है। महर्षि दयानन्द ने भी अपनी उणादिवृत्ति १। १०५। सूत्र में कहा है कि फैली हुई है इसलिये इस

"१।१०५। सूत्रे । उक्तञ्च वेदे—"तस्मिन्ह तस्थुर्भुवनानि विश्वा," । यजुः- ३१.१९
भवतश्चात्रास्माकम्—

पृथुः स विष्णुः प्रथते ह सर्वं चरा-चरं विश्वमिदं समस्तम् ।
सोनन्तधर्मा कुरुते ह्यनन्तं चराचरं तस्य दृशा च सान्तम् ॥२४६॥

तस्य विष्णोः=दृशा, ज्ञानदृष्ट्या, इदं जगत् सान्तं—एतावत् इयता युक्त-मित्यर्थः । तद्यथा—शिल्पी यन्त्रस्योच्चावचं वित्त्वाऽऽविष्कर्तुं प्रयोक्तुं चार्हति न तथोपभोक्ता ।

पृथुं हि यो पश्यति पार्थदृष्टिः, स एव देहं मनुते च विष्णुम् ।
चन्द्रं मनः सूर्यमसौ स्वनेत्रम्, विराजमानस्य विराट् शरीरम् ॥२४७॥

विराजमानस्य=देहाभिमान्यात्मन=इदं शरीरम् विश्वमात्रञ्च तस्य महात्मनः शरीरम् ।

हिरण्यगर्भः—४११

हिरण्यशब्दो गर्भशब्दश्च पूर्वं प्रकृतिप्रत्ययाभ्यां व्याख्यातचरौ । हिरण्यं गर्भे यस्य स हिरण्यगर्भः, हिरण्यस्य गर्भे वा यः स हिरण्यगर्भ इत्युभयथा संयोजनीयम् । हिरण्यं गर्भे यस्येति विग्रहतो हिरण्यगर्भशब्दो व्याख्यातचरः । हिरण्यस्य गर्भे यः स हिरण्यगर्भ इत्यत्र लिङ्गम्-आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।

का नाम पृथ्वी है । भगवान् वेद भी उसकी विस्तीर्णता को प्रमाणित करता है । उसी में वे सब भुवन समाये हुये हैं ।

यहां भाष्यकार ने सारांश पद्य द्वारा इस प्रकार कहा है—

वही भगवान् विष्णु पृथु है, क्योंकि वह सब जगह फैला हुआ वा प्रसिद्ध है, वह ही अनन्त धारकत्व शक्ति विशिष्ट इस विश्व को भी अनन्त बनाता है, और वह अनन्त होता हुआ भी उस प्रभु की दृष्टि से सान्त भी है, क्योंकि उस प्रभु की ज्ञानदृष्टि बहुत विस्तीर्ण है । जैसे कोई यन्त्र का ज्ञान रखनेवाला, उसके कल पुर्जों को अच्छी तरह जाननेवाला यन्त्र का ठीक २ प्रयोग कर सकता है, वैसा उससे केवल काम लेनेवाला नहीं । जो विस्तृत दृष्टिवाला ज्ञानी मनुष्य उस सर्वेश्वर पृथु को पदार्थ रूप से देखता है, वह अपने शरीर को विष्णु, मन को चन्द्र और नेत्र को सूर्य रूप से जानता है । जैसे देहाभिमानी आत्मा अपने शरीर को ही शरीर समझता हैं वैसे वह महात्मा पुरुष नहीं; वह तो सम्पूर्ण विश्व को ही अपना शरीर समझता है ।

हिरण्यगर्भः—४११ब्रह्मा के रूप में प्रकट होनेवाले ।

हिरण्य शब्द और गर्भ शब्द की प्रकृति प्रत्यय विभाग पूर्वक पहले ही व्याख्या की जा चुकी है । हिरण्यगर्भ शब्द का समास भेद से अर्थ भी दो प्रकार से किया है । हिरण्य जिसके गर्भ में हो, अथवा जो हिरण्य के गर्भ में हो, वह है हिरण्य-गर्भ । हिरण्य जिसके गर्भ में है, एतदर्थक हिरण्य गर्भ शब्द की व्याख्या पहिले ही की जा चुकी है । हिरण्य के गर्भ में जो है इस अर्थ का समर्थन यह "आकृष्णेन" इत्यादि मन्त्र करता है ।

हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् । यजुः —३३-४३

हिरण्ययेन=हिरण्यमयेनेत्यर्थः । यथा-रथमध्यमधिष्ठाय कश्चिद् याति, तथैव, भगवान् विष्णुर्विश्वस्य चराचरस्य मध्येऽधिष्ठानरूपेण विराजमानः स्तुतिमुपयाति, आहूतो वा भवति ।

तथा लोकेऽपि पश्यामः—गृहमधितिष्ठन् गृहपतिराहूयते तद्द्रष्टुकामैः । अध्यापनपदमधितिष्ठंश्च गुरुराहूयते जिज्ञासुभिः । अमुथैव शरीरे विराजमान आत्मा तत्तदिन्द्रियकृतरम्यरूपदर्शनशुचिश्रवः श्रवणादिसाधनिकां स्तुतिमुपयाति तथैवायं विष्णुरपि विद्वज्जनकृतां स्तुतिमाप्नोति । एतत्समर्थनपरं मन्त्रञ्च उपात्तचरम् ।

भवति चात्रास्माकम्—

हिरण्यगर्भः स उ विष्णुरेको देहे यथात्मा मत एक एव ।
रथे स्थितः सन् स रथी शरीरी हिरण्यगर्भोऽपि तथात्र विष्णुः ॥२४८॥

अत उक्तं भवति—

स एक एव केवलो न द्वितीयतृतीयादिसंख्याभाक्, विशदं द्रष्टव्यमसंख्येय २४७इति नाम्नो व्याख्याने ।

शत्रुघ्नः—४१२

शत्रुघ्न इति विष्णोर्नाम, तत्र "शद्लृ शातने" इति तौदादिको धातुः, तस्माण्णिचि वृद्धिः "शदेरगतौ तः" पा० सू० ७।३।४२। इत्यनेनागत्यर्थे णिचि दस्य तः "रुशातिभ्यां

मन्त्र में हिरण्य शब्द हिरण्य रूप रथ का बोधक है । जैसे कोई रथ में बैठकर चलनेवाला मनुष्य दूसरों की दृष्टि में प्रशंसनीय श्रेष्ठ होता है, अर्थात् उसकी सब स्तुति करते हैं इसी प्रकार भगवान् विष्णु चराचर विश्व रूप रथ में बैठा हुआ सब का स्तुत्य होता है अथवा सब से आदर पूर्वक बुलाया जाता है, लोक में भी ऐसा ही देखने में आता है, अपने घर में स्थित गृह-स्वामी को दूसरे मनुष्य देखने या मिलने की इच्छा से, आदरपूर्वक बुलाते हैं तथा अध्यापन स्थान में स्थित गुरु को जिज्ञासु जन स्तुतिपूर्वक बुलाते हैं । इसी प्रकार शरीर रूप रथ में स्थित आत्मा इन्द्रियों द्वारा उपस्थापित सुन्दर रूप तथा श्रवणार्ह वचनों से स्तुति को प्राप्त करता है । उसी प्रकार यह हिरण्य रूप विष्णु भी चराचर विश्व में रथी रूप से बैठा हुआ सब का स्तुत्य है

सारार्थ—जैसे शरीर में आत्मा एक ही है वैसे ही इस चराचर विश्व में स्थित हिरण्य-गर्भ नामा विष्णु भी एक ही है, वस्तुतः द्वित्व, त्रित्व आदि संख्या उस में नहीं है । अधिक स्पष्टता से 'असंख्येय' नाम की व्याख्या में देखना चाहिये ।

शत्रुघ्नः—४१२ शत्रुओं को मारनेवाला ।

शदलृ शातने, तुदादिगण पठित धातु से णिच् और दकार को तकारादेश तथा ण्यन्त से

क्रुन्'' इति औणादिकसूत्रेण, क्रुन् प्रत्ययः "नेड् वशि कृति" पा० सू० ७।२।८ सूत्रेणेट्-प्रतिषेधः। णिलोपः। प्रज्ञादिगणे ह्रस्वपाठात् आकारस्य ह्रस्वादेशः। एवं शत्रुशब्दः सिध्यति। हन् हिंसागत्योर्धातुरादादिकः, तस्मात् "अमनुष्यकर्तृके च" पा० सू० ३।२।५३ इति टक् प्रत्ययः "गमहनजनखनघसां लोपः क्ङित्यनङि" ६।४।९८ इत्यनेन कित्युपधालोपः। "हो हन्तेर्ञ्णिन्नेषु" पा० सू० ७।३।५४ इत्यनेनान्तर्तम्यान्नकारे परे हकारस्य घकारः कुत्वम्। "अचः परस्मिन् पूर्वविधौ" पा० सू० १।१।५१ इत्यनेनोपधालोपः स्थानिवन्न भवति, नकारे परे कुत्वविधानसामर्थ्यात्।

यदि च शत्रुशब्दे मनुष्यत्वभावना तदा मनुष्यकर्तृक पूर्वपदत्वात् टकोऽप्राप्तिः तदा "कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्" इति ३।२।५ पा० सूत्रस्थवार्तिकेन कप्रत्ययं विधाय रूपं साधनीयम्। मूलविभुजादिराकृतिगणः। शेषा प्रक्रिया टक्-प्रत्ययवज्ज्ञेया। एवञ्च शत्रुः शातयिता, प्राणघातकः कार्यविघातको वा भवति। यश्च यस्य शातयिता स तस्य शत्रुरित्युच्यते, तञ्च शत्रुं यो हन्ति स शत्रुघ्न इति शत्रुघ्न-शब्दः सङ्गतार्थो भवति। स च विष्णौ सम्यगन्वेति, अतो विष्णुरेव शत्रुघ्ननाम्नोक्तो भवति। यतो हि यः कश्चिदपि भागवतान्नियमानवमत्य यथेच्छं विशृङ्खलमाचरति, स तन्नियमशातयिता भवति, तञ्च सर्वनियामको विष्णुः स्वकृताभिर्व्यवस्थाभि-र्हिनस्ति, तं दण्डयति, अतो विष्णुरेव शत्रुघ्नशब्दान्वर्थकः।

भवति चात्रास्माकम्—

विश्वे कृता या विभुना व्यवस्था तां यो विभज्याकुरुते क्रियाः स्वाः।
स एव दण्ड्यः किमु वा स घात्यः शत्रुघ्ननाम्ना कथितः स विष्णुः॥२४९॥

विभज्य-भङ्क्त्वा।

मन्त्रलिंगञ्च—

अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः।
साम ४। ऋ० ६।१६।३४

को ह्रस्वादेश करने से शत्रु शब्द बनता है, शत्रु शब्द के उपपद रहते हुवे, हन् धातु से 'टक्' प्रत्यय तथा उपधा लोप और कुत्व करने से शत्रुघ्न शब्द सिद्ध होता है। शत्रुघ्न यह भगवान् विष्णु का नाम है। क्योंकि वह अपने बनाये नियमों का अतिक्रमण करने वाले को मारता है, दण्ड देता है। शत्रु नाम उस का है, जो प्राणों का या किसी कार्य का हनन करे—बिगाड़े और उस प्राण या कार्यविघातक को जो मारता है वह कहाता है शत्रुघ्न। भगवान् विष्णु भी, जो भागवत नियमों को तोड़कर मनमाना, मनचाहा व्यवहार करता है, अमानुषिक कार्य करने में लग जाता है, उसको अपनी ही व्यवस्थाओं से—नियम विशेषों से मार देता है—दण्ड देता है। इसलिये वह शत्रुघ्न है, तथा दण्ड नाम भी उसी का है, क्योंकि यह भी विष्णु के नामों में संगृहीत है। सारांश यह है कि—

विश्व में जो प्रभु ने नियम बना रक्खे हैं उन नियमों का अतिक्रमण करके जो अपने स्वेच्छाचार से कार्य करता है वह प्रभु का दण्डनीय या हनन करने योग्य है। इसलिये भगवान् विष्णु को शत्रुघ्न कहते हैं।

व्याप्तः—४१३

आप्लृ व्याप्तौ, धातुर्व्युपसर्गः, तस्मात्कर्त्तरि क्तः प्रत्ययः। सर्वं चराचरं जगद् विशेषेण, आप्नोतीति व्याप्तः प्रभोर्विष्णोर्नाम। सर्वं हीदं जगद् भगवद्व्याप्तिमद् न हि जगत्यङ्गुलीपरिमितमपि स्थानमीदृक्—यत्तेन विना भवेत्, भगवतस्तु जगदादिकारणत्वात्, जगदन्तरापि सद्भावः किन्तु जगतस्तु भगवद्व्याप्तिमत्त्वाद् भगवत्सत्तयैव सत्त्वम्। अत एव स विष्णुर्व्याप्ताभिधानः।

मन्त्रलिंगञ्च—

"तस्मिन्ह तस्थुर्भुवनानि विश्वा" यजुः ३१।१९

आप्नोतेरेव "आपः" ब्रह्मपर्य्यायः। "आपो ब्रह्मजना विदुः" इत्यथर्वः।

भवति चात्रास्माकम्— १०।७।१०

व्याप्नोति विश्वं स्वक एव गर्भे, माता यथान्तर्निदधाति गर्भम्।
व्याप्तेन नाम्ना स ततोऽत्र विष्णुः सङ्कीर्तितो वेदविदां वरेण्यैः ॥२५०॥

वायुः—४१४

वा-गतिगन्धनयोः, इत्यादादिकधातोः "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" इत्यौणादिक उण् प्रत्ययः, "आतो युक् चिण्कृतोः" पा० सू० ७।३।३३ सूत्रेण युगागमे व्याकृतो वायुशब्दः। वाति सर्वत्र गतो भवतीति वायुर्विष्णुः। व्यापनशीलत्वात्, स्वसत्तास्फूर्तिभ्यां सर्वं व्याप्नोतीत्यर्थः।

मन्त्रलिङ्गञ्च—

व्याप्तः—४१३ कारण रूप से सब कार्यों को व्याप्त करनेवाले।

व्याप्त, यह भगवान् विष्णु का नाम है क्योंकि वह सम्पूर्ण जड़ चेतन जगत् को विशेष रूप से व्याप्त करता है। अर्थात् विश्व में एक इञ्च भर भी स्थान ऐसा नहीं, जहां सर्वनियन्ता सर्वेश्वर विष्णु का सद्भाव न हो। जगत् के कण कण में वह व्यापक रूप से विद्यमान है। सामान्य रूप से सब जड़ चेतन वर्ग में व्यापक होता हुवा भी वह चेतन वर्ग को स्वच्छ हृदय होने से अपने ज्ञान रूप द्वारा विशेष रूप से व्याप्त करता है। यही उसका व्याप्तत्व है। इसी से उसका नाम व्याप्त है। "तस्मिन्ह तस्थु" रित्यादि वेदवाक्य भी इस के व्याप्तत्व में प्रमाण है। पद्य में भी संक्षेप से यह कहा गया है –

जैसे माता गर्भ को अपने उदर में धारण करती है। इसी प्रकार विश्वात्मा विष्णु भी सम्पूर्ण विश्व को अपने अन्दर धारण करता है। इसीलिये पुरातन महर्षियों ने, उसको व्याप्त नाम से कहा है।

वायुः—४१४ पवनरूप

वायु, नाम भगवान् विष्णु का है क्योंकि वह सम्पूर्ण विश्व में गया हुवा है। व्यापन स्वभाव वाला वह सर्वेश्वर, इस जड़ चेतन रूप विश्व को अपनी सत्ता और स्फूर्ति से चेतनता प्रदान करता है। अर्थात् उस सर्वत्र व्यापक विष्णु से ही सत्ता और चैतन्य पाकर यह जड़ात्मक विनाशी विश्व सत् और चेतन सा प्रतीत हो रहा है। उसकी व्यापकता में यह "तदेजति

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजुः ४०।५

भवति चात्रास्माकम्—

स्थानन्न तद्यत्र न वाति शम्भुः स्थानन्न तद्यत्र न तस्य सत्ता।
स वायुरूपः प्रपुनाति विश्वं विश्वान्तरः प्राणयते ह विश्वम् ॥२५१॥

इह पञ्चभूतान्तर्गतवायौ यः प्राणनधर्मः सोऽपि वायुनाम्नो विष्णोरेव।
"तद्वायुस्तदु चन्द्रमाः" इति च मन्त्रम्। यजुः ३२।१
तदिति=ब्रह्म।

अधोक्षजः—४१५

"यादृगेव ददृशे तादृगुच्यते" ५।४४।६ इति ऋग्वेदीयवचनमनुसृत्य–"अधोक्षजः" सूर्यस्य नाम, अधः अक्षात्–जायत इत्यधोक्षजः, 'पञ्चम्यामजातौ' पा० ३।२।९८ इति सूत्रेण जनेर्डः प्रत्ययः, 'डित्यभस्यापि टेर्लोपः' इत्यनेन वार्तिकेन टेर्लोपात्—अधोक्षज इति सिद्ध्यति।

जनी प्रादुर्भावे दैवादिको धातुः, प्रादुर्भावो हि नाम सतः पदार्थस्य व्यवधायकस्य विक्षेपराहित्यात् स्वरूपेऽवस्थानम्। सूर्योऽप्येतस्मादेव—दिवसः पुत्र उच्यते। 'दिवि योनि' ऋ० १०।८८।७

भवन्ति चात्रास्माकम्—

तन्नैजति" मन्त्र भी प्रमाण है। इस कथन को इस प्रकार पद्य बद्ध किया है—

विश्व में ऐसा कोई भी स्थान नहीं, जहां वायुरूप भगवान् विष्णु की सत्ता या गति न हो, वही विश्व में प्रविष्ट होकर विश्व को जीवित रखता है। इस पञ्चभूतान्तर्गत वायु में जो प्राणन धर्म है वह भी वायु नामक विष्णु का ही है। मन्त्र भी है—

वही ब्रह्म वायु तथा चन्द्रमा है।

अधोक्षजः—४१५

जैसा देखा वैसा ही कहा जाता है ऋग्वेद के इस वचनानुसार 'अधोक्षज' सूर्य का नाम है।

अक्ष के नीचे उत्पन्न होनेवाले को अधोक्षजः कहते हैं।

दिवादिगण में पठित प्रादुर्भावार्थक जनी धातु से ड प्रत्यय एवं टी का लोप होकर अधोक्षजः शब्द सिद्ध होता। सत् पदार्थ के विक्षेपरहित स्वरूप में अवस्थान को ही प्रादुर्भाव कहते हैं। "दिवि योनिः" १०-८८-७ या "दिवस्पुत्र" भी सूर्य का नाम इसी से है। भाष्यकार विवक्षित अर्थ को अपने पद्यों से इस प्रकार व्यक्त करते हैं—

जनैर्यथास्थानगतैः स सूर्यः सूप्रान्तरिक्षादधरादुदायन् ।
निरीक्ष्यतेऽधोक्षजमेनमाहुर्विष्णुं रविं भानुमनेकसंज्ञम् ॥२५२॥

न जायते नापि च लीयतेऽयं दिवि श्रितो द्योतत एव नित्यम् ।
यो वाऽर्कराशिः स्पृशतीव गोंऽशं निरीक्ष्यते लग्नमतस्तमाहुः ॥२५३॥

लग्नं कलांशैः स्फुटयन्ति तज्ज्ञाः शुभाशुभं लग्नवशाद्धि मर्त्यः ।
भुङ्क्ते यथाकालकृतं च नैजं लग्नातिरिक्तं न हि किञ्चिदस्ति ॥२५४॥

यद्वा—द्यौरक्षं प्रथिवी चाधस्तयोः प्रादुर्भवन्निव ।
दृश्यते लोहितार्कोऽयं ततोऽधोक्षज उच्यते ॥२५५॥

अक्षशब्दो बह्वर्थः—तद्यथा—

शंकुर्नरो ना कथितः स एव खार्द्धाद्रवेर्या विषुवद्दिनार्धे ।
नतिः पलोऽक्षश्च स एव तज्ज्ञैस्तत्रोन्नतिर्यस्य स एव लम्बः ॥

सिद्धान्तशिरोमणौ गणिताध्याये ।

चन्द्राश्विनिघ्ना पलभार्द्धिता च लंकावधिः स्यादिह दक्षिणोक्षः ।

लंका निरक्षदेशः ।

यथास्थान स्थित पुरुष सूप्तान्तरिक्ष अवर से उदय होते हुए सूर्य को देखते हैं, इसी को अधोक्षज, विष्णु, रवि एव भानु आदि अनेकों नामों से कहते हैं ।।१।।

यह न कभी उत्पन्न होता है और न कभी लीन (अस्त) होता है; आकाश स्थित नित्य प्रकाशमान रहता है । भूमि के अंश को सूर्य की जो राशि स्पर्श करती हुई सी है उसी को लग्न कहते हैं ।।२।।

पण्डित जन लग्न को अंश-कला-विकलादि से स्पष्ट करते हैं, लग्नानुसार ही मनुष्य समय समय पर अपने किए हुए कर्मों से शुभाशुभ फल को प्राप्त करता है । लग्न के बिना सारा राशिचक्र नगण्य है । सूर्य ही लग्न का जन्म दाता है ।।३।।

अथवा अधस्तात् पृथिवी, आकाश अक्ष इन दोनों में प्रकट होता हुआ यह लोहित वर्ण-वाला सूर्य दीखता है । इसीलिये इसे अधोक्षज कहते हैं । अक्ष शब्द अनेकार्थ वाचक है । जैसे—ग्रहगणित के त्रिप्रश्नाधिकार में सिद्धान्तशिरोमणि में भास्कराचार्य लिखते हैं—जल द्वारा समीकृत भूमि पर इष्ट प्रमाण वृत्त बनाकर उस के केन्द्र में द्वादश अंगुल परिमित शंकु रक्खे, इस शंकु की छाया इस वृत्त पर जहां पड़ती है वही पश्चिम, पूर्व दिशा होती है । दिनार्ध में शून्यकलात्मक सूर्य से जो पलभा होती है ज्यौतिष शास्त्र उसी को नत, पल, एवं अक्ष कहते हैं और इस में से जिस की उन्नति होती है वही "लम्ब" होता है ।

१२ से गुणा किया हुआ और पलभा से आधा लंका से ही दक्षिण अक्ष होता है । लंका निरक्ष स्थान है ॥ पलभा—

पलभा-मेषादिगे सायनभागसूर्ये दिनार्धभा या पलभा भवेत् सा । ग्रहलाघवे ।

उदग् दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमृक्षमण्डलम् ।
उदग् ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः ॥
(सिद्धान्तशिरोमणौ गोलाध्याये)

अक्षा द्यूतसाधनीभूताः पाशा अप्युच्यन्ते, तत्र मन्त्रलिंगं—

"अक्षैर्मा दीव्यः कृषिमित् कृषस्व" ऋग् १०।३४।१३

नेत्रेन्द्रियपर्य्यायोऽप्यक्षशब्दः, तद्यथा—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा ।

ऋग्—१-८९-८, यजुः २५।२१

अधोऽक्षमिन्द्रियं स्त्रीपुरुषयोः प्रजननसाधनीभूत इन्द्रिये, ते च स्वार्थसाधकेऽपि—तत्र मन्त्रलिंगं च—

रेतो मूत्रं विजहाति योनिं प्रविशदि न्द्रयम् ।

यजुः १९।७६

लोकेऽपि च पश्यामः- सदयं जीवः । सतो मातुरुपस्थात् सावकाशे स्थाने प्रादुर्भवति । यथा च मन्त्रलिंगम्—

"वितिष्ठन्तां मातुरस्या उपस्थात् नाना रूपाः पशवो जायमानाः"

अथर्व १४।२।२

को सायनार्क कहते हैं । राशि अंश कलादि से अयनांश से युक्त सूर्य शून्य मेषादि सूर्य के दिन मध्याह्न में शंकु की छाया को पलभा कहते हैं—श्री भास्कराचार्य का शंकु लक्षण अधोऽङ्कित है—"समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः शंकुः "

सिद्धान्तशिरोमणि के गोलाध्याय में भास्कराचार्य दिग्व्यवस्था के पश्चात् चक्रभ्रमण व्यवस्था का निरूपण करते हैं—

निरक्ष देश में जो विषुवत् मण्डल है वह ही सम मण्डल है । वह दो ध्रुव (दक्षिण व उत्तर) क्षितिजासक्त है । निरक्ष देश से नर (द्रष्टा) जैसे जैसे उत्तर को जाता है वैसे वैसे ऋक्ष मण्डल नत होता है एवं वैसे वैसे पृथिवी से उत्तर ध्रुव को उन्नत देखता है जैसे चक्रांशमित परिधि से भू-परिधि प्राप्त होती है वैसे ही अक्षांशों से निरक्ष देश से स्वदेश के अन्तर योजन उपलब्ध होते हैं ।

अक्ष द्यूत (जूआ) के पाशों को भी कहते हैं—इसमें "अक्षैर्मा दीव्यः, कृषिमित् कृषस्व" ऋग् -१०-३४-१३ मन्त्र प्रमाण है । अक्ष शब्द नेत्रेन्द्रिय का पर्य्यायवाची है । जैसे "भद्रं पश्येमाक्षभिर्यजत्राः" ऋग् १-८९-८, यजुः—२५-२१ मंत्र प्रमाण है । स्त्री एवं पुरुष के सन्तानोत्पत्ति के साधनभूत इन्द्रियां भी अधोक्षज कहाती हैं । ये इन्द्रियां स्वप्रयोजनसाधिका भी हैं । लोक में देखते हैं जातक सावकाश स्थान में माता के उपस्थ से उत्पन्न होता है इसमें "मातुरस्या उपस्थात् नानारूपाः पशवो जायमानाः" अथर्व १४।२।२ प्रमाण है । शेपस् (लिङ्ग) का

"शेफसः प्रजापतिर्देवता—तद्यथा—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते" यजुः ३१।१९

"यस्यामुशन्तः प्रहराम शेपम्" इत्यथर्वणि १४।२।३८

एवमियं मैथुनी सृष्टयपि संगच्छतेतराम्।

बीजांकुरोऽप्यधोभूतमक्षं प्राप्य पृथिव्याः स्तरमतिक्रममाणः प्रादुर्भवति, अतो लोकोऽप्यधोक्षजनामवाच्यार्थः।

द्विजः पक्ष्यप्येतस्मादेव—एकधाऽण्डो मातुरुपस्थात् प्रादुर्भवति पुनश्च तस्मादण्डात् पक्षी प्रादुर्भवति। दन्ता अपि द्विजा एतस्मादेवोच्यन्ते—प्रथमं ते दन्ता दुग्धनिमित्तात् प्रादुर्भवन्ति, ततश्चान्ननिमित्तमधिकृत्य प्रादुर्भवन्ति। दन्तार्थे प्रयोगश्चरके—"द्विजैश्छित्वा भुञ्जीत"।

भवन्ति चात्रास्माकम्—

अधोक्षजो विष्णुरनन्तशक्तिश्चतुर्विक्लृप्तं जनयत्यकल्यम्।
पिता यथा द्यौः, पृथिवी च माता तयो रविर्जायत एव दृश्यः ॥२५६॥
एवं बुधा सर्वसरं तमाद्यं सर्वास्ववस्थासु तमेव विश्वे।
पश्यन्ति, शृण्वन्ति, गृणन्ति तं वा ज्ञानेक्षणा ज्ञानमियन्ति तस्य ॥२५७॥

प्रजापति देवता है इस में प्रजापतिश्चरति गर्भे० इत्यादि यजुः ३१-१९ मन्त्र प्रमाण है। यस्मामुशन्तः प्रहराम शेपम् अथर्व १४।२।३८॥ मन्त्र प्रमाण है। इस प्रकार मैथुनी सृष्टि की भी अधोक्षज नाम के तुल्य संगति हो जाती है। वीज भी पृथिवी भूत अधोक्षज को प्राप्त होकर पृथिवी के स्तर से ऊपर को प्रकट होता है इस प्रकार संसार का उत्पत्तिक्रम भी अधोक्षजः के समान ही है। पक्षी भी द्विज है—माता से अण्डा, पुनः अण्डे से पक्षी प्रकट होता है। दान्त भी द्विज हैं:—प्रथम दुग्ध निमित्त पुनः—अन्न निमित्त उत्पन्न होते हैं। इस में "द्विजैश्छित्वा भुंजीत" ऐसा चरक में—द्विज शब्द दान्तों के अर्थ में प्रयुक्त हुआ है।

भाष्यकार संक्षेप से अपने वाच्यार्थ को इस प्रकार व्यक्त करते हैं—

भगवान् सूर्य अधोक्षज है। वह अनन्त शक्ति धारण करनेवाला विष्णु सदा से ही चतुर्विध सृष्टि को उत्पन्न करता है, द्युलोक तथा पृथिवी के मध्य से सूर्य उदय होता हुआ दीखता है।

इस प्रकार बुध (पण्डित जन) सब के आदिभूत उस अधोक्षज विष्णु को सभी अवस्थाओं में इस संसार में देखते हैं उसी के यश का श्रवण करते हैं, एक उसी का पूजन करते हैं, ज्ञानी मनुष्य उसी अधोक्षज विष्णु के ज्ञान को प्राप्त करते हैं। समस्त जगत् पुरुष

लोकेऽस्ति दृश्यं सकलं प्रसूतं पुंस्त्रीप्रयोगेण कृतं गुणाढ्यम् ।
अधोक्षजो विष्णुरिदं विरच्य जगत् स्वयं तिष्ठति निर्विकल्पः ।।२५८।।

अनुकूलः ३४२ नामव्याख्याप्रसंगे विशदमुक्तं तत्र द्रष्टव्यम् ।

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः सम्वत्सरो दक्षो विश्रामो विश्वदक्षिणः ।।५८

४२६ ऋतुः, ४२७ सुदर्शनः, ४१७ कालः, ४१९ परमेष्ठी, ४२० परिग्रहः ।
४२१ उग्रः, ४२२ संम्वत्सरः, ४२३ दक्षः, ३२४ विश्रामः २२५ विश्वदक्षिणः ।।

ऋतुः—४१६

ऋतुरिति विष्णोर्नाम, तदित्थं, ऋच्छतीति ऋतुः । "ऋतेश्चतुरित्यौणादिकस्तुः" प्रत्ययः स च कित् । एवञ्च ऋच्छति गच्छतीति ऋतुरिति सूर्योऽभिहितो भवति । कालोऽपि सूर्यपरिस्पन्दनादिगतिलक्षण एवातो वसन्तादिरूपः कालोऽप्यृतुशब्देनोच्यते, कारणधर्मस्य कार्यं उपचारात् । सूर्यगतिभेदाच्च कालभेदः, सूर्यगतिरूपत्वात्कालस्य । तथा च स वसन्तादिरूपेण षोढा भिद्यते, अत एवोच्यते, ऋतवः षडिति । सूर्यसंक्रमणप्रवृत्ता हि,—ऋतवो, यदा सूर्यो दक्षिणात उत्तरां दिशं गन्तुं प्रवर्तते, तदा वसन्ति तेजःकणा यत्र, ग्रसते हिमं यत्रेत्याद्यन्वर्थकं वसन्ताद्यृतूनां प्रादुर्भावो यदा चोत्तरतो दक्षिणां दिशं गच्छति तदा शीर्णा भवन्ति तेजःकणा यत्र, ह्रीना भवन्ति तेजःकणा यत्रेत्याद्यन्वर्थं शरदादि-ऋतूनामुत्पत्तिः । ऋतुप्रभावजन्या ऋत्वनुगुणं हि पृथिव्यां रसोत्पत्तिः । वीजधारणसामर्थ्यात्स्त्रियोऽपि पृथिवीरूपाः, अत एव तासामपि प्रतिमासमृतुधर्मोदयः । एतच्च चान्द्रमासमधिकृत्य, अत एव चान्द्रमासाधिके

तथा स्त्री के संयोग से दृश्य है । अधोक्ष विष्णु अधः इन्द्रियों से मैथुनी सृष्टि की व्यवस्था करके स्वयं निर्विकल्प है ।। इस विषय पर अन्यत्र भी 'अनुकूलः' नाम पर प्रकाश डाला है ।

ऋतुः—४१९ काल रूप से लक्षित होनेवाले ।

ऋतु, यह सर्वेश्वर विष्णु का नाम है क्योंकि वह सर्वगत है । सूर्य का नाम भी ऋतु है, क्योंकि वह भी यथासमय गमनशील है । सूर्य की गति का नाम ही काल है इसलिये वसन्तादि रूप काल भी ऋतु शब्द से कहा जाता है । सूर्य के गति भेद से काल षट् प्रकार से भिन्न होकर छः ऋतुओं का रूप ले लेता है। इसलिये छः ऋतुएं होती हैं । सूर्य की गति से ही ऋतुएं बनती हैं, जब भगवान् भास्कर दक्षिण दिशा को छोड़कर उत्तर दिशा में जाने को प्रवृत्त होते हैं तब क्रम से वसन्तादि तीन ऋतुएँ बन जाती हैं । इस ऋतुगण में क्रम से तेज के कण बढते रहते हैं और जब सूर्य उत्तर दिशा को छोड़कर दक्षिण में जाने लगता है तब क्रम से शरद् आदि ऋतुओं का प्रवर्तन होता है इस ऋतुगण में क्रम से तेज के कण क्षीण होते रहते हैं । पृथ्वी में रसों की उत्पत्ति ऋतुओं के गुणानुसार होती है । स्त्रियां भी बीज धारण

सम्वत्सरे स्त्रीणामपि तन्मासनिमित्तक ऋतुधर्मो दृश्यते। पूर्वोक्तसूर्यकालादिषु-ऋतत्वाद्, गतत्वाद्, व्याप्तवाद्भगवतो विष्णोरेव नाम, ऋतुरिति, बहुधा स्तोतुम्।

"आदित्य"नाम्नो व्याख्याप्रसङ्गे विशिष्टमुक्तं तत्र द्रष्टव्यम्। ऋतुप्रभावाद्यत्र यत्र यस्य वृक्षपत्रफलादिकस्य रसक्षयो भवति तत्र तत्र तत्तन्नीरस्यमाप्तं शुष्यति।

सति चाभिमतरसोदये पुनस्तत्पत्रादिकं सरसं सञ्जातरूपं नव्यं भवति।

दृश्यते हि,—श्लेष्मान्तकस्य "लहसूड़ा" पत्रपातो वैशाखे मासि, वटस्य च चैत्रे। पत्रपातहेतुकं कालभेददर्शनेन; समानजातीयानामपि, आन्तरो भेदोऽनुमीयते।

ऋतुकृतरसोदयप्रभावादेव, भिन्नमासजातानामेकमनुष्यजातकानामपि गुण-कर्म-स्वभावा भिन्ना दृश्यन्ते।

भवतश्चात्रास्माकम्—

ऋतुस्वभावात् प्रतिमासमेति, रसोदयश्चापि भवेद्विभिन्नः।
लोकेऽस्ति दृश्यं विविधौषधीनां, जनिस्त्वमह्नाञ्च समासभेदात् ॥२५९॥
भूगोलकञ्चापि रसोदयानां, भेदोऽस्ति दृश्यः पृथिवीस्वभावात्।
उपोर्मिमद् यन्न तदस्ति मेरौ, प्रभाकरस्यैव मरीचिभेदात् ॥२६०॥

मन्त्रलिंगञ्च—

"वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः"।

करने की समानता से पृथिवीरूप हैं इसलिये उनके भी चान्द्र मास के अनुसार प्रतिमास ऋतु धर्म होता है। सूर्यकालादि सब में अनुगत होने से भगवान् विष्णु का ही नाम ऋतु है बहुत प्रकार से स्तुति करने के लिये। विशेष आदित्य नाम की व्याख्या में देखना चाहिये। ऋतु के प्रभाव से जहां जहाँ जिस जिस वृक्ष, पत्र, पुष्प, फलादि के रस का क्षय हो जाता है वह सब नीरस होकर सूख जाता है। जब उन में फिर रस आजाता है तब जीवित अथवा हरे हो जाते हैं। समानजातीय वृक्षों में भी पत्र आदि के पतन के हेतु काल में भिन्नता देखने में आती है। इसलिये उन में भी कोई आभ्यन्तर भेद है ऐसा अनुमान होता है।

जैसे ल्हेसुवा का पत्रपात वैशाख में होता है और वट वृक्ष का पत्रपात चैत्र में। ऋतु निमित्तक रसोदय के प्रभाव से ही भिन्न भिन्न मासों में पैदा होनेवाले एक पिता के पुत्रों में भी गुण, कर्म, स्वभावों का भी भेद होता है। यही कथन पद्य द्वारा इस प्रकार उक्त है—

लौकिकानुभव से सिद्ध होता है, अनेक प्रकार की औषधियों का जन्म तथा उन में रसोत्पत्ति ऋतुओं के स्वभाव से प्रतिमास भिन्न भिन्न होती है।

भूगोल पर सूर्य की किरणों के सम विषम पड़ने से सब स्थानों में समान रस की उत्पत्ति नहीं होती।

चन्द्रमा भी ऋतुओं को बनाता है, इस में भाष्यकारोद्धृत प्रमाण हैं।

पूर्वं सूर्यगतिहेतुकमृतुभवनमिति प्रदर्शितम्। इदानीञ्चन्द्रोऽपि ऋतूनां विधातेत्यत्र मन्त्रलिङ्गम्—

द्वे ते चक्रे ब्रह्माण ऋतुथा विदुः।
अथैकं चक्रं यद्गुहातद्धातय इद्विदुः। ऋ० मं० १०।८५।१६।

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्।
विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥१८॥
नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो विदधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः ॥

(ऋ. मं. १०।८५।१९)

सुदर्शनः—४१७

पश्यति येनेति करणे "मृदृशियजिवपिपर्विपच्यमितमिनमिहर्यिभ्योऽस्तच्" उणादि ३।११०। सूत्रे अनजपीति माधवमतेन दर्शतसमानार्थको दर्शनशब्दः सिध्यति। दर्शनशब्दस्य च सूर्यो वाच्यः यदुक्तं "देवो याति भुवनानि पश्यन्" यथा सूर्यो देवः सर्वमिदं चराचरं विश्वं पश्यन्, दृग्गोचरीकुर्वन् वा यात्यन्तरिक्षेण वर्त्मना, प्रेरयति च सकलान् प्राणिनो यथार्हं स्वस्वकर्मणि सवितृभूत, इत्यत्राथर्ववेदवचनम्—

"स (सूर्यः) सविता भूत्वा अन्तरिक्षेण याति" अथर्व १३।३।१३

तथा च—स देवान्त्सर्वानुरस्युपदद्य सं पश्यन् याति भुवनानि विश्वा।

अथर्व १३।३।१४।

यथायं शरीरो व्यष्ट्यात्मा स्वशरीरसम्बन्धि सुखं वा दुःखं वा सम्यक्पश्यत्यनुभवति, तथायं सकलसमष्ट्यात्मा सूर्यः समग्रविश्वं पश्यति, अत्र यजुः—

"सूर्य आत्मा जगतस्तस्थुषश्चेति" भगवान् विष्णुः सर्वस्यान्तर्बहिश्च वर्तमानः सर्वमिदं सम्यक्पश्यतीति सुदर्शन उक्तो भवति। सूपसर्गयुतो दर्शनशब्दः किञ्चिद्वैशिष्ट्यं प्रकटयति दर्शने, सूर्यो हि देशकालव्यवहितं वस्तु कदाचिन्न पश्यति न प्रकाशयति न

सुदर्शनः ४१७— प्राणियोंको सुगमता से दर्शन देनेवाला।

दर्शन नाम सूर्य का है, क्योंकि वह सब लोकों को देखता हुआ या प्रकाशित करता हुआ अन्तरिक्ष मार्ग से जाता है, ऐसा वेद वचन कहता है। तथा वह सब स्थावर जङ्गम वर्ग का आत्मा है, इसलिये जैसे शरीरगत जीवात्मा अपने शरीर सम्बन्धी सुख दुःखों को अच्छी प्रकार देखता या अनुभव करता है। उसी प्रकार जगदात्मा भगवान् भास्कर भी जगत् तथा तदन्तर्गत कार्यजात को अच्छी प्रकार देखता है। अथर्ववेदमें-उदय होकर, आकाश मार्ग से अस्ताचल को जाते हुवे सूर्य का नाम 'सविता' कहा है, क्योंकि वह लोकों को अपने २ कर्मों में प्रवृत्त करता हैं। भगवान् विष्णु का सुदर्शन नाम इसलिये है कि, वह सम्पूर्ण विश्व के बाहर और भीतर व्यापक रूप से स्थित विश्व को अच्छी प्रकार देखता है। जैसे सूर्य काल या देश

तथा विष्णुः, यतो हि स देशकालापरिच्छन्नः सर्वदा सर्वद्रष्टा । यदुक्तं "न द्रष्टुर्दृष्टे- विपरिलोपोऽविनाशित्वात्" इत्यार्षवचनम् । अथवा यथा शरीरी स्वचक्षुर्विषया- न्तर्गतञ्चक्षुरिन्द्रियगोलकयुतं सर्वं पश्यति किन्तु न चक्षुरिन्द्रियम् ।

सर्वेश्वरोऽशेषद्रष्टा विष्णुस्तु, चक्षुःस्थानीयाभ्यां सूर्यचन्द्राभ्यामिदं सर्वं पश्यन्ता- न्नप्युभौ पश्यत्येतदेव सुदर्शनत्वं तस्य, अत एव च सुदर्शन इत्युक्तो भवति ।

भवति चात्रास्माकम्—

सुदर्शनो विष्णुरिदं विरच्य जगत्स्वयं पश्यति सूर्यनेत्रः ।
शिल्पी यथा यन्त्रकृतौ प्रवृत्तः स्वयं हि तज्जानि सुखानि भुंक्ते ॥२६१॥

कालः—४१८

"कल_संख्याने" धातोर्भावे घञ्, मत्वर्थीयोऽच्, कालः । सर्वेश्वरो विष्णुरेव कालो यतो हि स कलयति गणयति, समस्तप्राणिकर्माणि, तदनुकूलफलप्रदानाय । यदि नाम केन प्राणिना कस्मिन् समये कीदृक्कर्म कृतं शुभाशुभं केन च कियतां कर्मणां शुभाशुभफलं भुक्तमिति गणना न कृता स्यात् तदा कथन्न, यथाकर्म- फलप्रदातृत्वनियमभंगो न स्यात् । 'अत्रोक्तौ मन्त्रलिङ्गम् 'स पर्यगादिति" "याथा- तथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः" । यथोक्तं–योनिमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् । यथाकर्मफलिकां योनिं यथाकर्मफलकं यथाकालाधारकञ्च सुखं दुःखं वा कथं प्राप्नुयात्प्राणी, कालरूपनियन्तारमन्तरेण । लोकेपि च पश्यामः—

यथा कश्चिदाकरस्वामी "खनिपतिः" स्वस्वामिकाकरे कर्म कुर्वाणानां कर्म-

---

व्यवहित वस्तु को रात्रि आदि में नहीं भी देखता, किन्तु भगवान् विष्णु देशकाल से परिच्छिन्न न होने से, सब समय तथा सब जगह पूर्ण रूप से देखता है । इसलिये उसका नाम सुदर्शन है ।

अथवा जैसे जीवात्मा चक्षु से चक्षु इन्द्रिय के गोलक सहित अपने सब विषय को देखता हुआ भी, चक्षु इन्द्रिय को नहीं देख सकता किन्तु इस के विपरीत भगवान् विष्णु अपने नेत्र रूप सूर्य चन्द्र से सब, जगत् को देखता हुआ सूर्य चन्द्र को देखता है । इसलिये उसका नाम "सुदर्शन" है ।

भाष्यकार के पद्य द्वारा यह इस रूप में कहा गया है—

भगवान् सुदर्शन नामा विष्णु इस जगत् की रचना करके, अपने सूर्य रूप नेत्र से, इस जगत् को देखता हुआ अपने लीलाजन्य सुख का अनुभव करता है । जैसे कोई कारीगर, यन्त्र बनाकर उसके द्वारा सुख भोग करता है ।

कालः—४१८ सबकी गणना करने वाला ।

सर्वरूप विष्णु के नामों में काल भी उसका एक नाम है । क्योंकि, वह प्राणियों को कर्मानुरूप फल देने के लिये, उनके कर्मों का गणित रखता है । किस किस समय कैसा शुभ या अशुभ कर्म किया, तथा किस-किस कर्म का बुरा या अच्छा फल भोगा, यह गणित न रखे तो यथासमय शुभाशुभ कर्म का फल कैसे दे ? लोक में भी देखने में आता है, जैसे कोई कारखाने

कराणां दैनिकोपस्थितिं कार्यञ्च स्वगणनापट्टे लिखति । सति च पूर्णे मासि गणनापट्टानुसारं कियत्यः कस्योपस्थितयः केन च कियत्कार्यं प्रतिदिनं विहितमिति विविच्य, वेतनरूपं फलं प्रयच्छति । सम्मानार्हाय सम्मानञ्च दत्त्वा अध्यारोपयत्युच्चैस्तमं पदमिति । एवं कालनामा भगवान् विष्णुस्तत्तत्कर्मानुरूपं शुभाशुभंफलं योनिं वा स्वकृतव्यवस्थातः प्रयच्छन् कालशब्देनोक्तो भवति ।

मन्त्रलिङ्गञ्च—

कालो अश्वो वहति सप्तरश्मिरिति दशर्चम् अथर्व-१९।५३,
कालादापः समभवन्निति (अथर्व १९।५४) पञ्चर्चं सूक्तंमिह ज्ञेयम् ।

ग्रसनादपि कालः—यथाऽऽकरपतिर्यदेच्छति तदा समापयति स्वभाकरमेवं भगवान् कालोऽपि स्वक्रीडनत्र भूतं विश्वमिदं प्रकृतिलीलां यदा संजिहीर्षति, जिग्रसिषति तदा ग्रसति दर्शयति च स्वकालरूपां सत्याभिधानतामिति ।

भवति चात्रास्माकम्—

कालः स विष्णुः कलयन् समस्तं स्वभावसिद्धञ्च युनक्ति सर्वम् ।
सूत्याऽथ धृत्या ग्रसनेन चापि स्वयञ्च नोपैति सदैकभावात् ॥१६२॥

परमेष्ठी—४१९

परमे पदे तिष्ठतीति ताच्छील्ये णिनिः । परमं पदञ्च परं व्योम । "ऋचोऽक्षरे परमे व्योमन्" परमे व्योम्नि स्थितः परमेष्ठी च सूर्यः । ज्ञानप्रधानत्वमत एव पञ्च-

---

का मालिक अपने कारखाने में कार्य करने वाले श्रमिकों की, प्रतिदिन की उपस्थिति तथा कार्य अपने गणना-पत्र खाते में लिख लेता है, और मास पूरा होने पर कार्यानुसार वेतन देता है उत्तम कार्य करने वाले को मान और ऊंचा पद भी देता है । इसी प्रकार भगवान् भी कर्मानुसार उत्तमाधम योनि और बुरा या अच्छा फल देता है । यह सब जगत् उसी के वश में है । ग्रसन से संसार का संहार करने के कारण से भी उसको काल कहते हैं । क्योंकि जब वह चाहता है विश्व को समेट लेता है ।

पद्यगत सारांश इस प्रकार है—

भगवान् काल रूप विष्णु सबका कर्मानुसार गणन रखता हुआ जन्म, पालन तथा मृत्यु रूप संसार में घुमाता है, और स्वयं अविकृत रहता है ।

परमेष्ठी-४१९ अपनी प्रकृष्ट महिमा में स्थित रहने के स्वभाव वाला

परमेष्ठी यह भगवान् विष्णु का ही नाम है, क्योंकि, वह अक्षर ज्ञानरूप व्योमस्थानीय परम पद में रहता है । सूर्य का नाम भी इसी से है कि, वह व्योम (अन्तरिक्ष) में रहता है । यह

ज्ञानेन्द्रियाणामूर्ध्वे जत्रुणि विन्यासः। अत्र मन्त्रलिङ्गम्–'ज्योतिषां ज्योतिर्मनः' यजुः। ज्योतींषीन्द्रियाणि। एवं कृत्वा तमसः परस्तात् स परमेष्ठी ज्ञानेन्द्रियैः साम्यमुपगच्छति सर्वत्र ज्ञानानुशायिनि मस्तिष्क एव तिष्ठति। अत एव वक्तुं शक्यते ज्ञानेन्द्रियेषु स्वयं भगवान् परमेष्ठी तिष्ठति। हृन्मस्तिष्कयोः स्यूतसम्बन्धत्वाद् बुद्धिर्मनः प्रेरयति, तच्च पुनर्ज्ञानेन्द्रियैर्लब्धज्ञानं तदनुरूपं कर्म कर्तुं प्रारभते। अत्र हृन्मस्तिष्कसम्बन्धसमर्थकं मन्त्रलिङ्गम्—

मूर्धानमस्य संसीव्याथर्वा हृदयञ्च यत्।

मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधिशीर्षतः॥ अथर्व १०।२।२६॥

एवं हि सर्वत्र तस्य नियमो लोके दृश्यते यथा व्योम्नि सूर्योदयो विश्वेदेवा निषीदन्ति, तथैव प्राण्यूर्ध्वभागे सर्वेषां ज्ञानेन्द्रियाणां निचयः। लोकसम्मितत्वात् पुरुषस्य। एवं हि सर्वज्ञानसमूहः पञ्चेन्द्रियैर्व्यक्तीक्रियते, स च मस्तिष्क एव। प्रवृद्धज्ञानगुणो जन्तुः परमेष्ठिनमाचष्टेऽहर्निशम्।

तद्यथा-योजनगन्धा पिपीलिका स्वस्थानात् योजनान्तरे स्थितमपि वस्तुगन्धमुपादत्ते। गृध्रश्च पक्षी योजनात्पश्यति। उलूको बहुयोजनान्तरितमपि वृत्तं जानानः प्रत्यक्षमिवावेदयति। इयमत्रानुभूता घटना, कश्चिद्यात्रामारिप्सुः पुरुषश्चलनसमयेऽश्रौषीदुलूकवाचं ताञ्च, निशम्याशुभेयमिति मत्वा यात्रामतिममुञ्चत्, तदवस्थं तमवलोक्य च तत्र स्थितः कश्चित् पक्षिवाग्विदवदत्, कथं यात्रातो विरतोऽसि, निष्कण्टक इदानीन्ते पन्था इत्युलूको वदति, तत्त्वयाऽवश्यं गन्तव्यम्। अभूदपि तथैव, चतुर्योजनायते मार्गे न स

ज्ञान की प्रधानता लेकर व्याख्यान है, क्योंकि पञ्च-ज्ञानेन्द्रियों की स्थिति जत्रु स्थान में मस्तिष्क में है। इस तरह ज्योतिर्मय मस्तिष्क की स्थान समानता से परमेष्ठी या सूर्य ज्ञानेन्द्रियों के समान है और ज्ञान स्थानीय मस्तक में ही रहता है। अथवा यों कहिये, ज्ञानेन्द्रियों में ही भगवान् परमेष्ठी का निवास है। हृदय और मस्तक आपस में ऐसे सम्बद्ध हैं, जैसे सिले हुए हों। बुद्धि मन को प्रेरणा करती है, और मन ज्ञानेन्द्रियों से ज्ञान प्राप्त करके उसके अनुसार कार्य प्रारम्भ कर देता है। हृदय और मस्तिष्क के सम्बन्ध का "मूर्धानमस्येति" मन्त्र समर्थक है। इस प्रकार का नियम लोक में सब जगह देखने में आता है। क्योंकि जो कुछ लोक में है, वही सब पुरुष पिण्ड में है। जैसे सबसे ऊंचे व्योम में सूर्यादि देवों की स्थिति है, उसी प्रकार प्राणी के ऊर्ध्व भाग मस्तक में ज्ञानेद्रियों की स्थिति है। इस प्रकार समग्र ज्ञान का प्रकाश ज्ञानेन्द्रियों से मस्तक में ही होता है। उस भगवान् परमेष्ठी का अपने विकसित ज्ञान के द्वारा प्राणी रात दिन व्याख्यान कर रहा है।

जैसे कि–योजनगन्धा चींटी ४ कोश की दूरी से वस्तु की गन्ध ले लेती है तथा गीध पक्षी योजनभर की दूरी से वस्तु को देख लेता है, उल्लू बहुत दूर के समाचार प्रत्यक्ष द्रष्टा की तरह बतलाता है यह अनुभव की हुई घटना है। कोई मनुष्य यात्रा करने को तैयार ही था कि, इतने में उल्लू की वाणी सुनकर उसको यात्रा के समय अशुभ समझकर यात्रा का विचार छोड़ दिया। वहीं कोई पक्षियों की बोली समझने वाला दूसरा मनुष्य खड़ा था वह बोला, यह उल्लू तो मार्ग को निर्विघ्न बतला रहा है तूने जाने का विचार क्यों छोड़ दिया ? उसके कहने से वह मनुष्य चल पड़ा, उसके १६ कोश लम्बे मार्ग में कोई विघ्न बाधा

कञ्चिद्यात्राविघातकं विघ्नमाप्नोत्। मयूरश्च योजनानां शताच्छृणोतीति लोकप्रसिद्धिः। अक्षरे ज्ञाने स्थितानीन्द्रियाणि ज्ञानेन्द्रियाण्युच्यन्ते। यथा जले स्थितो दण्डो जलदण्ड उच्यते।

मन्त्रलिङ्गञ्च भावप्रधानम्—

"ऋचोऽक्षरे परमे व्योमन्" इत्यादि तथा नामप्रधानम्—
आज्यस्य परमेष्ठिन्जातवेदस्तनूवशिन्।
अग्ने तौलस्यं प्राशान यातुधानान् विलापय। अथर्व १।७।२।

भवति चात्रास्माकम्—

स एव विष्णुः परमेष्ठिधर्मा विश्वं समस्तं दिवि सन्दाधति।
तथा यथोर्ध्वं कुरुते स खानाश्चयश्च तान्यास्फुटयन्ति विष्णुम् ॥२६३॥

परिग्रहः—४२०

परितो ग्रहोऽस्येति परिग्रहः। परितः सर्वतो ग्रहणमित्यर्थः। यथा भगवता भास्करेणेदं जगत्परितो गृहीतमस्ति तथा विष्णुनापि निजज्ञानानुपाति व्यवस्थया सर्वं चराचरं परितः सर्वतो गृहीतं धृतमस्ति। तथैव च मनुना मनःसंज्ञकेन विष्णुना सर्वप्राणिप्रतिष्ठेन परिगृहीतमस्ति, सर्वं व्यापारजातं स्थावरसम्बन्धि, जङ्गमसम्बन्धि वा यन्मनोऽधीनम्।

नहीं हुई। मयूर सौ योजन दूर के शब्द को सुनता है यह लोक में प्रसिद्ध है। अक्षररूप ज्ञान में स्थित होने से इन्द्रियों को ज्ञानेन्द्रिय कहते हैं। जैसे जल में स्थित दण्ड को जलदण्ड कहते हैं। 'ऋचोऽक्षर' इत्यादि मन्त्र इसी भावार्थ का पोषक है और 'आज्यस्य परमेष्ठी' इत्यादि मन्त्र नाम की प्रधानता का समर्थक है।

भाष्यकार ने इस कथन का सारसंग्रह इस प्रकार किया है—

परमेष्ठी नाम भगवान् विष्णु ही समस्त विश्व को अपने द्योतनशील ज्ञान रूप परमपद में धारण कर रहा है। तथा ज्ञानेन्द्रियों के समूह के साथ रहता हुआ, वह ज्ञानेन्द्रियों के द्वारा ही प्रकट हो रहा है।

परिग्रहः—४२० शरणार्थियों के द्वारा सब ओर से ग्रहण किये जानेवाले।

परिग्रह भी भगवान् विष्णु का नाम है क्योंकि उसने सब ओर से इस चराचर विश्व को अपनी शक्ति से ग्रहण धारण कर रखा है। जैसे सूर्य ने अपनी किरणों से जगत् को धारण कर रखा है उसी प्रकार विष्णु ने भी अपने ज्ञानानुकूल नियम से इसको नियन्त्रित कर रखा है। उसी प्रकार मनु या मन संज्ञक नाम वाले भगवान् ने सब स्थावर जङ्गम सम्बन्धी व्यापार

मन्त्रलिङ्गञ्च—

"येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्" यजुः ३४।५

यद्यप्ययं मन्त्रो मनोदैवतकस्तथापि सर्वमेवैतद् विष्णोः कर्मणामनुव्याख्यानमेव। अतो विष्णुसंज्ञके मनावपि सङ्गच्छते।

भवति चात्रास्माकम्—

सूर्यो यथाऽनादित एव विश्वं गृह्णाति शक्त्या निजया समन्तात्।
तथैव गृह्णाति च विष्णुरेकश्चराचरं चित्तमथापि तद्वत् ॥२६४॥

चित्तं=मन इति।

उग्रः—४२१

उग्रः=प्रचण्डः।

"उच समवाये" इति दैवादिकाद्धातो ऋज्रेन्द्रेत्युणादिना रन् प्रत्ययः। यस्मिन् सर्वं संवीतं समवेतं सम्यग्गतं प्रोतं वा भवति, स उग्रः। यथैतत् सर्वं सूर्ये प्रोतं तथैव विष्णौ।

अत्र मन्त्रलिङ्गम्—

"सः ओतः प्रोतश्च विभुः प्रजासु" यजुः ३२।८

समूह, जो मन के आधीन है ग्रहण अथवा धारण कर रखा है। इसमें प्रमाण 'परिगृहीतममृतेन सर्वम्' यह मन्त्र है। यद्यपि इस मन्त्र का देवता मन है तथापि यह विष्णु के ही कर्मों का अनुकरण रूप व्याख्यान है, इसलिये मनुसंज्ञक विष्णु में भी इस की संगति है। भाष्यकार ने पद्य द्वारा इसका कथन इस रूप में किया है—

जैसे अनादिकाल से, सूर्य ने अपनी शक्ति द्वारा इस विश्व को सब ओर से ग्रहण कर रखा है। उसी प्रकार चित्तसहित चराचर को परिग्रह नाम विष्णु ने ग्रहण कर रखा है।

४२१:—सूर्यादि के भी भय के कारण।

भगवान् विष्णु के नामों में आये हुये उग्र शब्द का अर्थ है—जिसमें जड़ चेतन वर्ग समवेत रूप से मिला हुआ हो, ओत प्रोत अर्थात् माला में पुष्पों की तरह अथवा वस्त्र में तन्तुओं की तरह पिरोया हुआ हो वह उग्र है। जैसे यह सम्पूर्ण विश्व सूर्य में ओत प्रोत है उसी प्रकार विष्णु में ओत प्रोत है। यहां "स ओतश्च प्रोतश्च' आदि मन्त्र प्रमाण है। विष्णु का अनुकरण रूप होने से मन में भी शब्द सार्थक होता है। "यस्मिंश्चित्तं सर्वं मोतमित्यादि" वेद वचन इस अर्थ का पोषक

तस्य विष्णोरनुकरणमात्रत्वान्मनोऽप्येतद्धर्मकम् । यदाह भगवान् वेदः—
'यस्मिंश्चित्त७ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पम तु' यजुः ३४।५
उग्रनाम्नि मन्त्रलिङ्गम्—

उग्रं युयुज पृतनासु सासहिमित्यादि ऋ० ८।६१।१२ ।

भवति चात्रास्माकम्—

उग्रे यथार्के निचितं हि विश्वं विष्णौ तथोग्रे निचितञ्च सर्वम् ।
विष्णौ यथोग्रे निचितं हि सर्वं चित्ते तथोग्रे निचितं प्रजानाम् ॥२६५॥

सम्वत्सरः—४२२

वस निवासे—भौवादिको धातुः सरश्च प्रत्ययः "सस्यार्धधातुके" पा. सू. ७।४।४९ इति सस्य तः । सम्यग् निवसति जगद्यस्मिन् स सर्वव्यापको विष्णुः संवत्सरशब्देनोच्यते । तथा सूर्योऽपि सम्वत्सरः संवसति जगद्येन हेतुनेत्यर्थात् । संवसति प्राणिनः सर्वं कृताकृतं संस्काररूपेण यत्र मनसि तन्मनोऽपि सम्वत्सरशब्दाभिधानीयं भवति ।

अत्र मन्त्रलिङ्गम्—

संवत्सरो रथः परिवत्सरो रथोपस्थो विराडीषाग्नी रथमुखम् ।
इन्द्रः सव्यष्ठाश्चन्द्रमाः सारथिः । अथर्व ८।८।२३।

सम्वत्सरे मनसि च—

"यस्मिन् प्रतिष्ठिता रथनाभाविवाराः । यजुः । ३४।५

पद्य द्वारा यही इस रूप में कथित है—

जैसे उग्रनाम सूर्य में यह सब विश्व वस्त्र और धागों की तरह मिला हुआ है, उसी प्रकार वष्णु तथा उग्रनाम मन में भी समग्र जगत् ओत प्रोत है ।

सम्वत्सरः—४२२ सम्पूर्ण भूतों के निवास स्थान ।

सम्वत्सर शब्द से भगवान् विष्णु ही कहा गया है क्योंकि यह सकल विश्व उसी में वास करता है तथा सूर्य को भी सम्वत्सर कहते हैं क्योंकि सूर्य द्वारा की गई व्यवस्था से ही यह सुव्यवस्थित रहता है । मन का नाम भी सम्वत्सर है क्योंकि प्राणिकृत शुभाशुभ कर्मों के संस्कार मनमें ही वसते हैं । 'सम्वत्सरो रथ' यह मन्त्र सम्वत्सर के भगवन्नाम होने में प्रमाण है। मन सम्वत्सर है, इस में यजुर्वेद मन्त्र प्रमाण है। यस्मिन् प्रतिष्ठितमित्यादि काल भी गणना का विषय तथा विश्व का आधार होने से संवत्सर है क्योंकि सकल विश्व कालात्मक संवत्सर में ही निवास करता है । काल के बिना विश्व की और कहीं पर स्थिति नहीं है तथा जितना भी हमें आंखों से दिखाई देने वाला दृश्य वर्ग है वह सब संख्या का विषय अर्थात् जगत् में ऐसा कोई पदार्थ नहीं हैं जो एक दो आदि संख्या से न गिना जावे । भगवान् विष्णु की

कालोऽपि कलनविषयत्वाद् विश्वाधारत्वाच्च सम्वत्सरः। यतो हि, सर्वमिदं विश्वं कालात्मनि सम्वत्सरे न्युषितम्। न हि कालमन्तरेण विश्वस्य स्थितिरन्यत्र कुत्रापि। यावच्च दृश्यं वस्तु जगति तत्सर्वं संख्याभाक्-नातिसंख्यं किञ्चिद्वस्तु दृश्यते। वस्तुतो विष्णुनेव संख्ययापि सर्वं जगदनुस्यूतमतः संख्यैव कालः, तस्मिंश्च क्षणादिकल्पान्तात्मके काले सर्वमिदं वसतीति कलयितुमर्हत्वात्कालोऽपि सम्वत्सरः। अयञ्च कालात्मकः सम्वत्सरश्चतुर्विधो ब्राह्मणक्षत्रियवैश्यशूद्रसंज्ञाभेदात्। ब्रह्मणो विराट्पुरुषस्य चतुर्धा व्यवक्लृप्तत्वात्। तत्र सम्वत्सरावयवभूता एकपञ्चनवसंख्याभाजो मासा ब्राह्मणसंज्ञकाः। द्विषड्दशसंख्याभाजो मासाः क्षत्रियसंज्ञाः। त्रिसप्तैकादशसंख्याभाजश्च वैश्याः। शेषाश्च चतुरष्टद्वादशसंख्यकाः शूद्राः। एवं द्वादशराशिस्थानां ग्रहाणामपि ब्राह्मणादिसंज्ञा ज्ञेया। मासा अपि चतुर्धा विभक्ता ब्राह्मणादिसंज्ञां लभन्ते। कालनिष्ठा गतिरपि सम्वत्सराभिधानिका सर्वस्य निवासहेतुत्वात्। सापि चतुर्धा भिद्यते, तद्यथा-१ ऊर्ध्वादधः। २ अधश्चोर्ध्वम्। ३ तिर्यगात्मिका। ४ स्वस्थानस्थितिरूपा च ब्राह्मणादिवर्णात्मिका। एवञ्च सम्वत्सरोऽपि ब्राह्मणः। मासोऽपि ब्राह्मणः। वर्षशतकस्याद्यभूता वर्षपञ्चविंशतिरपि ब्राह्मणसंज्ञिका। जन्मेष्टकालोऽपि ब्राह्मणादिवत्। एवंविधयोगलाभस्तु जीवस्य परमेण पुण्यग्रामेण भवति। ग्रामः=समूह इति। गृहमपि सम्वत्सरो यतो हि गृह एव निवसन्ति सर्वं इति कृत्वा। शरीरमपि सम्वत्सरो यतो हीदमपि निवासभूतमात्ममन-इन्द्रियाणाम्। विपणिरपि संवत्सरो यतो हि

तरह संख्या भी सर्वत्र व्यापक है तथा संख्या ही काल है और क्षण से लेकर कल्पान्त काल में तद्रूप होकर रहती है। इसलिये काल भी संवत्सर है। तथा कालात्मक सम्वत्सर चार ४ प्रकार का है ब्राह्मण, क्षत्रिय, वैश्य और शूद्र। क्योंकि सम्वत्सर के अवयव ११ मास हैं, उन में १-५-९ वां मास ब्राह्मण है, २-६-१० वां मास क्षत्रिय है। ३-७-११ वां मास वैश्य और ४-८-१२ मास शूद्र हैं। इसी प्रकार मास तथा राशिस्थ ग्रहों के भी चार विभाग करने से ब्राह्मणादि संज्ञा जान लेनी चाहिये। क्योंकि ब्रह्मा ने विराट् पुरुष के ४ भेदों की कल्पना की है जिसमें "ब्राह्मणोऽस्येत्यादि" मन्त्र प्रमाण है। काल में होनेवाली गति का नाम भी सम्वत्सर है, क्योंकि सकल विश्व का निवास स्थान काल की गति ही है। यह चार प्रकार की है जैसे ऊपर से नीचे को, नीचे से ऊपर को टेढी तथा स्वरूपस्थिति रूप से। वह भी ब्राह्मण, क्षत्रिय, वैश्य तथा शूद्र रूप है। इसी प्रकार जन्म का इष्ट काल भी अंश भेद से ब्राह्मणादि रूप चार प्रकार का है। इस तरह सम्वत्सर भी ब्राह्मण, मास भी ब्राह्मण, तथा वर्ष शतक का प्रथम चतुर्थांश २५ वर्ष भी ब्राह्मण तथा जन्मेष्ट काल भी ब्राह्मण है। ऐसे योग की प्राप्ति जीव को बड़े पुण्य समूह से होती है। घर का नाम भी सम्वत्सर है, क्योंकि सब उसी में रहते हैं। शरीर भी संवत्सर है क्योंकि आत्मा, मन और इन्द्रिय उसी में वास करते हैं। दुकान का नाम

तन्निवासिव्यापारकर्मतद्गृहं विपणिः, सा च किं वर्णात्मिकेति ज्ञातुं, पटलाधारभूतानां काष्ठलौहादिशलाकानां गणनां कृत्वा चतुर्भिर्विभज्य शेषेण क्रमश एकशेषे ब्राह्मणी, द्विशेषे क्षत्रिया, त्रिशेषे वैश्या, चतुःशेषे च शूद्रा इति। एवं कृत्वा सम्वत्सरस्य व्यापकता प्रदर्शिता बुद्धेर्वैशद्याय।

मन्त्रलिङ्गञ्च—चतुर्धा व्यवकल्पने—

"ब्राह्मणोऽस्य मुखमासीदित्यादि"। यजु० ३१।११

भवति चात्रास्माकम्—

सम्वत्सरो विष्णुरमोघकर्मा करोति विश्वं निजधर्मसिद्धम्॥
एवं हि यो वेत्ति महेशमाद्यं स विष्णुभूतः परमेति धाम॥२६६॥

राशिमधिकृत्य विशेषो द्रष्टव्य आदित्यनाम्नो व्याख्याने।

दक्षः—४२३

दक्ष वृद्धौ शीघ्रार्थे च भौवादिको धातुः, तस्मात्पचाद्यचि दक्षः। दक्षते वर्धते क्षिप्रं वा कुरुते दक्षः सूर्यः।

सूर्यो हि भूमण्डलस्थप्राणिभिरुदीयमान उदेत्य चास्तङ्गच्छन् क्षिप्रधर्मा दिवि वर्धमानो दृश्यते। तत्र मन्त्रलिङ्गं यथा—"स महेन्द्रो भूत्वा तपति मध्यतो दिवम्"

भी सम्वत्सर है क्योंकि शकल व्यापार का कार्य उसी में रहता है और वह उस व्यापार का घर है। यदि जानना हो कि उसका ब्राह्मणादि में से कौन-सा वर्ण है तो उस की छत में लगे हुवे लोहे के टुकड़े या कड़ियों की गणना करके उसमें ४ का भाग दें, शेष १ बचे तो ब्राह्मण २ बचें तो क्षत्रिय आदि क्रम से जान लेना चाहिये। यहां हमने बुद्धि के विकास के लिये संवत्सर का व्यापक रूप से वर्णन किया है। यह कथन पद्यबद्ध इस प्रकार हुआ है—

सफल सकल शक्तिविशिष्ट भगवान् सम्वत्सर नामा विष्णु समस्त विश्व को अपने धर्म से सिद्ध बनाता है अर्थात् जितने गुण भगवान् में हैं, वे विश्व में भी आते हैं। उस आदिकारण ईश्वर को जो तत्त्व से जान लेता है वह विष्णुरूप होकर परमपद को प्राप्त कर लेता है।

राशि के सम्बन्ध विशेष जानने के इच्छुक आदित्य नाम का व्याख्यान देखें।

दक्षः— ४२३ सब कर्यों को बड़ी कुशलता से करने वाले।

दक्ष नाम सूर्य का है, क्योंकि वह बढ़ता है तथा चलने में शीघ्रता करता है। भगवान् सूर्य उदित होकर अस्ताचल को जाता हुआ, शीघ्र बढ़ता हुआ सा आकाश के मध्य में दीखता है। "स महेन्द्रेति" अथर्ववेद का वचन इसमें प्रमाण है।

दक्ष, कूटस्थ एकरस अविकृत ब्रह्म का भी नाम है। क्योंकि उससे यह जगत् उत्पन्न होता है तथा परिणामी होने से तत्तद्रूपों में शीघ्र बढ़ जाता है। यद्यपि वृद्धि तथा

अथर्ववेदे । कूटस्थमेकरसं ब्रह्मापि दक्षशब्देनोच्यते, यतो हि, तत इदं जगदुदेति वर्धते शीघ्रयति च परिणमनशीलत्वात् । कूटस्थस्य दक्षार्थाभिधाने च "तात्स्थ्यात्ताच्छब्द्यम्" इति ज्ञेयम् । एतदेव स्पष्टयितुं दक्षशब्दस्य विश्वदक्षिण इति पर्य्यायत्वेन पृथङ् नाम कल्पितं तत्त्वदर्शिभिः ।

दक्षत इति दक्षो दक्ष एव दक्षिणो, विश्वेषु कर्मसु दक्षिणो दाक्षिण्यं ज्ञानवैचित्र्यं यस्य स विश्वदक्षिण इति विश्वदक्षिणशब्देनापि दक्षशब्दस्यैवार्थ उक्तो भवति। किञ्चित्प्रसङ्गप्राप्तञ्चोच्यते, यज्ञे दीयमानमृत्विग्भ्यो यज्ञपूर्णाङ्गकरं धनमपि दक्षिणाशब्देनोच्यते । यतो हि, तद्दत्तं धनं यजमानं स्वेनाभीष्टेन फलेन वर्धयति, फलदाने क्षिप्रकारि च भवति । अतः सिद्धान्तितं पूर्व्यैर्हतं यज्ञमदक्षिणमिति ।

भवति चात्रास्माकम्—

> **दक्षः स विष्णुः कुरुते सदैव विश्वं समस्तं गतिमत्प्रगुणम् ।**
> **स एव दक्षः किमु दक्षिणो वा स विश्वपूर्वः स महान् स भर्गः ॥२६७॥**

विश्रामः—४२४

श्रमु तपसि खेदे चेति, व्युपसृष्टो दैवादिको धातुः । तस्माण्णिचि पचाद्यचि। विश्रामयति सर्वमिति विश्रामः, "मितां ह्रस्वः" पा. सू. ६ ४।९२। इति ह्रस्वादेशस्तु वैकल्पिको व्यवस्थितविभाषाश्रयणात् । यद्वा विश्राम्यति, यस्मिन् सर्वमिति विश्रामो घञि रूपमत्रापि वृद्धेर्निषेधस्तथैवेति । उभयथापि विश्रामशब्देन विष्णुरेवोक्तो भवति, यतो हि, सर्वमिदं चराचरं तद्व्यवस्थया निबद्धं विश्राम्यति, तस्मिन् वा व्यापके

क्षिप्रकारिता धर्म जगत् का है कूटस्थ एकरस का नहीं, फिर भी जो जिसमें रहता है वह भी उस नाम से कहा जाता है । दक्ष शब्द के अर्थ को स्पष्ट करनेवाला विश्वदक्षिण शब्द है। विश्वदक्षिण शब्द का अर्थ है जो सब कर्मों के विषय में विचित्र ज्ञानवाला तथा कुशल हो ।

यह प्रसङ्ग प्राप्त विवेचन है—

यज्ञ कर्म में यज्ञपूर्ति के लिये, होताओं को जो धन दिया जाता है उसका नाम भी दक्षिणा है, क्योंकि वह दिया हुवा धन यजमान को सब सांसारिक साधनों से बढ़ाता है तथा फल दान में नियत रूप से गतिशील होता है । इसलिये शिष्टपुरुषों ने दक्षिणारहित यज्ञ को निष्फल माना है । जैसा कि पद्य द्वारा कहा गया है वह विश्व का आदिकारण तेजस्वरूप दक्ष नाम सर्वेश्वर विष्णु सकल जगत् को अपनी प्रेरणा से गतिशील बनाता हुवा दक्ष या दक्षिण शब्द से ख्यात है । विश्वपूर्वक होने से वह ही विश्वदक्षिण कहाता है ।

विश्रामः— ४२४ विश्राम देनेवाला ।

विश्राम शब्द भगवान् विष्णु का वाचक है । क्योंकि वह सब को विश्राम देता है, अथवा सब उसमें विश्राम करते हैं । दोनों ही प्रकार से विश्राम शब्द का भगवान् विष्णु अर्थ सिद्ध होता है । लोक में भी ऐसा देखने में आता है कि विष्णु के नियम विशेष से ही यह सब

विश्राम्यतीति। दृश्यते हि लोके जीवो गर्भे विश्राम्यति विश्राम्यन्तञ्च तं भगवतो विष्णोर्व्यवस्था "नियमविशेषः" शुभाशुभकर्मणां तत्कृतानां फलं प्रापयितुं खेदयितुं योनिस्थं प्रेरयति बहिर्निर्गन्तुमिति। अमुथैव "तस्मिन्ह तस्थुर्भुवनानि विश्वा" यजुः। इति निगमप्रामाण्यात्—भगवति विष्णौ सर्वलोकानां स्थितेरुक्तत्वाद् विष्णुरेव गौणेन नाम्ना "गुणकृतेन नाम्ना" विश्राम इत्युक्तो भवति। अथ च यथा रात्रौ जोवा विश्राम्यन्ति स्वस्वकर्मोपरतास्तथैव प्रलये सर्वमिदं चराचरं विश्वं भगवति विश्राम्यतीति कृत्वा स विश्राम इति।

भवतश्चात्रास्माकम्—

स विश्रमो विष्णुरनन्तलोकान् दधाति गर्भे तपसा पुनस्तान्।
संक्षोभ्य संयोज्य समेध्य शक्त्या पुनर्भवायैव च तान् युनक्ति ॥२६८॥
तथैव लोकेऽपि च मातृगर्भे जीवः शयानः स्वकृतानि जानन्।
विश्रम्य कालं निजयोनिसिद्धं चेखिद्यमानो बहिरेति धाम ॥२६९॥

निजयोनिसिद्धमिति। निजस्य स्वस्य योनिवासनियतीकृतकालं यावत् तत्रोषित्वेत्यर्थः। विश्रमोऽपि व्याख्यातो विश्रामार्थको विष्णोरेव नाम। एतदत्र विशिष्य सन्धातव्यम्—

सर्वेषां जीवानां योनिभेदात्स्वगर्भवासकालो भिन्नो भिन्न इति, यथा गौर्नवममासोत्तरं दशमे प्रसूते, मानुषी पूर्णे नवमे मासि, महिषी दशममासोत्तरमेकादशे मासि, हस्तिनी चतुर्दशे मासि।

बंधा हुआ है। जैसे गर्भ में विश्राम करते हुए जीव को भगवती व्यवस्था उसको, किये हुए अच्छे बुरे कर्मों का फल भुगताने के लिए यथासमय बाहर जगत् में भेज देती है। तथा तस्मिन्निति वेदवचनानुसार समस्त संसार की स्थिति उसी में है अर्थात् प्रलय काल में सारा जगत् उसी में विश्राम करता है, जैसे सब कर्मों से विरत होकर रात्रिकाल में जीव विश्राम करते हैं। इसलिये उसका विश्राम यह गुणकृत नाम है।

यही कथन पद्य द्वारा इस रूप में वर्णित है—

विश्रमनामा भगवान् विष्णु प्रलयकाल में इन अनन्त लोकों को अपने अन्दर धारण कर लेता है। यही जीवों का विश्रामस्थान है। फिर उनमें अदृष्टवश से हल चल उत्पन्न करके और शक्ति से युक्त करके संसार रूप से रचना कर देता है तथा यह जीव माता के गर्भ में वास करता हुवा और अपने द्वारा किये हुवे शुभाशुभ कर्मों का स्मरण करता हुआ अपनी योनि= वास में नियत काल तक वहां रहकर अत्यन्त दुःखी होकर बाहर जगत् में आजाता है। विश्रम भी विश्रामार्थक विष्णु का ही नाम है।

निजयोनि सिद्ध काल का अर्थ है—प्रत्येक योनि का प्रसव काल भिन्न २ होता है। जैसें गौ का नव मास, भैंस का दश मास, घोड़ी का ग्यारह मास और हथिनी का चौदह मास आदि समझ लेना चाहिये।

विश्वदक्षिणः—४२५

विश्वदक्षिण इति दक्ष ४२३ इति नाम्नो व्याख्याप्रसङ्गेनैव व्याख्यातस्तत्र द्रष्टव्यः।

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥५६॥

४२६ विस्तारः, ४२७ स्थावरस्थाणुः, ४२८ प्रमाणम्, ४२९ बीजमव्ययम्। ४३० अर्थः, ४३१ अनर्थः, ४३२ महाकोशः, ४३३ महाभोगः, ४३४ महाधनः॥

विस्तारः—४२६

स्तृञ् आच्छादने विपूर्वस्तस्मात् "प्रथमे वावशब्दे" पा० सू० ३।३।३३। इत्यनेन घञि विस्तारः। सर्वरूपस्य विष्णोर्नाम। तथा हि स स्वमात्मानं दृश्यादृश्यजगद्रूपेण विस्तार्य व्यापकत्वधर्मेण च तदाच्छाद्य स्वमहिम्नि स्थितः कूटस्थरूपेण। भगवतो विस्तृतिरेवेदं सर्वमतो लोकात्मना विस्तीर्णतामापन्नः स विस्तार उच्यते। तेन व्याप्तञ्चेदमशेषं तेनाच्छादितमिव भवति। पुनश्च जगद्रूपेण विस्तीर्णमात्मानं संक्षिपन् "संहरन्" सूक्ष्मभावमापद्यते स्वस्वरूपमिति। यथा वटबीज एव विस्तीर्णो वटवृक्षः। एवं च सूक्ष्मभावमापन्नो वटबीज इत्युभयथा संक्षेप्तुर्विस्तारयितुश्च परं महिमानं प्रकटयति। वृक्षरसो यथा तत्पञ्चाङ्गेनाच्छादितो भवति, तथा तेनेदं समस्तं विस्तीर्णं

विश्वदक्षिणः— ४२५ बलि के यज्ञ में समस्त विश्व को दक्षिणा के रूप में प्राप्त करनेवाले।

"विश्वदक्षिण" नाम का व्याख्यान "दक्ष" ४२३ नाम के व्याख्यान-प्रसङ्ग में ही कर दिया है वहां देखना चाहिये।

विस्तारः – ४२६ समस्त लोकों के विस्तार के कारण।

विस्तार यह सर्वरूप भगवान् विष्णु का नाम है। क्योंकि यह अपने आप को दृश्यादृश्य जगत् रूप से फैलाकर अपने व्यापक रूप धर्म से इसका आच्छादन करता है अर्थात् स्थिर रखने में आलम्बन (सहारा) होता है तथा स्वयं अपने आप में स्थिर रहता है। भगवान् की ही विस्तीर्णता जगत् है। और उसी से यह सकल जगत् आच्छादित है। जब वह अपने विस्तीर्णरूप विश्व को संहृत "समेट" लेता है तब उसका मूल निर्विशेषरूप ही शेष रहता है। जैसे बड़ के वृक्ष का बीज अपना सूक्ष्म भाव छोड़कर बहुत विस्तीर्ण वृक्ष बन जाता है। फिर वही सूक्ष्म भाव बीज रूप में चला जाता है। इन सूक्ष्म तथा विस्तीर्ण

विश्वमाच्छादितं व्यापकत्वधर्मेण, स्वयञ्चाच्छन्नः स्वविस्तृतिरूपेण जगता, इत्युभयथाच्छाद्याच्छादकधर्मा हि स विस्ताराभिधानः।

भवति चात्रास्माकम्—

विश्वं समस्तं कुरुते स्वगर्भे विस्तारनाम्ना कथितः स विष्णुः।
वटं स बीजे निदधाति यद्वत् तद्वत् स बीजं कुरुतेऽर्थवृत्तम् ॥२७०॥

अर्थवृत्तम्=सर्वाङ्गसमुदितं वटवृक्षमिति।

स्थावरस्थाणुः—४२७

स्थावरविशेषणविशिष्टं स्थाणुरित्येकं नाम खण्डशो व्याख्यातम्।

तत्र-स्थावरः—

ष्ठा गतिनिवृत्तौ इति भौवादिको धातुः। "धात्वादेः षः सः" पा० सू० ६।१।६४। इत्यनेन षस्य सत्वम्। ठकारस्य स्वयं थकारो निमित्तापाये। "स्थेशाभासपिसकसो वरच्" पा० सू० ३।२।२७५। इति वरच् प्रत्ययः। अनिट्। सर्वत्र तिष्ठति तच्छीलः स्थावरः। सर्वस्मिन् तिष्ठतीति वा स्थावरः।

अत्र मन्त्रलिङ्गम्—

"तस्मिन् ह तस्थुर्भुवनानि विश्वा" यजु० ३१।१६

तस्थुरिति तिष्ठतेरेव रूपं लिटि। जगति यथा—गच्छत्स्वपि प्राणिषु गच्छतामाधारभूतो मार्गो न गच्छति स्थितिं स्वकीयां न जहाति। मातरि चलन्त्यामपि गर्भः

भावों से उस सर्वेश्वर की ही महिमा प्रकट होती है। जैसे वृक्ष का रस वृक्ष को स्थिर रखता हुआ पञ्चाङ्ग रूप वृक्ष से आच्छन्न (छिपा हुआ) रहता है उसी प्रकार विस्तार नामा विष्णु भी अपने आच्छादकत्व धर्म से विश्व को स्थिर रखता हुआ स्वयं उसमें छिपा रहता है।

भाष्यकार के श्लोक में संक्षिप्तार्थ यह है—

जैसे बड़ का बीज वट वृक्ष को अपने सूक्ष्म भाव से विस्तीर्णता को प्राप्त हो जाता है, क्योंकि यह शाखा, फल, पत्र, पुष्पादि युक्त वृक्ष बीज में ही था तथा फैलाव को छोड़कर फिर बीज रूप सूक्ष्म भाव में चला जाता है। उसी प्रकार भगवान् का फैलाव ही जगत् है और जगत् का सूक्ष्म भाव ही भगवान् है। इसलिये भगवान् ही विस्तार है।

स्थावरस्थाणुः ४२७ स्वयं स्थितिशील रहकर पृथ्वी आदि स्थितशील पदार्थों को अपने में स्थित रखने वाला।

स्थावर स्थाणु, यह एक ही नाम है स्थावर विशेषण स्थाणु विशेष्य है किन्तु उसकी व्याख्या दो खण्ड करके की गई है। जो सब में रहे अथवा जिसम सब रहें, उसका नाम है स्थावर। तस्मिन् ह तस्थुः इत्यादि वेदवचन इस में प्रमाण है। लोक के अनुभव से भी यह बात सिद्ध है, जैसे मार्ग में सभी प्राणी चलते हैं किन्तु गमन क्रिया करने वालों का मार्ग जो

स्वरूपत: स्थितिं न त्यजति । क्रियामयमिदं शरीरं यदाश्रितं सत् क्रियाः कुरुते, क्रियाः शरीरे कुर्वाणेऽपि तदाश्रयीभूतोऽर्थो न कदाचिदपि क्रियाश्रयतां 'विकृतिं' चाञ्चल्यमाप्नोति । एवं भगवान् स्थावरत्वरूपेण गुणेन सर्वं व्याप्य विराजतेतराम् । एवं लोक दर्शं दर्शं बह्वचः कल्पना: कल्पनीयाः ।

भवति चात्रास्माकम्—

स स्थावरः सर्वजगन्नियन्ता नियम्य विश्वं कुरुते स्थिरं वै ।
तथा यथा मातरि गर्भ एवं चलत्सु मार्गश्च न याति चालम् ॥२७१॥

स्थाणुः—

तिष्ठतेरौणादिको णुप्रत्ययो बाहुलकात् । तिष्ठति सर्वत्रेति स्थाणुः । स्थावर-स्थाणुशब्दयोः केवलं प्रत्ययकृतो रूपभेदो गतिनिवृत्तिरूपोऽर्थस्तु समान एव । यः स्थावरः स एव स्थाणुरिति समानाधिकरणः कर्मधारयः । स्थाणुशब्दे स्थावरशब्द-विशेषणकृतं वैशिष्ट्यमियदेव, यत्स स्थाणुः कूटस्थोऽपि विक्रियारहितोऽपि स्वयं सर्वत्र

आधारभूत है वह स्थिर ही है । इसी प्रकार माता के चलने पर भी माता के गर्भ में स्थित गर्भ, अपने रूप में स्थिर ही रहता है इसी प्रकार क्रिया रूप यह शरीर जिसके आश्रित होकर क्रिया करता है वह शरीर के कार्य करते हुए भी तदाश्रयभूत आत्मा अविक्रिय-क्रियारहित स्थिर बना रहता है । इसी प्रकार भगवान् भी अपने स्थावरत्व गुण से सब में व्यापक होकर विराजमान है । इसी से उसका नाम स्थावर है । लोक में भी पदार्थों को देखकर इस तरह की कल्पनाएं कर लेनी चाहियें ।

भाष्यकार ने श्लोक में इस प्रकार कहा है—

प्राणियों के चलने पर भी रास्ता नहीं चलता, माता के चलने पर उसके उदर में स्थित गर्भ में गति नहीं होती क्योंकि स्थावर नामा भगवान् विष्णु जगत् को नियमित तथा अपने स्थावरत्व धर्म से स्थिर रखता है ।

स्थाणुः—

स्थाणु शब्द का अर्थ स्थावर के समान ही है, केवल रूप में भेद है । वस्तुतः कर्मधारय-समास से स्थावर और स्थाणु शब्द एक ही है । स्थावर ही स्थाणु है । स्थावर विशेषण है स्थाणु विशेष्य है । स्थाणु शब्द में स्थावर को विशेष्य मानने से एक विशेष अर्थ की झलक या आभास मिलता है । स्थावर शब्द में वरच् प्रत्यय ताच्छील्य में है तथा स्थाणु शब्द नित्य अविकृत कूटस्थ का वाचक है भाव यह है कि वह कूटस्थ रहता हुआ भी अपनी महिमा अचिन्त्य शक्ति से विकारी जगत् के पदार्थों में अपनी स्थिरता शीलता भर देता है

विकारवत्सु, भौतिकेषु पदार्थेषु स्थितिशीलः स्वमहिम्ना तानपि स्थितिशीलतामापादयति । तद्यथा–पात्रे जलं, जले कमलं, कमले पिपीलिका, पिपीलिकामुखे च तण्डुलकणः स्थिर इति । एवञ्चाविकृतिः सन् सर्वत्र स्थितिशीलः, सर्वांश्च तान् स्वाश्रितान् स्वगुणार्पणेन स्थितिमतो विदधातीति, स स्थावरस्थाणुरित्युक्तो भवति । एतन्नामव्याख्यया तस्य सर्वाधारतापि व्याख्याता भवति गौणनाम्नामानन्त्यात् ।

मन्त्रलिङ्गञ्च—

"तस्मिन्ह तस्थुर्भुवनानि विश्वा" यजुः

भवतश्चात्रास्माकम्—

स्थाणुर्हि विष्णुर्विविधं विधाय विश्वं गुणैस्तिष्ठति चाप्रमत्तः ।
बीजो यथा चात्मगुणैर्द्रुमाङ्गे तिष्ठन्ति लिङ्गानि च कार्यकाले ॥२७२॥
स स्थावरस्थाणुरनन्तलोकान् दूरेऽवरे मर्त्यदृशा च दृश्यान् ।
निर्माय तत्रैव करोति धाम स्वकं यतो वेत्ति स विश्वविश्वम् ॥२७३॥

प्रमाणम्—४२८

प्रोपसृष्टो माङ् माने धातुर्जुहोत्यादिकः, तस्मात्करणेऽधिकरणे वा ल्युट् । "युवोरनाकौ" पा. सू. ७।१।१ इत्यनेन योरनादेशः । 'कृत्यचः" पा. सू. ८।४।२२९ । इत्यनेन णत्वे प्रमाणम् । प्रमीयतेऽनेन सर्वं, प्रमितमस्मिन् सर्वमिति वा प्रमाणं

अर्थात् उसकी अचिन्त्य शक्ति से गतिशील विकारी जगत् के प्राणी भी स्थितिशील बन जाते हैं । जैसे पात्र में जल, जल में कमल, कमल में चींटी तथा चींटी के मुख में चावल का दाना । इस प्रकार देखा जाये तो सब में ही स्थितिधर्मता है, जो कि स्थावर नामा भगवान् विष्णु की व्याप्ति से सिद्ध है । इसी से उसकी सर्वाधारता का भी व्याख्यान हो गया क्योंकि गुणकृत नाम अनन्त होते हैं ।

भाष्यकार के श्लोकों का संक्षिप्तार्थ इस प्रकार लिखा है—

स्थाणु नामा भगवान् विष्णु, इस नाना रूप विलक्षण विश्व को बनाकर अपने स्थितिशीलतादि गुणों से इसी में अप्रमत्त होकर वास करता है । जैसे कि वृक्ष के अंगों में बीज व्याप्त रहता है । वह भगवान् स्थावर, स्थाणु, मनुष्यों के देखने में आने वाले या न आने वाले दूरस्थित या पास में होने वाले, अनन्त लोकों की रचना करके, उन्हीं में वास करता है क्योंकि यह सम्पूर्ण विश्व उसके ज्ञान का विषय है ।

प्रमाणम्—४२८ ज्ञानस्वरूप होने के कारण स्वयं प्रमाणरूप ।

प्र यह उपसर्ग है, माङ् माने धातु है, इस से करण या अधिकरण में ल्युट् प्रत्यय करने से प्रमाण शब्द सिद्ध होता है । जिसका अर्थ होता है, जिसके द्वारा सब का मान "माप" किया जाता है, अथवा जिसमें यह सकल जड़ चेतन परिच्छिन्न परिमित है वही ब्रह्म

तद्धि ब्रह्म, यावत्प्रमाणकं यादृग्गुणकं यादृगाकृतिमच्च जगन्निर्मित्सति, तत्प्रमाणं तान् गुणान् ताञ्चाकृतिं, जगदारम्भात्पूर्वमेव सङ्कल्प्य तथाभूतमेव तन्निर्माति परिमितमित्यत एव तत्प्रमाणमभिधीयते । अत्र लोक एव दृष्टान्तो यथा कश्चित्कारुः "शिल्पी" कार्य्यारम्भणात्प्रागेव मनसि सङ्कल्पयति बाह्यतश्च प्रमीयतेऽहमियदायतमियद्दीर्घमियदाकृति चैतत्कार्यं करिष्ये, ततः कर्तुमारभते । यथा सीवकः—कस्यचित्पुरुषस्य कञ्चुकादिकं निर्मिमाणः प्राक्केनचित्प्रमाणेन पुरुषं मिमीते तन्मानानुसारञ्चादाय वस्त्रं सीव्यति कञ्चुकादिकम् । तस्यैव प्रमाणात्मकस्य ब्रह्मणः—स्वभावानुकृतिर्विश्वे व्याप्ता सती, तत्प्रतिपदं व्याख्याति, सर्वस्य हि शरीरं प्रमाणानतिक्रमि । एवं बहुत्रोहनीयम् ।

मन्त्रलिङ्गञ्च—

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अधा ते सुम्नमीमहे ॥ ऋक् ८।९८।११

इतरा जननी पदपर्य्याया माताप्येतस्मादेव । वप्तुर्मानमितं जनयति, विकृतिश्चान्येन हेतुना भवति । अत एव परिचीयतेऽयमस्य जातक इति ।

भवति चात्रास्माकम्—

प्रमाण है। वह ब्रह्म इस विश्व को, जितने परिमाण वाला, जैसे गुणों वाला तथा जैसी आकृति वाला, बनाना चाहता है उस प्रमाण, गुण तथा आकार का जगत् के बनाने से पहले ही ध्यान करके वैसा ही इसे बनाता है, इसलिये वह प्रमाण है। लोक में भी ऐसा ही होता है। जैसे कोई शिल्पी कार्य करने से पहले ही, मुझे यह कार्य इतना लम्बा इतना चौड़ा तथा इस आकार का करना है यह विचार लेता है, तब कार्य करना आरम्भ करता है। जैसे सीवक "दर्जी" किसी का कपड़ा सीने से पहले, उस पुरुष का नाप लेता है, जिसका वह कपड़ा होता है, फिर उसे तदनुसार सीता है। उसी प्रमाणात्मक ब्रह्म के स्वभाव का अनुकरण इस जगत् में व्यापक होकर, पद-पद पर प्रभु का व्याख्यान कर रहा है अर्थात् सब विश्व में प्रभु की, व्याप्ति बतला रहा है। जैसे कि सब प्राणियों का शरीर अपने २ प्रमाण के अनुकूल ही होता है। इस अर्थ की पुष्टि में त्वं हि न पिता इत्यादि मन्त्र भी प्रमाण है। जननी का नाम भी माता इसी अर्थ की समानता से है।

क्योंकि वह बीज का आधान स्थापन करने वाले पिता का जैसा प्रमाण है, उसी प्रमाण की सन्तान उत्पन्न करती है। यदि सन्तान के प्रमाण या आकार में भेद है, तो समझना चाहिये कि इस विकार का कोई और हेतु है। इसीलिये पुत्र को देखकर पिता की जानकारी होती है कि यह अमुक का पुत्र है।

भाष्यकार ने श्लोक का संक्षिप्तार्थ इस प्रकार कहा है-—

वह विश्व का कर्त्ता तथा नियन्ता प्रमाण नामा विष्णु विश्व के निर्माण की इच्छा से

स विश्वकर्मा मिषतो वशी वा विश्वं मिमीते प्र च मित्समानः।
तस्यानुमानं कुशलीह शिल्पी कुर्वन् मिमीते कुरुतेऽथ कार्यम् ।।२७४।।

वीजमव्ययम्—४२९

वीजमिति—वि उपसर्गो जनि, प्रादुर्भावे, धातुर्दैवादिकः। "उपसर्गे च संज्ञायाम्" पा. ३।२।९९। इति डः प्रत्ययः। "डित्यभस्यापि टेर्लोपः" इति टिलोपः।" "अन्येषामपि दृश्यते" पा. ६।३।१३७ इति वेरिकारस्य दीर्घः। बीजः—बीजं वा, लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति महाभाष्यम्। अव्ययमिति—इण् गतौ, धातुरादादिको व्युपसर्गः—तस्मात् "एरच्" पा. ३।३।५६। इत्यच् प्रत्ययो नञ्समासः। एवञ्च, बीजञ्च तदव्ययमिति बीजमव्ययं ब्रह्मे ति।

वैयाकरणाश्चाप्याहु:—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।

एवञ्च विविधं जायते वीजमिति, वीजशब्देन तस्य ब्रह्मणो विविधरूपेष्वभिव्यक्तिरुच्यते; अव्ययशब्देन च जन्मादिषड्विकाररा हित्यमित्यपारमहिम्नस्तस्य सर्वमुपपद्यते। इममेवार्थं वेदोऽप्याह "अजायमानो वहुधा विजायते" यजु० ३२।१९। यथा हि—वृक्षवीजं वृक्षमुत्पाद्यापि तदनुस्यूतं तदवस्थमेव तिष्ठति, पुनश्च स्वसमावेशितवृक्षः स्वनिर्विशेषं स्वरूपमापद्यते न च विकुरुते। तथा ब्रह्माप्यव्ययं वीजं जगतो, वीज-

---

विश्व का परिच्छेद, इयत्ता का नाप करके विश्व को बनाता है तथा जगत् में कार्य कर्त्ता कारीगर भी उसी परमेश्वर का अनुकरण करता हुआ, पहिले कार्य की इयत्ता का अवधारण आकार प्रकार का परिसीमन करके फिर कार्य करता है।

वीजमव्ययम्:—४२९ संसार के अविनाशी कारण।

विपूर्वक जन धातु से ड प्रत्यय होकर तथा वि उपसर्ग को दीर्घ होकर बीज शब्द बना है। तथा इण् धातु से भाव में अच् प्रत्यय होकर विपूर्वक से नञ् समास करने से, अव्यय शब्द सिद्ध होता है। विकार रहित तथा सबका आदिकारण परम ब्रह्म बीजमव्यय शब्द का अर्थ है। वैयाकरण भी अव्यय शब्द का यही अर्थ करते हैं। जो तीनों लिङ्गों, सब विभक्तियों तथा सब वचनों में विकार रहित—समान है, वह अव्यय शब्द है। वीज शब्द ब्रह्म के नाना रूपों में आविर्भाव-प्राकट्य को वतलाता है। तथा अव्यय शब्द उसकी जन्मादि विकार भावों से निर्विकारता को वतलाता है। अनन्तशक्ति परब्रह्म के विषय में यह सब उचित है। "अजायमान" इत्यादि वेदवचन भी इसमें प्रमाण है। जैसे बीज वृक्ष को उत्पन्न करके उस में व्यापक रूप से रहता हुआ, अपने स्वरूप को नहीं छोड़ता है तथा फिर वृक्ष को अपने गर्भ में रखकर, अपनी आद्यावस्था "बीजावस्था" में आ जाता है, किन्तु विकृत नहीं होता। इसी

मनव्ययमिति नाम्नोच्यते ।

यस्य च स्थावरजङ्गमात्मकस्यं वस्तुनः सर्गादौ यादृग्बीजं तत्तादृगेवासर्गान्तं तिष्ठति, न हि वटवृक्षबीजमश्वत्थपलाशखदिरादीनां जन्मदातृ । लोके सर्वत्रैवं व्यवस्था । जातविकारं विना । भगवतो वरारोह इति नामापि—एतदर्थसाम्यादेव । बीजात्फलं फलाच्च पुनर्बीजमिति व्यवस्थाबद्धो लोकसर्गः । अनव्ययः=अन्यथा भावरहितः ।

भवति चात्रास्माकम् :—

ब्रह्माव्ययं तेन कृतञ्च बीजं सदाव्ययं सद्भिरिहास्ति गीतम् ।
फलात्स विष्णुः कुरुते ह बीजं बीजात्फलं वेद स एव मूलम् ।।२७५।।

मूलम्=किं पूर्वं कृतमिति बीजं फलं वा आहोस्विद् युगपदिति ।

अर्थः—४३०

अर्थ इति—ऋ गतौ, धातुर्जौहोत्यादिकः, तस्मात् "उषिकुषिगार्त्तिभ्यस्थन्" इत्यौणादिकस्थन् प्रत्ययः । गुणोरपरः, अनिट् । अर्थ इति । अर्यते प्राप्यते-ऋच्छन्ति वा यमित्यर्थो विष्णुः । विष्णुरेव हि सर्वस्य जगतः प्रेप्साविषयो, यतो हि स "सत्यं ज्ञानमनन्तं" सत्यं सदात्मको ज्ञानं ज्ञानात्मकोऽनन्तमानन्दात्मको भूम्न्येव सुखं नाल्पे—इत्युपनिषद्वचनात् । एवञ्च सच्चिदानन्दरूपत्वात् स एव सर्वदा सर्वप्राणिवर्गेण प्राप्तुमिष्यते, प्राप्यते चापि तद्यथा—जगद्धीदं दृश्यं काव्यं

प्रकार जगत् का बीज ब्रह्म भी अव्यय है । इसीलिए उसका नाम 'बीजमव्यय' है ।

जिस जड़ चेतन वस्तु का सृष्टि के आदि में जैसा बीज "कारण" है, सृष्टि के अन्त तक वह वैसा ही बना रहता है ।

वट वृक्ष के बीज से पिप्पल, पलाश "ढाक", खैर आदि उत्पन्न नहीं होते । सब लोक में ऐसा ही नियम है—केवल सविकार वस्तु को छोड़कर । भगवान् का वरारोह नाम भी इसी अर्थ की समानता से है । बीज से फल और फल से बीज, इस नैसर्गिक अटल नियम से यह सकल विश्व बँधा हुआ है । भाष्यकार ने श्लोक में संक्षिप्तार्थ इस रूप से कहा है :—

महापुरुषों ने, ब्रह्म तथा तत्प्रवर्तित बीज को अव्यय अविकारी अथवा अविनाशी कहा है ।

वही अव्ययात्मा विष्णु फल से बीज तथा बीज से फल को बनाता है तथा बीज और फल में कौन आदि में था या अन्त में अथवा एक साथ हुए यह वही जानत

अर्थ :—४३० सुखस्वरूप होने के कारण सब के द्वारा प्रार्थनीय ।

अर्थ शब्द की सिद्धि ऋ गतौ धातु से उणादि थन् प्रत्यय करने से होती है । जो प्राप्त किया जाता है, अथवा जिसे प्राप्त करते हैं, उसको अर्थ कहते हैं । यह भगवान् विष्णु का नाम है । क्योंकि, सुखरूप होने से विष्णु को सभी प्राप्त करना चाहते हैं । तथा वह अनुमान प्रमाण

"नाट्यम्" नाटकञ्च न हि नटमन्तरेण सुव्यवस्थितं दर्शयितुमभिनेतुं वा शक्यतेऽतोऽनुमीयते तथा बुद्धया प्राप्यतेऽस्ति कश्चिदस्य जगन्नाटकस्याभिनेतेति। कर्तृपूर्वकाणि कार्याणीति नियमाल्लोकेऽपि कार्यं दृष्ट्वा कर्तानुमीयते। अथ च यथा कर्तुर्बुद्धौ कार्यस्य सर्वं स्वरूपं चित्रितमिव भवति, तथैव ज्ञानरूपे भगवति सकलमिदं विश्वमूर्तं भवति स्वभावत, इति कृत्वा स भगवान् विष्णुरर्थात्मना सर्वत्र व्यापकः, तस्मादर्थः।

मन्त्रलिङ्गञ्च—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तद्वै ब्रह्मविदो विदुः ॥ अथर्व० १०।८।३३

यच्चायं लौकिको व्यवहारप्रवर्तकोऽर्थः सोऽप्येतस्मादेव। यतो हि स सर्वव्यवहारसाधनत्वेन, सर्वत्रर्तो गतो भवति तस्माद्धनमप्यर्थशब्दाभिधेयम्।

अर्थः शब्दवाच्योऽपि, यतो हि शब्दोच्चारणेन स प्राप्यते, यथा—लवित्रमानयेत्युक्ते, यदानीयते स लवित्रशब्दस्य वाच्योऽर्थ इति।

भवति चात्रास्माकम्—

अर्थः स विष्णुः प्रपदं व्यनक्ति गम्योऽहमत्रास्मि, जगद्वशे मे।
तथा यथा यन्त्रमुदीर्य शिल्पी तस्योच्चनीचे कुरुतेऽधिनैजम् ॥२७६॥

उदीर्य=आविष्कृत्या तस्य=यन्त्रस्य। उच्चनीचे=चालमनवरोधनं तिर्यग्भावनं वा।

से सब को प्राप्त भी है। क्योंकि यह जगत् नाटक है, और नाटक विना अभिनेता (नट) के दिखाया नहीं जा सकता। इस से प्रतीत होता है कि, इस जगत् रूप नाटक का, बनाने वाला और खिलाने वाला कोई नट है। इसी प्रकार लोक में भी, कार्य को देखकर कर्ता का अनुमान कर लेते हैं, क्योंकि कार्य बिना कर्ता के हो नहीं सकता, यह नियम है। जैसे कार्य का स्वरूप कर्ता की बुद्धि में चित्र के समान बसा रहता है उसी प्रकार ज्ञान रूप भगवान् में भी, यह सकल संसार वास करता है तथा स्वभाव से ही वह अर्थ रूप से सर्वत्र व्याप्त है, इसलिए उसका नाम अर्थ है। अपूर्वेणेति मन्त्र इस में प्रमाण है।

जिससे सकल सांसारिक व्यवहार चलता है, उस धन का नाम भी अर्थ है क्योंकि उसे भी सब प्राप्त करना चाहते हैं।

शब्द के उच्चारण से जिस वस्तु की प्रतीति होती है. उसका नाम भी अर्थ है। जैसे किसी ने कहा 'चाकू लाओ' तब चाकू शब्द को सुनकर जो वस्तु लाई जाती है, वही इस चाकू शब्द का अर्थ है।

भाष्यकार ने श्लोक द्वारा संक्षिप्तार्थ इस प्रकार कहा है :—

भगवान् अर्थ नामा विष्णु पद-पद पर इस अर्थता को प्रकट करता है, कि मैं ही सबका प्राप्य हूं तथा सकल जगत् मेरे वश में है।

जैसे यन्त्र का सीधा टेढ़ा चलाना रोकना आदि सब यन्त्र के बनाने वाले कारीगर के ही आधीन होता है।

अनर्थः—४३१

अनर्थं इति, अर्थं उपयाच्ञायामिति चौरादिको धातुः। तस्माण्णिच् ततो "अकर्तरि च कारके संज्ञायाम्" पा. ३।३।२९। इति घञ्, अर्थः। ततो न विद्यमानोऽर्थो यस्येति बहुव्रीहिः। "न लोपो नञः" पा. ६।३।७३। इति नलोपः। "तस्मान्नुडचि" पा. ६।३।७४ इति नुडागमेऽनर्थः। एवञ्च यो न किञ्चिदर्थयते सदाप्तकामत्वाद्यश्च सर्वैरर्थ्यते स्वस्वकामप्रेप्सुभिरित्यनर्थो विष्णुरिति।

न्यूनता हि याच्ञाहेतुरतो य आत्मनि किञ्चित्प्रकारकं नैयन्यून्यमनुभवति, स तत्पूर्तिकामस्तदपनयनक्षमं परमुपैति याचते च, न तु सर्वथा सकलकाम्यवस्तुजातप्रपूर्णः।

मन्त्रलिङ्गम्—

"तत्वा यामि ब्रह्मणस्पते" ऋग् १।२४।११। यामि=याचामि। च-वर्णलोपश्छान्दसः, सर्वत्र वेदे वर्णलोप-वर्णागम-वर्णोपजनाश्च दृश्यन्ते। वेदे सर्वत्रेष्टापूर्तिमभिसन्धायैवाग्नेः प्रार्थना।

यथा—"उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते संसृजेथा" इत्यादि यजुः १५।५४

अपरञ्च—"अग्ने ! त्वं सुजागृहि वयं सुमन्दीषीमहि।

रक्षाणो अप्रयुच्छन् सुबुधे नः पुनस्कृधि॥" यजुः ४।१४

रक्षन्=नः-पुनः=प्रत्नः सुष्ठु बोधाय समर्थय इति निदर्शनमात्रमुपन्यस्तम्। एवं जगदपि भगवन्मूलकेन व्याप्तिमताऽनर्थत्वगुणेन सर्वतो नियन्त्रितमिव स्यूतमिव दृश्यते। प्राचां मतमप्येतदाशयकमेव। 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तत' इति।

अनर्थः—४३१ पूर्णकाम होने के कारण प्रयोजनरहित।

उपयाच्ञार्थक चुरादिगणपठित णिजन्त अर्थ धातु से कर्म में घञ् होकर अर्थ शब्द सिद्ध होता है। जिसका अर्थ होता है जो किसी से याच्ञा-प्रार्थना नहीं करता। अर्थात् जिसको अपनी भोग्य सामग्री सदा उपलब्ध है किसी से जाकर प्रार्थना नहीं करता है, जिसके पास किसी तरह की कमी नहीं होती है और जिसके पास योग्य वस्तुएं पूर्ण हैं वह क्यों किसी से जाकर मांगेगा। व प्रभु आप्तकाम परिपूर्ण है, इसीलिए वह अनर्थ है।

इस अर्थ की पुष्टि में "तत्वा यामि" इत्यादि मन्त्र प्रमाण है। उक्त मन्त्र में याचामि क्रिया के स्थान में यामि पढ़ा है जो छान्दस वर्णलोप के कारण है। वर्णलोप वर्णागमादि को छन्द में साधु माना है। वेद में सभी स्थानों में, अपनी इष्टपूर्ति के लिए, अग्नि की स्तुति की गई है।

जैसे "उद्बुध्यस्वाग्ने" तथा अग्ने त्वं सुजागृहीत्यादि मन्त्रों में हे अग्नि, हमारी रक्षा करता हुआ हमें फिर प्रातः अच्छा ज्ञान दे।

यह जगत् भी, भगवान् के अनर्थत्व गुण से नियन्त्रित है।

प्राचीन आचार्यों का वचन भी इसी आशय का है। किसी अर्थसिद्धि के उद्देश्य के बिना मूर्ख प्राणी भी किसी कार्य में प्रवृत्त नहीं होता।

भवति चात्रास्माकम्—

अर्थार्थिनस्तं भुवने शयानं स्तुवन्ति याचन्ति जगन्ति वाग्भिः ।
तस्मादनर्थो भगवान् वरेण्यो ह्यल्पार्थता क्लेशयतीह मर्त्यम् ॥२७७॥

आप्तकामः स विष्णुर्नान्यमर्थयते तस्मादनर्थ इति ।

महाकोशः—४३२

महाकोश इति—कुशिश्चौरादिको धातुः । तस्मादधिकरणे घञि कोशो, महच्छब्दश्च व्युत्पादितचरः । महान् कोशो यस्येति बहुव्रीहिसमासः ।

कोशशब्दो निधिशब्दसमानार्थकः । यथा लोके नानाविधबहुमूल्यवस्तु-संग्रहस्थानं, निधिशब्देनोच्यते, तथा कोशशब्देनापि । एतदर्थानुगमादेव भगवानपि महाकोशशब्देनोच्यते । तत्र विशेषणीभूतेनमहच्छब्देनाक्षय्यता तस्य द्योत्यते कोशस्येति । तदित्थ तस्माद्भगवतो कोशादनेकब्रह्माण्डोद्गमः, प्रतिब्रह्माण्डञ्चानेके लोकाः, प्रतिलोकञ्चानेके प्राणिनः, प्रतिप्राणि च भिन्ना गुणाः, भिन्नानि कर्माणि, भिन्नाश्चाकृतयस्तदेतत्सकलं गणयितुमाकलयितुञ्चाशक्यं तस्मादेव निर्गतं निर्गच्छति च प्रतिपलं तथापि च स तदवस्थ एव । न नाममात्रमपि न्यूनता तस्मिन्नायाति, किन्त्वक्षय्य एव स महाकोश इति ।

तन्महाकोशार्पितमक्षय्यत्वं लौकिकेष्वपि पृथिव्यादिषु । यथा "रत्नधा वसुन्धरा" इत्यन्वर्थनाम्ना पृथिव्यां सर्वविधौषधानां परमाणवोऽक्षया, मेघे जलमक्षयं समुद्रेऽपि

यही बात पद्य द्वारा इस तरह कही गई है :—

काम्य विषयों की इच्छा वाले प्राणी अच्छी-अच्छी वाणियों से समस्त भुवन में व्यापक भगवान् का गान, स्तवन तथा नमन करते हैं किन्तु उसे किसी वस्तु की इच्छा न होने से वह अनर्थ कहाता है । जगत् में निर्धनता ही मनुष्य को कष्ट देती है ।

महाकोशः—४३२

महाकोश—कुश संश्लेषार्थक चुरादि धातु से अधिकरण में घञ्प्रत्यय होकर, कोश शब्द सिद्ध होता है । महत् शब्द के साथ बहुव्रीहि समास होकर, महाकोश शब्द बन जाता है । लोक में जैसे मुद्रा जवाहरात रत्नादि रखने के स्थान को निधि (खजाना) कहते हैं उसी प्रकार उस को कोश-भी कहते हैं किन्तु परमात्मा का कोश महाकोश है । वह बड़ा है । सदा पूर्ण है, वह कभी भी क्षीण नहीं होता "घटता नहीं" । उससे अनन्त ब्रह्माण्ड निकलते हैं । एक एक ब्रह्माण्ड में अनन्त लोक तथा एक एक लोक में, असंख्य प्राणियों की आकृतियाँ तथा गुण कर्म सब भिन्न भिन्न होते हैं । ये सब उसी महाकोश से निकले तथा निकल रहे हैं, फिर भी वह महाकोश वैसे ही पूर्ण है "भरा हुआ है· उस में कुछ कमी नहीं आती, वह अक्षीण है । इसीलिए भगवान् का नाम महाकोश है । उस महाकोश का अक्षीणत्व— न घटना गुण पृथिव्यादि लौकिक पदार्थों में भी आया हुआ है । जैसे पृथिवी में सब

च। अत एव सकलजगद्व्यवस्थापकमहाकोशात्मकगुणत्वेन सर्वेश्वरो विष्णुरेव महाकोशेति नाम्ना गीत:

मन्त्र लिङ्गञ्च—
"तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वं मा इदम्।
तुच्छेनाभ्वपिहितं यदासीत् तपसस्तन्महिम्ना जायतैकम्।" ऋग् १०।१२६।३

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः॥
समुद्रादर्णवादधि सम्वत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीञ्चान्तरिक्षमथो स्वः॥
ऋग्० १०।१९०।१-२-३। इत्यादि।

लोकोऽपि तं महाकोशात्मकं विष्णुमनुकुरुते, तथा हि कुम्भकारो मृदमाकोश्य, ततस्तद्विकारान् घटादीनुपक्रमते कर्तुमिति।

भवति चात्रास्माकम्—

लोके महाकोशपदेन विष्णुर्गीतः पुराणैः स यतोऽस्ति वेदः।
न क्षीयते तस्य कृता व्यवस्था जगत् स कोशप्रसु संविधत्ते॥२७८॥

जगच्छब्दस्य द्वितीयान्तमेकवचनम्। कोशप्रसुशब्दो जगद्विशेषणम्।

स्त्रियामप्यव्यक्तः कोशो यत्र गर्भस्वरूपनिष्पत्तिः। बीजाधाने सति व्यक्तो भवति। आहारजन्यरसोपादानो गर्भः सर्वाङ्गसमुदितो दशमे मासि योनिभेदतो यथाकालं वा प्रसूयते। आहारस्य पार्थिवत्वाद् रसोऽपि पार्थिवः। माता च गर्भस्य निमित्तकारणं

ओषधियों के परमाणु सर्वदा पूर्ण रहते हैं। उनका कभी क्षय नहीं होता, अनेक ओषधियों को उत्पन्न करके भी अपने रूप से पूर्ण रहते हैं। मेघ तथा समुद्र का जल कभी क्षीण नहीं होता। क्योंकि महाकोशात्मक गुण ही भगवान् का सब स्थानों में व्यापक होकर, सब की व्यवस्था कर रहा है। इसीलिए भगवान् का नाम महाकोश है।

"तम आसीत् तमसा गूढमित्यादि" मन्त्रों से इस अर्थ की पुष्टि होती है। लोक भी महाकोश विष्णु का ही अनुकरण करता हैं। जैसे कुम्हार पहिले मिट्टी का संग्रह तथा उसे अच्छी तरह मिलाकर गून्दकर फिर उस से घड़े आदि बर्तन बनाता है।

भाष्यकार ने श्लोक द्वारा संक्षिप्तार्थ इस रूप में व्यक्त किया है—

प्राचीन आचार्यों ने लोक में महाकोश पद से विष्णु का ही गान किया है। क्योंकि वह वेद स्वरूप है, वेद जैसे सकल विज्ञानों का कोश 'खजाना' है वैसे ही भगवान् भी सकल द्रव्य जगत् का कोश है। उसकी की हुई व्यवस्था का कभी भी ह्रास नहीं होता। वह लोकों को भी अपने अपने कोश से अन्यों को उत्पन्न करनेवाले बनाता है। जैसे स्त्री जाति के भीतर 'उदर में' एक अव्यक्त कोश है। वह बीज स्थिति से व्यक्त विकसित हो जाता है। और आहार रस से सब अङ्गों से पूर्ण गर्भ योनि के अनुसार यथासमय उत्पन्न हो जाता है। माता गर्भ का

नोपादानकारणम्। अमुथैव भगवान् विष्णुर्निमित्तकारणं सन् सर्वासां योनीनां संवर्धनानि अक्षय्याणि विदधद्दर्शयति स्वमहाकोशगुणस्य व्याप्तिं जगति। मूलेऽपित एव गुणस्तत्सर्वाङ्गेषु साकल्यतः समुदेति। यथा वटाश्वत्थनिम्बसमूहस्त्रिवेणीति। एवं लोकदर्शं यथायथमूहनीयमिति।

महाभोगः—४३३

महाभोग इति—भुज पालनाभ्यवहारयोरिति रौधादिको धातुः, तस्मात्कर्मणि घञ् "चजोः कुः घिण्यतोः" पा. ७।३।५२। इत्यनेन कुत्वे भोग इति। महान् भोगोऽस्येति महाभोगः। भोगो हि विषयो भुज्यते इति कृत्वा। महत्तात्वञ्च प्रकृतिः, प्रकृतेरेव रूपमिदं नानाविधं विश्वमतो विश्वरूपां प्रकृतिं महासामान्यरूपया सत्तया ज्ञानलक्षणया स्फूर्त्या च विषयीकुर्वन् स महाभोग इत्युच्यते विष्णुः।

यद्वा-महान्तस्तत्त्वविवित्सवो यं भुञ्जते सेवन्ते विषयीकुर्वन्ति प्राप्तुमिति महाभोगः।

यद्वा-महान् आभोगो विस्तारः प्रकृतिमधिष्ठाय जगद्रूपेण यस्य स महाभोग इति विष्णुरेव।

सूर्यादयो ग्रहाः सप्तर्ष्याद्यास्तारका अपि महाभोगशब्दाभिधानाः। यतो हि तेऽपि यावच्चतुर्दशमन्वन्तरमितं कालं भुञ्जन्ति पालयन्ति भगवत्कृतां व्यवस्थां नियमतो

निमित्त कारण है, उपादान नहीं। इसी प्रकार भगवान् भी निमित्त कारण होकर सब योनियों की सन्तान परम्परा से वृद्धि करता हुआ मेरा महाकोशात्मक अक्षय गुण अविनाशी गुण जगत् में व्यापक है, यह प्रकट करता है। मूल का गुण ही अवयवों में सकल रूप से उदित होता है या आता है। जैसे एक ही स्थान में परस्पर मिलकर उत्पन्न हुए वट-पीपल नीम अपने अपने मूल के रस गुण को लेकर बढ़ते हैं।

महाभोगः—४३३ सुखरूप महान् भोगवाला।

महाभोग इति—भुज, पालनाभ्यवहारयोः इस रुधादिगण पठित धातु से कर्म में घञ् प्रत्यय करने से भोग शब्द बनता है तथा महत् शब्द के साथ बहुव्रीहि समास होकर महाभोग शब्द सिद्ध होता है भोग नाम विषय का है क्योंकि वह भोगा जाता है। इसी प्रकार महत् नाम प्रकृति तत्त्व का है, प्रकृति का ही विस्तार यह सकल विश्व है, इसलिये प्रकृति रूप महत्तत्त्व को ही जो सत्ता और स्फूर्ति प्रदान करके अपना विषय बनाता है। अर्थात् भोग का आधार बनाता है वह महाभोग है अतः यह भगवान् विष्णु का नाम है।

अथवा जिसको तत्त्वज्ञान की इच्छावाले महापुरुष प्राप्त करने के लिये अपना विषय बनाते हैं, अथवा जो प्रकृति का अधिष्ठाता होकर बहुत अधिक विस्तृत (फैला हुआ) है इसलिये भी विष्णु का ही नाम महाभोग है। सूर्यादि ग्रह तथा सप्त ऋषि आदि नक्षत्र गण भी महाभोग नाम से कहे जाते हैं क्योंकि ये सब चतुर्दश मन्वन्तर दीर्घकाल तक भगवत्कृत नियम का

न चातिवर्तन्ते कदाचिदित्यर्थानुगमात् ।

लोकेऽपि च दृश्यते प्रतिवस्तु नियतो भोगकालः परन्तु प्रत्येकं वस्तु स्वांशतस्सन्तानपरम्परया महाभोगवत्तां प्रतिपद्यते । अत आसर्गात्सर्गान्तं यावत्सन्तान-परम्परया सर्वे प्राणिनो महाभोगवन्त इति महाभोगशब्दवाच्या भवन्ति ।

मन्त्रलिङ्गञ्च—

तस्माद्यज्ञात्सर्वहुत सम्भृतमित्यादि "तस्मा ज्जाता अजावयः" यजुः ३१-६-७-८

भवति चात्रास्माकम्—

उक्तो महाभोगपदेन विष्णुर्भुनक्ति विश्वं महतः स कालात् ।
तत्रैव तद्भोजनमादधाति, साक्षी स्वयं पश्यतिमात्रमात्रः ।।२७९।।

पश्यतिमात्रमात्र=यथा लोके सर्वः कृतव्यवस्थो यन्त्राधिपतिः स पश्यत्येव न तु स्वयं कुरुते ।

महाधनः—४३४

महाधन इति—धन-धान्ये वैदिको धातुर्जुहोत्यादिकः । धनं हि प्रीणनहेतुकं द्रव्यमुच्यते, यत्प्राप्य सर्वं तुष्यति तृप्यति । महाधनशब्दे महच्छब्दो धनस्यापारिमित्यमाख्याति, एवञ्च महदपरिमितं धनमस्येति महाधन इत्युच्यते । जगज्जातानां सर्वेषां किमुतान्येषां, महाराजानामपि धनमियत्तावच्छिन्नं परिमितं भवति । विराट्-

पालन करते हैं । भगवान् का यह महाभोग रूप गुण लोक में भी प्रत्येक वस्तु में व्यापक दीखता है । जैसे यद्यपि प्रत्येक वस्तु का भोगकाल नियत है फिर भी वह अपनी सन्तान परम्परा से महाभोगवाली बन जाती है, क्योंकि सृष्टि से लेकर सृष्टि के अन्त तक उसकी सन्तान परम्परा चलती रहती है । इस अर्थ की पुष्टि में "तस्माद्यज्ञात्सर्वहुत" इत्यादि मन्त्र प्रमाण है ।

पद्य द्वारा यह इस प्रकार कहा गया है—

विष्णु ही का नाम महाभोग है क्योंकि वह सृष्टि से लेकर विश्व का पालन या भोग करता है और विश्व में ही परस्पर भोज्य-भोजकता उत्पन्न करके अपने आप केवल मात्र साक्षी होकर देखता रहता है कर्ता कुछ नहीं । यह सकल संसार उसके देखने मात्र से ही चल रहा है ।

महाधनः ४३४ यथार्थ और अतिशय धन स्वरूप ।

धान्यार्थक धन धातु वैदिक है और जुहोत्यादि गण पठित है । महत् और धन शब्द का समास होकर महाधन शब्द बनता है । धन शब्द उस द्रव्य का नाम है, जिसके मिलने से मनुष्य का मन तृप्त हो जाये और महाशब्द धन की बाहुल्य अनन्तता को बताता है । इसलिये महाधन शब्द का अर्थ हुआ, अपरिमित असंख्य धन वाला, ऐसा परमेश्वर ही है । क्योंकि लोक में साधारण मनुष्यों का तो कहना ही क्या है, किन्तु बड़े-बड़े राजा लोगों का धन भी, परिमित

पुरुषस्य ब्रह्मणोऽपीयदायुरियज्ज्ञानमियानानन्द इयती भोगसामग्री चेति गणना-विषयतामापद्यते। अतो यस्य सर्वमिदमनन्तं यञ्च याचन्तेऽन्ये सुखसाधनतृप्तिहेतुकं हिरण्यपश्वादिकं, स एव महाधनशब्दाभिधेयो भगवान् विष्णुरिति।

अत्र मन्त्रलिङ्गम्—

"दश ते कलशानां हिरण्यानामधीमहि, भूरिदा असि वृत्रहन्।"
"भूरिदा भूरि देहि नो मा दभ्रं भूर्यभिर। भूरि घेदिन्द्र दित्ससि।"
"भूरिदा ह्यसि श्रुतः पुरुत्रा शूर! वृत्रहन्। आ नो भजस्व राधसि।"

ऋक् ४।३२।१६।२०।२१

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः।
मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्॥ ऋ० १०।४८।१

भवन्ति चात्रास्माकम्—

कश्चित्सुवर्णं यवकांश्च कश्चित् वस्त्राणि कश्चिचत् द्रुमयांश्च कश्चित्।
कश्चिद् गुडूचीं मधुमष्टिकां वा कश्चित्पशून् वा विनिमातुमेति॥२८०।

स एव विष्णुः कुरुते निधानं धनस्य सर्वत्र कृतेऽत्र विश्वे।
महाधनः स्वेन गुणेन युक्त्या धनेन तुल्यं कुरुते समस्तम्॥२८१॥

एवं हि सर्वत्र धनं स विष्णुर्महाधनो व्यापयति प्रसह्य।
तं बुद्धिमन्तः स्वधिया विशेष्य महाधनं तं स्तुवते महान्तः॥२८२॥

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः॥६०॥

४३५ अनिर्विण्णः, ४३६ स्थविष्ठः, ४३७ अभूः (भूः), ४३८ धर्मयूपः, ४३९ महामखः।
४४० नक्षत्रनेमिः, ४४१ नक्षत्री, ४४२ क्षमः, ४४३ क्षामः, ४४४ समीहनः॥

जो गिनती में आ सकता है उतना ही है। ब्रह्म जो सकल ब्रह्माण्ड का अधिपति है उसके भी आयु, ज्ञान, आनन्द और भोग्य सामग्री सब परिमित हैं, अर्थात् उनकी संख्या की जा सकती है। इसलिये जिसके पास यह सब कुछ अनन्त है जिससे कुछ लेने के लिये सब याचना करते हैं वही भगवान् विष्णु महाधन है। इस अर्थ का समर्थक "दश ते कलशानामित्यादि" वेद मन्त्र है।

भाष्यकार ने श्लोकों का भावार्थ इस प्रकार दिया है—

वह महाधन रूप विष्णु अपने गुण से युक्त, संसार की रचना करके इस में अपने धन का विस्तार अथवा दान कर देता है जिससे कि जगत् में कोई सुवर्ण, कोई अन्न, कोई काष्ठ, कोई गुडूची, कोई मधुमष्टि, मुलहठी, कोई पशु आदि का लेन देन आपस में करता है इस प्रकार वह महाधन विष्णु अपने धन को सर्वत्र बलात् फैला देता है। यही कारण है कि ज्ञानी पुरुष उसकी पर्याप्तता को जानकर उसकी महाधन नाम से स्तुति करते हैं।

अनिर्विण्णः—४३५

अनिर्विण्ण इति—निरुपसृष्टो विद-विचारणे धातुः। "गत्यर्थाकर्मकेति" पा० ३।४।७२ कर्तरि क्तः। निर्विण्णस्योपसंख्यानम्। ८।४।२९ इति सूत्रवार्तिकेन पूर्वनकारस्य णकारे—"ष्टुना ष्टु"रिति ष्टुत्वेन णः। नञ्समासः। अनिर्विण्णः। निर्वेदं क्षोभं क्लेशमालस्यं वा न प्राप्नोति सोऽनिर्विण्णो विष्णुः। तथा हि निर्वेदो नाम विकारोऽव्ययस्य कथं स्यात्, निर्वेदादिकं हि सविकारस्य वस्तुनो धर्मः, यदीश्वरोऽपि निर्विण्णः स्यात्तदा निर्वेदवशात्सृष्टेरुच्छित्तिरेव स्यात्।

अतो नायं विकारी सन्निर्वेदमाप्नोति। किन्त्वेकरसोऽव्ययः। अत एवानिर्विण्णो विष्णुरिति। पौनःपुन्येन सृष्टिं विदधत्संहरंश्चाप्येकरसः सर्वदाविकृतरूपः। कारणगुणकं कार्यमिति न्यायाच्च यादृशोऽनिर्विण्णः स्वयं तादृग्गुणानुस्यूतमेव विश्वं विधत्ते। यादृग्गुणसम्पन्नो बीजस्तादृग्गुणसम्पन्नामेव पृथिवीं जनयति। पृथिव्याश्च बीजानामुद्गमोऽविच्छिन्नो, न सा कदाचिन्निर्वेदमापद्यते, अनिर्विण्णस्य विष्णोः कार्यत्वात्। एवं समुद्रोऽपि सर्वतो जलमाददानो न निर्विद्यते। सूर्योऽपि निरन्तरगतिरयं न निर्विद्यते, जगदाकर्षन् सन्तापयंश्च। इदं हि जगद्भगवतो विष्णोरजरममृतं दृश्यं काव्यं "देवस्य पश्य काव्यन्न ममार न जीर्यती"ति मन्त्रलिङ्गत्वात्।

अनिर्विण्णः—४३५ उक्तादृशरूप विकार से रहित।

निर् उपसर्ग पूर्वक विद्-विचारणे धातु से कर्ता में क्त प्रत्यय तथा नञ् समास होकर अनिर्विण्ण शब्द सिद्ध होता है। अनिर्विण्ण शब्द का अर्थ है जो कभी भी उदासीनता, आलस्य तथा खेद को प्राप्त न हो। निर्वेद, उदासीनता वा क्लेश का अनुभव करना विकारी वस्तु का धर्म है, जो प्रतिक्षण बदलती रहती है।

सर्वेश्वर भगवान् का कभी किसी प्रकार का विकार नहीं होता, वह सदा एकरस तथा अव्यय है। उसकी बनाई हुई सृष्टि तथा उसके नियम सदा सुव्यवस्थित चल रहे हैं। यदि वह भी निर्वेद या उदासीनता का अनुभव करने लगे लो सृष्टि प्रवाह मूल से ही नष्ट हो जाए किन्तु ऐसा नहीं होता। इसलिये वह प्रभु अनिर्विण्ण है। बार वार सृष्टि को बनाता हुआ तथा उसका संहार करता हुआ भी प्रभु अपनी अव्ययता तथा एकरसता को नहीं छोड़ता। कारण के गुण कार्य में आते हैं इस नियम के अनुसार अनिर्विण्ण रूप प्रभु का गुण समस्त संसार में व्याप्त है। पृथिवी के बीज का गुण पृथिवी रूप कार्य में भी आया हुआ है। क्योंकि इस से भी सब प्रकार के बीजों का प्रादुर्भाव निरन्तर होता रहता है यदि यह निर्विण्ण हो जाये तो ओषधियों का मूलोच्छेद हो जाए जिन से संसार का जीवन चल रहा है। इसी प्रकार समुद्र का जलादान-प्रदान तथा सूर्य का निरन्तर राशि आदि के नियम से गमन सुव्यवस्थित होता है। सूर्य का जगत् आकर्षण तथा सन्ताप दान रूप कार्य अविच्छिन्न चलता है। यह जगत् उस प्रभु का, अजर और अमर दृश्य काव्य है "देवस्य पश्ये"ति मन्त्र वचन इस में प्रमाण है। यह प्रभु का जगद्रूप दृश्य काव्य कभी नष्ट या जीर्ण नहीं होता, किन्तु सदा प्रवाह रूप से चलता

अत्र दृशिना दृश्यकाव्यस्य जगत एव सम्बन्धः। तस्य श्रव्यं काव्यञ्च श्रुतिपर्यायो वेदः।

भवति चात्रास्माकम्—

उक्तो ह्यनिर्विण्णपदेन विष्णुः समीक्ष्य विश्वं बहुधा ततं यत्।
सूर्यो न निर्वेदमुपैति भेषु न चोर्मिमाली न धरा च नैंजे॥२८३॥

भेषु=इत्यत्रागच्छन्नित्यध्याहारः। नैंजे—निजविकारेषु-बीजोत्पादनादि-कर्मसु। तथा समुद्रः स्वकार्येषु सततं निरत इत्यर्थः।

स्थविष्ठः—४३६

स्थूल-परिबृंहणे चौरादिकस्तस्माण्णिच्यतो लोपः। पचाद्यच्। णेर्लोपः। आतिशायिक इष्ठन् प्रत्ययः। स्थूलदूरयुवह्रस्वेत्यादि पा० ६।४।१५६ सूत्रेण यणो लोपो पूर्वस्य च गुणः। अतिशयेन स्थूलः स्थविष्ठः। इष्ठनातिशयस्थूलत्वमुच्यते। स्वभावतः स्थूला जागताः पदार्थाः, यश्च रसरूपेण तदन्तः प्रविश्य स्थूलतमान् करोति स स्थविष्ठ इत्युच्यते। परिबृंहणं हि धात्वर्थः, परिबृंहणञ्च परितो वर्द्धनमिति, सर्वंजगदन्तर्गतो यावदिच्छति तावद्वर्धयति, जगदिदमतो बृंहणधर्मकत्वात्स्थविष्ठो धात्वर्थानुगमादेव, स विष्णुः।

मन्त्रलिङ्गञ्च—

"स पर्य्यगाच्छुक्रमित्यादि" यजु० ४०।८

ही रहता है। इस श्रुति वचन में पश्य किया का दृश्य काव्य जगत् से सम्बन्ध है। श्रव्य काव्य उसका वेद है और उसका श्रुति नाम भी श्रवण से ही है।

भाष्यकार ने श्लोकों में भावार्थ संग्रह इस प्रकार किया है—

इस विश्व का बार बार विस्तार तथा सृजन करता हुआ वह कभी भी श्रान्त खिन्न नहीं होता, इसी अभिप्राय से भगवान् विष्णु अनिर्विण्ण कहा है।

इसी प्रकार सूर्य और समुद्र भी अपने अपने कार्य में निरन्तर लगे रहते हैं, किन्तु कभी खिन्न नहीं होते।

स्थविष्ठ—४३६ विराट् रूप से स्थित।

स्थूल परिबृंहणे यह चुरादिगण की धातु है। इससे अतिशय अर्थ में ताद्धित इष्ठन् प्रत्यय करने से स्थविष्ठ शब्द सिद्ध होता है। जिसका अर्थ है जो अत्यन्तस्थूल हो। अर्थात् स्थूल तो सभी जगत् के पदार्थ हैं किन्तु रस रूप से इन के 'भीतर' प्रवेश करके जो इन को बहुत स्थूल बनाता है वह स्थविष्ठ है।

धातु का अर्थ परिबृंहण-अर्थात् सब प्रकार से बढाना है इसी अर्थ के अनुसार वह इस जगत् के अन्दर प्रवेश करके जितना बढाना होता है उतना इसे बढाता है। इसलिये वर्धन-धर्मा होने से वह स्थविष्ठ कहाता है।

इस अर्थ का पोषक मन्त्र "स पर्य्यगादित्यादि" है। यजु:० । भगवान् विष्णु का स्थूली-

दृश्यते च जगति, तस्य स्थूलीकरणरूपोऽनुस्यूतो गुणः। प्रत्येकं वस्त्वन्यत्र प्रविश्य तत्स्थूलयति वर्धयति विकासयति। यतो ह्यन्तःप्रविष्टस्यान्नभूतस्य रसरूपेण परिणतस्य वस्तुनो वर्धनरूपः "स्थूलीकरणरूपो" धर्मस्तत एव आयातः। यथा-यत्र वस्तुनि जलप्रवेशस्तत् स्थूलीभवति, यतो हि रसरूपतामापन्नं जलं, तत्र परितो गत भवति, अतस्तद्वस्तुस्थूलताहेतुर्जलं स्थविष्ठं तद्वस्त्वपेक्षया।

भवतश्चात्रास्माकम्—

नूनं स्थविष्ठः स हि विष्णुरेव यतोऽस्ति सर्वत्र गतः स्वयं सः।
व्याप्य स्थितः सर्वमतो वशिष्ठो दीपो यथा रश्मिभिरावृणोति ॥२८४॥
एवं हि यो ध्यायति सत्यबन्धुं स्थूलाच्च वृद्धं परियातमन्तः।
देहे यथात्मा विभिनत्ति रूपं तथा स्थविष्ठः कथितः स एव ॥२८५॥

सत्यया व्यवस्थया बध्नाति यः स सत्यबन्धुः-विष्णुरिति। विभिनत्ति= वहुविधं दृश्यते शरीरभेदात् यथाशरीराकारम्। सूक्ष्मकीटाद्हस्त्युत्तरशरीरान्तमिति यावत्। स्थूलतरस्योदाहरणं पुनर्यथा-सुनियन्त्रितं वाष्पं महत्तमं यन्त्रं चालयति। शक्त्यतिशयं द्योतयितुं वाष्पस्य, स्थविष्ठत्वमुक्तं भवति यन्त्रापेक्षया। एवं विष्णुरपि लोके। यद्यपि ब्रह्मणि स्थूलत्वं कृशत्वं वा न सङ्गच्छते तथापि तस्यैव ब्रह्मणः प्रपञ्च-मात्रमिदमिति विज्ञापयितुं स स्थविष्ठनाम्नोक्तः। वशिष्ठः=वशिनां श्रेष्ठः।

करण धर्म जगत् में ओतप्रोत अर्थात् व्याप्त है। प्रत्येक वस्तु दूसरी वस्तु में प्रवेश करके अर्थात् उसका अन्न होकर रस रूप से परिणत हो उस वस्तु को स्थूल करती है अर्थात् वढाती है।

यह उस वस्तु का स्थूलीकरण उसी परमेश्वर से आया है। जैसे जिस वस्तु में जल का प्रवेश होता है, वह वस्तु फूल जाती है क्योंकि वह जल रस रूप होकर उस वस्तु में सर्वथा घुल मिल जाता है। इसलिये वह जल उस वस्तु की अपेक्षा स्थविष्ठ है। अतिशयिता भी कई प्रकार की होती है। उपर्युक्त उदाहरण आकार से अतिशय का है। शक्ति से अतिशयिता का उदाहरण यह है जैसे सुनियन्त्रित भाप "धूआं" एक वहुत बड़े यन्त्र को चलाता है, यहां यन्त्र की अपेक्षा धुएं में शक्त्यतिशय से स्थूलता है।

इसी प्रकार भगवान् विष्णु भी लोक में सब प्रकार की अतिशयता विशिष्ट है। इसलिये वह स्थविष्ठ है। यद्यपि स्थूलत्व तथा कृशत्व ब्रह्म के धर्म नहीं हैं फिर भी यह जगत् उसी का विस्ताररूप प्रपञ्च है। इसलिये उसको स्थविष्ठ नाम से कहा है।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार कहा है—

जिस प्रकार दीपक अपनी ज्योति से अपने विषय प्रदेश के अन्तर्गत सब वस्तुओं का व्यापन-आच्छादन कर लेता है उसी प्रकार जो विश्व में सर्वगत होकर अपने विधान को नियमित रखता हुआ अपनी सत्य व्यवस्था से सब का व्यापन-आवरण करता है तथा सब वस्तुओं में व्याप्त होकर तत्तदाकार से भिन्न हो जाता है। शरीर आत्मा जीवात्मा की तरह ऐसे स्थूल से स्थूल परमात्मा का जो ध्यान करते हैं, वे उसे स्थविष्ठ नाम से कहते हैं। भगवान् विष्णु ही सर्वगत है, इसलिये वही स्थविष्ठ है।

अभूः—४३७

अभूरिति भू सत्तायां धातुर्भौवादिकस्तस्मात् "भुवः संज्ञान्तरयोः पा० ३।२।१७६ इत्यनेन संज्ञायां क्विप्। तस्य सर्वस्य लोपः। नञा समासोऽभूरिति। अथवा भवनं भूरिति सम्पदादिभ्यो भावे क्विप्, ततो नञा समासः। एवञ्च अभूरित्यनेन, भगवतो भवनक्रियाविषयत्वं निषिध्यते। भवतीति सामान्यक्रिया, तन्निषेधे सर्वेषामर्वाक्तनानां भावविशेषाणां निषेधः। जायते-इति समानार्थिका भवनक्रिया, जायते=भवतीति समानार्थदर्शनात्। एवञ्च सामान्यनिषेधे, समापन्न एव विशेषनिषेधः। न हि निर्विशेषं सामान्यमिति न्यायात्। एवञ्च भवनक्रियाविषयो न भवति सः, इत्यनेनाद्यभावविकारो जन्म निषिध्यते, तस्मिन्निषिद्धे च स्वतोऽन्येषां भावविकाराणां निषेधः। अतोऽभूर्भगवान् विष्णुः।

भवति चात्रास्माकम्—

अभूः स विष्णुर्ह्यजरोऽमरोऽजो वा, न तत्परः कोऽपि न तस्य शास्ता।
सम्पद्विपद्भ्यां च न सोऽस्ति सक्तो ह्यभूर्यथा खं स तथा स्वयम्भूः ॥२८६॥

धर्मयूपः—४३८

धर्मयूप इति—धर्मशब्दो व्युत्पादितचरः। 'अर्तिस्तु' इत्यादिनौणादिकमनि-

---

अभूः— ४३७ अजन्मा

भू-सत्तायाम्, धातु से संज्ञा में अथवा भाव में सम्पदादिलक्षण क्विप् करके तथा नञ् समास होकर अभूः— शब्द सिद्ध होता है। अभू शब्द का अर्थ है, जो भवन "होना" रूप क्रिया का विषय नहीं बने।

भवन और जनन समानार्थक शब्द हैं। और क्रिया ६ छ प्रकार की है, जिसका सब प्राणियों पर असर 'प्रभाव' पड़ता है। सब से आदि की क्रिया भवन या जनन जन्म लेना है, उसका यहां निषेध किया है अर्थात् वह अजन्मा है, जन्म नहीं लेता।

इस प्रकार जन्म का निषेध करने से, उसके पीछे होनेवाले सभी भाव-विकारों का निषेध हो गया। भगवान् अव्यय तथा अजन्मा है, इसलिये अभू है।

भाष्यकार ने श्लोक में भावार्थ इस प्रकार दिया है—

सर्वेश्वर विष्णु अजर है क्योंकि वह एकरस होने से कभी जीर्ण या नवीन नहीं होता अर्थात् बाल्य, यौवन, वार्धक्य आदि विकारों से रहित है। इसलिये अमर है, अविनाशी है तथा अजन्मा है। वह किसी दूसरे के शासन में नहीं, किन्तु स्वतन्त्र है।

सम्पद् विपद् आदि धर्मों से भी उसका कोई सम्बन्ध नहीं है।। वह सत्स्वरूप तथा आकाश के समान निर्लेप तथा व्यापक है, इसलिये उसे तत्त्वदर्शी 'अभू' नाम से कहते हैं।

धर्मयूपः—४३८ धर्म के स्तम्भ रूप।

उणादि मनिन् प्रत्ययान्त धर्म शब्द का व्याख्यान पहिले किया जा चुका है। यूप शब्द

प्रत्ययान्तः। यूपशब्दो हि यु मिश्रणे, मिश्रणामिश्रणयोरित्येके पठन्ति। धातोरादादिकादन्तर्भावितण्यर्थात् "कुयुभ्याञ्च" इत्यनेनौणादिकः पः प्रत्ययः किच्च सः, तस्माद् गुणाभावः। "श्र्युकः कितीति" पा. ७।२।११ नेट्। बाहुलकाद्दीर्घः। यावयतीति यूपः। धर्माणां विश्वस्य धारकाणां पञ्चभूतानां यूप इति धर्मयूपः। धारको हि धर्मः स च स्वयं धर्मरूपः स्वकार्यभूतान्यात्मधर्मविशिष्टान्याकाशादीनि समुत्पाद्य संयाव्य च पञ्चीकरणेन त्रिवृत्करणेन वा नानाविधं विश्वं विधत्ते। प्रतिवस्तु च तदन्तर्गतस्तदाकारः स्वधारकत्वरूपं धर्मं निदधाति। तेन च प्रत्येकं वस्त्वात्मानं दधदस्तित्वलक्षणं सत्त्वमापद्यते। एवं सर्वानुस्यूतात्मधर्मेण सर्वमिदं जगदात्मनि बध्नातीति कृत्वा धर्मयूपः स इत्यभिधीयते।

यथेक्षुदण्डो मनुष्यैः प्रपीड्य यन्त्रे विकृतः स्वविकारेषु गुडशर्करादिषु स्वमधुरत्वलक्षणं गुणं निदधाति येन सर्वं विकारजातं माधुर्यमापद्यते, भजते च पृथक् पृथग्नाम। एवं लोकानुभवतः सङ्गमनीयम्।

भवति चात्रास्माकम्—

स धर्मयूपः कुरुते विचित्रं जगत् बहुत्वे कृतबुद्धिरन्तः।
स वा मनःकामनया च शम्भुः पुंस्त्रीप्रयोगेण जगद्द बभार ॥२८७॥

भृञ्=भरणे लिटि बभार। पुंस्त्रीप्रयोगः=सर्वत्र युग्मसद्भावाख्यायी।

प्रेरणार्थक यु मिश्रणे धातु से उणादि प प्रत्यय करने से बनता है। धर्म के साथ यूप शब्द का समास करने से धर्मयूप शब्द सिद्ध हुआ, जिसका अर्थ हुआ विश्व के धारण करनेवाले पञ्चभूतों को जो आपस में मिलाता है अर्थात् धर्म नाम धारण करनेवाले का है। स्वयं भगवान् ही धर्म है। वह अपने कार्य जो आकाश आदि पञ्चभूत हैं, उनको भी धारण करना रूप जो धर्म है, उससे युक्त ही बनाता है और पञ्चीकरण या त्रिवृत्करण प्रक्रिया से उन को परस्पर मिलाकर नाना प्रकार के विश्व को बनाता है और विश्व की प्रत्येक वस्तु में उस वस्तु के आकार रूप से व्याप्त होकर प्रत्येक वस्तु में अपना धारकत्व धर्म व्याप्त कर देता है अर्थात् सब वस्तुओं को अपने जैसी धारकत्व धर्म विशिष्ट बना लेता है। इसी कारण से प्रत्येक वस्तु अपने आप को धारण करती हुई अस्तित्व रूप को प्राप्त कर लेती है। इस प्रकार जगत् में व्यापक परमेश्वर अपने धर्म से जगत् को अपने में बांधे हुए है इसलिये वह धर्मयूप है।

जैसे मनुष्य गन्ने को यन्त्र में दबाकर रस निकाल लेते हैं, उस से बहुत प्रकार की कार्यरूप मिठाइयां-गुड़, शक्कर, चीनी आदि बनाते हैं। उन सब विकृत वस्तुओं के नाम रूप पृथक् पृथक् होते हुए भी गन्ना रस रूप से सब में ओतप्रोत है तथा विकार को माधुर्य रूप गुण से अपने में बांधे हुए है इसी प्रकार लोक को देख कर अन्य कल्पना कर लेनी चाहिये।

भाष्यकार ने श्लोक द्वारा भावार्थ इस रूप में ग्रथित किया है—

वह धर्मयूप नामा विष्णु जगत् की अनेकरूपता को ध्यान में रखकर अपने संकल्प से स्त्री पुरुष रूप मिथुन के द्वारा विचित्र जगत् को बनाता है तथा इसे (अपने धर्मरूप गुण से) धारण करता है।

महामखः—४३९

महामख इति—मख गतौ भौवादिको धातुस्तस्मात्—"पुंसि संज्ञायां घः प्रायेण" प्रा० ३।३।११८। सूत्रेण करणे घः प्रत्ययः। मख्यते प्राप्यते स्वाभीष्टं येनेति मखो यज्ञः। महान् मखोऽस्येति महामखो विष्णुरिति। तथा हि मखो नाम आदानप्रदानादिरूपां क्रियामभिदधत्सर्वस्य साधारणः। सर्व एव प्राणिवर्गः स्थावरवर्गश्च, किञ्चिदन्यस्मादादत्ते, किञ्चिदन्यस्मै ददाति। यथा वृक्षः सूर्यादुष्माणमादत्ते, मेघेभ्यो जलं, पृथिव्या रसञ्च। दत्ते च जगते फलानि पुष्पाणां सुगन्धञ्च।

एवं स्थावरेष्वपि, यद्यपि न स्फुटं दृश्यते आदानप्रदानक्रिया तथाप्यस्ति, यतो हि सर्व एव मेघेभ्यो जलं सूर्याच्चौष्ण्यमाददानाः कालक्रमात्क्षयमुपयन्ति मलोपलिप्ताः। किन्तु भगवतो जगद्रूपं मखः सर्वमखातिशायीत्यतः सः महामख इत्युच्यते। यतो हि स जगदिदमाक्रीडमानं विलोक्य बहु प्रसोदतीतीत्येतत् प्रसादरूपमेव फलं जगद्यज्ञस्य। ब्रह्मण्यपि प्रसादजन्यसुखानुभवोऽस्त्येवान्यथा तस्यानन्दरूपतान्धस्य सौन्दर्यमिव निष्फला स्यान्न च भगवति किञ्चिन्निष्फलमस्ति।

मन्त्रलिङ्गञ्च—

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ यजु० ३१।१६

महामखः—४३९ अर्पित किये हुए यज्ञों के निर्वाणरूप महान् फलदायक बना देनेवाला।

मख गतौ धातु से संज्ञा में घ प्रत्यय करने से मख शब्द सिद्ध होता है, महा शब्द के योग से महामख बन गया। महामख शब्द का अर्थ महामखवाला अर्थात् बड़े यज्ञवाला है क्योंकि जिसके द्वारा अपना इष्ट मनोरथ प्राप्त किया जाए वह मख या यज्ञ है।

जगत् ही महायज्ञ है इसलिये विष्णु का नाम महामख है। क्योंकि मख नाम यज्ञ तो संसार के सब पदार्थों पर प्रत्येक समय होता रहता है। यज्ञ नाम परस्पर में लेना देना रूप जो क्रिया है, उसका है। जैसे सब ही चेतन या स्थावर वर्ग किसी से कुछ लेता है तथा किसी को कुछ देता है। जैसे वृक्ष सूर्य से गर्मी, मेघ से जल तथा पृथ्वी से रस लेता है और विश्व को फल तथा पुष्पों की सुगन्ध देता है, यह आदान प्रदानरूप क्रिया स्थावर वस्तुओं में भी होती है, लेकिन उन में साफ नहीं दीखती। क्योंकि सभी स्थावर सूर्य से गर्मी, मेघों से जल लेते तथा जङ्ग आदि लगने से कालक्रम से सब क्षीण हो जाते हैं।

इन सब यज्ञों की अपेक्षा भगवान् का यह जगत् यज्ञ बड़ा है इसलिये वह महामख है। "ज्ञेन यज्ञमयजन्त" इत्यादि वेदमन्त्र प्रमाण है।

यज्ञस्वरूपञ्च—

वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः, शरद्धविः। यजु० ३१।१४

इष्टनामव्याख्यावसरे, यज्ञमधिकृत्य व्याख्यातचरम्।

भवन्ति चात्रास्माकम्—

महामखो विष्णुरनन्तबोधो जङ्गञ्जगद्दोषगणेन युञ्जन्।
चयप्रकोपप्रशमांश्च कुर्वन् यज्ञायते विश्वमिदञ्च सर्वम् ॥२८८॥
शीतोष्णसाम्यैरवनेः प्रदेशा वसन्तसन्तापगुणान् वहन्तः।
पृथग्विभक्तौषधिवर्गजातान् विकास्य पुष्पैरथवा फलैश्च॥ २८९॥
महामखत्वं हि महामखस्य व्यवस्थया यत्र वितानवृद्धम्।
ब्रूते समस्तं न परं हि तस्मान् महामखो विष्णुरतोऽस्ति शीतः ॥२९०॥

एवं सर्वत्र पशुपक्षिवनस्पत्यादिषु योजनीयम्। न हि सर्वं वनस्पत्यादिकं, सर्वदोद्भवति, पाकमुपैति च। दोषगणेन=दोषत्रयेण।

नक्षत्रनेमिः—४४०

नक्षत्रनेमिरिति—णक्ष गतौ भौवादिको धातुः "णो नः" इति णस्य नत्वे "अमिनक्षियजिवधिपतिभ्योऽत्रन्" इत्यौणादिकोऽत्रन् प्रत्ययो, नक्षत्रम्। नेमिः—णीञ् प्रापणे धातुर्भौवादिको "णो नः" इति णत्वे "नियो मि"रित्यौणादिको निप्रत्ययो गुणो नेहानिट्त्वात्। नेमिर्नयति प्रापयतीत्यर्थः। नक्षत्रस्य नेमिर्नक्षत्रनेमिः। यद्वा न क्षरति क्षीयते "नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु" पा० ६।३।७५ इति निपातनान्नक्षत्रम्। एवञ्च नक्षत्रात्मकस्य ज्योतिषो

यही कथन श्लोकों में इस प्रकार संगृहीत है—

परस्पर प्रतिद्वन्दी जगत् को त्रिदोष से युक्त करके, त्रिदोष का सङ्घात प्रकोप तथा शान्ति करता हुआ अनन्त ज्ञान महामख नामा विष्णु स्वयं यज्ञस्वरूप इस विश्व को भी यज्ञ स्वरूप ही बनाता है।

सर्दी गर्मी तथा इन दोनों की समानता से विभिन्न औषधियों के वर्ग से उत्पन्न हुए शीत तथा उष्ण गुणों को धारण करते हुए भूप्रदेश पृथिवी के भिन्न भिन्न स्थान खिलाये हुये पुष्पों तथा फलों के द्वारा तथा सुव्यवस्थित यज्ञों के विस्तार से सम्पन्न सम्पूर्ण जगत् उस महामख की महाखमता को बतला रहा है। उससे बड़ा और किसी के न होने से भगवान् विष्णु ही महामख है।

नक्षत्रनेमिः—४४० समस्त नक्षत्रों के केन्द्र स्वरूप।

नक्षत्र शब्द णक्ष गत्यर्थक भ्वादिगण की धातु से उणादि अत्रन् प्रत्यय करने से बनता है तथा नेमि शब्द णीञ् प्रापणे धातु से उणादि मि प्रत्यय होने से बनता है। नक्षत्रों का नेमि यह षष्ठी तत्पुरुष समास होकर नक्षत्रनेमि शब्द सिद्ध हुआ।

अथवा न क्षरति क्षीयते वा इस अर्थ में "नभ्राडित्यादि" सूत्र से नक्षत्र शब्द का निपातन किया गया है।

जगतो नियामकत्वान्नक्षत्रनेमिः। सर्वदा गतिशीलमेतज्जगत् भ्राम्यदपि यन्निबद्धं स्वपरिधितो न विपर्येति। यथा सर्वथा भ्राम्यन्तोऽपि रथचक्राङ्गा अरा नेमिनिवद्धा नेमिं परित एव भ्राम्यन्ति, न तु परिधीनतिवर्तन्ते। यथा वोत्तमाङ्गस्थानीयज्ञानकेन्द्र-निवद्धानीन्द्रियाणि न स्वस्थानतो विचलन्ति। तथा केन्द्रस्थानीये नेमिरूपे भगवति निवद्धमेतन्नक्षत्रं जगदासर्गात् सर्गान्तिमक्षणं यावन्न किञ्चिदपीतस्ततो विचलति, किन्तु स्वपरिधावेव सुव्यवस्थितञ्चलति, सोऽयन्नक्षत्रनेमिर्विष्णुरिति। स्वाध्याय-ब्राह्मणेऽपि श्रूयते—

नक्षत्रतारकैः सार्धं चन्द्रसूर्यादयो ग्रहाः।
वायुपाशमयैर्वन्धैर्निबद्धा ध्रुवसंज्ञिते॥

स्वाध्यायब्राह्मणे शिशुमारवर्णनप्रस्तावे—

"विष्णुं हृदय"मिति वर्ण्यते, शिशुमाराकृतिवन्नाक्षत्रञ्जगत् तत्पुच्छे ध्रुवमतो ध्रुवं नक्षत्रमपि ध्रुवसंज्ञया व्यवह्रियते।

भवति चात्रास्माकम्—

नक्षत्रनेमिर्भगवान् स विष्णुर्व्यवस्थया नह्यति नेमिभूतः।
नक्षत्रताराग्रहमण्डलानि ध्रुवे निबद्धानि च तानि तेन॥२९१॥

नक्षत्रनेमि शब्द का समुदित अर्थ यह हुआ-नक्षत्ररूप जगत् का जो नियामक है अर्थात् जिस नेमिरूप भगवान् में वंधा हुआ यह सकल जगत् अपनी मर्यादा को न छोड़कर सुव्यवस्था से चल रहा है वह है नक्षत्रनेमि। जैसे रथ के चक्र के आरे अपनी नेमि नाभि में वंधे हुए अपनी परिधि का अतिक्रमण नहीं करते अथवा जैसे मस्तिष्क में केन्द्रभूत ज्ञान में वंधी हुई इन्द्रियां अपने स्थान से विचलित नहीं होती इसी प्रकार केन्द्रस्थानीय नेमिरूप भगवान् में वंधा हुआ यह सकल जगत् सृष्टि से प्रलय तक क्षण मात्र भी इधर उधर न होकर अपनी परिधि में व्यवस्था से चल रहा है। इसलिये भगवान् विष्णु ही नक्षत्रनेमि है। स्वाध्याय ब्राह्मण भी इस में प्रमाण है-—जैसे नक्षत्र तारों सहित, चन्द्र और सूर्यादि ग्रह वायु रूप पाशों से ध्रुव में बंधे हुए है। स्वाध्याय ब्राह्मण में शिशुमार चक्र का वर्णन करते हुए विष्णु को हृदय या सम्पूर्ण जगत् का केन्द्र बताया है क्योंकि सकल जगत् का संचालन वहीं से होता है तथा शिशुमार चक्राकार नक्षत्र जगत् जिस नक्षत्र की पूंछ में बंध कर ध्रुव स्थिर हो रहा है उस नक्षत्र का नाम भी ध्रुव है।

भाष्यकार ने श्लोक द्वारा भावार्थ यों व्यक्त किया है—

जगत् को अपनी व्यवस्था से बांधकर नियम से चलाता हुआ भगवान् विष्णु ही नक्षत्र-नेमि है। क्योंकि नेमि रूप भगवान् में यह सब कुछ बंधा हुआ स्थिर है तथा भगवान् विष्णु ने ही नक्षत्र, तारा गण और ग्रह मण्डल को ध्रुव में बांध कर नियन्त्रित कर रक्खा है जिससे कि वे अपनी मर्यादित गति से इधर उधर नहीं जा सकते।

नक्षत्री—४४१

नक्षत्रीति—नक्षत्रशब्दो व्युत्पादितचरः। तस्मान्मत्वर्थीय "अत इनिठना-विति" पा० ५।२।११५ सूत्रेण इनि-प्रत्यये "यस्येति चे"त्यकारलोपे "सौ च" पा० ६।४।१३ इति दीर्घे नक्षत्रीति। यद्धि यस्य स्वं भवति, स तेन तद्वान् भवति। स तेन क्षेत्रेण क्षेत्रीत्युच्यते। शरीरेण स्वेन शरीरीत्युच्यते। एवं चन्द्रो नक्षत्राणाम-धिपतिर्नक्षत्राणि तस्य स्वमिति स नक्षत्री। मनः शरीरे नक्षत्रं तस्य व्यवस्थापकत्वेनाधिपतिरात्मा स नक्षत्री। तथेदं विश्वं नक्षत्रं तस्य व्यवस्थापकोऽधिपतिरात्मभूतो विष्णुर्नक्षत्री।

वेदेऽपि "सूर्य-आत्मा जगतस्तस्थुषश्चे"त्युक्तं सूर्यस्य विष्णुरूपत्वात्। एवं लोकदर्शं विविधमूहनीयम्।

भवति चात्रास्माकम्—

नक्षत्रलोकस्य यतोऽस्ति शम्भुर्विधायकोऽतः कथितः स तद्वान्।
देहे मनः सर्वशरीर आत्मा विराजते तस्य पदं दधानः ॥२९२॥

तद्वान्-नक्षत्रवान्-नक्षत्रीति समानं भवति।

क्षमः—४४२

क्षमूष् सहने भौवादिकस्तस्मात्पचाद्यच्। क्षमः। क्षमते समर्थो भवति,

---

नक्षत्री—४४१ चन्द्ररूप

नक्षत्र शब्द का व्याख्यान नक्षत्रनेमि शब्द में हो चुका। नक्षत्र शब्द से मत्वर्थ में इनि प्रत्यय होकर नक्षत्री शब्द बनता है।

जो वस्तु जिसकी होती है उस वस्तु से वह उस वस्तु वाला कहा जाता है। जैसे जिसके पास क्षेत्र 'जमीन' है तो वह क्षेत्री "जमीदार" कहा जायेगा। शरीर आत्मा की अपनी वस्तु हैं तो आत्मा शरीरी कहा जायेगा। नक्षत्र मण्डल का स्वामी चन्द्र है, तो चन्द्र नक्षत्री कहा जायेगा। इसी प्रकार शरीर में ज्योतिरूप मन नक्षत्र है उसका अधिपति आत्मा नक्षत्री है। एवं यह सकल जगत् नक्षत्र है। इसका व्यवस्थापक परमात्मा नक्षत्री है। वेद में भी सूर्य रूप विष्णु को जङ्गम, स्थावर रूप जगत् का आत्मा कहा है। इस प्रकार और भी कल्पनाएं कर लेनी चाहिये।

भाष्यकार के श्लोक का भावार्थ इस प्रकार है—

नक्षत्र लोक भगवान् का अपना है क्योंकि नक्षत्र मण्डल को उसी परमेश्वर ने बनाया है इसलिये वह नक्षत्री है। तथा देहस्थित मन तथा सब शरीरों का स्वामी विराजमान आत्मा नक्षत्री है।

क्षमः—४४२ समस्त कार्यों में समर्थ।

क्षमूष् सहने भ्वादि धातु से अच् प्रत्यय होकर, क्षम शब्द सिद्ध होता है जिसका अर्थ

व्यवस्थावद्धं जगच्चालयितुम्। कर्तुमकर्तुमन्यथा कर्तुं वा सर्वथा अचिन्त्यापरिमेय-शक्तित्वात्, स क्षमः।

अथवा—क्षमा नाम कृतापराधेषु दुर्बलेष्वपि, स्वतो न्यूनबलेष्वपि क्रोधानाविष्करणम्, सा अस्यास्ति स क्षमः, मत्वर्थीयोऽच्। दृश्यते च, क्षमा नाम गुणस्तस्मिन्, यन्नाम सदुपदिष्टं वेदमार्गमतिक्रम्य कुपथप्रवर्तमानमपि जीवलोकं तदनुरूपफलदानेन विशोध्य, सर्वदोन्निनीषुर्न च तस्मै क्रुध्यति, तमुपेक्षते च।

सूर्योपि क्षमो, यतो हि स भगवता विष्णुना, विश्वेषां कर्मसाक्ष्ये नियुक्तः, सर्वदा नैरन्तर्यगमनजन्यं खेदं, पृथिव्याकर्षणजन्यञ्च खेदं सहते; न चोपैति विश्रान्तिं जात्वपि। पृथिवी क्षमा, क्षमते सहते महान्तं भारमिति कृत्वा। शरीर आत्मापि क्षमः, यतो हि स यावदायुः शरीरसम्बद्धः शरीरं सुखदुःखादिरूपं विकारजातं सहते। अत्र सर्वत्र जगति भगवता क्षमनाम्ना विष्णुना स्वकीयः क्षमत्वरूपो गुणो व्यापितः, व्यापकत्वात्स्वस्य।

मन्त्रलिङ्गञ्च—

"नाक्षस्तप्यते भूरिभारः।" ऋक् १।१६४।१३

भवति चात्रास्माकम्—

क्षमः स विष्णुः प्रवितत्य विश्वं क्षमत्वधर्मेण जगच्च युञ्जन्।
स्वयं क्षमः सन् सहते ह सर्वं जगत्क्षमं तं पदशोऽनुयाति॥२९३॥

पदशः=प्रपदमिति।

होता है अपनी ईश्वरीय व्यवस्था के अनुसार जगत् के चलाने में जो अतुल शक्ति वाला होने से समर्थ है। सूर्य का नाम भी क्षम है। क्योंकि वह जगत् के कर्मों का साक्षी होकर निरन्तर चलता हुआ तथा पृथिवी का आकर्षण करके अपने ध्रुव में रखता हुवा कभी भी खेद का अनुभव नहीं करता और न कभी विश्राम करता है। पृथ्वी का नाम भी क्षमा है क्योंकि वह बहुत बड़े भार को सहन करती है। आत्मा का नाम भी क्षम है, क्योंकि वह आयु पर्यन्त शरीर से सम्बद्ध होकर 'मिलकर' शरीर सम्बन्धी सुख दुःखादि विकार को अपना समझकर सहता है। वस्तुतः सभी पदार्थ क्षम है क्योंकि वे सब अपने २ विषय में होनेवाले शीतोष्णादि विकारों को सहते हैं। भगवान् का क्षम रूप गुण सभी पदार्थों में व्याप्त है। इस अर्थ की पुष्टि में "नाक्षस्तप्यते भूरिभारः" मन्त्र प्रमाण है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार कहा है—

भगवान् विष्णु ने विश्व को विस्तृत करकें उस में अपने क्षमत्व गुण का विधान किया है। इसलिये जैसे भगवान् सहन करने से क्षम है इसी प्रकार विश्व भी क्षम है।

क्षामः—४४३

क्षाम इति—क्षै क्षये भौवादिको धातु "आदेच उपदेशेऽशिति" पा० ६।१।४५ सूत्रेणैच आत्वम्। "गत्यर्थाकर्मकेति" पा० ६।१।४५ कर्तरि क्तः। "क्षायो मः" पा० ८।२।५३। इति तकारस्य मकारः। अनिट् क्षाम इति साधुः। यद्वा क्षायन्ति विलीयन्तेऽस्मिन्नित्यधिकरणे क्तः "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" पा० ३।४।७६ इति सूत्रेण। एवञ्च य एतस्मिन् विश्वेऽन्तर्लीनस्तिष्ठति सर्वं व्याप्य, यस्मिन्वेदं विश्वं प्रलीयते, यथासमयमित्युभयथापि, क्षामशब्दोऽन्वर्थो भवति।

इदं विश्वं नामरूपात्मकं, वैविध्यं विहाय, यदा विलीयते, तदा मूलरूपतामापन्नो यस्तिष्ठति, स क्षामो विष्णुः। स एवास्मिन्नशेषे विकारजाते जगदात्मके क्षीणेऽवशिष्यते उच्छिष्ट इव निर्विशेषरूपणेति, सम्यगुक्तो भवति क्षामः। यथा कश्चिन्मनुष्यः, क्षयमापद्यमानान् स्वारम्भानवलोकयन्नपि स्वयं क्षामस्तिष्ठति स्वारम्भमूलत्वात्, न तु जहात्युत्साहमिति। एवमेव वृक्षमूलं स्वोपरितनै शाखाप्रशाखादिगणे निकृत्तेऽपि क्षाम इव वर्तमानः पुनः सति समये सत्सत्तः शाखादीन्याविर्भावयति।

एवं विश्वव्यापित-क्षामत्वगुणो भगवान् क्षाम इत्युच्यते। दृश्यते च लोकेऽपरथापि, यथा-प्रियतमेषु स्त्रीपुत्रादिषूपरतेषु कश्चित्कुलप्रधानः पुरुषः क्षायति, ग्लानः

क्षामः—४४३ समस्त विकारों के क्षीण हो जाने पर परमात्म-भाव से स्थित।

क्षै क्षये भौवादिक धातु से कर्ता या अधिकरण में क्त प्रत्यय होने से और प्रत्यय के तकार को मकार होने से क्षामः शब्द बनता है। इस प्रकार जो विश्व में लीन अर्थात् छिपा हुवा सा है अथवा जिस में यह सकल जगत् विलीन अर्थात् समाया हुवा है ये दोनों ही अर्थ इस क्षाम शब्द के सङ्गत हैं। यह नाम-रूपात्मक जगत् जब अपने नानात्व को छोड़कर अपनी मूल अवस्था को प्राप्त होता है, तब जो उच्छिष्ट शेष रहता है वह ही क्षाम है। भगवान् विष्णु का नाम क्षाम है क्योंकि इस जगद् रूप विकार समूह के समाप्त होने पर वह ही एक शेष रहता है।

लोक में भी ऐसा ही देखने में आता है। जैसे कोई मनुष्य अपने कार्यों को नष्ट होते हुए देखकर भी स्वयं कार्यों का मूल होने से क्षाम बनकर रहता है, किन्तु उत्साह को नहीं छोड़ता। इसी प्रकार वृक्ष अपने ऊपर के शाखा प्रशाखा आदि के कट जाने पर भी अपने आप क्षाम की तरह स्थित रहता है, समय आने पर फिर शाखा आदिकों को उत्पन्न करने में लग जाता है। क्योंकि वह स्वरूप से सत् है।

इसी प्रकार भगवान् भी क्षाम है और उन्हीं का क्षामत्व जगत् में व्याप्त है, जिससे सारा जगत् ही क्षाम है।

दूसरे प्रकार से भी लोक में देखा जाता है जैसे कोई कुल में प्रधान पुरुष अपने अत्यन्त प्रिय स्त्री पुत्रादि के देहान्त से शोकग्रस्त होकर क्षाम "कृश" हो जाता है और फिर पुत्रादि

सन् कृशतां याति, पुनश्च प्रयतते, पुत्रादीनधिगन्तुम्। तथा भगवानपि जगति प्राप्तेऽवान्तरप्रलयं, पुनश्चिकीर्षुस्तावत्कालं क्षाम उच्यते।

भवति चात्रास्माकम्—

क्षामः स्वयं सर्वमिदं विधाय विष्णुः स्वयं तत्कुरुते क्षयार्हम्।
पुनश्चिकीर्षुं समयेऽन्तराले क्षामेति नाम्ना कवयः स्तुवन्ति ॥२६४॥

श्रूयते च, यच्छिशुमाराकृतेरस्य तारागणस्य क्षयेऽपि, चतुर्नक्षत्रसंयुक्तो, ध्रुवस्तारा तिष्ठति, स ध्रुवः क्षामः, क्षामो वा ध्रुव इत्युक्तो भवति।

उक्तं विष्णुपुराणेऽपि—

तारकाशिशुमारस्य नास्तमेति चतुष्टयम्।

विष्णुपुराणे २।९।५; १।११।६६

यावन्मात्रे प्रदेशे तु, मैत्रेयावस्थितो ध्रुवः।
क्षयमायाति तावत्तु भूमेराभूतसम्प्लवः॥

वि० पु० २।८।९१।५

समीहनः—४४४

समुपसर्गपूर्वं, ईह चेष्टायां धातुर्भौवादिकस्तस्मात्-णिच् ततो "नन्दिग्रहीत्यादिना कर्तरि ल्युप्रत्ययः। ल्युड्वा बाहुलकात्, योरनो णिलोपः। समीहनः। एवञ्च, सम्यक् चेष्टयति प्रजाः कर्मसु। सम्यक् चेष्टते वा जगद्रचने, कर्मफलप्रदाने चेत्युभय-

---

प्राप्ति के लिये प्रयत्न करता है। इसी प्रकार भगवान् भी जगत् के अवान्तर प्रलय होने पर फिर से सृष्टि करने तक या सृष्टि की इच्छा करने तक बीच के समय में क्षाम के समान होने से क्षाम कहलाते हैं।

भाष्यकार ने श्लोक द्वारा इस कथन का संकलन इस प्रकार किया है—

भगवान् विष्णु इस जगत् को बनाकर फिर इसका क्षय कर देता है और जब पुनः सृष्टि बनाना शुरु करता है, इतने तक के बीच के समय में विद्वान् उस को क्षाम नाम से कहते हैं।

सुना जाता है कि शिशुमार चक्राकार इस तारा गण के क्षय होने पर भी चार ४ नक्षत्रों सहित ध्रुव तारा शेष रहता है।

विष्णु पुराण में भी कहा है—तारकाशिशुमारस्य नास्तमेति चतुष्टयम्।

और भी वहीं पर—यावन्मात्रे प्रदेशे तु इत्यादि कहा है।

समीहनः—४४४ सृष्टि आदि के लिये भली भांति चेष्टा करनेवाला।

ईह चेष्टायां धातु है, भ्वादिगण की और सम् उपसर्ग है। नन्दिग्रहिपचादि सूत्र से कर्ता में ल्यु वा बाहुलक से ल्युट् करने से समीहन शब्द सिद्ध होता है। उक्त प्रकार से जो प्रजा को अच्छी प्रकार कर्म में लगाता है अथवा स्वयं जगत् की रचना या कर्मफल देने में अच्छी प्रकार

था सङ्गतार्थः। अस्य च भागवतस्य रचनात्मकस्य गुणस्य, प्रजास्वप्यन्वयः। यतो हि, न केवलं मनुष्यस्यापि तु सर्वस्यापि प्राणिनः, स्वसन्तानतन्तुविताने सार्वकालिकी समीहा नैसर्गिकी। अत एव चतुर्भेदभिन्नं सर्गं विदधज्जीवोऽपि समीहनः। सूर्योऽपि समीहनो, यतो हि स समीहते, उदयास्ताभ्यां लोकलोकान्तरेभ्य, आत्मानं दर्शयितुं कारयितुञ्च कर्माणि। स्वयं वा जीवलोकः, स्वात्मभूतं सूर्यं पौनः पुन्येन दिदृक्षुरिति जीवनशक्तिप्राप्त्यै।

मन्त्रवचनञ्च—

"सूर्यस्यावृतमन्वावर्ते।" यजु० २।३६

"यथेमे द्यावापृथिवी सद्यः पर्य्येति सूर्यः।" अथर्व० ६।८।३

इत्यादि।

भवति चात्रास्माकम्—

समीहनो विष्णुरिहास्ति गीतः कर्तुं स विश्वं कुरुते समीहाम्।
तथैव जीवः कुरुतेऽनुयानं समीहमानः पुरुरूपभूत्यै ॥२६५॥

पुरुरूपभूत्यै—बहुत्वभावाय। पुत्रपौत्रात्मकरूपेणेति। अनुकरणमनुयानमनुचलनमिति समानार्थकाः।

मन्त्रलिङ्गम्—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः। ऋ० १०।१९०।३

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतांगतिः।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥६१॥

४४५ यज्ञः, ४४६ इज्यः, ४४७ महेज्यः, च, ४४८ क्रतुः, ४४९ सत्रम्, ४५० सतांगतिः। ४५१ सर्वदर्शी, ४५२ विमुक्तात्मा, ४५३ सर्वज्ञः, ४५४ ज्ञानमुत्तमम्॥

से चेष्टा करता है। ये दोनों ही अर्थ समीहन शब्द के उचित हैं। भगवान् का रचनात्मक गुण संसार में भी व्यापक है। क्योंकि केवल मनुष्य की ही नहीं, किन्तु, प्रत्येक प्राणी की अपनी संतान के विस्तार में स्वाभाविक चेष्टा हर समय देखी जाती है। इसीलिये चार प्रकार के योनि भेद से चार प्रकार की सृष्टि करता हुआ जीव भी समीहन है। सूर्य भी समीहन है। क्योंकि वह सर्वदा उदय अस्त होता हुआ लोक-लोकान्तरों को अपने आप को दिखाने तथा कर्म करवाने के लिये चेष्टा करता है। लोक भी समीहन है क्योंकि यह जीवन शक्ति को प्राप्त करने के लिये अपने आत्मभूत सूर्य को बार बार देखने की चेष्टा करता है। इस अर्थ की पुष्टि में सूर्यस्यावृतमन्वावर्ते" इत्यादि याजुष वचन भी प्रमाण है।

भाष्यकार ने श्लोक में इस कथन को इस प्रकार व्यक्त किया है—

इस विश्व को पुनः पुनः बनाने की चेष्टा करने से भगवान् का नाम समीहन है। इसी प्रकार जीव भी सन्तान परम्परा से बहुत होने की चेष्टा करने से समीहन नाम वाला है। इसमें "सूर्याचन्द्रमसौ" इत्यादि मन्त्र प्रमाण है।

यज्ञः—४४५

यज्ञ इति—यज, देवपूजासङ्गतिकरणदानेषु, इति भौवादिकाद् धातोः "यजयाचयतविच्छप्रच्छरक्षो नङ्" पा० ३।३।९० सूत्रेण नङ् प्रत्ययः "स्तोश्चुना श्चुः" पा० ८।४।४० इति चुत्वेन नस्य ञः, सिद्धो यज्ञशब्दः। एवञ्चेज्यते, सङ्गम्यते, दीयते च यस्मा इति नानार्थो यज्ञशब्दः। स एव देवः, "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे"-त्युक्तलक्षणः सर्वैरिज्यते पूज्यते स्व-स्व-कर्मभिः। स एव प्राप्यते सर्वेषां मूलाधारत्वात्। तस्मिन्नेव सर्वैरेकीभूय स्थीयते। तस्मा एव च, सर्वभूतात्मभूताय दीयते, यत्किञ्चित्स्वं भवति, यतो हि सर्वेषामात्मैव प्रेष्ठः। अतो विष्णुरेव यज्ञशब्दवाच्यो "यज्ञो वै विष्णुरित्युक्तत्वात्। तै० सं० १।७।४। तथा च स एव विश्वान्तर्गतो विश्वं संयुनक्ति वियुनक्ति चेति संयोगवियोगलक्षणयज्ञतन्त्वनुस्यूतमिदं सर्वं विश्वं यज्ञमयम्।

मन्त्रलिङ्गञ्च—

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ यजु० ३१।७

इत्यादि।

भवति चात्रास्माकम्—

यज्ञात्मकं विश्वमिदं समस्तं यज्ञो ह विष्णुः कुरुते प्रयत्नात्।
संश्लेष-विश्लेषमयं हि विश्वं तस्मात्प्रचारार्थमिहैति सर्वम् ॥२९६॥

प्रचारार्थं=व्यवहारार्थम्। तस्मात्—विष्णोः।

यज्ञः—४४५ भगवान् विष्णु।

यज देवपूजा सङ्गतिकरण तथा दान अर्थवाली भ्वादिगण की धातु है इससे नङ् प्रत्यय और चुत्व करने से यज्ञ शब्द की सिद्धि होती है।

इस प्रकार से जिसकी पूजा या यजन किया जाये जिस को सर्व कर्मफल समर्पण रूप दान से प्राप्त किया जाये ये अर्थ यज्ञ शब्द के होते हैं। अथवा जिसमें सब एकीभूत होकर रहते हैं, वह यज्ञ है। प्रत्येक प्राणी का कर्म अपनी आत्मप्रीति के लिए होता है क्योंकि आत्मा ही सब को अत्यन्त प्रिय है। सब प्राणियों का आत्मा भगवान् विष्णु ही है। इसलिये सब कर्मों का फल उसी के लिये समर्पण किया जाता है इससे वही यज्ञ है। तैत्तिरीय संहिता में भगवान् विष्णु को ही यज्ञ नाम से कहा है, जैसे कि "यज्ञो वै सः"। सकल विश्व में व्यापक होकर भगवान् ही सब का संयोग या वियोग करता है। इसलिये संयोग-वियोग रूप यज्ञतन्तु से बन्धा हुआ सकल जगत् यज्ञमय है। इसमें "तस्माद्यज्ञा"दित्यादि मन्त्र भी प्रमाण है।

इसका भावार्थ भाष्यकार ने इस प्रकार श्लोक बद्ध किया है—

यज्ञरूप भगवान् विष्णु इस समग्र संसार को भी अपने सदृश यज्ञ रूप ही बनाता है। संयोग-वियोगरूप विश्व व्यवहार के लिये एक रूप भगवान् से प्रादुर्भूत होकर अनेक रूप में आजाता है।

इज्यः—४४६

इज्य इति—यजधातोः—"व्रजयजोर्भावे क्यप्" पा० ३।३।९८ "वचिस्वपियजादीनां किति" पा० ६।१।१५ इति सम्प्रसारणं यकारस्येकारः, "सम्प्रसारणाच्च" पा० ६।१।१०८ इति पूर्वरूपम्। कित्त्वाद् गुणाभावोऽदन्तलक्षणष्टाप्। दीर्घः। इज्याशब्दः साधुः। तत इज्यामर्हति "दण्डादिभ्यो यत्" इति यति प्रत्यये "यस्येति चे"त्याकारलोपः। "हलो यमां यमि लोपः" पा० ८।४।६४ इति प्रथमयकारलोपः, एवमिज्यः शब्दः सिध्यति। इज्यो यष्टुमर्हः। यजनं हि फलपूर्वकं, यजमानो यदा कञ्चिद् यियक्षते, तदा फलं पूर्वतोऽनुसन्धत्तेऽमुकदेवयजनेनेदं फलं प्राप्नुयामिति, यथावृष्टिकाम इन्द्रं, धनकामः कुबेरं, तथान्यान्यकामा अन्यान्यान् देवान्। तथा मनुष्योप्यधिकगुणः किञ्चित्कामै-रन्यैः। किन्तु यथा सम्यक्सिक्ताः शाखाः पत्राणि वा न फलदानसमर्था, अपि तु वृक्ष-मूले सिक्त एव फलावाप्तिः। तथा शाखास्थानीया लोकसर्गाङ्गभूतास्तदनुग्रह-लब्धसामर्थ्यास्तद्व्यवस्थाबद्धा इन्द्रादयोऽपि न स्वतः शक्तिमन्तस्तेषामपि तन्मूल-कत्वात्। अतो मूलसेक एव फलावाप्तिस्तस्मात्स एव यष्टुमर्ह इज्यो विष्णुरिति। यतो हि स एव सर्वेषामेको देवो यज्ञमयः। सर्वा वैदिकी वाक् तमिज्यमेव स्तौति, इज्य एवान्तर्लीना च भवति, यज्ञयोनित्वाद्वेदवाचः।

भवति चात्रास्माकम्—

इज्यः स विष्णुः सकलैषरणेन मन्त्रैः सकामैः किमु वाप्यकामैः।
नाम्नापि ह्व्यः स उ एक एव साम्नाऽथ गीत्या स्तुतिभिश्च सोऽर्हः ॥२९७॥

इज्यः—४४६ पूजनीय

देवपूजाद्यर्थक यज धातु से भाव में क्यप् सम्प्रसारण, पूर्वरूप टाबादि करने से इज्या शब्द सिद्ध होता है। इज्या शब्द से अर्हार्थीय यत् करने से इज्य शब्द बनता है, जिसका अर्थ है यजन, पूजा करने के योग्य। यदि कोई किसी का यजन या पूजा करना चाहता है तो पहले फल की इच्छा करता है। मुझे अमुक की पूजा से यह फल मिले जैसे वर्षा के लिये इन्द्र की पूजा, यश तथा धन के लिये कुवेर की। इसी प्रकार मनुष्य भी फल की इच्छा से अपने से अधिक सम्पन्न गुणवान् मनुष्य की पूजा करता है। किन्तु जैसे वृक्ष का मूल सींचे बिना केवल शाखा पत्रादि के सिञ्चन से कोई फल प्राप्त नहीं होता, उसी प्रकार सृष्टि के अन्तर्गत देवों तथा मनुष्यादिकों से इष्ट प्राप्ति असम्भव है। क्योंकि जगत् अपने मूल भगवान् के आश्रित है। अतः उसी के यजन से सर्वार्थ सिद्धि होती है। इसलिये वही इज्य या यजनार्ह है। क्योंकि वह सबका ही एक यज्ञस्वरूप देव है। सब वेद वाणी भगवान् इज्य की स्तुति करती हैं और अन्त में उसी यज्ञरूप इज्य में लीन हो जाती है। क्योंकि वेदवाणी की योनि "उद्गमस्थान" भगवान् ही है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार कहा है—

सकाम या निष्काम भाव से मन्त्रों के द्वारा भगवान् का ही यजन करना चाहिये। सब सामगान और लौकिक गीत मनुष्य की अभिवाञ्छित फलप्राप्ति के लिये बनाये गये स्तोत्रादि से

उक्तञ्च हरिवंशेऽपि—

ये यजन्ति मखैः पुण्यैर्देवतादीन् पितॄनपि।
आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते ॥ ३।४०।२०

महेज्यः—४४७

इज्या शब्दष्टाबन्तः पूर्वं व्युत्पादितो, महत आतिदेशिकः शतृवद्भावोऽतः स्त्रिया-मुगिल्लक्षणो ङीप्। ततो महती इज्या यस्येति बहुव्रीहौ "स्त्रियाः पुंवद्भाषित-पुंस्का"दित्यादिना (६.३.६४) पुंवद्भावः। ततो महतः सांहितिकमात्वम्। आद्गुणः। "गोस्त्रियोरुपसर्जनस्य' पा० १।२।४८ इति ह्रस्वे सिद्धो महेज्यः शब्दः। महेज्यो हि भगवान् विष्णुरुच्यते, यतो हि स जगन्निर्माणरूपं, तदन्तः प्रविश्य च, यथापेक्षं प्रतिक्षणं परिवर्तनरूपं महान्तं यज्ञं वितनुते। प्रकटयति च सर्वत्र स्वव्याप्तिम्। तथा हि प्रतिशरीरं वर्तमानानि, तदान्तराणि सूक्ष्माणि यन्त्राणि, यावन्मरणं नियतं कर्म कुर्वाणानि; व्यञ्जयन्त्यात्मनो नियामकं परेशम्। एवञ्च, यष्टव्यासु देवतास्वयमेव महतीमिज्यामर्हतीति महेज्य उच्यते। यच्चोक्तं "सर्वदेवमयो हि सः।" उक्तञ्चात्रैव "ध्यायन् स्तुवन् नमस्यँश्च यजमानस्तमेव चेति।" देवयज्ञादयः पञ्चमहायज्ञाः। औपसर्गादयः सप्त पाकयज्ञाः। अग्निहोत्रादयः सप्त हविर्यज्ञाः। अग्निष्टोमादयः सप्त सोमसंस्थाः।

उसी सर्वेश्वर का हवन होना चाहिये। हरिवंश पुराण में भी आया है—जो यज्ञों तथा पुण्य कर्मों से देवता पितरों का यजन करते हैं वे अपने से, अपने आत्मरूप विष्णु का ही यजन करते हैं।

महेज्यः—४४७

इज्या शब्द का व्युत्पादन प्रथम हो चुका है, इज्य शब्द में। इज्या शब्द का स्त्री-लिङ्गान्त महती शब्द के साथ बहुव्रीहि समास होने से महेज्य शब्द बन जाता है। महेज्य भगवान् विष्णु का नाम है। क्योंकि जगत् का बनाना तथा इसमें व्यापक होकर प्रतिक्षण परिवर्तन करना यह उसका महान् यज्ञ है और सब स्थानों में उसकी व्यापकता प्रकट हो रही है। जैसे प्रत्येक के शरीर में होनेवाले सिरा तथा नाड़ी रूप सूक्ष्म यन्त्र मरण पर्यन्त अपना अपना अधिकृत नियत कार्य करते हुए अपने नियन्ता परमेश्वर को प्रकट कर रहे हैं।

इसी प्रकार यजन के योग्य जो दूसरे देव हैं उन सब का भी नियामक होने से यही सब का परम पूजनीय है। कहा भी है कि 'सर्वदेवमयो हि सः" अर्थात् वह सर्वदेवरूप है। यहीं पर एक दूसरा वचन यह है कि मनुष्य उसी का ध्यान स्तवन तथा नमस्कार और यजन करता हुआ परम श्रेय को प्राप्त होता है। देवयज्ञादि पांच ५ महायज्ञ, औपसर्गादि सात ७ पाकयज्ञ, अग्निहोत्रादि ७ हविर्यज्ञ तथा अग्निष्टोमादि सात ७ सोमयज्ञ कहे जाते हैं।

भवति चात्रास्माकम्—

विष्णुर्महेज्यः कुरुते ह नित्यं विश्वं महत् संयजनेन तुल्यम्।
तथा यथा देहमिमं महेज्यो धात्वाशयैर्यन्त्रमयैर्विधत्ते ॥ २९८ ॥

क्रतुः—४४८

क्रतुरिति—डुकृञ् करणे तानादिकस्तस्मात् "कृञः कतुः" औणादिकः कतुः प्रत्ययः कित्वाद्गुणाभावः "इको यणचि" पा० ६।१।७७ इति यणादेशः क्रतुः।

क्रियत इति क्रतुर्यज्ञापरनामकं कर्मनाम। अथवा क्रियते येन ज्ञानेनेति ज्ञाननाम। ज्ञानपूर्वकं हि कर्म, ज्ञानरूपश्च भगवान् विष्णुः कर्माध्यक्षश्चेति विष्णुरेव क्रतुः। क्रतुर्हि भगवतो जगदिदं, जगदन्तरश्च विष्णुरपि क्रतु,र्घटानुस्यूता मृद् घटो, घटश्चापि मृदितिवत्। क्रतवो देवयज्ञादयः परिगणिताः। ते लौकिकाः क्रतवोऽपि भगवतो विष्णोरनुकरणमात्रमिति, तस्यैव महामहिम्नो गुणानुविधायिनः। नित्यं स्वकर्मकारित्वाद्विष्णुः क्रतुः।

भवति चात्रास्माकम्—

करोति नित्यं सवनं जनानां[1] करोति नित्यं मरणं जनानाम्[1]।
नित्यक्रियं विश्वमिदं समस्तं सर्गान्तमन्वेष्यति विष्णुगर्भम् ॥२९९॥

विष्णुगर्भं=विश्वमितिशेषः। १- जन्मिनाम्, चतुर्विधयोनिसम्भूतानाम्।

भाष्यकार ने श्लोक द्वारा भावार्थ निम्न रूप से प्रकट किया है—

भगवान् विष्णु ही महेज्य है क्योंकि वह जगत् रूप महायज्ञ का निर्माण करता है जैसे भगवान् यन्त्ररूप धात्वाशयों से इस शरीर रूप यज्ञ का निर्माण करता है।

क्रतुः—४४८ यूपसंयुक्त यज्ञस्वरूप।

तनादि गणपठित डुकृञ् करणे धातु से उणादि प्रत्यय होने पर क्रतु शब्द सिद्ध होता है। जो किया जाय वह क्रतु यज्ञ या दूसरे कर्म अथवा जिस ज्ञान के द्वारा किया जाय वह भी क्रतु है क्योंकि सब कर्मों का कारण या मूल ज्ञान ही होता है, विना ज्ञान के कर्म नहीं होता तथा ज्ञान रूप भगवान् विष्णु ही है इसलिये भगवान् का ही नाम क्रतु है। यह जगत् भगवान् का क्रतु है तथा अन्तर्यामिरूप से इसके अन्तःस्थित भगवान् भी इस का कारण होने से क्रतु है। कारण का ही धर्म कार्य में आता है। जैसे घड़ा मिट्टी है और मिट्टी ही घड़ा है। क्रतुओं का देवयज्ञादि रूप से पहिले गणन कर दिया है लौकिक यज्ञ भी भगवान् विष्णु का अनुकरण मात्र हैं। क्योंकि उसी का गुण इन में आया हुआ है। नित्य एक रूप से कर्मों का कर्ता होने से भगवान् ही क्रतु है।

इस आशय का पद्य द्वारा कथन इस प्रकार है—

जैसे प्राणियों का जन्म तथा मृत्यु सर्वेश्वर विष्णु का प्रवाह रूप में चलता हुआ अविच्छिन्न नित्य कर्म है, उसी प्रकार यह समस्त विश्व भी प्रलय तक निरन्तर कर्म करता हुआ क्रतु रूप भगवान् विष्णु का अनुकरण करता है तथा करता रहेगा।

सत्रम्—४४९

षद्लृ—विशरणगत्यवसादनेषु भौवादिको धातुः। षकारस्य सकारः। ततो "गुधृवीपचिवचियमिसदिदक्षिभ्यस्त्रः" इति त्र-प्रत्यय औणादिकः, अनिट्। "खरि च" पा० ८।४।५५। इति चर्त्वं दस्य तः सत्त्रम्। सत्रयतेर्वा विस्तारार्थकात्पचाद्यचि, लिङ्गन्तु नैकान्तिकम्, लिङ्गमशिष्यमिति भाष्यवचनात्।

एवञ्च सीदति गच्छति सर्वत्र, यद्वा, सत्रयते विस्तारयति विश्वमिति सत्रम्। वैष्णवगुणानुस्यूतत्वादत एव तद्गुणानुविधायित्वाद्विश्वमपि सत्रम्। यतो हि न हि सत्रात्मके वैष्णवे विश्वे, गतिमन्तरा किञ्चिदस्ति, गतिगुणस्य भगवतः सर्वत्र व्याप्तत्वात्। लोकेऽपि दृश्यते—हृदयं सत्रं सदा गतिं कुर्वन्नेव सत्रं विष्णुमत्ता राघ्नोति, स्थिरञ्च सिराभिः सर्वतो बद्धत्वात्। जलस्रवोऽपि सत्रं महास्रोतसाम्। एवं लोकदर्शं कल्पनीय तत्त्वविद्भिः।

भवति चात्रास्माकम्—

सत्त्रं स विष्णुः कुरुते हि सर्वं गत्यानुविद्धं प्रपदं स्थिरं तत्।
सिरानुविद्धं हृदयं स्थिरं सत् सत्रायते जीवयितुञ्च जन्तुम् ॥३००॥

मन्त्रलिङ्गञ्च—

ईशा वास्यमिदं सर्वं यत्किञ्चित् जगत्याञ्जगत्। यजु० ४०।१

जगत्याम्=गच्छन्त्याम्। जगत्=गतिमत्-इति।

सत्त्रम् ४४९— प्राणियों की रक्षा करनेवाला।

भ्वादिगणपठित षद्लृ विशरणगत्यवसादनेषु धातु से औणादिक त्र प्रत्यय होने पर सत्त्र शब्द बनता है। अथवा विस्तारार्थक चौरादिक सत्र धातु से पचाद्यच् करने से सत्र शब्द बन जाता है। इस प्रकार से जो सब जगह पहुँचा हुआ है अथवा सकल विश्व का विस्तार करता है वह सत्र है। क्योंकि विष्णु से निर्मित विश्व में ऐसा कोई पदार्थ नहीं है जिसमें गति न हो क्योंकि भगवान् का गतिरूप गुण सर्वत्र व्याप्त है।

लोक में भी देखने में आता है। हृदय सत्र है वह सदा गमन करता हुआ अपने में विष्णु की व्याप्ति को सिद्ध करता है तथा सब ओर से सिराओं से बंधा हुआ होने से स्थिर भी है। बड़े नदों के जल का बहाव 'बहना' भी सत्र है। इस प्रकार से लोक को देखते हुए कल्पनाएं करलेनी चाहियें।

भाष्यकार के पद्य द्वारा सार कथन इस प्रकार—

गतिशील भगवान् विष्णु सत्र है क्योंकि वह विश्व के प्रत्येक पदार्थ को अपने गति गुण से युक्त ही बनाता है तथा स्थिर भी रखता है। जैसे कि निरन्तर गमन करता हुआ भी हृदय सिराओं से बंधा हुआ होने से स्थिर है तथा प्राणियों के जीवन का हेतु सत्र है।

इस में "ईशा वास्य"मित्यादि मन्त्र भी प्रमाण है।

सतांगतिः—४५०

अस्तीति सत्—अस्तेश्शतरि षष्ठी विभक्तिः। गम्लृ-गतौ, भौवादिको धातुस्तस्मात्स्त्रियां कर्मणि क्तिन्। अनिट्। अनुदात्तोपदेशेत्यादि पा० ६।४।३७ सूत्रेणानुनासिकलोपः। सतां सृष्टिदशायां वर्तमानानां पञ्चभूतादीनां प्रकृतिकार्याणां गतिराश्रयः। सर्वदा तदाश्रितत्वात्प्रकृतेः। षष्ठीसमासोऽत्र, षष्ठ्याश्चालुक् विनाप्याक्रोश, न हि भगवत्याक्रोशावसरः। आक्रोशो निन्दावचनम्। सर्वं हि स्थावरजङ्गमात्मकं जगज्जन्ममृत्युभ्यामावर्तनशीलं, यो जायते स म्रियते, सार्वदिकमेतद् भ्रमणं, जन्ममृत्योः सर्वस्य। भ्रमणं गतिरावर्तनाख्या। यथा सूर्यादयो ग्रहा उदयास्ताभ्यां सदा गतिशीलाः। जीवः सन् जन्ममृत्युचक्रे निरन्तरं भ्राम्यति। किं बहुना गत्यनुविद्धाः सर्वे, गतिश्च भगवानेव सर्वेषामत उक्तं सतांगतिर्विष्णुः।

मन्त्रलिङ्गञ्च—

सूर्यस्यावृतमन्वावर्ते। यजु० २।२६

स्वस्ति पन्थामनुचरेम, सूर्याचन्द्रमसाविव। ऋ० ५।५१।१५

भवति चात्रास्माकम्—

यदस्ति लोके तदिहास्ति गच्छद् गतेर्विना तस्य च नास्ति सत्ता।
सतांगतिर्विष्णुरिदं विरच्य सम्भ्रामयन् मोहयतीह विश्वम् ॥३०१॥

सतांगतिः—४५० सत्पुरुषों के परम प्रापणीय स्थान।

अस्-भुवि धातु से शतृ प्रत्यय करने से सत् तथा गम्लृ-गतौ धातु से कर्म में क्तिन् प्रत्यय करने से गति शब्द सिद्ध होता है। षष्ठी समास तथा षष्ठी विभक्ति का लुगभाव होने से 'सतां गति' एक पद बन जाता है जो कि भगवान् विष्णु का नाम है। क्योंकि वह प्रकृति के पञ्चभूतादि नाना विकारों का आश्रय है अथवा गति देनेवाला है।

प्रत्येक स्थावर जङ्गमात्मक पदार्थ अपने जन्म तथा मृत्यु के द्वारा सदा भ्रमणशील है। चक्र की तरह घूमने का नाम आवर्तन है। सूर्यादि ग्रह भी अपने उदय तथा अस्त के द्वारा सदा भ्रमणशील हैं। यह जीव भी जन्म मृत्यु के चक्र में सदा घूमता रहता है। वस्तुतः प्रत्येक प्राणी ही गति से युक्त है। भगवान् विष्णु ही सब की गति है, इसलिये भगवान् का सतांगति नाम है। इसमें "सूर्यस्यावृतमन्वावर्ते" इत्यादि मन्त्र प्रमाण है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस रूप में व्यक्त किया है—

जो कुछ जगत् में दिखाई देता है वह सब गतिवाला है। ऐसा पदार्थ ही नहीं है जिसमें गति न हो। वह सतांगति भगवान् विष्णु इस विश्व को बनाकर चक्राकार से घुमाता हुआ मोहित कर रहा है।

सर्वदर्शी—४५१

सर्वं द्रष्टुं शीलमस्येति. सर्वशब्दो व्युत्पादितचरः। दृशिर् प्रेक्षणे भौवादिको धातुस्तस्मात्—"सुप्यजातौ णिनिस्ताच्छील्ये" पा० ३।२।७८ इत्यनेन णिनिः प्रत्ययः, गुणो रपरः। तत इन्नन्तलक्षणो दीर्घः।

ज्ञानचक्षुर्भगवान् विष्णुः, सर्वदा सर्वं विचष्टे स्वाभाव्यात्, अत एव स सर्वदर्शीत्युच्यते।

दृश्यते च लोके, अयं जीवः स्वकृताकृतं, ज्ञानेन वा नेत्रेण वा सहजस्वभावतः पश्यति।

मन्त्रलिङ्गञ्च—

"हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।" यजु० ३३।४३

भवति चात्रास्माकम्—

स सर्वदर्शी भगवान् वरेण्यः, पश्यञ्जगज्ज्ञानदृशा बिभर्ति।
सूर्यो यथा विश्वमिदं विचष्टे तथैव देही निजकर्मचक्रम् ।।३०२।।

विमुक्तात्मा—४५२

वि-उपसर्गो मोचनार्थको मुच्लृ धातुस्तौदादिकः। तस्मादविवक्षितकर्मकाद् "गत्यर्थाकर्मकेत्यादिना" कर्तरि क्तः प्रत्ययः। अनिट्। "चो कुः" पा० ८।२।३० इति कुत्वं कः। आत्मा शब्दो व्युत्पादितचरः। स्वरूपपर्यायोऽयमात्मा शब्दः।

सर्वदर्शी—४५१ समस्त प्राणियों को और उनके कर्मों को देखनेवाला।

सर्व शब्द की सिद्धि पहले दिखा चुके हैं। सर्व शब्द के योग से दृशिर् प्रेक्षणे धातु से ताच्छील्य अर्थ में णिनि प्रत्यय करने से सर्वदर्शी शब्द सिद्ध होता है। भगवान् का ज्ञान ही नेत्र है, वह उस ज्ञान रूप नेत्र से प्रतिक्षण सब को देखता है इसलिये उसका सर्वदर्शी नाम है।

हिरण्ययेन सवितेत्यादि मन्त्र इस में प्रमाण है। लोक में भी देखा जाता है कि यह जीव अपने द्वारा किए हुए या बिना किए हुए को नेत्र से वा ज्ञान से स्वभावतः देखता ही रहता है।

यह कथन पद्य में इस रूप से संगृहीत है—

वह श्रेष्ठ परमात्मा सर्वदर्शी है। वह जगन्नियन्ता सारे जगत् को देखता है। जैसे सूर्य इस विश्व को देखता है उसी प्रकार जीव भी अपने कर्मगणों को देखता है।

विमुक्तात्मा—५५२ सांसारिक बन्धन से रहित आत्मस्वरूप।

मोचनार्थक तुदादि गण पठित मुच्लृ धातु से कर्म की अविवक्षा में क्त प्रत्यय करने से मुक्त शब्द सिद्ध होता है। वि उपसर्ग है। विमुक्त शब्द का आत्मा शब्द के साथ बहुव्रीही समास करके विमुक्तात्मा शब्द बना है।

एवञ्च विशेषैः प्राकृतैर्गुणैर्नामरूपादिभिर्मुक्त आत्मा स्वरूपं यस्येति विमुक्तात्मा विष्णुः। प्रकृतिद्वारा जगतः कर्ताप्ययं प्रकृतिस्वरूपभूतैर्गुणैस्तथा तद्धर्मभूतैर्नामरूपादिभिश्च न निबद्धयते, सर्वदाकाशवन्निर्लेपरूपत्वादत एव विमुक्तात्मा विष्णुः।

यथा—कुम्भान् कुर्वाणोऽपि कुम्भकारो न तन्नामरूपादिषु समन्वेति। किन्तु निमित्तकारणत्वात्पृथगेव तिष्ठतीति।

मन्त्रलिङ्गञ्च—

"अत्यतिष्ठद्दशांगुलम्" यजु० ३१।१

भवति चात्रास्माकम्—

गीतो विमुक्तात्मपदेन विष्णुरन्तर्बहिश्चास्ति स वर्तमानः।
तथा यथा भूतविकारदेहादात्मा विमुक्तो निजलिङ्गभेदात् ॥३०३॥

यत्तुक्तं, निजलिङ्गभेदादिति—प्रत्येकं वस्तु वस्त्वन्तरात् स्वलक्षणविशेषेण, जातिगुणादिना भिद्यते, यथा घटपटाविति, न तयोर्योगः सम्भवति। ययोस्तु समाना जातिस्तयोस्तु सम्भवेदेव सम्बन्धो यथा परस्परं द्वयोः कम्बलयोरिति। भास्करोक्तं बीजगणितसूत्रञ्च "योगोन्तरं तेषु समानजात्योः"। विभिन्नजात्योस्तु पृथक् स्थितिः स्यात् पृथग्जात्योस्तु न कश्चित्सम्बन्धः सम्भवति। नायं देहाभिमान्यात्मा पाञ्चभौतिकः, पाञ्चभौतिकञ्चेदं शरीरमिति, भिन्नजातीयत्वात्कथमेतयोः सम्बन्धः स्यात्? अतः पृथक्सत्तत्वमेव विमुक्तात्मत्वम्।

जिसका अर्थ यह होता—है विशेषों प्राकृत विकारों से पृथक् है आत्मा=स्वरूप जिसका अर्थात् जो प्रकृति के भीतर अन्तर्यामीरूप से रहता हुआ भी प्रकृति से बंधा हुआ नहीं है किन्तु सर्वत्र व्यापक होकर भी आकाश की तरह निर्लेप है। जैसे घट शरावादिकों को बनाता हुआ भी कुम्हार अपने किये हुए घटादिकों के नाम तथा आकारादि से कोई सम्बन्ध नहीं रखता। कोई भी मनुष्य अपने कार्य के नाम तथा रूप से किसी प्रकार का सम्बन्ध नहीं रखता। क्योंकि भगवान् के पृथक्त्व गुण का सबसे सम्बन्ध है। इसमें—"अत्यतिष्ठद्दशांगुलमित्यादि" मन्त्र प्रमाण है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार व्यक्त किया है—

विमुक्तात्मा नाम भगवान् विष्णु का है। क्योंकि वह विश्व के अन्दर रहता हुआ भी विश्व से पृथक् है। जैसे शरीर के अन्तर्वर्तमान भी आत्मा अपने स्वरूप भेद से शरीर से भिन्न है।

भाष्यकार "निजलिङ्गभेदाद्" का स्पष्टीकरण इस प्रकार करते हैं:—एक वस्तु के दूसरी वस्तु से भिन्न होने का कारण उसका जाति गुण दि विशेष लक्षण है। जैसे घट और पट का कोई सम्बन्ध नहीं, क्योंकि ये दोनों भिन्नजातीय है। समान जाति वालों का सम्बन्ध होता है, जैसे दो समानजातीय कम्बलों का।

भास्करोक्त बीजगणित का यह सूत्र है—

"योगोन्तरं तेषु समानजात्योः" भिन्न जातियों का परस्पर कोई सम्बन्ध सम्भव नहीं,

केषाञ्चिन्मते निवृत्तात्मा, इत्यपि विष्णोर्नाम। तत्र निपूर्वो वृतु वर्तने भौवादिको धातुः। "गत्यर्थाकर्मके" त्यादिना कर्तरि क्तः "यस्य विभाषा" पा० ७।२।१५ इति नेट्। निवृत्तः पृथग्भूतः प्रकृतिविकारेभ्य आत्मा स्वरूपमस्येत्यर्थस्तु समान एव विमुक्तात्मनः।

सर्वज्ञः—४५३

सर्वज्ञ इति—ज्ञा अवबोधने, क्रैयादिको धातुः। तस्मात्सर्वोपपदात् "आतोऽनुपसर्गे कः" पा० ३।२।३ सूत्रेण कः प्रत्ययः। आतो लोप इटि चेत्यालोपः। सर्वज्ञः सर्वं जानातीति।

यो हि यस्य कर्ता भवति, स तद्विषयकं सर्वं जानाति, कार्यज्ञानमन्तरा न हि कर्तुं शक्यते कार्यम्।

यथा—यन्त्राणामाविष्कर्ता तथा प्रयोक्ता च, यन्त्रविषयकं सर्वं निर्माणविधिं प्रयोगविधिञ्च जानाति। यथा वा—पीडार्तः स्वांगे क्व कीदृशी चेति, सर्वं पीडाविषयकं वेत्ति। तथैव विष्णुरपि विश्वस्य, विश्वं गतिविधिं वेत्ति व्यवस्थाञ्चेत्यतः सर्वज्ञः। भवति चात्रास्माकम्—

स एव सर्वज्ञपदेन गीतो विष्णुः पुराणो भुवने शयानः।
यस्मिन् हि यत्तस्य स वेत्ति तत्त्वं विश्वं हि तस्मिन् स्थितिमेति यस्मात् ॥३०४॥

जैसे आत्मा और शरीर का। क्योंकि देहाभिमानी जीवात्मा, पञ्चभूतों का विकार नहीं है तथा शरीर पञ्चभूतों का विकार है। फिर इन दोनों का सम्बन्ध कैसे हो सकता है। पृथक सत्ता ही विमुक्तात्मा है अर्थात् जगत् में अन्तर्यामी रूप से रहते हुए जगत् से पृथक् रहना यही विमुक्तात्मा का लक्षण है। एवं विष्णु ही विमुक्तात्मा है। यहां किसी के मत में निवृत्तात्मा भी विष्णु का नाम है इसकी व्याख्या और अर्थ भी विमुक्तात्मा के समान है। इसमें नि उपसर्ग और वर्तनार्थक वृतु धातु से क्त प्रत्यय होने से निवृत्त बना है। शेष सब पूर्ववत् है।

सर्वज्ञः—४५३— सब को जानने वाला।

क्र्यादि गण की अववोधनार्थक ज्ञा धातु से, कर्ता में क प्रत्यय तथा आकार का लोप होने से सर्वज्ञ शब्द सिद्ध होता है। जो सब जानता है, जो जिस कार्य का बनाने वाला या करनेवाला है वह उस कार्य के विषय का पूर्ण जानकार होता है। क्योंकि जिसको कार्य का ज्ञान नहीं वह उस कार्य को नहीं कर सकता। जैसे यन्त्रों मशीनरियों का बनाने वाला या उनको प्रयोग में लानेवाला अपने २ विषय के बनाने या प्रयोग करने का पूरा जानकार होता है अथवा जैसे रोगी अपने शरीर में होनेवाली पीड़ा या दुःख को किस अङ्ग में कितनी पीड़ा है अच्छी प्रकार जानता है। इसी प्रकार भगवान् विष्णु भी अपने कार्य विश्व की सम्पूर्ण गतिविधि को जानता है। इसलिये वह सर्वज्ञ है।

यही पद्य द्वारा इस रूप में संगृहीत है—

विश्व में व्यापक भगवान् विष्णु अपने में रहनेवाले इस सकल विश्व का पूर्ण ज्ञाता है। क्योंकि जो जिसमें रहता है वह उस तत्त्व का जानकार होता है। अर्थात् अपने अन्दर रहनेवाली वस्तु का जाननेवाला होता है। यह सकल विश्व विष्णु के उदर में विराजमान

मन्त्रलिङ्गञ्च—

"तस्मिन्ह तस्थुर्भुवनानि विश्वा" यजु० ३१।१९

ज्ञानमुत्तमम्—४५४

ज्ञा अवबोधने, क्रैयादिको धातुस्तस्मात्करणे नपुंसके भावे वा ल्युट् चेति पा० ३।३।११५ सूत्रेण ल्युट् अनादेशे च ज्ञानमिति, एवञ्च ज्ञायतेऽनेनेति ज्ञप्तिर्वा ज्ञानम्। उत्कृष्टवाची। उच्छब्दस्तस्मादतिशायने तमप्प्रत्ययः। चर्त्वं दस्य तः। सविशेषणकं नामैतज्ज्ञानमुत्तममिति।

एवञ्च ज्ञानसाधनं, ज्ञानफलञ्च ब्रह्मैवामोघज्ञानं सर्वज्ञानातिशायि। यतो हि सर्वत्र विभक्तेषु भूतेष्वनुस्यूतं तद्भागवतं ज्ञानं साधनतां प्रतिपद्यते, ज्ञेयं च ज्ञानरूपं ब्रह्मैवातः फलमपि तदेव। प्राणिज्ञानं हि सर्वत्र जगद्वैचित्र्येण ह्रियते, न तथा भगवज्ज्ञानमिति सर्वत उत्तमज्ञानं ब्रह्मज्ञानमुत्तममुच्यते।

अत एवोक्तं वेदे—

"सूत्रं सूत्रस्य यो वेद, स वेद ब्राह्मणं महत्" अथर्व० १०।८।३७

दृश्यते च लोके, जीवसद्भाविनि शरीरे, ज्ञानोत्पादकानि शरीरयन्त्राणि, ज्ञानमुत्पादयन्ति, निर्गते च जीवे न ज्ञानोत्पादः। अतो ज्ञानानां किं ज्ञानमुत्तममिति प्रश्ने, वक्तुं युज्यत आत्मज्ञानमिति। अथ च लोकज्ञानापेक्षया, ब्रह्मज्ञानमेवोत्तममिति तदेव ज्ञेयम्।

है। इसलिये वह इसका पूर्ण ज्ञाता होने से सर्वज्ञ है। "तस्मिन्ह तस्थुरिति मन्त्र भी इसमें प्रमाण है।

ज्ञानमुत्तमम्—४५४. सर्वोत्कृष्ट ज्ञानस्वरूप।

अवबोधनार्थक क्र्यादिगण की ज्ञा धातु से करण में या नपुंसक भाव में ल्युट् प्रत्यय करने से ज्ञान शब्द बनता है। उत् यह अव्यय पद उत्कृष्ट श्रेष्ठ का वाचक है तथा उस में अतिशय अर्थ में तमप् प्रत्यय करने से उत्तम शब्द सिद्ध होता है। इसका अर्थ होता है—बहुत उत्कृट ज्ञान या ज्ञानवाला। व्याकरण प्रक्रिया के अनुसार जिसका ज्ञान कभी विफल नहीं होता तथा जिसका ज्ञान सबसे श्रेष्ठ है ऐसा ब्रह्म ही ज्ञान का साधन वा ज्ञान का फल है। प्राणियों का ज्ञान स्थान-स्थान पर प्रतिहत होता है, विफल होता है। किन्तु वैष्णव ज्ञान एकरस है वह कभी भी विफल नहीं होता, सदा सफल है। इसलिये उसको 'ज्ञानमुत्तमं' कहते हैं। इसलिये अथर्ववेद में कहा है कि जो उस ज्ञान भगवान् की ज्ञानवत्ता को जानलेता है, वह परब्रह्म को जान लेता है। लोक में देखा जाता है कि जब तक शरीर में जीव रहता है, तब तक सब शरीर के यन्त्र ज्ञान का प्रकाश करते हैं किन्तु जीव के निकल जाने पर नहीं। यदि कोई प्रश्न करे कि ज्ञानों में उत्तम ज्ञान क्या है तब यही उत्तर होगा कि आत्मज्ञान उत्तम है। इसलिये लौकिक ज्ञान की अपेक्षा ब्रह्म का ज्ञान उत्तम है। अतः ब्रह्म को ही जानना चाहिये।

भवति चात्राऽस्माकम्—

ज्ञेयं क्षितावस्ति जनेन किन्तत्? तस्यैव गूढस्य विशुद्धरूपम्।
ज्ञानोत्तमे ब्रह्मणि सत्यबोधे सत्यस्वरूपे निखिलं हि यस्मात् ॥३०५॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥६२॥

४५५ सुव्रतः, ४५६ सुमुखः, ४५७ सूक्ष्मः, ४५८ सुघोषः, ४५९ सुखदः, ४६० सुहृत्।
४६१ मनोहरः, ४६२ जितक्रोधः, ४६३ वीरबाहुः, ४६४ विदारणः ॥

सुव्रतः—४५५

सु शोभनार्थक उपसर्गः। व्रतिः सौत्रो धातुस्ततः "अज्विधौ भयादीनामुपसंख्यानम्—नपुंसकेत्यादिनिवृत्त्यर्थमिति पा० सू ३।३।५ वार्तिकेन भावेऽच्, शोभनं व्रतं नियमोऽस्यास्ति सुव्रतो विष्णुः। तथा हि, तस्य सुव्रतत्वेनानुस्यूतत्वं लोके प्रतिवस्तु दृश्यते। यथा आब्रह्मकीटान्तमामहावृक्षकतृणान्तं, तथा नक्षत्रग्रहोपेतं सौरमण्डलं, सर्वं सुव्यवस्थावद्धं सदस्ति कश्चिदस्य विश्वस्य व्यवस्थापको, नियन्ता सुव्रत इत्याख्याति। व्यवस्था चैषा प्रतिपदं लोके दृश्यते।

मन्त्रलिङ्गञ्च—

"सर्वं तदिन्द्र ते वशे।" यजुः ३३।८५
"इन्द्रो राजा जगतश्चर्षणीनाम्।" ऋक् ७।२७।३
"अग्ने! व्रतपते व्रतं चरिष्यामि।" यजुः २।२८

इति सुव्रतस्यानुकरणमाचष्टे।

भाष्यकार ने श्लोक द्वारा भावार्थ संकलन इस रूप में किया है—

विश्व में आकर मनुष्य किस को जाने? इसका उत्तर है कि विश्व को बनाकर विश्व में ही अन्तर्हित भगवान् सत्यरूप, सत्यज्ञान ज्ञानोत्तम के विशुद्ध रूप को जाने क्योंकि यह सकल जगत् उसी से उत्पन्न हुआ है। अपने आदिभूत कारण का ज्ञान ही श्रेष्ठ ज्ञान है।

सुव्रतः—४५५ प्रणत पालनादि श्रेष्ठ व्रतों वाला।

सु शोभार्थक उपसर्ग है तथा व्रत इस सौत्र धातु से भाव में अच् प्रत्यय करने से सुव्रत शब्द सिद्ध होता है। जिसका अर्थ है अच्छे नियमों वाला। लोक में प्रत्येक वस्तु में उसका सुव्रतत्व विशेष रूप से व्याप्त है। जैसे कि ब्रह्मा से लेकर चींटी पर्यन्त, बड़े वृक्ष से लेकर छोटे से छोटे तृण पर्यन्त तथा नक्षत्रों और ग्रहों सहित सूर्य मण्डल सुव्यवस्थित नियमबद्ध चलता हुआ प्रकट करता है कि विश्व का व्यवस्थापक तथा नियामक कोई सुव्रत है। भगवान् की व्यवस्था स्थान स्थान पर दीखती है। "सर्वं तदिन्द्र ते वशे" आदि मन्त्र भी इसमें प्रमाण है।

भवति चात्रास्माकम्—

स सुव्रतो विष्णुरमोघबोधो विश्वं नियच्छन् कुरुते व्रते तत्।
व्रती ह सूर्यो वशयंश्च विश्वं सु-सुव्रतं विश्वमतोऽस्ति सर्वम् ॥३०६॥

"विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे" यजुः १३।३३ इति च मन्त्रलिङ्गम्।

सुमुखः—४५६

खनु अवदारणे भौवादिको धातुस्तस्माद् "डित् खनेर्मुट् चोदात्तः" उणादि। इत्यनेनाच् अल् वा डित्-मुट् चोदात्तः, डित्त्वाट्टिलोपः, एवं मुखशब्दः सिध्यति। सु-शोभनं खननं यस्येति सुमुखः, शोभनं मनोहरं खननमवदारणं यः करोति स सुमुखो विष्णुः। यथा सजीवानां प्राणिनामोष्ठद्वयमध्यं विदीर्णं तथा तन्मध्ये सौषिर्यञ्च भवति भोजनमादातुं वक्तुं वा। एतदनुकरणमात्रं प्राकृतस्य समुद्रस्य। तथा हि—समुद्रः पृथिव्या मुखं, वाडवाग्निश्चातन्द्रितस्तत्र शेते। एतच्च महाखातमयं मुखं, सर्वं स्वान्तः समावेशयति। केनेदं खातमिति प्रश्ने, भगवता विश्वस्य कर्त्रा, विष्णुनेत्युत्तरमायाति, अतः स सुमुख उच्यते शोभनखानकः।

पूर्वोक्तस्य भावार्थज्ञानाय स्पष्टीकरणम्। यथा समुद्रात्मके खाते, जलादिबहु-वस्तुसद्भावस्तथा मुखेऽपि। तथा हि—मुखे मांसगर्तपिनद्धमूला दन्ता ग्रसिष्णु

यह कथन पद्य में इस तरह संकलित है—

अमोघ ज्ञानवाला भगवान् विष्णु ही सुव्रत है। वही सकल विश्व को वनाकर उसको अपने नियम में रखता है। भगवान् भास्कर भी सुव्रत है, क्योंकि वह भी विश्व को वश में रखता है तथा उस सुव्रत भगवान् की व्याप्ति से, यह सकल विश्व भी सुव्रत है। इस में "यतो व्रतानि पस्पशे" यह मन्त्र प्रमाण है।

४५६—सुन्दर और प्रसन्न मुखवाला।

खनु अवदारणार्थक स्वादिगण की धातु से उणादि अच् प्रत्यय तथा मुट् का आगम और टि का लोप होने से मुख शब्द की सिद्धि होती है। मुख शब्द का शोभनार्थ सु उपसर्ग के साथ बहुव्रीहि समास होने से सुमुख शब्द बन जाता है। सुमुख शब्द का अर्थ है, जिसका खनन अवदारण, 'खोदना' शोभन है, अच्छा है। विष्णु का नाम सुमुख है। जैसे सजीव प्राणियों का दोनों ओष्ठों का मध्य भाग विदीर्ण "फटा हुआ" होता है और उसमें भोजन करने के लिये एक छिद्र होता है। यह प्रकृति सिद्ध समुद्र का अनुकरण मात्र है। जैसे प्राकृत समुद्र में जो कि पृथ्वी का मुख रूप है, वाडवाग्नि सदा अतन्द्रित कार्यरत निवास करता है। इस महाखात रूप पृथ्वी के मुख में सब कुछ समाया हुवा है। यदि कोई पूछे कि यह किसने खोदा हे ? तब उत्तर मिलेगा, इस सकल विश्व के वनानेवाले भगवान् विष्णु ने। इसलिये वही अच्छा खनन करनेवाला विष्णु सुमुख है। ऊपर जो कुछ कहा है उसका स्पष्टीकरण इस प्रकार है। जैसे समुद्र रूप महाखात में जल के अतिरिक्त और वहुत वस्तुएं रहती हैं। जैसे मुख में मांस से बद्धमूल दांत तथा अन्नादि को खानेवाली जिह्वा रहती है।

जिह्वा च। एवं प्राणिमात्रस्य मुखं, तदीयं वैविध्यञ्च दृष्ट्वा ज्ञायते, प्राणिमुखं समुद्रात्मकं पृथिव्या मुखञ्चोभे समाने, तद्यथा समुद्रे जलस्रोतांसि, मुखे च, रसवाहिन्यः सूक्ष्मांकुरितसिरायन्त्रधमन्यश्च, समुद्रे यथा पर्वतास्तथा मुखे दन्ताः, समुद्रे यथा वीचयस्तथा मुखे राजिमयं काकुदमिति निदर्शनमात्रमुक्तं पथप्रदर्शनाय।

भवति चात्रास्माकम्—

विज्ञा विधिज्ञाः सुमुखं तमाहुः, समुद्रखातं बहुशश्च दृष्ट्वा।
तस्यानुयानं मुखमस्ति जन्तोर्मुखैस्तु तैर्गाप्यवरः स एकः ॥३०७॥

यथा समुद्रात्मके खाते सदा जलं, तथा मुखेऽपि जलदैवतका जिह्वा सदा विराजते। इत्युभयोः साम्यमिति।

सूक्ष्मः—४५७

सूच पैशुन्ये, कथाद्यन्तर्गतश्चुरादिः, ततो णिच् अतो लोपे सूचिः, ततः "सूचेः स्मन्" इत्युणादिः स्मन् प्रत्ययः सादिः "तितुत्रतथसिसुसरकसेषु च" पा० ७।२।६ इति नेट्। णेर्लोपः "चो कुः" पा० ८।२।३० इति चकारस्य कुत्वम्, "आदेशप्रत्यययोः" पा० ८।३।५६ सूत्रेण सस्य षत्वम् सूक्ष्मः। सूचयति ज्ञापयति-आत्मानमिति सूक्ष्मः। तथा हि सूक्ष्मा बुद्धिः, सूक्ष्मं मनः, सूक्ष्माणीन्द्रियाणीति, ज्ञानसाधनैः सर्वैरेभिः सूक्ष्मैः

इस प्रकार प्राणिमात्र के मुख तथा उस में विविध वस्तुओं के सद्भाव होने से जाना जाता है कि प्राणियों का मुख तथा पृथिवी का समुद्र रूप मुख दोनों समान हैं। जैसे समुद्र में जल के स्रोत होते हैं वैसे ही मुख में रस को वहन करनेवाली सूक्ष्म सिरायें तथा नाड़ियां होती हैं। समुद्र में जैसे पर्वत होते हैं वैसे मुख में दांत। समुद्र में जैसे तरङ्गें होती हैं वैसे ही मुख में रेखाओं वाला काकुद, जो जिह्वा के मूल में कुछ उठा हुआ सा स्थान है। यह मार्ग दिखाने के लिये दृष्टान्त मात्र है।

भाष्यकार ने श्लोक में भावार्थ इस प्रकार दिया है—

विद्वान् पुरुषों ने समुद्र रूप महाखात बड़े खुदे हुए स्थान को देख कर भगवान् को सुमुख कहा है क्योंकि समुद्र रूप महाखात ही उसका मुख है और यह जो प्राणियों का मुख है, केवल समुद्र का अनुकरण है। इसलिये मुखों से उसी एक सुमुख का गान स्तवन होना चाहिये।

जैसे समुद्र में जल सदा रहता है, उसी प्रकार मुख में जल देवता वाली जिह्वा रहती हैं। इसलिये दोनों की समानता है।

सूक्ष्मः ४५७— अणु से भी अणु।

पैशुन्यार्थक चौरादिक सूच धातु से स्मन् प्रत्यय तथा कुत्व और षत्व करने से सूक्ष्म शब्द सिद्ध होता है। जिसका अर्थ है जो अपने आप को सर्वत्र ज्ञापन करे "बताये" जैसे बुद्धि सूक्ष्म, मन सूक्ष्म, तथा इन्द्रिय सूक्ष्म, इन सब ज्ञान के साधनों की सूक्ष्मता से सूक्ष्म रूप से सर्वत्र गत अपने

सूक्ष्मरूपेण सर्वत्रानुगतं सूक्ष्मं स्वं सूचयतीति सूक्ष्मो विष्णुः। विश्वस्य सर्वं वस्तुजातं प्रतीन्द्रियबोधे किञ्चित्सूचयन्निव तं सूक्ष्ममाख्याति। मन्त्रलिङ्गञ्च—

"पश्य देवस्य काव्यं न ममार न जीर्यति।" अथर्वं० १०।८।३२

तद्विष्णोः परमं पदमित्यादि अव्यक्तस्य तस्याकाशात्मको महाभूतमव्यक्तं तत्र चाव्यक्त एव शब्दः श्रोत्रेन्द्रियग्राह्यः "दिशः श्रोत्रात्तथा लोकां अकल्पयत्" इति मन्त्रलिङ्गात्।

शब्दोऽपि द्विविधः—आहतोऽनाहतश्च, तत्रानाहतः प्राकृतः शब्दः स्वकर्तुः सूक्ष्मत्वं व्यनक्ति। यथा लोके शब्दः, शब्दकारिणं ख्यापयति, गोशब्दो गाम्, मनुष्यशब्दो मनुष्यमित्यादि। दूरस्थश्चक्षुर्विषयतामतीतोऽपि शब्देन व्यज्यते। एवं सूक्ष्मत्वगुणेन सर्वत्रानुगतः सूक्ष्मो विष्णुः।

भवन्ति चात्रास्माकम्—

स सूक्ष्मनामा भगवान् वरेण्यो, विष्णुः स्वयं सूचयते प्रसह्य।
जनाय बोधं निजमात्मरूपमनन्तगात्रेषु विराजमानम्॥३०८॥
एवं हि यो ना प्रपदे वशिष्ठं गुहाशयं पश्यति वीतशोकः।
स स्थूलभूतोऽपि शरीरयोगात्, सूक्ष्मायते सूक्ष्मविचारमग्नः॥३०९॥

आप को बोधित करता है, बतलाता है। इसलिये भगवान् सूक्ष्म है। विश्व की प्रत्येक वस्तु इन्द्रिय से होनेवाले ज्ञान के विषय में किसी गुप्त रहस्य को प्रकट करती हुई के समान उस सूक्ष्म का ही कथन कर रही है अर्थात् उस सूक्ष्म का ही बोध करवा रही है। "देवस्य पश्य काव्यं" तथा तद्विष्णोः परमं पदमित्यादि मन्त्रों से पूर्वोक्त विषय की पुष्टि होती है। उस अव्यक्त का प्रथम कार्य आकाश अव्यक्त है तथा उस में होनेवाला शब्द भी अव्यक्त अर्थात् सूक्ष्म है। जिसका श्रोत्रेन्द्रिय से ग्रहण होता है। दिशाओं की उत्पत्ति श्रोत्ररूप आकाश से है इस में "दिशः श्रोत्रात्तथा" मन्त्र प्रमाण है।

आहत और अनाहत भेद से शब्द भी दो प्रकार का है। उन दोनों में जो अनाहत है वह प्रकृतिसिद्ध अव्यक्त शब्द है वह अपने बनानेवाले की सूक्ष्मता को बताता है

जैसे लोक में शब्द, शब्द करनेवाले का ज्ञान करवाता है। जैसे उच्चारण किया हुआ गो शब्द अपने अर्थभूतगौ का अथवा गो पशु की अव्यक्त ध्वनि को सुनकर गो पशु का बोध होता है। इसी प्रकार मनुष्य के शब्द को सुनकर मनुष्य का बोध होता है। चक्षु से न दीखने वाले को भी शब्द से ज्ञान होता है। इस प्रकार सूक्ष्म रूप से सम्पूर्ण विश्व में व्यापक विष्णु सूक्ष्म नाम वाला है।

भाष्यकार ने श्लोकों का भावार्थ इस प्रकार किया है—

सब का प्रार्थनीय भगवान् सूक्ष्म नामा विष्णु अगणित इन्द्रियों में विराजमान अपने रूप को, बल से प्रत्येक प्राणी का बोध करवा रहा है।

इस प्रकार जो मनुष्य सांसारिक शोक से युक्त होकर पद पद पर हृदयाकाश रूप गुफा में स्थित सर्वेश्वर को देखता है। वह सदा सूक्ष्म का ही विचार ध्यान करता हुआ सूक्ष्म सा ही

विद्यामयोऽसौ न तिरोदधाति, रूपं निजं विश्वमयं हि तस्य।
विश्वं हि यो वेद स वेद विष्णुं तदेव सूत्रस्य च सूत्रमुक्तम् ॥३१०॥

वोधं=वोधस्वरूपम्। सूक्ष्मविचारमग्नः=किं सूचयतीति कृतावधानः। तत्=ब्रह्म।

सुघोषः—४५८

घुषिर् विशब्दने चौरादिकः। "घुषिरविशब्दने" पा० ७।२।२३ इति निष्ठायामिण्निषेधाल्लिङ्गादनित्यणिजन्तोऽयम्। ततो घञ्प्रत्यये लघूपधगुणे च घोषः। णिजन्ताद् "एरच्" इति भावेऽच्प्रत्यये तु णेर्लोपे उपधाया गुणो घोष इति। सुपूर्वो बहुव्रीहिः सुघोषः। पौनःपुन्येनोच्चार्यमाणः शब्दो घोषः, सवलमुच्चार्यमाणो वा। शोभनो घोषो यस्य स सुघोषः। अथवा शोभनं घुष्यते शब्द्यते सः, यतो हि सर्वत्र वेदे स एव तात्पर्यविषयत्वेनोपतिष्ठते। अथवा शोभन यथा स्यात्तथा घोष्यतेऽनेनेति करणे घञ्। एवञ्च महावलवता प्लुतस्वरेणोच्चार्यमाणेन 'ओ३म्' नाम्ना स प्रतिपदं घोष्यते, स्वपरमार्थभूतत्वादिति, सुघोषशब्दो ब्रह्मणि सङ्गतार्थः। स एष सुघोषः शब्दतोऽर्थतश्च सर्वत्र लोके प्रसृतः। तथा हि—वर्षागमे मेघः स्तनयति, स्तनयन्तञ्च तं वीक्ष्य, वृष्टेरित्थम्भावं विदन्ति, वर्षाविज्ञाननिपुणाः सुघोषस्य तत्र सत्त्वात्। अमुथैव स्रवतो जलस्य घोषो विज्ञापयति स्वगतेरप्रतिवद्धतां, विकृतश्चा-

---

वन जाता है। ज्ञानरूप भगवान् विष्णु कभी छिपता नहीं अर्थात् अदृश्य नहीं होता क्योंकि यह सकल विश्व उसी का रूप है। जो विश्व को अच्छी तरह जानता है, वह विष्णु को ही जान लेता है। यह ही उस सूक्ष्म की सूक्षमता है अर्थात् वह सूक्ष्म का सूक्ष्म है।

सुघोषः—४५८ सुन्दर और गम्भीर शब्द वाला।

विशब्दनार्थक चुरादि गण के घुषिर् धातु से भाव में, कर्म में अथवा करण में घञ् अथवा अच् प्रत्यय से करने से घोष शब्द बनता है। शोभनार्थक सु उपसर्ग के साथ बहुव्रीहि समास होने से सुघोष शब्द बन जाता है। इस प्रकार वार वार उच्चारण किया हुआ शब्द अथवा सबल उच्चारित शब्द घोष कहा जाता है। जिसका अच्छा घोष है उसका नाम सुघोष है अथवा जिसका बार बार अच्छी प्रकार से उच्चारण किया जाय वह सुघोष है। ब्रह्म ही सुघोष है क्योंकि वेद शब्दों का विषय होने से वेद से उसी का पुनः पुनः उच्चारण किया जाता है अथवा जिसके द्वारा वल से उच्चारण किया जाय वह सुघोष है। प्लुत स्वर "ओ३म्" से उसका सवल उच्चारण किया जाता है इसलिये नाम और नामी का अभेद होने से ब्रह्म ही सुघोष है। यह भगवान् सुघोष नाम से तथा स्वत्व रूप अर्थ से सकल विश्व में फैला हुआ है जैसे कि वर्षा काल में मेघ स्तनयित्नु रूप शब्द करता है उस शब्द को सुनकर वर्षा के लक्षण जानने वाले मनुष्य वर्षा का ज्ञान कर लेते है। क्योंकि वहां वर्षा का लक्षण सुघोष विद्यमान है। इसी प्रकार बहते हुए जल के सुघोष से जल की निर्मल प्रतिबन्ध रहित गति का ज्ञान होता है तथा सुघोष के जल शब्द के विकृत होने से गति की रुकावट का ज्ञान

वरुद्धतामिति। एवं महायन्त्रघोषो महायन्त्रस्य ज्ञापकः। एतेन ज्ञायते, महाबलो भगवान् सुघोषः, स्वरूपेण सर्वत्र व्याप्त इति सुघोषनाम्ना स्तुतिमुपगच्छति।

मन्त्रलिङ्गञ्च—

"त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश" इति ऋग् ४।५८।३

भवन्ति चात्रास्माकम्—

सुघोषनाम्ना भगवान् मनोज्ञो, घोषं व्यवस्थापयतीह विश्वे।
सद्घोषमात्रे विमलं स्वरूपं निजं व्यनक्त्येव सुघोषरूपम् ॥३११॥

एवं हि यो गायति तस्य घोषं शब्दः स्वयं गायकमाप्तुकामः।
तस्यैव रूपं विविधं व्यनक्ति, तथा यथा चित्रकृतं तु रेखाः ॥३१२॥

चित्रं करोतीति चित्रकृत् तं चित्रकृतम्।

घोषो हि कण्ठ्यः स तु घोषभेदात्, षड्जादिकानात्मनि सन्दधाति।
तानान् बहून् मूर्च्छनया विभक्तान्, तमेव तत् सर्वमिदं व्यनक्ति ॥ ३१३॥

सुखदः—४५९

सुखरूपे कर्मण्युपपदे ददातेः "आतोऽनुपसर्गे कः" पा० ३।२।३ सूत्रेण कर्तरि कः प्रत्ययः, आल्लोपः, सुखं ददातीति सुखदः। सुखमिति—सुपूर्वः खनु-अवदारणे धातुर्भौवादिकस्तस्माद् "अन्येभ्योऽपि दृश्यते" पा० ३।२।१०१ इति सूत्रबलतो डः

होता है। एवं किसी इञ्जन आदि महायन्त्र के शब्द से उस महायन्त्र का ज्ञान होता है। इससे पता चलता है कि सुघोष नामा भगवान् विष्णु अपने स्वरूप से प्रत्येक वस्तु में व्याप्त है। इसमें 'महो देवो मर्त्यां आविवेश' यह मन्त्र प्रमाण है।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार दिया है—

अन्तर्यामी रूप से सब के मन को अर्थात् मनोगत विचारों को जाननेवाला भगवान् सुघोष अपने घोष की इस विश्व में स्थापना कर देता है तथा विश्वान्तर्गत भिन्न भिन्न वस्तुओं के घोष से अपने निर्मल व्यापक स्वरूप को प्रकट करता है।

इस प्रकार जो इसके घोष शब्द को गाता है या जानता है। वह उसी भगवान् को जानता है जिसका यह घोष है। क्योंकि शब्द, शब्द करनेवाले का परिचय जानकारी देता है। जैसे चित्र से चित्र के कर्त्ता अथवा जिसका वह चित्र है उसका पता चलता है।

घोष कण्ठस्थानीय है। वह स्थानभेद से, मूर्छनाओं से विभक्त किये हुये तान, स्वरों को अपने आप में धारण करता है। किन्तु ये सब तानादि स्वर उसी को प्रकट करते हैं।

सुखदः—४५९ सुख देनेवाला।

सुखरूप कर्म के उपपद रहते दा धातु से "आतोऽनुपसर्गे कः" सूत्र से कर्त्ता में क प्रत्यय होने से सुखद शब्द सिद्ध होता है तथा सु पूर्वक खनु अवदारणार्थक धातु से ड प्रत्यय और टिलोप

प्रत्ययः, टिलोपश्च, सुखनतीति सुखं ब्रह्म। सुखं सुखातं तद्दः सुखदो विष्णुः। एवञ्च सम्यक् खनित्वा कृतं सुखातं तदेव सुखं यथा लोके आमुखादागुदान्तं खातमिदं शरीरं, तत्र यदि पृच्छयेत, क एतस्य महास्रोतसो "महाबिलस्य" खानकस्तदेदमेव प्रत्युत्तरं स्यात्, स सुखदो विष्णुः। स हि शरीरे मांसमयं सिराजालं, तथास्थीनि चान्तःखातानि कुरुते, सुव्यवस्थितखातञ्चेदं शरीरं जीवेभ्यो ददातीति सुखद उक्तो भवति। एवं प्रतिप्राणिशरीरं सुखातशरीरस्य प्रदातारं भगवन्तं व्यनक्ति। तथा सुखदरूपेण सर्वत्र व्याप्तो भगवानपि स्वस्वरूपव्यञ्जकः। अमुथैव सनक्षत्रं ग्रहमण्डलमन्तरिक्षे व्यवस्थाप्य, तद्भ्रमणाय राशिसंज्ञं सुव्यवस्थितं खातं ददाति—इति सुखद उच्यते। यद्वा—खम्—आकाशं, शोभनं खं सुखं तस्मै सुखायात्मबोधं शक्तिं वा ददातीति सुखदः। दृश्यते हि लोके—यदा सन्निपातादिरोगेषु, विकृतैर्दोषैरन्तःशरीरं, सिरास्थ्यादीनां स्रोतांस्यापूर्यन्ते, "अवरुध्यन्ते" तदा तत्र सुखस्याभावात्, क्लेशरूपं केवल शरीरं जीवात्मा जहाति, यतो हि न हि तत्र शोभनं खमवतिष्ठतेऽपितु दुष्टं खं दुःखरूपं तिष्ठति। तदृष्ट्वा च शेषास्तत्र स्थिता जनाः शोचन्ति रुदन्ति मुहुर्मुहुर्व्याकुलात्मानो भवन्ति। एव विबुधैर्विचित्रचित्रितां रचनां दृष्ट्वा, बहुधोदाहरणकल्पनाः कर्तव्याः।

होने से सुख शब्द बनता है जिसका अर्थ है अच्छा, ख अर्थात् "खोदा हुआ" खात। उस सुखात अथवा सुख को जो देवे वह सुखद है। वही विष्णु है। इस प्रकार से अच्छी प्रकार खोदकर जो बनाया वह सुखात अथवा सुख है। जैसे लोक में शरीर के विषय में विचारिये, इस में मुख से लेकर गुद पर्यन्त एक बहुत बड़ा स्रोत खात है। यदि पूछा जाय इस महास्रोत के खोदनेवाला "खानक" कौन है ? तब यही उत्तर मिलेगा कि सुखद विष्णु ही इस खात का बनानेवाला है। वह इस शरीर में माँस रूप सिराओं का समूह तथा हड्डियों को खात सहित सछिद्र बनाता है और सुव्यवस्थित खात वाला यह शरीर प्राणियों को देता है। इसलिये वह सुखद है। प्रत्येक प्राणी का शरीर सुख रूप शरीर के देनेवाले भगवान् को प्रकट कर रहा है, बतला रहा है। भगवान् स्वयं भी सुखद रूप से जगत् में व्याप्त अपने स्वरूप को वस्तु, वस्तु में व्यक्त कर रहा है। इसी प्रकार नक्षत्रों तथा ग्रह मण्डल के आकाश में सुव्यवस्थित राशि नामक खात प्रदान किया है अथवा सुन्दर जो खं आकाश उसके लिये अपना ज्ञान या शक्ति दी है इसलिये भी सुखद है। लोक में भी देखने में आता है कि जब सन्निपातादि रोगों में विकृत हुए दोषों से शरीर के आभ्यन्तर की सिरा तथा हड्डियों के स्रोत छिद्र रुक जाते है, बन्द हो जाते हैं तब वहां अच्छे खात के न होने से केवल दुःख रूप शरीर को जीवात्मा छोड़ देता है। क्योंकि वहां शोभन ख के अभाव में दुष्ट ख शेष रहता है। जिस को देख कर वहां के शेष पुरुष शोक करते हैं, रोते है तथा भयभीत हो जाते हैं।

इस प्रकार नाना चित्रों से चित्रित रचना देखकर विद्वान् पुरुषों को अन्यान्य उदाहरणों की कल्पना कर लेनी चाहिये।

भवन्ति चात्रास्माकम्—

स एव लोके सुखदः पुराणो लोकान्वितं खातमयं शरीरम् ।
जीवाय नित्यं प्रददाति सर्गाद्, न मोहमाप्नोति सुखं ददानः ॥३१४॥

यद्वा—निर्दोषमेवं किमु वस्तु युक्तं खं यस्य लोके स सुखो मनुष्यः ।
तस्मै ददात्यात्मपदं सुगुप्तं, गीतस्तु तज्ज्ञैः सुखदः स विष्णुः ॥३१५॥

यद्वा—सुखं विना क्लेशपदं हि यत्तत्, स्वयं निगृह्णन् कुरुते स्वकस्थम् ।
यस्तं स्ववश्ये कुरुते सदास्थं, स एव मर्त्यः सुखदेन गोप्यः ॥३१६॥

गोप्यः=रक्षणीयः । गुपू रक्षणे धातुः ।

सुहृत्—४६०

हञ् हरणे, भौवादिकधातो "वृह्रोष्षुक्दुकौ चे"ति कयन् प्रत्ययो दुगागमश्चौणादिकः । कित्त्वान्न गुणः । एवं हृदयशब्दः सिद्धः । शोभनं हृदयं यस्येति बहुव्रीहिसमासे "सुहृद्दुर्हृदौ मित्रामित्रयोः" पा० ५।४।१५० सूत्रेण हृदयशब्दस्य हृद्भावो निपात्यते सुहृदिति ।

एवञ्च शोभनं कामलोभमोहादिप्राकृतदोषैरनाविद्धं हृदयं सङ्कल्पात्मकं मनो यस्य स सुहृत् । न हि भगवति कामादिदोषाणामस्तित्वमाप्तकामो हि सः । अत एव प्रत्युपकारानपेक्ष-परोपकार-कर्तृ मित्रमिव, स भवति जीवजातस्य । सुहृत्त्वादेव

इस कथन का सार भाष्यकार ने निम्न रूप में पद्य वद्ध भी किया है—

वह पुरातन सुखद पुरुष ब्रह्माण्ड पिण्ड की समानता रूप न्याय के अनुसार लोकानुगत खातपूर्ण शरीर नित्य सृष्टि से लेकर प्रलय तक जीवों को देता हुआ कभी भी मोह को प्राप्त नहीं होता ।

इस लोक में उपयुक्त उपभोग्य वस्तु सहित तथा निर्दोष शरीर वाला मनुष्य ही सुख है उसी को भगवान् अपना गुप्त पद सुख रूप देते हैं । इसलिये तत्त्वज्ञों ने उसका सुखद नाम से गान किया है ।

सुख के विना जो शेष रहता है वह केवल क्लेश का ही स्थान होता है । उस को रोककर अपने वश में कर लेता है अर्थात् सुखात के न होने से उस की कोई सत्ता नहीं रहती । जो मनुष्य प्रभु के स्तवन गान आदि से उसको अपने अनुकूल कर लेता है । सुखद प्रभु उसकी रक्षा करते हैं ।

सुहृत्—४६० प्राणीमात्र पर अहैतुकी दया करनेवाला ।

हञ् हरणे भ्वादिगणी धातु से उणादि कयन् प्रत्यय तथा दुगागम होने से हृदय पद सिद्ध होता है तथा सु उपसर्ग के साथ बहुव्रीहि समास होने से भिन्न अर्थ में हृदय शब्द को हृत् निपातन होता है । इस प्रकार सुहृत शब्द वन जाता है जो सर्वेश्वर विष्णु का नाम है । भगवान् का सङ्कल्प रूप हृदय या मन कामादि प्राकृत दोषों से रहित होने से शोभन है, शुद्ध है और वह किसी प्रयोजन के विना ही जगत के प्राणियों के साथ मित्र के समान व्यवहार

वृहस्पतिर्जीवैः प्रार्थ्यते, "यन्मे च्छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं वृहस्पतिर्मे तद्दधातु शन्नो भवतु भुवनस्य यस्पतिः । यजु० ३६।२।

सच्चक्षुर्हृदयमनोवद्धि मित्रं, तस्मान्मित्रत्वाय, चक्षुर्हृदयमनोविषयकं, निर्दोषत्वं प्रार्थितम् । एवं स शोभनहृदयो विष्णुः, स्वसुहृत्त्वगुणेन विश्वं व्याप्य, सकलं व्यवस्थाबद्धं यथागुणं यथास्वभावं यथापरिच्छदश्च विदधदायाति, यास्यति चेयं तस्य व्यवस्था, सर्गान्तिमतोऽशेषसुहृद् विष्णुः सुहृदिति नाम्नोक्तो भवति ।

भवति चात्रास्माकम्—

सुहृत् स विष्णुः सकलं वसानो मित्रस्य दृष्ट्या परिपाति विश्वम् ।
तं मित्रभूतं सुहृदं पुराणं ध्यायन्ति नित्यं गतवैरदोषाः ॥३१७॥

अन्यच्चापि मन्त्रलिङ्गम्—

"मित्रꣳ हुवे पूतदक्षं वरुणञ्च रिशादसम्" यजु० ३३।५७
मित्रस्य मा चक्षुषे क्षमध्वमनयः । ५।३५ यजुरित्यादि

मनोहरः—४६१

मन ज्ञाने दैवादिको धातुस्तस्मात् "सर्वधातुभ्योऽसुन्" इत्युणादिसूत्रेणासुन् प्रत्ययः सस्य उत्वम् "हशि च" पा० ६।१।१७४ इत्युत्त्वे "आद्‌गुणः" पा० ६।१।८७ इति गुणः । हर इति—हृञ् हरणे भौवादिक—धातोः "हरतेरनुद्यमनेऽच्" पा० ३।२।९ इति मनस्युपपदे कर्तर्यच् प्रत्ययः, गुणो रपरः । मनो ज्ञानं हरति—अन्यतो निर्वर्त्यात्मानं

करता है । अच्छे हृदय वाला मित्र होने से ही जीव वृहस्पति रूप ईश्वर की प्रार्थना करते हैं । "यन्मे च्छिद्र"मित्यादि मन्त्र से । जिसका जिसके प्रति शुद्ध हृदय, शुद्ध दृष्टि तथा शुद्ध मन होता है, वह उसका मित्र होता है । इसलिये इस मन्त्र से इन्हीं तीनों की निर्दोषता की प्रार्थना की है । इस प्रकार भगवान् विष्णु अपने सुहृत्त्व रूप गुण से विश्व में व्यापक होकर सब को गुण, स्वभाव तथा सुखद सामान से युक्त तत्तद् वस्तु को नियमबद्ध बनाता आरहा है तथा सर्ग के अन्त तक बनाता रहेगा । इसलिये सबका सुहृत् भगवान् सुहृत् नाम से कहा जाता है ।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार दिया है—

सुहृत् नामा भगवान् विष्णु मित्र के रूप में सब में व्यापक होकर सकल विश्व की रक्षा करता है । उस पुरातन मित्र रूप सुहृत् का वे महापुरुष निरन्तर ध्यान करते हैं । जिनका जगत् में कोई शत्रु नहीं तथा स्वयं किसी के शत्रु नहीं अर्थात् वैरभाव से रहित हैं ।

मनोहरः—४६१ मन को हरनेवाला ।

मन-ज्ञाने दिवादि गण की धातु से उणादि असुन् प्रत्यय होकर मनस् शब्द बनता है ।
हृञ् हरणे भ्वादि गण की धातु से कर्ता में अच् प्रत्यय होकर हर शब्द बनता है ।
मनस् और हर दोनों का उपपद समास होने से मनोहर शब्द सिद्ध हो जाता है । मन

प्रत्याकर्षतीति, मनोहरो विष्णुः। तथा हि—तत्कृतविविधसृष्टेर्वैविध्यकृतं वैचित्र्यं विलोक्य, केनेयं विहिता विचित्रा सृष्टिरिति तं स्रष्टारं प्रत्याकृष्टमानसाः सर्वेऽसुभृतो भवन्ति विस्मिता इति सर्वेषां मनसो हारको मनोहरः।

मन्त्रलिङ्गञ्च—

"इयं विसृष्टिर्यत आबभूवेत्यादि" ऋक्० १०।१२६।७

विसृष्टिः—विविधप्रकारालंकृता सृष्टिः। सृष्टिः सर्जनम्।

तच्चैवं—"ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत, अहोरात्राणि विदधद्विश्वस्य मिषतो वशी, सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः। तस्माज्जाता अजावयः। द्विपदश्चतुष्पदश्च ये" इत्यादि। कम्रो हि स सिद्धसङ्कल्पश्च। अतः कम्रं मनोहरमेवेदं विश्वं विधत्ते जीवहितकामो, जीवानां मनसो रमणाय, एतेन मनोहरत्वरूपेण विश्वे भगवतो व्याप्तिर्दर्शिता। दृश्यते हि लोके प्रत्येकं प्राणिनो मनो ह्रियते विषयैरिति, विष्णुरेव मनोहरनामा। "चन्द्रमा मनसो जात इति" ३१।१२ यजुश्श्रुतेर्ब्रह्मणो मनस उत्पन्नश्चन्द्रमाः प्राणिनां मनसां देवता।

स च चन्द्रमा गोतमः, प्राणिनां मनो वेगवत् "जविष्ठं" करोति। प्राणिनां हि मनो यथारुचि-सात्त्विकं, राजसं तामसञ्च भवति, न तथा भगवतः शुद्धसत्त्वमयत्वात्तस्य 'तमसः परस्तादित्युक्तेः। यजु० ३१।१८। अतः सृष्टिं विदधन्न विकरोति ताम्। लोकेऽपि दृश्यते, सात्त्विकेन मनसा शान्त्या क्रियमाणं कार्यंन्न विकुरुते। सहजश्च

नाम ज्ञान का है। इसलिये मन नाम ज्ञान को दूसरे विषयान्तर से हटाकर अपनी तरफ आकृष्ट करे उसका नाम मनोहर है। जैसे कि परमेश्वर से बनी हुई विविध प्रकार की सृष्टि की विचित्रता देखकर आश्चर्य चकित प्राणियों का मन इस विचित्र सृष्टि का करनेवाला कौन है इस प्रकार स्रष्टा की ओर आकृष्ट होता है। इसी प्रकार सब के ज्ञान का हरनेवाला होने से वह भगवान् मनोहर है। सृष्टि बनने की रीति का वर्णन "ऋतञ्च सत्यमित्यादि" मन्त्रों में है। भगवान् कमनीय मनोहर तथा सिद्ध संकल्प है। वह विश्व को अपने समान मनोहर ही बनाता है। इस उपरोक्त व्याख्या से यह सिद्ध होता है कि भगवान् मनोहर अपने मनोहर रूप गुण से सकल विश्व में व्यापक हैं क्योंकि मनोहरत्व के विना भगवत्प्रिय जीवों के मन के रमण का साधन ही क्या था? प्रत्येक प्राणी का मन विषय से हरण किया जाता है। कुछ प्रासङ्गिक वर्णन "चन्द्रमा मनसो जातः" इस यजुर्वेद वचन के अनुसार चन्द्रमा की उत्पत्ति ब्रह्मा जो विराट् पुरुष है उसके मन से है। तथा वही चन्द्रमा सब प्राणियों के मन का देवता है। वह चन्द्रमा गोतम अर्थात् बहुत शीघ्र चलनेवाला है। इसलिये प्राणियों के मन भी वेगवाले चंचल होते हैं। प्राणियों का मन उनकी इच्छानुसार सात्त्विक, राजस तथा तामस होता है। किन्तु भगवान् का मन=ज्ञान शुद्ध सत्त्व रूप है। इसी अर्थ को "तमसः परस्तात्" यह श्रुति सिद्ध करती है। इसलिये युगयुगान्तरों से एकरूप समान सर्जन करता आ रहा है। किन्तु उसकी

प्राणिमनस्सु-शिवेतरसङ्कल्पानामुदयः। अत एव शिवसङ्कल्पाय प्रार्थ्यते परमेश्वरः "तन्मे मनः शिवसङ्कल्पमस्तु" यजु० ३४।१। न तथा ब्रह्मणि शुद्धसत्त्वरूपत्वात्तस्य।

भवतश्चात्रास्माकम्—

मनोहरो विष्णुरिमां वितन्वन् सृष्टिं विचित्राकृतिरूपयुक्ताम्।
मनोहरत्वेन करोति रम्यां कृत्वा विसृष्टिं परिपाति भुंक्ते ॥३१८॥

एवं मनुष्योऽपि मनोहरस्य, कार्यानुकारी कुरुते विसृष्टिम्।
यथाभिलाषं त्रिगुणोदयां तां, यतः स्वभावात्त्रिगुणात्मकः सः ॥३१९॥

भुंक्ते=यथाकालं स्वान्तःक्षयां कुरुते। सः=मनुष्यः।

जितक्रोधः—४६२

क्रुध क्रोधे दैवादिको धातुर्भावे घञि क्रोधनं क्रोधः। जि जये भौवादिकः, कर्मणि क्तः, कित्त्वाद् गुणाभावः, जितः। जितः क्रोधो येन स जितक्रोध इति बहुव्रीहिसमासः। क्रोधो हि ग्रहणीस्थदूषितपित्तमूलको हृदय-मस्तिष्कमनोविकारः। सर्वेषामेव मनोविकाराणां ग्रहणी मूलं, प्रज्ञापराधश्च। अकायत्वात्, तमसः परत्वात्,

---

सृष्टि में किसी प्रकार का विकार नहीं आता है। लोक में भी देखा जाता है, शान्ति तथा सात्त्विक मन से किया हुआ कार्य कभी विकृत नहीं होता। प्राणियों के मन में, स्वभाव से ही कुत्सित निन्दनीय विचारों की उत्पत्ति होती है। इसलिये वे भगवान् से शुभ विचार संकल्पों की प्रार्थना करते हैं। "तन्मे मनः शिवसङ्कल्पमस्तु" इत्यादि मन्त्रों से ब्रह्म के शुद्ध सत्त्वमय होने से उस में अशुभ सङ्कल्पों की कल्पना भी नहीं की जा सकती।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार दिया है-—

भगवान् मनोहर विष्णु विविध प्रकार के आकार और रूपवती इस सृष्टि को अपने मनोहरत्व गुण से सम्पन्न करके बहुत रमणीय बनाता है तथा रक्षा करता हुआ अन्त में अपने आप में लीन कर लेता है।

इसी प्रकार मनुष्य भी भगवान् मनोहर का अनुकरण करता हुआ त्रिगुणात्मक सृष्टि का निर्माण करता है। क्योंकि मनुष्य स्वयं त्रिगुणात्मक है।

जितक्रोधः—४६२ क्रोध पर विजय करनेवाला अर्थात् अपने साथ अत्यन्त अनुचित व्यवहार करनेवाले पर भी क्रोध न करनेवाला।

जि, जये धातु से कर्म में क्त प्रत्यय होने से जित शब्द की सिद्धि होती है तथा क्रुध क्रोधे दिवादिगण की धातु से भाव में घञ् प्रत्यय होकर क्रोध शब्द सिद्ध होता है। दोनों पदों का बहुव्रीहि समास करने से "जितः क्रोधो येन" इस प्रकार जितक्रोध शब्द सिद्ध होता है। ग्रहणी के अन्तःस्थित पित्त के दूषित हो जाने से जो हृदय, मस्तक तथा मन में विकार पैदा होता है उसका नाम क्रोध है। सब मनोविकारों का कारण ग्रहणी या प्रज्ञापराध बुद्धि का

ज्ञानरूपत्वाच्च, भगवति सर्वव्यापके, क्रोधोदयाभावात्, स जितक्रोधः स्तूयते। वस्तुतस्तु भगवति प्राकृतविकाराणां सद्भाव एव नास्तीति तदभावतैव तज्जितता शब्दार्थः। क्रोधश्चित्तविकारः स च नास्ति भगवति प्रकृतिविकारत्वात्तस्य। लोकेऽपि दृश्यते, मनसः प्रतिकूले क्रोध उदेति, न च भगवतः किञ्चित्प्रतिकूलं, सकलस्य तद्वशवर्तित्वात्। अतः स जितक्रोधः। मन्त्रलिङ्गम्—

"अहेडमानो वरुण" यजु० २१।२

भवति चात्रास्माकम्—

विश्वे जितक्रोध उ विष्णुरेकः, सोऽकाय उक्तस्तमसः परस्तात्।
तस्मिन्न जागर्ति विकारवर्गो, यथा मनुष्ये कृतबुद्धिदोषे ॥३२०॥

वीरबाहुः—४६३

वीरौ विलोडनकरौ बाहू यस्य स वीरबाहुः। वीरेति—विक्रान्त्यर्थकाद् वीरयते चौरादिकाद्धातोः, पचाद्यच् वीरः।

बाहु—बाधृ विलोडने भौवादिकस्तस्मात् "अर्जिदृशिकम्यमिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च" इत्युणादिः कुप्रत्ययो, हकारश्च धकारस्य बाहुः। विलोडनं हि बाहुभ्यामेव भवति, जगत्येतत्प्रत्यक्षं दृश्यते, किन्तु भगवांस्तु सङ्कल्पमात्रेण सर्वं विलोडयतीति, विलोडनकर्तृत्वात्तस्य, बाहुमत्त्वमभिधीयते।

दोष है। किन्तु भगवान् के शरीर न होने से तमोगुण से रहित होने से तथा ज्ञानरूप होने से सर्वगत भगवान् में क्रोध का प्रादुर्भाव नहीं होता है इसलिये उसकी जितक्रोध इस नाम से स्तुति की जाती है। वस्तुतः भगवान् में कोई भी प्रकृतिजन्य विकार, काम, मोहादि है ही नहीं। इसलिये उनका अभाव ही उनकी जय है, जीत लेना है। लोक में ऐसा देखने में आता है कि जो अपने प्रतिकूल होता है उस पर क्रोध आता है किन्तु भगवान् के कोई प्रतिकूल ही नहीं होता, क्योंकि सकल विश्व उसके वश में है, वह सब जगत् का स्वामी है। इसलिये वह जितक्रोध है।

यह कथन भाष्यकार के श्लोक द्वारा इस प्रकार किया है—

जैसे शरीर जीवात्मा में बुद्धयादि अन्तःकरण के दोषों से क्रोधादि विकारों की उत्पत्ति होती है। उस प्रकार शरीरादि सम्बन्ध से रहित तथा ज्योति स्वरूप होने से भगवान् विष्णु में क्रोधादि विकारों का प्रादुर्भाव नहीं होता इसलिये भगवान् का नाम जितक्रोध है।

वीरबाहुः—४६३ अत्यन्त पराक्रमशील भुजाओं से युक्त।

वीर शब्द, विक्रान्ति पराक्रम अर्थ वाली चुरादिगण की वीर धातु से पचादि अच् प्रत्यय करने से सिद्ध होता है। तथा बाहु शब्द विलोडनार्थक भ्वादिगण की बाधृ धातु से उणादि कुप्रत्यय तथा धकार को हकारादेश करने से सिद्ध होता है। विलोडन "मन्थन" बाहुओं से ही होता है। यह जगत् में प्रत्यक्ष देखा जाता है, किन्तु भगवान् केवल अपने सङ्कल्पमात्र से ही सब का विलोडन करते हैं इसलिये विलोडन की समानता से वह बाहुवाला कहा गया है।

अत्र च मन्त्रलिङ्गम्—

"सं बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः" ऋक् १०।८१।३

वीरबाहुर्हि विष्णुरत एव सोऽग्निरूपेण, सूर्यरूपेण वा मनुष्यैर्बाहुबलाय प्रार्थ्यते "बाह्वोर्मे बलमस्तु" इति। बाहू बलाधिष्ठानौ, लोकेऽपि वीरबाहुर्बाहुबलो विजयते। बाहू यत्साधनीकृत्य विलोडयतस्तदपि बाहुशब्देनाभिधीयते, यथा प्रशंस्तशस्त्रः प्रशस्त-प्रहरणो वीरबाहुरिति। एवं वीरबाहुत्वं बिभ्राणो विष्णुः स्ववीरबाहुत्वगुणेन सर्वत्र जगति प्रतिवस्तु प्रसृतः प्रत्येकं वस्तु स्व-गुणयुक्तं विदधाति।

भवति चात्रास्माकम्—

स वीरबाहुर्विधमन् समस्तं, विश्वं जनित्वा कुरुते स्ववश्यम्।
जन्तुस्तदीयेन गुणेन युक्तो निजाप्रियं बाधत एव नित्यम्॥३२१॥

अप्रियं=द्वेष्टारम्। जन्तुः=प्राणिमात्रम्। बाधते=मथ्नाति।

विदारणः—४६४

वि-उपसर्गो दृ विदारणे धातुः क्रैयादिकस्तस्मात् णिच्, रपरा वृद्धिः "आर्" ततो नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" ३।१।१३४। पा० सूत्रेण ल्युः प्रत्ययो बाहुलकाद्वा ल्युट्, योरनादेशः "युवोरनाकौ" पा० ७।१।१ सूत्रेण। णेर्लोपः। विदारण इति।

इस में यह मन्त्र प्रमाण है " सं बाहुभ्यां धमतीत्यादि" वीरबाहु भगवान् की बाहुबल प्राप्त करने के लिये मनुष्य सूर्य या अग्नि रूप से स्तुति करते हैं। लोक में भी जिसकी भुजाओं में बल होता है वही विजयी होता है। मन्थन करने में या विजय प्राप्त करने में भुजाएं जिस शस्त्रादि से काम लेती हैं वह भी बाहु कहाता है। जैसे जिस के हाथ में प्रसंशनीय शस्त्र हो तो उसे वीरबाहु शब्द से कहते हैं। इस प्रकार भगवान् वीरबाहु अपने वीरबाहु गुण से जगत् में व्यापक होकर जगत् की प्रत्येक वस्तु को वीरबाहु गुण से युक्त करता है।

भाष्यकार ने श्लोक में भावार्थ इस प्रकार संगृहीत किया है—

भगवान् वीरबाहु विलोडन से समस्त संसार को उत्पन्न करके उसे अपने वश में रखता है।

जगत् के प्राणी भी वीरबाहुत्व गुण से युक्त होकर अपने से द्वेष करने वाला यदि कोई हो तो उसका नित्य मन्थन या बाधन करते हैं अर्थात् उसे दबाते हैं।

विदारणः—४६४ भेदन करने वाला।

क्र्यादि गण की दृ विदारणार्थक धातु है वि उपसर्ग है। प्रेरणा अर्थ में णिच् तथा णिजन्त से पचादि अच् प्रत्यय अथवा बाहुल्य से ल्युट् प्रत्यय करने से विदारण शब्द सिद्ध होता हैं। विदारण नाम भेदन करनेवाले का है अर्थात् जो एक वस्तु के खण्ड करके उसे अनेक बना दे उसका नाम विदारण है। सकल जगत् में प्रत्येक वस्तु विदीर्ण है अर्थात् विभक्त हुई है। जैसे

विदारयतीति विदारणः। सर्वं विश्वं पुंस्त्रीरूपेण विदीर्णमिव द्विधा दृश्यते। प्रत्येकं वस्तुनो बीजस्य मज्जाकार्योत्पत्तिहेतुरान्तरं द्रव्यं द्विधा दृश्यते, तदेतत्—विदारणस्य विष्णोरेव गुणस्य सर्वत्र व्यापकत्वं दृश्यते। तथा हि—योनिर्विदीर्णा, उपस्थेन्द्रियं विदीर्णं, ब्रह्माण्डगोलोऽपि द्विधा विदीर्णः, कालोऽपि दिनरात्रिरूपेण द्विधा, उत्तरदक्षिणायनेऽपि द्वे, अग्नीषोमौ द्वौ। एवं सर्वत्र द्वन्द्वं दृश्यते, तत्सर्वं विदारणस्य विष्णोरेवान्वाख्यानम्।

भवति चात्रास्माकम्—

विदारणो विष्णुरदृश्यमानो गर्भे विदार्यैव बहिष्करोति।
सर्वाङ्गसम्पूर्णविभक्तगात्रं, बीजे च मज्जां कुरुते विभक्ताम् ॥३२२॥

मन्त्रलिङ्गञ्च—

इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री।
अहन्नहिमन्वपस्ततर्द प्रवक्षणा अभिनत् पर्वतानाम् ॥ अथर्व० २।५।५

अभिनदिति—भिदिर्-विदारणे।

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥६३॥

४६५ स्वापनः, ४६६ स्ववशः, ४६७ व्यापी, ४६८ नैकात्मा, ४६९ नैककर्मकृत्। ४७० वत्सरः, ४७१ वत्सलः, ४७२ वत्सी, ४७३ रत्नगर्भः, ४७४ धनेश्वरः॥

स्त्री और पुरुष ये दोनों मूल में एक वस्तु के दो खण्ड हैं। प्रत्येक वस्तु के बीज में मज्जा "गिरी" रूप जो अंश है, वह भी दो प्रकार से विभक्त है। अर्थात् बीज के अन्दर का वह अंश जो कार्य की उत्पत्ति का कारण है वह भी विदीर्ण होता है। इस प्रकार भगवान् विष्णु का विदारण रूप गुण सर्वत्र व्यापक दीखता है। जैसे कि स्त्री और पुरुष चिह्न दोनों ही विदीर्ण हैं। ब्रह्माण्ड रूप गोलक भी पृथिवी तथा अन्तरिक्ष रूप से विदीर्ण है। काल भी दिन और रात्री भेद से दो प्रकार का है। उत्तर और दक्षिणायन भी दो २ हैं। अग्नि और सोम भी भोज्य-भोजक रूप से दो हैं। इस प्रकार सकल वस्तु समूह जगत् में विभिन्न है, विदीर्ण है। यह वस्तुओं का द्वैधीभाव विदारण रूप भगवान् विष्णु का ही कथन कर रहा है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार कहा है—

भगवान् विष्णु ही विदारण है क्योंकि उसका विदारण रूप कार्य संसार में व्यापक दीखता है। जैसे गर्भ में स्थित बच्चे के शरीर को सब अङ्गों से विभक्त करके उदर से बाहर निकालता है तथा बीज में स्थित मज्जा को कार्य की उत्पत्ति से पहले विभक्त कर देता है भेदन करने में "इन्द्रस्य नु" इत्यादि मन्त्र प्रमाण है।

स्वापनः—४६५

स्वापन इति—ञिष्वप् शये, आदादिको धातुस्तस्मात्प्रेरणार्थको णिच्, उपधा-वृद्धिः। ततो नन्द्यादिलक्षणो ल्युः। बाहुलकाल्ल्युड्वा, योरनि णेर्लोपे च, स्वापन इति। स्वापयति निद्रापयति प्रलयकाले, सर्वं प्रकृताविति स्वापनः। तथा हि भगवान् सृष्टिकाले सर्वं जागरयति, प्रलयकाले च सर्वं स्वापयति। एवञ्च सृष्टिर्जागरावस्था, प्रलयश्च स्वापावस्था, तयोश्चोभयोः कर्ता स एवेति, स स्वापन उच्यते। सर्वं स्वापयन्नपि स स्वयमतन्द्रित एव तिष्ठति। यथा सूर्यः स्वयन्न स्वपिति, किन्तु रात्रियोगेन, सर्वं स्वापयति कर्मजालान्निवर्त्य। स्वापमूलं हि श्लेष्मा तमश्च। अत एव निशागमे सर्वभूतधात्री निद्रा जन्तून् विश्रमयति, पोषयति च पुनः कर्मकरणाय। एवञ्च स सर्वत्र स्वाप-गुणेन व्याप्तः स्वापन उच्यते।

सत्त्वप्रधानं दिनं, रजस्तमःप्रधाना उषा, तमःप्रधाना रात्रिरिति ज्ञेयम्। दिने पित्तं रात्रौ च श्लेष्मा बलमाप्नोति, अन्यत्र विकारात्।

भवति चात्रास्माकम्—

स स्वापनो विष्णुरतन्द्रितः सन्, रात्रिं विधत्ते शयनाय जन्तोः।
रात्रौ तमः श्लेष्मबलञ्च रात्रौ, निद्रा यतः श्लेष्मतमोभवोक्ता ॥३२३॥

स्वापनः—४६५ प्रलय काल में समस्त प्राणियों को अज्ञान निद्रा में शयन कराने वाला।

ञिष्वप् शये, अदादि गण की धातु से प्रेरणा में णिच् तथा णिजन्त से नन्द्यादि ल्यु प्रत्यय होकर स्वापन पद की सिद्धि होती है। जो प्रलयकाल में प्रकृति की गोद में सब को सुला देता है उसका नाम स्वापन है। जैसे भगवान् सृष्टि के समय सब को जगा देता है, उसी प्रकार प्रलय के समय सब को सुला देता है। इस प्रकार सब जीवों की जागरण अवस्था ही सृष्टि है तथा शयन अवस्था ही प्रलय है और इन दोनों अवस्थाओं का कर्त्ता परमेश्वर विष्णु ही है। इसलिये वह स्वाप है। सब को सुला कर भी भगवान् सर्वदा प्रबुद्ध ही रहता है। शयन का कारण श्लेष्मा, कफ या तमोगुण का कार्य आलस्य है। इसलिये रात्री आने पर निद्रा देवी सब को सुलाकर फिर से कर्म करने में सब को समर्थ, पुष्ट बना देती है। भगवान् सूर्य सब को सुलाकर भी स्वयं नहीं सोता किन्तु नित्य गतिशील और प्रबुद्ध रहता है। इस प्रकार भगवान् अपने स्वापनत्व गुण से सकल विश्व में व्यापक है। सूर्योदय से लेकर सूर्यास्त तक का काल दिन नाम से कहा जाता है। उस में सत्त्व गुण की प्रधानता रहती है। तथा रात्री का अन्तिम भाग प्रभात, उषा से कहा जाता है। उस में रज और तम दोनों की प्रधानता रहती है। उस से अतिरिक्त रात्रि में तमोगुण की प्रधानता रहती है। किसी प्रकार के विकार के न होने पर दिन में पित्त को तथा रात्रि में श्लेष्मा को बल मिलता है।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार निबद्ध किया है—

स्वापन नामा भगवान् विष्णु प्राणियों के सोने के लिये रात्रि का निर्माण करता है। रात्रि में तमोगुण तथा श्लेष्मा बलवान् होता है। क्योंकि तम और श्लेष्मा ही निद्रा के

यद्वा—विश्वस्य सर्गो दिनमुक्तमार्यैं रात्रिर्हि विश्वस्य तमोऽभ्यधायि।
न स्वापनो याति कदापि निद्रां तथा यथा याति रविर्न निद्राम् ॥३२४॥

स्ववशः—४६६

स्वः—स्वृ-शब्दोपतापयोर्भौवादिको धातुस्तस्माद् "अन्येष्वपि दृश्यते" पा० ३।२।१०१ सूत्रेण डः प्रत्ययः टिलोपश्च स्वः। वशः—वश कान्तौ, आदादिको-धातुस्तस्मात्कर्मणि "वशिरण्योरुपसंख्यानम्" इति-अप् प्रत्ययः वशः। स्व-शब्द आत्मवाची, वशशब्दश्चोश्यते काम्यत इति वशः कामार्थः, स्वस्मिन् यस्येति व्यधिकरणो बहुव्रीहिः समासः। एवञ्च यो बाह्यप्राकृतपदार्थानापेक्षकाम आत्मकाम आत्मारामो वा स स्ववशो विष्णुः। आत्मनोपलब्धोपलभ्यार्थो वा शक्ति-रूपः। यथा शक्तिमान् नान्यमपेक्षते, क्वचित्कर्मण्युपलभ्यार्थे वा सर्वशक्तिमत्त्वात्, तथायं निरंकुशो निरञ्जनः, स्वान्तर्मितसर्वकाम आस्ते।

भवति चात्रास्माकम्—

स विष्णुरुक्तः स्ववशः पुराणो, विश्वं युनक्त्येव पृथक् पृथक् सः।
तैः साधनैर्यैरलमङ्गित कर्ता तथा यथा पक्षयुगेन पक्षी ॥३२४॥

पक्षयुगेन पक्षी=उपलक्षणमात्रमेतत्, प्रतियोनिशरीरं सर्वावयवसमुदितं करोति।

कारण होते हैं। अथवा अभिज्ञ पुरुषों ने सृष्टि को ही दिन नाम से कहा है तथा प्रलय को रात्रि नाम से। जैसे भगवान् सूर्य कभी भी नहीं सोता इसी प्रकार भगवान् स्वापन सब को सुलाकर भी कभी नहीं सोता है।

स्ववशः—४६६ स्वतन्त्र।

शब्द और उपताप "रोगार्थक" स्वृ धातु से कृत ड प्रत्यय और टि का लोप होने से स्व शब्द बनता है तथा वश कान्ती धातु से कर्म में अप् प्रत्यय होकर वश शब्द बनता है। इन दोनों पदों का व्यधिकरण बहुव्रीहि समास होकर स्ववश एक पद बन जाता है। स्व शब्द अपने आप का वाचक है तथा वश शब्द इच्छा या इच्छा के विषय भोग्य पदार्थ का वाचक है। इस प्रकार जिस के सब भोग्य पदार्थ आत्मा में अपने आप में रहते हैं अर्थात् जिस को कभी भी प्राकृत भोग्य पदार्थ की कामना नहीं होती जिस को सब काम स्वतः प्राप्त हैं, जो अपने आप में ही रमण करता है वह भगवान् विष्णु स्ववश है। अपनी शक्ति से जिसने सब काम विषय प्राप्त किए हैं क्योंकि वह शक्ति रूप है। जैसे कोई शक्तिशाली पुरुष किसी वस्तु के प्राप्त करने वा किसी कार्य के करने में किसी अन्य की सहायता नहीं लेता, क्योंकि वह स्वयं समर्थ है। इसी प्रकार भगवान् भी सर्वशक्तिमान् होने से सकल काम्य पदार्थ अपने आप में ही रखता है तथा स्वतन्त्र और निर्लेप है।

भाष्यकार ने श्लोक में भावार्थ संकलन इस प्रकार किया है—

भगवान् पुरातन पुरुष विष्णु का ही नाम स्ववश है। वही जिस जिस साधन से जो वस्तु यथोचित बनाई जा सकती है उसी प्रकार उस उस वस्तु का निर्माण करता है। जैसे पक्षों के जोड़े से पक्षी का निर्माण किया है। पक्षी शब्द उपलक्षण है। प्रत्येक योनि के शरीर को सब अवयवों से युक्त करता है।

व्यापी—४६७

वि उपसर्ग आप्लृ व्याप्तौ धातुः सौवादिकः, ततः "सुप्यजातौ णिनिस्ताच्छील्ये" पा० ३।२।७६ सूत्रेण णिनिः प्रत्यय उपसर्गस्य सान्धिको यण्। इन्नन्तलक्षणो दीर्घः, व्यापीति। स्वस्वरूपभूतगुणैः सर्वं व्याप्नोति स्वभावादिति व्यापी। कथञ्च स स्वगुणैर्व्याप्नोति सर्वमिति तत्त्वविद्वेत्ति। तथा हि—मनुष्यशरीरे मुख्योर्ध्वभागे पञ्च ज्ञानेन्द्रियाणि। वाह्वोश्च तत्स्थानीयाः पञ्चांगुलयः। मध्यमभागे चैकं हृदयं, द्वौ यकृत्-प्लीहानौ, द्वौ कफोढौ "फुफ्फुसौ" इति पञ्च। अधोभागेऽपि, पादयोः पचांगुलय एव। अत एव मन्त्रोक्तं सङ्गच्छते "इन्द्रो मायाभिः पुरुरूप ईयते" ऋक्। पुरुरूपो=वहुरूपः।

भवति चात्रास्माकम्—

व्यापी स विष्णुः प्रपदं हि दृश्यो यथा रविं पश्यति सर्वलोकः।
खपञ्चके ज्ञानसमृद्धमुच्चैर्यथा तथा मध्यकरांघ्रिषूह्यम् ॥३२६॥

मन्त्रलिङ्गञ्च—

इमानि यानि पञ्चेन्द्रियाणि मनःषष्ठानि मे हृदि।
यैरेव ससृजे घोरं तैरेव शान्तिरस्तु नः ॥ अथर्व० १९।९।३

व्यापी—४६७ आकाश की भांति सर्वव्यापी।

आप्लृ धातु व्याप्ति अर्थवाली स्वादि गण की है और वि उपसर्ग है। उससे ताच्छील्य विशिष्ट कर्ता में णिनि प्रत्यय होकर व्यापी शब्द बन जाता है। जो अपने स्वरूपभूत गुणों के द्वारा स्वभाव से ही सकल विश्व में व्यापक हो उसका नाम व्यापी है। यह भगवान् विष्णु का नाम है। उसकी इस प्रकार गुणों से व्याप्ति को विद्वान् ही जानते हैं।

जैसे कि मनुष्य शरीर में जो ज्ञान प्रधान ऊर्ध्व भाग है उसमें पांच ज्ञानेन्द्रियां, वाहुओं में पांच अङ्गुली ही पांच इन्द्रियां हैं तथा मध्य भाग में १ हृदय २ यकृत् और प्लीहा जिन को जिगर और तिल्ली कहते हैं तथा २ फुफ्फुस, इस प्रकार से पांच हो जाते हैं।

इसी प्रकार नीचे के भाग में पैरों की पांच अंगुलियां। इसी अर्थ को यह मन्त्र कहता है। "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादि ऋक्।

इस कथन का भाष्यकार ने श्लोक द्वारा भावार्थ संकलन इस प्रकार किया है—

भगवान् विष्णु ही व्यापी है क्योंकि उसका व्यापन करना गुण जगत् में दीखता है। जैसे सूर्य सब को साफ दीखता है। जैसे कि मनुष्य के ऊपर के भाग से लेकर नीचे पैरों तक ज्ञानेन्द्रियादि में ज्ञानरूप से सब स्थानों में उसकी व्याप्ति दीखती है।

नैकात्मा—४६८

आत्मा शब्द अत सातत्यगमनार्थाद्धातोर्मनिनि व्युत्पादितचरः। आत्मशब्दः स्वरूपवचनः। न एक आत्मा स्वरूपं यस्य स नैकात्मा विविधस्वरूप इत्यर्थः। नैकात्मा—इत्यत्र नलोपस्तु न भवति "नलोपो नञः"। अत्र नञ एव लोपविधानात्। अत्र च न नञा समासः किन्तु निषेधार्थेन नकारेण।

बहुरूपो हि स व्यापकत्वात्—यथा वस्त्वनुरूपतामापन्नः। इदञ्च नाम्नां सहस्रं तमेव नैकात्मानं व्याचष्टे।

मन्त्रलिङ्गञ्च—

"रूपं रूपं प्रतिरूपो बभूव ......।"

"इन्द्रो मायाभिः पुरुरूप ईयते" ऋक् ६।४७।१८

भवतश्चात्रास्माकम्—

आमृत्यु कर्माणि करोति जन्तुर्नैकात्मरूपेषु विभक्तसंज्ञः।
स एव पुत्रः स पिता स भर्ता, स एव शिष्यः स गुरुः स बन्धुः ॥३२७॥
स एव भृत्यः स सखा स राजा, स एव निद्राङ्कमितो विमूढः।
स एव नेता स कविः स गोप्ता, एको ह्यनेकात्मगतस्तथा सः ॥३२८॥

सः=विष्णुर्नैकात्मेति। अनेकात्मगतः=एक एव विभिन्नेषु देहेषु, तत्तद्रूपेण वर्तमानो, नामभिर्बहुधा गीयमानश्च, नैकात्मवद्—भिन्नो भिन्नो लक्ष्यते।

नैकात्मा—४६८ अनेकरूप वाला।

आत्मा शब्द अत सातत्य गमने धातु से सिद्ध किया जा चुका है। "नैकात्मा" में नैक आत्मा इस प्रकार पदच्छेद है अर्थात् जिसका आत्मा स्वरूप एक नहीं है किन्तु अनेक है। नैकात्मा में 'नलोपो नञः' सूत्र से नकार का लोप भी नहीं होता। क्योंकि सूत्र में अकार विशिष्ट अव्यय नञ् का ग्रहण है और यहां पर निषेधार्थक नकार है। वह जगत् के पदार्थों में, पदार्थ रूप बनकर बहुत प्रकार का बन जाता है क्योंकि वह जगत् में सर्वत्र व्यापक है। ये सब हजारों नाम उसी प्रभु नैकात्मा का व्याख्यान कर रहे हैं। इसमें "इन्द्रो मायाभिः पुरुरूप ईयते" यह मन्त्र प्रमाण है।

भाष्यकार ने श्लोकों में भावार्थ का इस प्रकार संकलन किया है—

नैकात्मा भगवान् विष्णु का नाम है क्योंकि वह एक होता हुआ भी अनेकों में व्यापक होकर अनेक बन जाता है तथा अनेक नाम धारण करके मृत्यु पर्यन्त कार्य करता रहता है। जैसे वही मनुष्य किसी के प्रति—पुत्र, पिता, शिष्य, गुरु, भर्त्ता, बन्धु, सखा, मित्र, भृत्य, राजा, नेता, कवि, रक्षक, तथा वही निद्रादेवी की गोद में जाकर विमूढ़ अचेत आदि रूपों में व्यक्त होता हुआ, एक होता भी अनेक रूपों में व्यक्त होता है—इसी प्रकार—सूर्य या विष्णु "रूपं रूपं प्रतिरूपो बभूव" ऋक् के कथनानुसार "नैकात्मा" कहाता है।

नैकत्र.र्मकृत्—४६९

नैककर्मकृदित्यत्र नैकात्मवत् नकारेण समासः, अतो नलोपाभावः ।

डुकृञ् करणे, इति तानादिकाद्धातोः "सर्वधातुभ्यो मनिनिति" मनिन् प्रत्यय औणादिः कर्म । तदुपपदाच्च करोतेः "सुकर्मपापमन्त्रपुण्येषु कृञः" पा० ३।२।८९ सूत्रेण क्विप् तस्मिंश्च तुक् । न एकं कर्म करोतीति, नैककर्मकृत्, सर्वं जगद् व्याप्य जागतप्राणिरूपतामापन्नस्तत्तद्रूपेण नानाकर्मकारी । नैकात्मवद् व्याख्या। केवलमियांस्तु भेदस्तत्र नानारूपता दर्शिता—इह च नानाकर्मकर्तृता । स एक एव पुरुषः कस्यचित्पुत्रः कस्यचित्पिता, पुत्रभूतः पितरौ सेवते पितृभूतश्च सेव्यते, भर्ता च भार्यां बिभर्ति । शिष्यभूतः सेवते गुरुं विद्याञ्चोपादत्ते ततः । गुरुतामुपगतश्च शिष्यानुपनीय विद्यामुपदिशति । बन्धुः सन् स्नेहेन सर्वं बध्नाति हितेच्छुः । भृत्यः स्वामिनमनुरञ्जयति सेवया । सखा च कस्मैचिद्रहस्यमावेदयति कस्माच्चिच्च रहस्यं शृणोति । स एव नेता नयति स्वीयान् सुवर्त्मना । स एव भावभावितः काव्यं कुर्वाणः कविः । स एव च गोपायन् गोप्तोच्यते । एवं नैककर्मकृतं विष्णुमनुकुरुते वैष्णवं रूपं बिभ्राणमिदञ्जगत् ।

नैककर्मकृत्—४६९ जगत् की उत्पत्ति स्थिति और प्रलय रूप तथा भिन्न भिन्न अनेक कर्म करनेवाला ।

नैककर्मकृत् में नैकात्मा के समान ही नकार का लोप नहीं होता । डुकृञ् यह धातु तनादि गण की है और करना इसका अर्थ है । कृञ् धातु से उणादि मनिन् प्रत्यय करने से कर्म शब्द बनता है तथा कर्म उपपद रहते कृञ् धातु से क्विप् तथा तुक् का आगम होने से कर्मकृत् शब्द बन जाता है । नैक के साथ समास होकर नैककर्मकृत् पद बन गया । जिसका अर्थ है अनेक कर्म करनेवाला । इसकी सब व्याख्या नैकात्मा के समान है केवल भेद अर्थ में है । नैकात्मा शब्द से भगवान् की विविध रूपता दिखाई है । तथा नैककर्मकृत् से अनेक कर्म करना दिखाया है। वह एक ही किसी का पुत्र, किसी का पिता, पुत्र रूप से माता पिता की सेवा करता है । और पिता होकर सेवा करवाता है । भर्ता होकर भार्या का भरण पोषण करता है । शिष्य होकर गुरुवरों की सेवा करता हुआ विद्या ग्रहण करता है तथा गुरु बनकर शिष्यों का उपनयन संस्कार करवाकर विद्या का उपदेश करता है । बन्धु बनकर सब को स्नेह से बांधता है । सेवक बनकर स्वामी को सेवा से प्रसन्न करता है। मित्र बनकर किसी को गोपनीय रहस्य बताता है तथा किसी से गोपनीय रहस्य सुनता है । राजा बनकर प्रजा का शासन करता है । निद्रा को प्राप्त होकर विमूढ अचेत हो जाता है । नेता बनकर अनुचर वर्ग का सञ्चालन करता है । भावों में मुग्ध होकर कविता करता हुआ कवि बन जाता है । रक्षा करता हुआ रक्षक बन जाता है । वैष्णव रूप को धारण करता हुआ यह सकल जगत् भगवान् का अनुकरण करता है ।

भवतश्चात्रास्माकम्—

आमृत्यु कर्माणि करोति जन्तुस्तं नैककर्माणमजं विपश्यन् ।
स एव पुत्रः स पिता स भर्ता, स एव शिष्यः स गुरुः स बन्धुः ॥३२९॥
स एव भृत्यः स सखा स राजा, स एव निद्राङ्कमितो विमूढः ।
स एव नेता स कविः स गोप्ता, एवं विपश्यन् न स मोहमेति ॥३३०॥

मन्त्रलिङ्गञ्च—

"विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ।"
ऋक् १।२।२२ ॥ अथर्व० ७।२६।६ ॥ यजु० १३।३३ ॥

वत्सरः—४७०

वसतीति वत्सरः—वस निवासे भौवादिको धातुरनिट् तस्माद् "वसेश्च" इत्युणादिः सरन् प्रत्ययः "सस्यार्धधातुके" पा० ७।४।४९ सूत्रेण सस्य तः । सर्वस्मिन् सर्वमस्मिन् वा वसतीति वत्सरः । इदं सर्वं दृश्यमानञ्जगत् तस्मिन् विष्णावेव वसति, वसति च सर्वत्र जगति विष्णुरत एव स वत्सर इत्युच्यते । मन्त्रलिङ्गञ्च—
"यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते। यजु० ४०।६। ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत् । यजु० ४०।१।

भाष्यकार के श्लोकों का भावार्थ भी इस से सम्मत है—

उस नैककर्मकृत् भगवान् का अनुकरण करता हुआ जीव आमरण कर्म करता है तथा यह भी उसी कारण से कभी पिता, कभी पुत्र, कभी शिष्य, कभी गुरु, कभी वन्धु, कभी सखा, कभी राजा, कभी कवि तथा कभी निद्रा से अचेत, कभी नेता और कभी रक्षक वन जाता है। इस तथ्य को समझने वाला कभी मोह को प्राप्त नहीं होता ।

इसमें "विष्णोः कर्माणि पश्यते"त्यादि ऋक् मन्त्र प्रमाण है ।

वत्सरः—४७० सब का निवास स्थान ।

वस यह भ्वादिगण की धातु है । निवास बसना इसका अर्थ है । वस धातु से उणादि सरन् प्रत्यय तथा सकार को तकार आदेश होकर वत्सर शब्द सिद्ध होता है । जिसका अर्थ है जो सब में निवास करता है अथवा जिसमें सब निवास करते हैं । यह सकल जगत् भगवान् विष्णु में ही स्थित है तथा विष्णु ही व्यापक रूप से सकल जगत् में स्थित है। इसलिये विष्णु का ही नाम वत्सर है । इसमें "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति" तथा "ईशा वास्यमिदं···जगदित्यादि" यजुः मन्त्र प्रमाण है । इसी अर्थ की समानता से सम्वत्सर भी विष्णु का नाम है क्योंकि कालात्मक ब्रह्म में सम्वत्सर रूप से सकल जगत् बसता है।

सम्वत्सरोऽपि तस्मादेव, सर्वं कालात्मके ब्रह्मणि¹ सम्यग्वसतीति सम्वत्सरः। भवनमपि सम्वत्सरमुक्तं भवति, तस्य च भेदा विपणिः, क्षेत्रं, जीविकार्था वृत्तिरित्यादयः स्वयमूहनीया वासे हेतुभूताः।

१- कालो ह ब्रह्मभूत्वा बिभर्ति परमेष्ठिनम्। अथर्व १९।५३।९

भवन्ति चात्रास्माकम्—

संवत्सरो वासयति स्वगर्भे, विष्णुर्हि विश्वं सकलं यथार्हम्।
तथा यथा गर्भगतं हि माता, संवास्य सूते स्वगुणैर्वसन्तम् ॥३३१॥

स सद्वचोभिर्नमसा स्तुवन् वा, सदा सदाचार-विहारयुक्तः।
तमेव निःशङ्कमुपैत्यशङ्कः, स वत्सरो सर्वगतोऽस्ति यस्मात् ॥३३२॥

एवं हि यो वेत्ति पदं गुहस्य, मातेव विष्णुं बहिरन्तराप्तम्।
तमानुकुर्वन् हृदयान्तराले, विश्वे च वा पश्यति निर्विकल्पः ॥३३३॥

वत्सलः—४७१

वद व्यक्तायां वाचि भौवादिको धातुस्तस्माद् "वृतृवदिहनिकमिकषिभ्यः सः" इत्यौणादिकः सः प्रत्ययः "तितुत्रेति" पा० ७।२।९। सूत्रेणेण्निषेधः। चर्त्वम्। वत्सः। वत्सशब्दाच्च वत्सांसाभ्यां कामवति मत्वर्थीयो लच् प्रत्ययो वत्सल इति। वत्सल-शब्दः स्नेहवानित्यर्थकः। एकाग्र्येण मनसा ध्यायति दीने दुःखिनि वा भक्ते, स

भवन नाम गृह का नाम भी सम्वत्सर है तथा वह कई प्रकार का है। जैसे दुकान, खेत आजीविका सम्बन्धी कर्म इत्यादि। क्योंकि ये वसने में कारण होते हैं। इसी प्रकार और उदाहरणों की कल्पना कर लेनी चाहिये।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार दिया है—

भगवान् विष्णु का नाम वत्सर है। क्योंकि वह सब को यथायोग्य अपने अन्दर बसाता है, जैसे माता अपने उदर में बसाकर अपने गुणों सहित बच्चे जन्म देती है। इसलिये मनुष्य का कर्त्तव्य है कि वह प्रशंसनीय वेद वचन तथा नमस्कारादि से उसी प्रभु का स्तवन करे अथवा करता है, तथा अपने अनुकूल आचार विहारादि करता है। वह निर्भय होकर विष्णु के निर्भय पद को प्राप्त करता है। क्योंकि वह वत्सर नामा विष्णु सर्वगत है और सर्वत्र विद्यमान है।

वत्सलः—परम स्नेही।

वद व्यक्त स्पष्ट बोलने अर्थवाली भ्वादिगण की धातु से उणादि स प्रत्यय तथा दकार को तकार रूप चर्त्व करने से वत्स शब्द सिद्ध होता है। वत्स शब्द से मत्वर्थीय लच् प्रत्यय करने से वत्सल शब्द बन जाता है। वत्सल शब्द का अर्थ है स्नेहवाला। एकाग्रता से ध्यान करने तथा दीन दुःखियों पर भगवान् दयाभाव से प्रेम करता है। इसलिये

वत्सलः स्नेहवान् भवत्यतो वत्सल उच्यते। यथा रुदन्तं धूलिधूसरितमव्यक्तवाचमस्पृश्यमपि, बालकमात्मीयं मत्वा वत्सला सती तमङ्कमारोपयति माता तथा भगवानपि सर्वत्र सामान्येन सङ्गमयन्नपि, स्तोतॄणां हृदयेषु विशेषतः समर्पयति, येन तेऽपि सर्वप्राणिवत्सला भवन्ति। अतो वत्सलाख्येन गुणेन सर्वत्र गतो भगवान् वत्सल उच्यते।

भवन्ति चात्रास्माकम्—

स वत्सलो विष्णुरिदं समस्तं, विश्वं निजेऽङ्के कुरुते सदातः।
तं योऽतिहीनो भजते वचोभिर्भावेन वा वत्सल एति साक्ष्यम्॥
स वत्सलो विष्णुरुदारवीर्यः, समग्रशक्त्या हृदयं बलेन।
सत्येन धैर्येण च साहसेन, गुणेन संयोज्य करोति गाङ्के॥
तदङ्कमाप्तः स विभुं स्तुवानः, मातासि धातासि पितासि शब्दैः।
तमेव गायन् तमुपैति पश्यन्, विश्वे ततं वत्सलमेकरूपम्॥

वत्सलशब्दः पुनः—शरणागतवत्सलः=भक्तवत्सल एवमपि शरणागतं, भक्तं वा वत्सलमिव मत्वा प्रयुज्यते।

उसका नाम वत्सल है। जैसे धूलि से लिप्त होते हुए तथा अव्यक्त अस्पष्ट "तोतला" बोलते हुए बालक को माता स्नेह से उठाकर गोद में बिठा लेती है। इसी प्रकार भगवान् भी अपने बालक रूप जीवों पर स्नेह करने से वत्सल है। भगवान् का वात्सल्य प्रेम यद्यपि सभी जीवों में है तथापि भक्तों में विशेष होता है, जिससे भक्त भी सब प्राणियों से स्नेह करते हैं। भगवान् का यह वात्सल्य प्रेम सकल संसार में व्यापक है, फैला हुआ है।

भाष्यकार ने श्लोकों में भावार्थ इस प्रकार दिया है—

भगवान् विष्णु का नाम वत्सल है। क्योंकि जो भी भक्त अथवा कोई दीन दुखी प्राणी उसकी प्रेम से तथा सुन्दर वचनों से स्तुति करता है भगवान् स्वयं उसको प्रेम से अपनी गोद में बिठा लेता है।

सब जीवों पर वत्सल, स्नेह रखनेवाला भगवान् विष्णु अपने स्तावक भक्त के हृदय को अपनी पूर्ण शक्ति, बल, सत्य, धैर्य तथा साहस रूप गुणों से युक्त करके उसे अपनी गोद में या अपने पास बिठा लेता है। भगवान् के गोद में अथवा निकट पहुंचा हुआ वह भक्त तू ही माता है तू ही पालन पोषण करनेवाला तथा पिता है, इस प्रकार स्तुति करता हुआ उसी को प्राप्त होता है। जो विश्व में एकरूप तथा वत्सलता रूप से व्याप्त है।

वत्सल शब्द का प्रयोग भगवान् के अतिरिक्त महापुरुषों में भी देखा जाता है। जैसे भक्तवत्सल शरणागतवत्सल। यहां भक्त और शरणागत ही वत्स के समान है।

वत्सी—४७२

वत्सशब्दो वत्सलनामव्याख्याने व्याख्यातचरः। तस्माद् "अत इनिठनौ" पा० ५।२।११२। सूत्रेण नित्ययोगे मत्वर्थीय इनिः। "यस्येति च" पा० ६।४।१४६। सूत्रेणाकारलोपः। इन्नन्तलक्षणो दीर्घो वत्सी। वत्सशब्दो हि गोः स्तन्यपायिनि शिशौ रूढः। प्रयुज्यते च प्रौढेऽपि, लोकाश्रितो हि शब्दप्रयोगः। वस्तुतस्तु वत्सशब्दः सामान्येन शिशुमात्रे प्रयुज्यते। तदभिप्रेत्यैव भगवतो वत्सी नाम। यथा वत्सोऽस्यास्तीति वत्सी गौः, तथा सर्वे प्राणिनो वत्सा अस्य सन्तीति भगवान् विष्णुर्वत्सी, भगवता हि वत्सपोषाय तत्प्रतिमातृस्तनयोः स्तन्यं व्यवस्थापितमस्ति। कपोतजात्यान्तु प्रत्यक्षमेतद्दृश्यत उद्गिरणं तज्जातकमुखे। स भगवान् विष्णुरेव वत्सी। अत एव जीवा भगवन्तं प्रार्थयन्ते—"मा नो महान्तमुत मा नो अर्भकम्, मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नो वीरान् रुद्र भामिनः। यजु० १६।१५। पितरौ चापि वत्सशब्देनोच्येते। गौण्या वृत्त्या पोषक-मात्रं वा वत्सी।

भवति चात्रास्माकम्—

वत्सी स विष्णुर्वदतां वरेण्यः स एव माता स पिता स बन्धुः।
तं वत्सिनं सत्यवचोभिरेष्य स्तुवन्ति गायन्ति नमन्ति यान्ति ॥३३७॥

वत्सी—४७२ पोषण कर्ता

वत्स शब्द का व्याख्यान वत्सल शब्द की व्याख्या में कर दिया है। वत्स शब्द से मत्वर्थ में इनि प्रत्यय होकर वत्सी शब्द बनता है। वत्स शब्द का वाच्य या अर्थ गौ का दूध पीनेवाला बच्छड़ा है। यह प्रयोग बड़े बच्छड़े में भी जो दूध पीने से हट गया है, किया जाता है। क्योंकि शब्दों का प्रयोग लोक के आधीन है।

वस्तुतः सामान्य से सभी जाति के बच्चों में वत्स शब्द का प्रयोग होता है। इसी अभिप्राय से भगवान् का नाम वत्सी है। जैसे वत्स वाली होने से गौ का नाम वत्सी है। उसी प्रकार सकल प्राणी वर्ग उसका वत्स होने से भगवान् का नाम वत्सी है। भगवान् ने वत्सों के पालन पोषण के लिये उनके उत्पन्न होने से पहिले ही उन की माताओं के स्तनों में दूध की व्यवस्था कर रक्खी है। इसी प्रकार पक्षियों में कपोत "कबूतर" जाति में तो यह प्रत्यक्ष मुख से मुख में देखने में आता है। इसलिये जीव भगवान् से "मा नो महान्त"मित्यादि मन्त्र से अपने सब प्रकार से कल्याण की प्रार्थना करते हैं। माता पिता का नाम भी वत्सी है। अथवा सब ही पालन करनेवालों का वत्सी यह गुणकृत नाम है।

यही कथन भाष्यकृत पद्य में इस प्रकार निबद्ध है—

सब का प्रार्थनीय तथा सब से श्रेष्ठ भगवान् विष्णु ही वत्सी है, वही माता पिता तथा बन्धु है। उस भगवान् वत्सी का महापुरुष भावयुक्त वचनों से उसे चाहते हुए गान, स्तवन, नमन करते हैं तथा उसे प्राप्त करते हैं।

रत्नगर्भः—४७३

रत्नम्—रमु क्रीडायाम्, भौवादिको धातुरन्तर्भावितण्यर्थः। तस्मात् "रमेस्त च" इत्युणादिसूत्रेण न प्रत्ययः, धातोस्तकारान्तादेशश्च रमयतीति रत्नम्।

गर्भः—गॄ निगरणे तौदादिको धातुस्तस्मात् "अर्तिगॄभ्यां भन्" इत्यौणादिको भन् प्रत्ययो रपरो गुणो गिरतीति गर्भः। एवञ्च रत्नानि रतिसाधनानि गिरत्या-दधात्यन्तरात्मनीति रत्नगर्भ इत्युपपदसमासः। अथवा रत्नानि गर्भे-उदरे यस्य स रत्नगर्भ इति बहुव्रीहिसमास उभयथोपपद्यते। तथा हि—गर्भो नाम, आन्तरो भागो गर्भे करणमन्तःप्रवेशनम्। एवञ्च, भगवान् रतिसाधनेन मनोरमेण विक्रीडनकेनैव जगता चिरमासृष्टेराप्रलयं विक्रीड्य सर्वमिदं रत्नभूतं विश्वं स्वान्तर्दधातीति रत्न-गर्भ उच्यते। अथवा यो यस्य वशगः सोऽपि तेन निगीर्ण इव गर्भाभिधानो भवति तदाज्ञान्तःस्थायित्वात्। अत्र वेदः—"आचार्यः कुरुते गर्भमन्तः तं, जातं द्रष्टुमभि संयन्ति देवा॥ अथर्व॥ सर्वेऽपि प्राणिनः कपोताविव, स्वं गर्भधिं रमयन्त्यात्मानं वा, गर्भमाधातुमाधापयितुं वा। मन्त्रलिङ्गञ्च— "कपोत इव गर्भधिम्" कपोतः कुत्सितपतनो भवति गर्भधिं=कपोतिकाम्। अत एव सिद्धान्तितमाचार्यैः स्वयोनौ रमते बुधः। धनमपि येन व्यवह्रियते रत्नम्। धनिनो हि व्यवहरमाणा रमन्ते

रत्नगर्भः—४७३ रत्नों को अपने गर्भ में धारण करनेवाला, समुद्ररूप।

क्रीडार्थक भ्वादि गण की रमु धातु से प्रेरणार्थ के द्योत्य होने पर उणादि न प्रत्यय तथा धातु के मकार को तकार आदेश होकर रत्न शब्द सिद्ध होता है। जिसका अर्थ होता है जो रमण करावे अर्थात् रमण या क्रीडा का साधक।

गर्भ शब्द तुदादिगण की निगीर्णार्थिक गॄ धातु से बनता है, जिसका अर्थ है जो अपने आप में किसी अन्य वस्तु का निगीर्ण करे "निगले" अर्थात् अपने उदर में प्रविष्ट करे, धारण करे इस प्रकार समुदित रत्नगर्भ शब्द का अर्थ होता है—अपने आप को रञ्जन आनन्द देनेवाले साधनों द्रव्यों को जो अपने आप में रखता है। गर्भ नाम भीतरी भाग का है। गर्भ में करना अर्थात् अपने अन्दर रखना।

इस प्रकार से भगवान् विष्णु क्रीडा के साधन खिलौने के समान जगत् से, सृष्टि से प्रलय काल तक खेलकर इस रत्नभूत जगत् को अपने उदर में रखलेता है, निगीर्ण कर लेता है। इसलिये इसका नाम रत्नगर्भ है अथवा जो जिसके वश में होता है वह भी गर्भ नाम से कहा जाता है क्योंकि वह उसकी आज्ञा में रहता है। यहां "आचार्यः कुरुते गर्भमन्तः" इत्यादि वेद वचन प्रमाण है। सभी प्राणी कपोत 'कबूतरों' के समान अपनी स्त्रियों तथा अपने को रमण से आनन्दित करते हैं। कपोत शब्द का रमण विशेष वेद वचन से सिद्ध होता है जैसे कि "कपोत इव गर्भधिम्" कपोत शब्द का अर्थ है, जिसका पतन अपने ऊपर उड़ना खराब है। इसलिये आचार्यों का सिद्धान्त है कि विद्वान् अपनी ही योनि में रमण करता है। जिसके द्वारा जगत् का व्यवहार चलता है वह धन भी रत्न है। क्योंकि वह जिसके पास होता वह उससे

रमयन्ति वा स्व-सम्बन्धिनः। लोकप्रसिद्धानि खनिजानि हीरकादीन्यपि रत्नशब्दवाच्यानि, रमन्ते हि तेषु जनानां मनांसि, तानि रमयन्तीति वा। तदेतन्नानावस्तुजातरामणीयकस्य किमधिष्ठानमिति प्रश्ने, विष्णुरेव रमणो रमयति सर्वमतः स रत्नगर्भः, तस्यैव रामणीयकं सर्वत्र प्रसृतं जगति।

पुरुषोऽपि रत्नगर्भः, स्वाश्रितानामिच्छापूरणेन रमणत्वात्। एवं लोकं दर्शं दर्शमभ्यूहितव्यं सुधीभिः।

भवन्ति चात्रास्माकम्—

स रत्नगर्भो रमयन् स्वगर्भे, विश्वं समस्तं विविधप्रसूतम्।
विश्वप्रचाराय विचित्रचित्रां सृष्टिं वितन्वन् रमते स्व-सत्त्वे ॥३३८॥

विविधप्रसूतं=चतुर्विधसृष्टिविक्लृप्तम्। विश्वप्रचाराय=लोकव्यवहाराय। स्वसत्त्वे=स्वकीये सत्त्वप्रधाने ज्ञानानन्दात्मनि।

यो लौकिको गर्भ इहास्ति दृश्यः, स गर्भधिं प्राप्य सुखेन शेते।
मातापि नित्यं रमते स्व-सत्त्वे, तद्र रत्नगर्भस्य पदं वृणीते ॥३३९॥

रत्नानि सर्वाणि दधाति शम्भुर्गर्भे स्वके सर्वमिदमस्ति रत्नम्।
कश्चिद्धनाप्त्यै यतते च तस्मात्, वधूकृते कोऽपि करोति यत्नम् ॥३४०॥

व्यवहार करता हुआ, अपने सम्बन्धी बन्धु मित्र आदिकों को रमण करवाता है, आनन्दित करता है। खान से उत्पन्न होने वाले हीरे आदि को भी रत्न कहते हैं, क्योंकि उन में मनुष्यों के मन रमण करते हैं। अथवा वे मन को रमण करवाते हैं। यदि कोई पूछे कि जगत् में होने वाले, नाना पदार्थों की रमणीयता, या मन के रमण करने का अधिष्ठान आधार क्या है ? तब उत्तर मिलेगा, भगवान् विष्णु ही सब को रमण करवाने वाला है, इसलिये वह रत्नगर्भ है। उसी भगवान् रत्नगर्भ का आनन्दरूप रमणीयत्व सब संसार में फैला हुआ है। पुरुष भी रत्नगर्भ है, क्योंकि, वह अपने आश्रय में, रहने वालों की इच्छा पूरी करके उनको आनन्दित करता है। इस प्रकार लोक को देखकर कल्पनायें कर लेनी चाहियें।

भाष्यकार ने श्लोकों द्वारा भावार्थ इस प्रकार दिया है—

वह भगवान् विष्णु रत्नगर्भ है, क्योंकि, वह विविध प्रकार से उत्पन्न समस्त जगत् को रमण करवाता है तथा विश्व के व्यवहार के लिये, बहुत प्रकार की सृष्टि करता हुआ, अपने आप में आनन्दरूप में रमण करता है। लौकिक गर्भ भी, अपनी माता के गर्भाशय में सुख से सोता है, और माता भी अपने हृदय में रमण करती हुई, खुश होती हुई, रत्नगर्भा नाम से कही जाती है। भगवान् विष्णु, सब रत्नों को अपने आप में ही धारण करता है। इस जगत् में जो भी कुछ दिखाई देता है वह सब रत्न ही है। जैसे कि कोई धन रूप रत्न को प्राप्त करने

कश्चित्कृषिं कर्षति सर्वयत्नैः क्रीणाति गामश्वमथापि कश्चित्।
कश्चिच्च यन्त्राणि करोति यत्नाल्लब्ध्वा स्वकार्हाणि सुखेन शेते ॥३४१॥
यो रत्नगर्भं भजते मनुष्यो जानाति वा सूत्रतमस्य वाच्यम्।
स रत्नगर्भो भवतीह मर्त्यः पश्यन् विकीर्णानि च रत्नकानि ॥३४२॥
न मोहमभ्येति स रत्नकेषु, न संचयं वा कुरुते च तेषाम्।
न वस्तुहीनो भवतीह खिन्नो, न हर्षमभ्येति च रत्नगर्भः ॥३४३॥
मन्येऽत्र नूनं बहुजन्मयोगात्, सद्योऽपि वा तत्त्वविदस्य योगात्।
संल्लब्धसिद्धिर्मनुजो भवेऽस्मिन् मनुष्यरूपे भगवान् स्वयं सः ॥३४४॥
रत्नानि गर्भे निपतन्ति तस्य रत्नत्वमस्मास्विदमस्ति भान्ति।
पदार्थजातानि वदन्ति तस्मै स रत्नगर्भो रमते सुकर्णः ॥३४५॥

धनेश्वरः—४७४

धन धान्य इति जौहोत्यादिको धातुश्छान्दसः। छान्दसधातुरूपाणां लोकेऽपि प्रयोगो यथा घृतं वश इत्यादीनाम्। तस्मात्पचाद्यचि धनमिति साधुः। ईश्वरः—अशूङ् व्याप्तौ संघाते चेति सौवादिको धातुः, तस्मात् "अश्नोतेराशुकर्मणि वरट् च" इत्युणादि-वरट् प्रत्यय—उपधाया ईत्वञ्च "नेड्वशि कृति" ७।२।८। इतीण्णिषेधः। अश्नुते व्याप्नोति संहन्ति वा-ईश्वरः। व्यापकः संघातकश्चेश्वर इत्यर्थः।

का यत्न करता है, तो कोई स्त्री प्राप्ति के लिए यत्न करता है कोई सब प्रकार के प्रयत्नों से खेती करता है, कोई रत्नरूप बैल घोड़े आदिकों का लेन देन करता है, कोई रत्नरूप यन्त्रों का परिश्रम से निर्माण करता है तथा कोई अपने अनुकूल वस्तुओं को प्राप्त करके सुख से सोता है। जो मनुष्य उस भगवान् रत्नगर्भ को भजता है, अथवा उस सूक्ष्म से सूक्ष्म की वास्तविकता को जानता है, वह मनुष्य रत्नगर्भ ही हो जाता है। वह मनुष्य रत्नगर्भत्व को प्राप्त करके, इधर उधर बिखरे हुए रत्नों को देखकर मोहित नहीं होता। न वह रत्नों का सञ्चय करता है तथा उनके न होने से वह दुःखी नहीं होता, और उनकी प्राप्ति से प्रसन्न नहीं होता। वह मनुष्य बहुत से जन्मों में, अथवा किसी तत्त्वज्ञानी के सम्बन्ध से तत्काल ही सिद्ध सङ्कल्प हो जाता है, और वह मनुष्य रूप में स्वयं भगवान् ही होता है। उसके पास सब वस्तुरूप रत्न, हम में रत्नत्व है, इस प्रकार चमकते हुए तथा कहते हुए स्वयं आ जाते हैं, तथा वह रत्नगर्भ रूप सुकर्ण (सूक्ष्मज्ञानी) उनसे रमण करता है।

धनेश्वरः—४७४ सर्वविधधनों का स्वामी।

ध्यान्यार्थक, जुहोत्यादि गण की वैदिक धन धातु से, पचादि अच् प्रत्यय होकर, धन शब्द बनता हैं। घृत धन आदि वैदिक शब्दों का भी लोक में प्रयोग देखा जाता है।

ईश्वर—अशू, व्याप्त्यर्थक तथा संघातार्थक सुवादि गण की धातु से, उणादि वरट् प्रत्यय, तथा उपधा को ईत्व करने से, ईश्वर शब्द सिद्ध होता है। इस प्रकार व्यापन करना, या संघात करना, ईश्वर शब्द का समुदित अर्थ होता है। धन या धान्य में किसी कार्य में

धनेषु धान्येषु वा यदाशुकारित्वं तद् व्यापनशीलस्याशुकरणशीलस्य वा विष्णोरेव गुणः। तथा हि दीयमानं धनं धान्यं वा कर्मकरान्-आशुकरणाय प्रेरयति संहतांश्च तान् करोति। यतो हि ते दत्तेन धनेन तुष्टाः स्वामिनः कार्यं संहता एकमनस्काः सन्त आशु कुर्वन्ति। धनधान्ययोः पर्यायेणापि प्रयोगो यथा यत्कार्यं मुद्रया साधयितुं शक्यते तद्धान्यप्रदानेनापि। एवञ्च सर्वत्र स स्वगुणेन व्याप्तो धनेश्वरो विष्णुरुच्यते।

भवति चात्रास्माकम्—

धनेश्वरो विश्वमिदं समस्तं समेध्य धान्यत्वगुणेन तस्मिन्।
करोति चाशुत्वमथापि यस्मात्, तस्मात्प्रसिद्धा चपला च लक्ष्मीः ॥३४६॥

यद्वा—धनानि शम्भुः स्ववशे विधत्ते, धनेश्वरः सन् स्तुतिमभ्युपैति।
तमेव याचन्ति च लिप्सितार्थाः, स भोजनीयेन युनक्ति विश्वम् ॥३४७॥

मन्त्रलिङ्गञ्च—

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः।
मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्। ऋक्० १०।४८।१

धर्मगुब्धर्मकृद्धर्मी सदसत् क्षरमक्षरम्।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥६४॥

४७५ धर्मगुप्, ४७६ धर्मकृत्, ४७७ धर्मी, ४७८ सत्, ४७९ असत्, ४८० क्षरम्, ४८१ अक्षरम्। ४८२ अविज्ञाता, ४८३ सहस्रांशुः, ४८४ विधाता, ४८५ कृतलक्षणः।

शीघ्रता करवाना या कुछ वस्तुओं का संघात करना; यह व्यापनशील भगवान् विष्णु से ही आया है। जैसे कि धन देने से सन्तुष्ट भृत्यवर्ग मिलकर कार्य को जल्दी करता है। धन और धान्य शब्द का पर्यायशब्द के रूप में भी प्रयोग किया जाता है। जो कार्य धन से होता है, वही कार्य धान्य देने से भी होता है। इस प्रकार प्रीणन रूप धनत्व से, तथा आशुकारित्वरूप गुण से भगवान् सर्वत्र व्यापक है। इसीलिये, भगवान् धनेश्वर कहे जाते हैं।

भाष्यकार ने श्लोकों में भावार्थ संकलन इस प्रकार किया है—

भगवान् धनेश्वर है, क्योंकि, वह समस्त विश्व को धान्य से समृद्ध करके, उस से उस धान्य के पृथक् करने में शीघ्रता करता है। इसलिए लक्ष्मी का नाम चपला है। भगवान् विष्णु धनेश्वर नाम से, इस कारण से भी कहा जाता है, क्योंकि वह धनों को अपने वश में रखता है। सब धन को चाहने वाले, उसी से याच्ञा करते हैं, और वही सबको भोग्य पदार्थ प्रदान करता है। इस में "अहं भुव" इत्यादि वेद मन्त्र प्रमाण है।

धर्मगुप्—४७५

धर्मः—धृञ् धारणे भौवादिको धातुस्तस्मात् "अर्तिस्तुसुहु" इत्याद्यौणादिकेन 'मन्' प्रत्ययः। गुणो रपरः। अनिट्। धर्मः। गुप्—गुपू रक्षणे भौवादिको धातुः तस्माद् धर्मोपपदात् "क्विप् च" इति क्विप् प्रत्ययः। "गुपूधूपविच्छिपणिपनिभ्य आयः" इत्याय-प्रत्ययस्त्वार्धधातुके वैकल्पिकः। "आयादय आर्धधातुके वा" पा० ३।१।३१। इत्यनुशासनात्। कित्त्वाद् गुणाभावो धर्मगुप्। धर्मं गोपायति रक्षतीति धर्मगुप् विष्णुः। यतो हि सर्गादारभ्यासर्गसमाप्ति प्रजा नियमेन रक्षतीति धर्मगुबुच्यते। लोकेऽप्येतद्दृश्यते, कर्ता स्वकृतं कार्यं यावदायू रिरक्षिषति। तदेतद्विष्णोरेवानुकरणं सर्वत्र।

भवति चात्रास्माकम्—

स धर्मगुब् विश्वमिदं वितत्य, मूलञ्च गोपायति तस्य यत्नात्।
तथा यथा बीजमथापि वृक्षं, बीजाच्च वृक्षं तरुतश्च बीजम् ॥३४८॥

एवं सर्वत्र चरेषु योज्यम्। मनुष्यकृताया व्यवस्थाया मनुष्य एव रक्षको नेश्वरः।

धर्मगुप्—४७५ धर्म की रक्षा करनेवाला।

धर्म शब्द धारणार्थक भौवादिक धृञ् धातु से, उणादि मनिन् प्रत्यय करने से बनता है। गुप् शब्द धर्मोपपद गुपू रक्षणे, भ्वादिगण की धातु से क्विप् प्रत्यय करने से बन जाता है। दोनों का समास होने से, धर्मगुप् शब्द एक पद बन जाता है। धर्मगुप् नाम विष्णु का है, क्योंकि वह धर्म की रक्षा करता है। सृष्टि से लेकर सृष्टि के अन्त तक प्रजा की नियम पूर्वक रक्षा करने से, विष्णु ही धर्मगुप् कहा जाता है। लोक में भी ऐसा देखने में आता है कि जो कोई किसी कार्य को करता है, वह अपने उस कार्य की, जन्म भर रक्षा करना चाहता है। यह सब भगवान् विष्णु का ही अनुकरण है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस रूप में व्यक्त किया है—

भगवान् विष्णु ही धर्मगुप् है। क्योंकि वह सकल विश्व की रचना करके, धारण शक्ति विशिष्ट इसके मूलरूप धर्म की रक्षा करता है जैसे कि बीज से वृक्ष तथा वृक्ष से बीज को बनाता है। इसी प्रकार सब जङ्गम पदार्थों में भी घटा लेना चाहिये। मनुष्यकृत धर्म की रक्षा मनुष्य करता है, ईश्वर नहीं।

धर्मकृत्—४७६

धर्मकृदिति—धर्मशब्दो व्युत्पादितचरः। धर्मोपपदात्कृञ् कर्तरि क्विपि तुकि च, धर्मं करोतीति धर्मकृत्। धर्मं धारणलक्षणां मर्यादां करोतीत्यर्थः। यदि लोके किञ्चिद् दृश्यजातं तत्सर्वं कयाचिन्मर्यादया निबद्धम्। तद्यथा—सर्वस्यापि प्राणिवर्गस्य शरीरं तदवयवभूतैः षड्भिरङ्गैर्धृतमस्ति। षडङ्गानि चेमानि—शिरोमध्यमभागौ द्वौ, हस्तौ द्वौ, पादौ च सशाखौ। भगवता धर्मकृता कृतव्यवस्थोऽपांनिधिरपि, प्राप्तकाल यथाव्यवस्थं विकुरुते सर्गान्ते। धर्मकृत्कृतमर्यादः सूर्योपि, निरन्तरं दक्षिणत उत्तरतश्च परिवर्तयत्यात्मानम्। चन्द्रोऽपि समर्यादः शुक्लपक्षीयाः कृष्णपक्षीयाश्च विषमाः कला भजमानो वृद्धि ह्रासं चोपैति यथानियमम्। एवं स्वकृतं धर्मं गोपायन्, स विष्णुर्धर्मकृदुच्यते। स्वकृतस्यैव धर्मस्य स गोप्ता, न मनुष्यकृतस्येति निश्चयतो ज्ञेयम्।

भवति चात्रास्माकम्—

स धर्मकृद् विश्वमिदं विधाय, गोप्तापि नूनं स्वकृतस्य बोध्यः।
अतोऽस्ति गीतः कविभिः पुराणैः, स धर्मगुब् धर्मकृतं विजानन् ॥३४९॥

धर्मकृतं=मर्यादितं विश्वम्।

धर्मकृत्—४७९ धर्म की स्थापना के लिए स्वयं धर्म का आचरण करने वाला।

धर्म शब्द का व्युत्पादन पहले किया जा चुका है। धर्मकृत् शब्द, धर्म उपपद रहते हुए कृञ् धातु से कर्ता में क्विप् प्रत्यय होने से बनता है। धर्मकृत् शब्द का अर्थ है, धारण रूप मर्यादा, व्यवस्था का करने वाला। इस विश्व में जो भी पदार्थ है, वह सब किसी न किसी मर्यादा से बन्धा हुआ है। जैसे प्राणी का शरीर ही लीजिए, यह इसके अवयवभूत छः अङ्गों से धारण किया हुआ, बँधा हुआ है। छः अङ्ग ये हैं—बाहु सहित २ हाथ, २ टांगें पाद अंगुलियों सहित, १ शिर और १ मध्य भाग। समुद्र भी भगवन्नियम से बन्धा उसी के नियमानुसार प्रलय के समय विकृत होता है, मर्यादा को छोड़ता है। परमेश्वर की मर्यादा में स्थित सूर्य निरन्तर उत्तर तथा दक्षिण में घूमता रहता है। चन्द्रमा भी भगवत्कृत मर्यादा में स्थित, शुक्ल तथा कृष्ण पक्ष की विषम कलाओं का सेवन करता हुआ, कभी क्षीणता तथा कभी वृद्धि को प्राप्त करता है। इस प्रकार अपने बनाये धर्म की रक्षा करता हुआ, वह धर्मकृत् कहा जाता है। किन्तु वह मनुष्यकृत् धर्म की रक्षा नहीं करता यह जान लेना चाहिये।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार कहा है:—

धर्मकृत् भगवान् विष्णु इस सकल विश्व को बनाकर स्वयं ही इसकी रक्षा करता है। इसीलिए उसके धर्मकृत्व के जानने वाले पुरातन कवियों नें, विद्वानों ने उसको धर्मगुप् कहा है।

धर्मी—४७७

धर्मीति—धर्मशब्दो व्युत्पादितचरः। तस्मात् "संज्ञायां मन्माभ्याम्" पा० ५।२।१३७। सूत्रेण मत्वर्थीय इनिः प्रत्ययः। "नस्तद्धिते" पा० ६।४।१४४। सूत्रेण टिलोप इन्नन्तलक्षणो दीर्घश्च धर्मी। धर्मोऽस्यास्तीति धर्मी, नित्ययोग इनिर्यो धर्मं कदाचिन्न व्यभिचरति, स एवम्विधो धर्मी विष्णुरेव। तथा हि—भगवता धर्मिणा यद्वस्तु सर्गादौ, यद्धर्मकं व्यधायि, तद्वस्तु सर्गान्तं तद्धर्मकमेवात्मानं रक्षति, न तु तद्धर्मात्कदाचिद्विच्यवते। यतो ह्यच्युतधर्मकस्य विष्णोरेव गुणस्य सर्वत्र व्याप्तिः। तथा च लोके—पञ्चभूतानि, सूर्यादयो ग्रहा वा, न स्वं स्वं भगवता नियतीकृतंधर्मं कदाचिज्जहति।

भवति चात्रास्माकम्—

धर्मी स विष्णुः कुरुते समस्तं धर्मेण युक्तं व्यभिचारहीनम्।
एवं हि यः पश्यति धर्मिणं तं स सर्वगं पश्यति विष्णुमेकम् ॥३५०॥

सत्—४७८

सदिति—अस् भुवि—अादादिको धातुस्तस्मात् "वर्तमाने ल"डित्यतो लडित्यनुवर्तमानेऽपि "लटः शतृशानचावप्रथमासमानधिकरणे" पा० ३।२।१२४। सूत्रे पुनर्लङ्-

धर्मी—४७७ सम्पूर्ण धर्मों के आधार।

धर्म शब्द का व्याख्यान हो चुका है। धर्मन् शब्द से संज्ञा में मत्वर्थीय इनि प्रत्यय तथा टि भाग अन् का लोप होने से धर्मी शब्द बनता है। यहाँ इनि प्रत्यय नित्ययोग में हुआ है, इसलिये इस धर्मी शब्द का अर्थ हुआ, जिसका धर्म से कभी व्यभिचार नहीं होता अर्थात् जिसकी धर्मव्यवस्था सदा एकसमान चलती है, वह है धर्मी। जैसे कि भगवान् विष्णु ने जो वस्तु, सर्ग के आदि में, जिस धर्म से युक्त बनाई, वह वस्तु उस अपने धर्म को सर्ग के अन्त तक, वैसा ही रखती है, छोड़ती नहीं। क्योंकि भगवान् अच्युतधर्मा के धर्म की ही सर्वत्र व्याप्ति है। जैसे कि लोक में, पञ्चभूत तथा सूर्यादि ग्रह, भगवान् के द्वारा व्यवस्थित किये हुए अपने धर्म को कभी नहीं छोड़ते।

भाष्यकार ने श्लोक में भावार्थ इस प्रकार कहा है—

भगवान् विष्णु ही धर्मी नाम से कहा जाता है; क्यों कि वह सकल विश्व को सुव्यवस्थित धर्म से युक्त करता है। इस प्रकार जो भगवान् को धर्मी रूप से देखता है, वह समस्त जगत् में व्यापक विष्णु को ही देखता है।

सत्—४७८ अस्ति स्वरूप।

भवनार्थक अदादिगण की अस् धातु से वर्तमानार्थ लट् के स्थान पर शतृ प्रत्यय होकर सत् शब्द बनता है।

भगवान् का स्वरूप सत्त्व है और वह अपने सत्स्वरूप से सर्वत्र व्याप्त है। इसलिए संसार के सब पदार्थ अस्तित्व रूप धर्म से युक्त हैं।

ग्रहणाद् ज्ञायते क्वचित्प्रथमासमाधिकरणेऽपि शता। अत एवास्तीति सत्। शेषमेतद्विषयकं प्रागुक्तम्। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति च भाष्यम्। सत्तालक्षणो हि भगवान् स्वेन सत्त्वेन सर्वत्र व्याप्तः। अत एव सर्वे जागतपदार्था अस्तित्वलक्षणं धर्मं भजन्ते सत्तालक्षणमस्तित्वं सर्वत्र "घटोस्ति, पटोस्ति, गौरस्ति, मनुष्योऽस्ती"-त्यादिरूपेणानुस्यूतं, किंपुनः बहुनकारवाच्यस्य निषेधस्याप्यस्तित्वं विना न स्थितिर्नास्ति, इति दर्शनात्। तथा चात्मा न म्रियत, इत्यमृतेन धर्मेण सोऽमरोऽस्ति सन्। देहोऽयं षड्भावविकारानाप्नोतीत्यतो विकारित्वधर्मेण स सन्। एवं सत्तालक्षणो धर्मः सर्वत्र व्याप्तस्तं सन्तं विष्णुं व्यनक्ति।

भवति चात्रास्माकम्—

सन् विष्णुरेकः स्वकृते च विश्वे सर्वं सता योजयते ह नित्यम्।
नित्यो हि देही नियतं हि सन् सः कायो विकारी स तु सन् विकृत्या ॥३५१॥

सदसदिति सांहितिकं जश्त्वम्।

असत्—४७६

असदिति—सतः प्रतिषेधोऽसत्। सतो नञा समासे नलोपः। शेषं सर्वं व्युत्पादनं सता समम्। द्विधा हि वस्तुनिरूपणं, विधिरूपेण निषेधरूपेण च। तत्र विधिरूपेण सन्निरूपितमस्तीति। निषेधरूपेणेदानीं निरूप्यतेऽसदिति। स स्वस्वरूपेण सदपि जगद्रूपेणासत्—उच्यते—तथा हि पञ्चीकृतपञ्चमहाभूतमयं प्रकृति-

---

सब पदार्थों में उसका सत् स्वरूप अनुगत है। जैसे घट है, पट है, गौ है, घोड़ा है, अधिक का निषेधार्थक, नकार के साथ भी अस्ति लगता है। जैसे नास्ति, इस प्रकार सत्तालक्षण धर्म, सर्वत्र व्याप्त होकर भगवान् विष्णु को प्रकट रूप से बतला रहा है।

भाष्यकार ने श्लोक में भावार्थ इस प्रकार कहा है—

भगवान् विष्णु ही सत् है, क्योंकि वह अपने बनाये सकल विश्व को अपने सत्त्व लक्षण धर्म से युक्त करता है। नित्य आत्मा अपने नित्यत्व रूप धर्म से सत् है, तथा विकारी शरीर अपनी विकार परम्परा "विकार प्रवाह" से सत् है।

असत्—४७६ स्थूल जगत् स्वरूप।

सत् शब्द का व्याख्यान पहिले किया जा चुका है, सत् शब्द का नञ् के साथ समास करने से, असत् शब्द सिद्ध होता है असत् शब्द सत् के विपरीत अर्थ को कहता है, अर्थात् सत् का निषेध असत् है। प्रत्येक वस्तु का निरूपण दो प्रकार से, विधि या निषेध रूप से किया जाता है, या तो किसी वस्तु का निषेध किया जाता है अर्थात् या 'है' रूप से वर्णन सत् शब्द से किया है। वह भगवान् सत्ता, ज्ञान तथा आनन्द रूप से सर्वत्र व्यापक होकर भी जगत् रूप से असत् है। पञ्चभूतरूप प्रकृति के विकारों से बने हुए जगत् में,

विकृतिभूतमिदं, चतुर्विंशतितत्त्वघटितं जगत्। अत्र च स व्यापकत्वेन सर्वत्र वर्तमानोऽपि, बुद्धित्वरूपेण, मनस्त्वरूपेण, इन्द्रियत्वरूपेण; न स बुद्धिरूपो, न स मनोरूपो—न स इन्द्रियरूप एवङ्कारन्निषिध्यते।

यथा—इक्षुविकारो गुडो नेक्षुरितीक्षुरूपत्वं तस्य निषिध्यते, रसरूपेण तत्र वर्तमानोऽपि। अत एवोच्यते "न सत् न चासत्सः"।

भवति चात्रास्माकम्—

वैकारिकं तस्य न सत्स्वरूपमसत्-सदुक्तः कविभिः पुराणैः।
एवं हि यो वेत्ति पदं गुहस्य, स मृत्स्नमूर्तौ न मनो दधाति ॥३५२॥

मृत्स्नं=प्रशस्तमृत्। एतच्चोपलक्षणं, पाषाणसुवर्णादिधातूनाम्।

मन्त्रलिङ्गञ्च—

"न तस्य प्रतिमा अस्ति यस्य नाम महद् यशः" यजु० ३२।३

क्षरम्—४८०, अक्षरम्—४८१

क्षरमक्षरमित्युभयं युगपद् व्याख्यायते—क्षर् सञ्चलने भौवादिकधातोः पचाद्यचि क्षरम्। क्षरस्य प्रतिषेधोऽक्षरमिति, क्षरशब्दस्य नञा समासो, नञो नकारस्य लोपश्च। क्षरशब्दो हि क्षरति सञ्चलतीति, गमनशीलं जगदाह। अक्षरशब्दश्च न सञ्चलति स्वरूपान्न विच्यवत इति जगदनुस्यूतमात्मानमाह। एवञ्च

---

२४ तत्त्वों में से कोई भी वह नहीं है, इन्द्रियत्व रूप से इन्द्रिय नहीं, मनस्त्व रूप से मन नहीं, बुद्धित्व रूप से बुद्धि नहीं, इस प्रकार उसका निषेध किया जाता है। जैसे इक्षु—ईख के विकार गुड़ रूप में रस रूप से रहता हुआ भी ईख, गुड़ रूप नहीं है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार दिया है—

प्राचीन विद्वानों ने भगवान् को सत् तथा असत् रूप से कहा है। वह स्वयं सत्स्वरूप होता हुआ भी, पञ्चभूतमय यह वैकारिक जगत् उसका सत्स्वरूप नहीं है, इसलिए जगत् रूप से वह असत् है। इसमें "न तस्य प्रतिमा अस्ती"त्यादि मन्त्र प्रमाण है।

क्षरम्—४८० सर्वभूतमय। अक्षरम्—४८१ अविनाशी।

क्षर और अक्षर दोनों शब्दों का एक साथ व्याख्यान किया जाता है। सञ्चलनार्थक भ्वादिगण की क्षर धातु से पचादि अच् प्रत्यय करने से, क्षर शब्द सिद्ध होता है, क्षर का निषेध रूप अर्थ अक्षर है। ... शब्द सञ्चलनरूप अर्थ से जगद् का वाचक है, क्योंकि

पाञ्चभौतिकं जगत्क्षरं, तत्प्रवर्तकञ्च क्षरभिन्नमक्षरम्। गच्छतीति जगत्, क्षरतीति क्षरमित्युभयोः समानार्थता। चक्रमित्यपि क्षरसमानार्थः। क्षराक्षररूपत्वाद्विष्णुरेवोभयोर्वाच्यः।

भवन्ति चात्रास्माकम्—

क्षरं जगद् दृश्यदृशास्ति दृश्यं क्षराणि नामानि च तस्य विष्णोः।
दिने महेन्द्रः सविताऽग्निरेवं, मासानुपातेन पृथक् पृथक् सः॥ ३५३॥

एवं हि यो वेत्ति पदं क्षरस्य क्षरेऽक्षरं पश्यति तस्य चक्षुः।
तथा यथा यन् मनुजो पदाभ्याम्, चलाचलेनैति पदेन धाम॥ ३५४॥

तत्राक्षरो जीव इलामभीप्सुः क्षराक्षरे तत्र चरे क्षरे ते।
विक्लृप्तिरेषा भुवनेऽस्ति दृश्या न चाक्षरे ब्रह्मणि सञ्चलत्वम्॥ ३५५॥

मन्त्रलिङ्गञ्च—

'ऋचो अक्षरे परमे व्योमन्'' ऋक्० १-१६४-३९

तथा ''तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।'' यजु० ४०।५

जगद् चलता है तथा अक्षर शब्द जगद् में व्यापक होकर अन्तर्यामी रूप से, उसको चलाने वाले परमात्मा का वाचक है। क्षर और जगत् गमनरूप अर्थ वाला है। क्षर और अक्षर दोनों ही, विष्णु के रूप होने से, विष्णु ही क्षर तथा अक्षर है।

भाष्यकार ने श्लोकों द्वारा भावार्थ इस प्रकार व्यक्त किया है—

जगत् में होने वाले सब प्राणी दृश्य हैं, और उनकी दृष्टि से यह सकल जगत् क्षर है। और काल के अनुपात से, समय क्रम से होने वाले भगवान् सूर्य के नाम भी क्षर हैं, जैसे दिन में महेन्द्र तथा सविता उसका नाम होता है, और रात्रि में उसका नाम अग्नि होता है। तथा मासों की भिन्नता से भी उसके भिन्न भिन्न नाम होते हैं, ये सब नाम क्षर हैं। इस प्रकार जो क्षर के तत्त्व को जानता है, वह अक्षर को ही क्षर में देखता है। जैसे एक मनुष्य प्रथम स्थान से दूसरे स्थान में जाता है, तब एक पैर को क्षर—'चल' तथा एक को अक्षर स्थिर रखता है। जीव रूप अक्षर जब पृथिवी को प्राप्त करना या चलना चाहता है, तब उसके चरण क्षर और अक्षर अथवा चल और स्थिर होते हैं। किन्तु यह कल्पना जगत् में ही है, ब्रह्म में गति नहीं है।

इसमें "ऋचो अक्षरे परमे" इत्यादि मन्त्र प्रमाण है।

अविज्ञाता—४८२

अविः—अव् रक्षणादौ भौवादिको धातुस्तस्मात् "सर्वधातुभ्य इन्" इत्युणादिः—इन् प्रत्ययः—अविः।

ज्ञातेति—ज्ञा अवबोधने क्रैयादिको धातुस्तमात् "ण्वुल्तृचौ" पा० ३।१।१३३ सूत्रेण तृच् प्रत्ययः कर्तरि कृत्वात् प्रातिपदिकसंज्ञा, अनङ्दीर्घादि सौ। एवञ्च—अविश्चासौ ज्ञातेति कर्मधारयसमासे, अवति, रक्षति सर्वं, दीप्यते सर्वत्र सूर्यादिरूपः, शृणोति शरणागताभ्यर्थनां, गच्छति सर्वत्रान्तर्यामिरूपेण, सकलस्य विश्वस्य स्वामित्वञ्चाप्नोतीत्याद्यर्थकोऽविः, जानाति च सकलस्य विश्वस्य स्वामित्वञ्चाप्नोतीत्याद्यर्थकोऽविः, जानाति च सकलमिति ज्ञाता। अविज्ञाता विष्णुः। पूर्वोक्ताः सर्व एवार्था विष्णौ समन्विताः।

भवति चात्रास्माकम्—

ज्ञानोदयो विष्णुरमोघधर्मा, करोति पूर्णं न कुतश्चनोनम्।
यद्यत् कृतं तेन भवेऽस्ति दृश्यं, तत्तत् तमाख्याति च निर्विकल्पम्॥ ३५६॥

अविज्ञाता—४८२

रक्षा कान्ति श्रवणाद्यर्थक भ्वादिगण की अव धातु से, उणादि, इन् प्रत्यय करने पर अवि पद बनता है। ज्ञा अववोधने क्र्यादिगण की धातु से, कर्ता में तृच् प्रत्यय करने से, ज्ञाता शब्द सिद्ध होता है। दोनों पदों का कर्मधारय् समास करने से, अविज्ञाता एकपद बन जाता है। इस प्रकार से जो सबकी रक्षा करता है, सूर्यादि रूप जो सब जगत् में प्रकाश करता है, जो शरणागत की प्रार्थना सुनता है, अन्तर्यामिरूप से जो सर्वत्र व्यापक है तथा जो सबका स्वामी है, और सर्वज्ञ है, वह अविज्ञाता है। ये सब अर्थ अविज्ञाता पद के हैं।

भाष्यकार ने श्लोक द्वारा भावार्थ कथन इस प्रकार किया है—

भगवान् विष्णु अविज्ञाता है। क्योंकि वह ज्ञान स्वरूप है, उसी के ज्ञान का समग्र संसार में उदय अर्थात् विस्तार, व्यापन, फैलाव है। वह इस विश्व को सर्वाङ्गपूर्ण बनाता है। भगवान् ने जैसा जगत् तथा उसके अवयवभूत पदार्थ बनाये हैं वे सब उसी निर्विकल्प स्वरूप को बतला रहे हैं।

सहस्रांशुः—४८३

सहस्रशब्दोऽनन्तपर्यायः। अंशुशब्दश्चन्द्रांशुनामव्याख्याने व्युत्पादितः। सहस्रमनन्ता अंशवो रज्जुस्थानीयाः करस्थानीया वा किरणा यस्य स सहस्रांशुरिति।

व्यापनादंशुरित्यर्थानुगमादंशुशब्दो ज्ञानं प्रभां वाचष्टे। ज्ञानं प्रभा वा स्वविषयं व्याप्नोति। अनन्तज्ञानानन्तप्रभश्च विष्णुरतः सहस्रांशुः।

भवति चात्रास्माकम्—

सहस्रदीप्तिर्भगवान् प्रसिद्धः, सहस्रबोधोऽपि स एव तस्मात्।
सूर्यो यथासंख्यकरैर्व्यनक्ति, स्वं विश्वमेतच्च सहस्ररश्मिः॥३५७॥

विधाता—४८४

विपूर्वको डुधाञ्, धारणपोषणयोर्जुहोत्यादिको धातुस्तस्मात्तृच् प्रत्ययः कर्तरि। अनिट् चायन्धातुः। सावनङ् दीर्घादि; विधातेति। विदधाति करोति विश्वं विविधैः फलयोगैर्नियमैश्च पालयति धारयति वेति विधाता विष्णुः। विष्णुर्हि जीवानां यथा जात्यायुर्भोगभोगाय नानाविधं प्राणिशरीरं विधत्ते।

सहस्रांशुः—४८३ असंख्य किरणों वाले सूर्य स्वरूप।

सहस्र शब्द असंख्य अर्थ का वाचक है, अंशु-शब्द का व्याख्यान हो चुका है चन्द्रांशु शब्द के व्याख्यान में। असंख्य हैं, हाथों या रज्जुओं के समान किरणें जिसकी उसका नाम है सहस्रांशु। व्यापन करने से अंशु है, इस व्युत्पत्ति से अंशु शब्द का अर्थ ज्ञान या प्रभा प्रकाश होता है। क्योंकि ज्ञान और प्रकाश दोनों ही अपने विषय में सब तरफ से फैल जाते हैं। भगवान् का ज्ञान या प्रकाश अनन्त है, इसलिए वह सहस्रांशु है।

भाष्यकार ने श्लोक द्वारा भावार्थ कथन इस प्रकार किया है—

भगवान् विष्णु अनन्त ज्ञान तथा अनन्त प्रकाश रूप से प्रसिद्ध है। जैसे सूर्य अपनी अनन्त किरणों से जगत् को प्रकाशित करता है, वैसे ही भगवान् विष्णु इस विश्व को बोध तथा प्रकाश देता है, इसलिये वह सहस्रांशु है।

विधाता—४८४ सब को अच्छी प्रकार धारण करने वाला।

विपूर्वक धारण पोषणार्थक जुहोत्यादिगण की डुधाञ् धातु से कर्ता में तृच् प्रत्यय हो कर विधाता बनता है। विधाता शब्द का वाच्यार्थ है, जो विश्व की रचना करके उसका नाना प्रकार के कर्मानुरूप फल सम्बन्धों से तथा विविध नियमों से रक्षा करता है। भगवान् विष्णु जीवों के जन्म तथा आयु के अनुसार विविध भोगों को भोगने के लिए विविध प्रकार के प्राणियों के शरीर बनाता है। इसमें "स नो बन्धुर्जनिता" इत्यादि मन्त्र प्रमाण है।

मन्त्रलिङ्गञ्च—

"स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा" यजु० ३२।१०

भवति चात्रास्माकम्—

धातुर्विधाता भगवान् स विष्णुर्जायाञ्च जन्यञ्च[1] समानकाले।
दधाति पुष्णाति पृथक् पृथक्[2] सः, धाता विधाता कथितः स सन्दृक्[3] ॥३५२॥

१- जनिष्यमाणम् २- पृथक्=अंगभेदेन पार्थक्यम्, ३- सन्दृक्=समानदृष्टिः।

कृतलक्षणः—४८५

डुकृञ् करणे तानादिको धातुस्तस्मात्कर्मणि क्तः। अनिडयं गुणाभावश्च कित्त्वात् कृत इति। लक्षणम्—लक्षदर्शनाङ्कनयोरिति चौरादिको धातुस्तस्माण्णिच् "लक्षेरट् च" इत्युणादिसूत्रेण नः प्रत्ययः, अडागमश्च, णिलोपो, णत्वं लक्षणमिति। लक्षयति अङ्कयति वा लक्षणम्। कृतानि लक्षणानि परिचायकानि, चिह्नविशेषाणि येन स कृतलक्षणः। भगवता हि प्रत्येकं वस्तु तदन्तरङ्ग-मव्यक्तं भावं व्यक्तीकर्तुं केनचिच्चिह्नविशेषेण विशेषितम्। यथा गो-रेभणेन व्यज्यत इयं वृषस्यतीति। एवं महिष्यपि। एतद्धि रेभणशब्दनलक्षणं तदन्तरङ्गमव्यक्तं कामं ज्ञपयति। व्यवायान्तर्गतं विषं, नेत्रविकारादिलक्षणैर्व्यक्तं

भाष्यकार ने श्लोक द्वारा भावार्थ कथन इस प्रकार किया है—

धारक शक्ति विशिष्ट पदार्थों का भी, विशेष करके धारण करने वाला भगवान् विष्णु स्त्री तथा उसके उदर में रहने वाले गर्भ का एक ही काल में पृथक् पृथक् धारण तथा पालन करता है। इसलिए वह समानद्रष्टा, धाता तथा विधाता नाम से कहा जाता है।

कृतलक्षणः—४८५

तनादिगण की डुकृञ् करणार्थक धातु से कर्म में क्त प्रत्यय होने से कृत शब्द तथा चुरादिगण की लक्ष दर्शन और अङ्कन अर्थात् चिन्ह विशेष से विशिष्ट करना अर्थ वाली धातु से उणादि न प्रत्यय और णि का लोपादि करने से लक्षण शब्द बनता है। इन दोनों पदों का बहुव्रीहि समास करने से कृतलक्षण यह एक पद बन जाता है। इस प्रकार से परिचय करवाने वाले चिह्न विशेष जिसने किये हैं वह कृतलक्षण है। भगवान् ने प्रत्येक वस्तु के अन्तरङ्ग अर्थात् उसके मानसिक अव्यक्त भाव को प्रकट करने के लिए उसको किसी न किसी चिह्न विशेष से विशिष्ट किया है। जैसे गौ (स्त्री पशु) के रेभण शब्द से उसके वृषोपगमन-रूप अन्दर के भाव का प्रकाश होता है। इसी प्रकार महिषी भी पुंस्त्व विशिष्ट भैंसे से सङ्गमन के लिए अपने भाव को शब्द से व्यक्त करती है। शरीर के अन्दर फैलने वाले विष का नेत्रादि

भवति। एवं सूर्यादयो ग्रहोपग्रहास्तमव्यक्तं स्वव्यवस्थापकं लक्षणभूता व्यञ्जन्ति। एवं कृत्वा बहिरागतं चिह्नविशेषमन्तःस्थं गुणं दोषं वा प्रकटयति। अथापि च ये जागताः पदार्थास्ते सर्वे केनचिच्चिह्नविशेषेण चिह्निताः, येन तेषां पृथक् पृथक् परिचितिः स्यात्। समानजातीया अपि पृथक् चिह्नाङ्किताः, किमुत विजातीयाः। एवञ्च स कृतलक्षणत्वेन सर्वत्र व्याप्तः। एवं सर्वत्रोहनीयम्।

भवन्ति चात्रास्माकम्—

स विष्णुरेकः स्वमनिन्द्यसत्त्वं, प्रकाशयन् लक्षणमातनोति।
तथा यथा व्यक्ततरं विकारं बहिर्गतं लक्षणमातनोति॥३५९॥

कृता व्यवस्था सुखदेन[1] येन, सुखे[2] शरीरे किमु वा जगत्याम्।
गायन्ति याचन्ति यथाभिलाषं नमन्ति तं वा कृत[3]लक्षणं ते॥३६०॥

१- विष्णुना, २- सुखाते, ३- विष्णुम्।

सैषा व्यवस्था प्रतिवस्तु वीक्ष्या मूलं त्वरिष्टस्य समग्रमस्मिन्।
यत्तत्त्वविद्भिः प्रपदं व्यकारि[4] शास्त्रे तदहं निचितं हि यत्नात्॥३६१॥

४- विश्ववर्कः कृ विक्षेपे कर्मणि लुङि।

शरीरगत विकारों से बाहर प्रकाश होता है। इसी प्रकार लक्षणरूप जो सूर्यादि ग्रह हैं, वे सब अपने व्यवस्थापक अव्यक्त परमात्मा को प्रकट कर रहे हैं। इस प्रकार से बाहर आया हुआ चिह्न विशेष उस वस्तु के अन्तःस्थित गुण दोष रूप भाव को प्रकट करता है। और भी जितने जगत् के पदार्थ हैं, समानजातीय या विजातीय वे सब विशेप विशेप चिह्नों से चिह्नित हैं, जिससे उनकी भिन्न रूप से पहिचान हो जाए। इसी प्रकार सब समझ लेना चाहिये।

भाष्यकार ने श्लोकों द्वारा भावार्थ कथन इस प्रकार किया है—

भगवान् विष्णु संसार में अपने श्रेष्ठ सद्भाव अर्थात् अपने अस्तित्व रूप को प्रकट करने की इच्छा से प्रत्येक वस्तु में विशेप विशेष चिह्नों का निर्माण करता है। जैसे कि उस उस वस्तु का वह विकार बाहर प्रकट कर देता है।

उस सुखद प्रभु ने इस सुखी रूप शरीर में अथवा जगत् में जो व्यवस्था नियम विशेष बनाये हुए हैं, उन से सन्तुष्ट होकर विद्वान् पुरुष अपनी अपनी अभिलाषा के अनुसार प्रभु का गान, स्तवन तथा नमन करते हैं। यह सर्वेश्वर विष्णुकृत व्यवस्था प्रत्येक वस्तु में दीखती है। इसी में समग्र ससार का कल्याण स्थित है। विद्वान् तत्त्व के जानने वाले पुरुषों के द्वारा, यत्र तत्र शास्त्रों में व्याख्यान किया हुआ तत्त्व मैंने यत्न से इस भाष्य में एकत्र किया

एवं हि यो वेत्ति स वेत्ति सूक्ष्मं[1] स्वयं भवे दुर्गतिमास्थितो वा।
ज्ञानं पवित्रं कुरुते पवित्रं तंदुर्गतंदुर्गमितं मनुष्यम् ॥३६२॥

१- विष्णुम्।

ज्ञानान्यनेकानि निरञ्जनं तं व्यञ्जन्त्यसक्तं भुवने शयानम्।
सच्छ्रद्धया नम्रतया च तज्ज्ञान्, संसेव्य पृच्छेत् परमादरेण ॥३६३॥

ज्ञानस्य लिङ्गं तपसश्च लिङ्गम्, नपुंसकं लोकमतं प्रसिद्धम्।
भोगान् परित्यज्य मनो निदध्यात् शास्त्रे गुरूणां वचने च यत्नात् ॥३६४॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥६५॥

४८६ गभस्तिनेमिः, ४८७ सत्त्वस्थः, ४८८ सिंहः, ४८९ भूतमहेश्वरः।
४९० आदिदेवः, ४९१ महादेवः, ४९२ देवेशः, ४९३ देवभृद्गुरुः ॥

गभस्तिनेमिः—४८६

गभस्तिरिति—भस—भर्त्सनदीप्त्योरिति जौहोत्यादिकश्छान्दसो धातुः। धनधातुवदस्यापि भाषायां प्रयोगो नाम्नां छन्दोवद्भावाद्वा। "वसेस्ति"रित्युणादिर्बाहुलकादत्रापि तिः प्रत्ययः। "तितुत्रेति" पा० ७।२।९। सूत्रेणेण्निषेधः। पृषोदरादित्वाद् वर्णागमो भकारस्य गकारः।

है। जो मनुष्य इस प्रकार से भगवान् विष्णु को जानता है, वह दुर्गत विपत्तिग्रस्त होता हुआ भी अर्थात् अनेक विपत्तियों से घिरा हुआ तथा लोगों की दृष्टि में अपवित्र और निन्दनीय भी प्रभु के ज्ञान से पवित्र हो जाता है। बहुत प्रकार के ज्ञान जो इस संसार में व्याप्त हैं, उस सच्चिदानन्द प्रभु को प्रकट कर रहे हैं, जो इस समग्र भुवन में व्यापक तथा पृथक् भी हैं। जो मनुष्य प्रभु को जानना चाहे वह ज्ञानी पुरुषों की सेवा करता हुआ आदर से, उन से ज्ञान प्राप्त करे। ज्ञान तथा तप दोनों ही नपुंसकलिङ्गी हैं, लोक का यह प्रसिद्ध मत है अर्थात् विद्वानों का मत ही इसमें प्रमाण है। इसलिए भोगों का त्याग करके शास्त्र तथा गुरुओं के वचनों में ही मन लगावे जिससे सच्चा ज्ञान प्राप्त होवे।

गभस्तिनेमिः—४८६ किरणों के बीच सूर्य रूप से स्थित।

भस भर्त्सन और दीप्ति अर्थ में जुहोत्यादि गण की धातु है, धन धान्ये धातु के समान इसका भी लोक में प्रयोग होता है। अथवा विष्णु के नाम शब्द भी वैदिक शब्दों के समान हैं। धातु से उणादि ति प्रत्यय तथा पृषोदरादि शासन से भकार को गकार वर्ण का आगम हो

नेमिः—णीञ् प्रापणे भौवादिको धातुः "नियो मि"रिति, उणादिसूत्रेण मिः प्रत्ययो गुणः। नेडयम्। एवञ्च गभस्तीन् मयूखान्नयति प्रापयति सर्वत्र, सर्वस्य प्रकाशायेति गभस्तिनेमिर्भगवान् विष्णुः। किरणसमूह एव प्रकाशोऽतः सहस्रांशुः सूर्य इति व्याख्यातचरः। यथाग्नेरधिपतिः सूर्यो लोके प्रकाशकः प्रसिद्धः। एवं यः सर्वेषां प्रकाशकानां प्रकाशको विष्णुः स गभस्तिनेमिरुच्यते, वृहतां भासकत्वाद् "वृहद्भानु"रपि स एव विष्णुः। मन्त्रलिङ्गञ्च—

"पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य।" ऋक्० १।३६।१५

पूर्वत्र नामसूपन्यस्तचरः।

भवन्ति चात्रास्माकम्—

गभस्तिनेमिः कथितो ह सूर्यः, प्रकाशकोऽनन्तमयूखगर्भः।
तस्यापि यो भासयिता स विष्णुर्गीतो बृहद्भानुपदेन वेदे ॥३६५॥
आत्मा शरीरेऽस्ति गभस्तिनेमिः, पृथु प्रभावत्कुरुते शरीरम्।
मृतं शरीरं सकलं यथावत्, सच्चापि तेजोरहितं यतस्तत् ॥३६६॥

१- तत्=शरीरम्।

एवं हि यो वेत्ति गभस्तिनेमिं स दीपकानां कुरुते विकासम्।
ज्योतिः पुरस्कृत्य तदर्थलिङ्गं गभस्तिनेमौ रमते विशङ्कः ॥३६७॥

जाता है। नेमि शब्द, णीञ्, प्रापणे धातु से उणादि मि प्रत्यय होने से बनता है। इस प्रकार गभस्तिनेमि शब्द का अर्थ जो विश्व को प्रकाशित करने के लिए अपनी किरणों दीप्तियों को सर्वत्र पहुँचाये, फलाये उसका नाम गभस्तिनेमि है, यह भगवान् विष्णु का नाम है। किरणों के समूह का नाम ही प्रकाश है, इसलिए सहस्रांशु शब्द मे सूर्य का व्याख्यान किया जा चुका है। जैसे अग्नि का अधिष्ठाता सूर्य लोक का प्रकाशक है, यह प्रसिद्ध है। इसी प्रकार जो सूर्यादि प्रकाशकों का भी प्रकाशक है, वह गभस्तिनेमि है। उसी विष्णु का नाम वृहद्भानु भी है, क्योंकि वह बड़े सूर्यादि प्रकाशकों का भी प्रकाशक है, इसमें "पाहि नो अग्ने" इत्यादि मन्त्र प्रमाण है।

भाष्यकार ने श्लोकों द्वारा भावार्थ संकलन इस प्रकार किया है—

अनन्त किरणों वाले जगत् के प्रकाशक सूर्य का नाम गभेस्तिनेमि है। उस सूर्य का भी प्रकाशक भगवान् विष्णु वेद में वृहद्भानु पद से कहा गया है।

इस शरीर में गभस्तिनेमि रूप से विराजमान आत्मा इस शरीर को प्रभावाला, प्रकाशवाला बनाता है। क्योंकि गभस्तिनेमि आत्मा के निकल जाने पर यह आकार से यथापूर्व रहता हुआ भी निस्तेज प्रभारहित हो जाता है।

इस प्रकार जो भगवान् गभस्तिनेमि को जानता है वह दीपकों का विकास करता है तथा तदन्तर्गत ज्योतिरूप चिह्न को समक्ष रखकर गभस्तिनेमि विष्णु में निःशङ्क विचरण करता है।

सत्त्वस्थः—४८७

सत्त्वस्थ इति सतो भावः सत्त्वम् "तस्य भावस्त्वतलौ" पा० ५।१।११९ इत्यनेन भावे ताद्धितस्त्वप्रत्ययः। तद्रूपे सुप्युपपदे "ष्ठा-गतिनिवृत्तौ", धातोः "सुपि स्थः" पा० ३।२४ इति सूत्रेण कः प्रत्ययः कर्तरि-आल्लोपश्च। सत्त्वं सद्भावः सत्त्वाख्यो गुणो वा, प्रकाशरूपस्तमधितिष्ठतीति सत्त्वस्थः। हृदयं मनश्चापि सत्त्वाभिधाने मनसो हि हृदये निवासः। अत्र च "हृत्प्रतिष्ठं यदजिरमिति" यजु० ३४।६ मन्त्रलिङ्गम्। एवञ्च भगवान् विष्णुः शुद्धे प्रकाशरूपे सत्तालक्षणे स्वरूपे, तिष्ठतीति सत्त्वस्थः। अथवा हृदयं मनसि वा विश्वेषां प्राणिनां तिष्ठति। पुण्डरीकाक्षनामवत्सर्वं व्याख्येयम्। मन्त्रलिङ्गञ्च—"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।" यजु० ३१।१८। उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्। यजु० २०।२१। इत्यादि। लोकेऽपि च दृश्यते—षड्भावविकारमयमिदं सर्वं स्वकारणे सत्तालक्षणे तिष्ठति। एवं सत्त्वस्थरूपेण गुणेन विश्वं व्यश्नुवानः सत्त्वस्थ उच्यते विष्णुः।

भवतश्चात्रास्माकम्—

सत्तैव सत्त्वं हृदयं मनो वा सत्त्वं गुणो वा सततप्रकाशः।
तं योऽधिकुर्वन् स्थितिमातनोति, सत्त्वस्थनाम्ना भगवान् स विष्णुः ॥३६८॥

सत्त्वस्थः—४८७ अन्तर्यामी रूप से समस्त प्राणियों के अन्तःकरण में स्थित रहने वाले।

सत् शब्द से भाव अर्थ में तद्धित का त्व प्रत्यय होने से सत्त्व शब्द बनता है। सत्त्व शब्द के उपपद रहते हुए स्था धातु से कर्ता में कृत् क प्रत्यय होने से सत्त्वस्थ शब्द बन जाता है। सत्त्व नाम सत्ता 'अस्तित्त्व' या प्रकाश रूप शुद्ध सत्त्व गुण का है। उस सत्त्व में जो स्थित रहे उसका नाम 'सत्त्वस्थ' है यह विष्णु का नाम है। हृदय और मन का नाम भी सत्त्व है, हृदय में मन की स्थिति है। इसमें "हृत्प्रतिष्ठं यदजिर"मित्यादि मन्त्र प्रमाण है। इस प्रकार से भगवान् विष्णु अपने सत्तारूप शुद्ध प्रकाश रूप गुण में स्थित रहते हैं, इसलिए उनका नाम सत्त्वस्थ है। अथवा सब प्राणियों के हृदय या मन में रहते हैं इसलिए भी सत्त्वस्थ हैं। इसका सब व्याख्यान 'पुण्डरीकाक्ष' नाम के समान है। इसमें "वेदाहमेतं पुरुषं महान्त"-मित्यादि मन्त्र प्रमाण हैं। यजु०। लोक में भी देखा जाता है कि षड्भाव विकार रूप सकल जगत् अपने सत्ता रूप कारण में स्थित है। इस प्रकार भगवान् सत्त्वस्थ अपने सत्त्व रूप से सर्वत्र व्याप्त है।

भाष्यकार ने श्लोकों द्वारा भावार्थ कथन इस प्रकार किया है—

सत्ता, हृदय, मन तथा शुद्ध प्रकाश स्वरूप सत्त्वगुण ये सब सत्त्व शब्द के वाच्यार्थ हैं। इन सब में जो व्यापक रूप से स्थित है, उसका नाम सत्त्वस्थ है। जो मनुष्य शुद्ध सत्त्वरूपता

यः शुद्धसत्त्वो भजते स्वकान्तः, सत्त्वस्थभावं लभते स मर्त्यः।
रजस्तमो वा निजवर्गयुक्तं, तं सत्यसन्धं न वियौति मार्गात् ॥३६६॥
मार्गः—शुद्धस्वरूपम्, मृजूष् शुद्धौ। मार्गो विष्णुः। वैष्णवमार्गाद्वा।

सिंहः—४८८

सिंह इति—षिच् क्षरणे तौदादिकधातोः "सिचेः संज्ञायां हनुमौ कश्च" इत्युणादिसूत्रेण कः प्रत्ययो, धातोरन्तादेशो हकारो नुम् च, सिंहः। यद्वा हिंसि, हिंसायां धातोः पचादिलक्षणोऽच्, पृषोदरादित्वाद्वर्णविपर्ययो नुम् च। यद्वा काशकृत्स्न-मते सिंहि धातुर्हिसार्थकस्तस्मात् इदित्वान्नुमि, पचाद्यचि च सिंहः।

एवञ्च सिञ्चति मेघैः पृथिवीं कर्मफलैर्वा जगद्, इति सिंहः। हिनस्ति हिंसति वा कालक्रमेण प्राणिनामायूंषि इति-सिंहः। अतुलपराक्रमो विष्णुः प्रतिक्षणं प्राणिना-मायुर्न्यूनयन् नानन्ततो मृत्युभाजो विधत्ते। इत्थञ्च सर्गान्ते जगतः सर्वे भावाः क्षीयन्ते, किमुत बहु-कल्पस्याप्यायुषश्चतुर्दशमन्वन्तराणि प्रमाणमस्ति, ततश्च यदिच्छया कल्पाख्यः कालोऽपि विलीयतेऽतः स सिंहः। अत एव कस्यचिदतुलबलत्तां दिद्योतयिषुः कश्चित्तं—सिंहेनोपमिमीते। यथा भिषक्केसरीति। केसरीशब्दः सिंहपर्यायः, सिंहसदृशः तेजस्त्वपराक्रमत्वादिगुणयुक्तो निर्भीकश्च, भिषगित्यर्थः। भगवांश्च

को प्राप्त कर लेता है, अर्थात् रज और तम से विचलित न होकर सात्त्विक शान्त स्वरूप बन जाता है, वह भी सत्त्वस्थ हो जाता है। उस सत्त्वस्थ पुरुष को कामक्रोधलोभादि अपने वर्ग सहित राग और तम वैष्णव मार्ग से विचलित नहीं कर सकते।

सिंहः—४८८

सिंह शब्द तुदादिगण की क्षरणार्थक षिच् धातु से क प्रत्यय और धातु के अन्त को हकार तथा नुम् आगम होने से सिंह बनता है। अथवा काशकृत्स्न ऋषि के मत में सिहि हिंसार्थक धातु से पचाद्यच् होने से सिंह बन जाता है। इस प्रकार से सिंह शब्द का अर्थ जो मेघों तथा कर्मफलों से पृथिवी और जीवों का सिञ्चन करे वह सिंह सूर्य है। अथवा जो कालानुसार प्राणियों की आयु को समाप्त करे, उसका नाम सिंह है। भगवान् की शक्ति का कोई प्रमाण नहीं, वह धीरे धीरे प्राणियों की आयु को क्षीण करता हुआ प्राणियों को समाप्त कर देता है। इस प्रकार प्रलय काल में सब भाव पदार्थों का क्षय हो जाता है। अधिक क्या, कल्प की भी आयु चौदह मन्वन्तरों से परिमित है, उसके बाद महाकाल रूप कल्प का भी अपने अधिष्ठान में लय हो जाता है। अनन्तशक्ति रूप होने से उसका नाम सिंह है। लोक में भी जो कोई किसी को अत्यन्त बलशाली बताना चाहता है, तब उसकी सिंह से उपमा देता है, अर्थात् समानता करता है। जैसे कोई किसी वैद्य की निर्भीकता तथा बलवत्त्व को प्रकट करने के लिए कहता है, यह वैद्यकेसरी है, केसरी नाम सिंह का है। भगवान् अपने आप अक्षर

स्वयमक्षरः सन् सर्वं क्षारयतीत्यतः सिंहः। इतरो लौकिकोऽपि सिंह एतस्मादेव यतो हि स प्राणिनामायूंषि क्षारयति हिनस्ति।

भवति चात्रास्माकम्—

सिंहः स विष्णुर्हि जगद् विरच्य, करोति तत्क्षारगुणेन युक्तम्।
स्वयन्न तत्रापि सिचिन्तनोति, योऽह्यक्षरः सिंह उ सोऽस्ति गीतः ॥३७०॥

उ निश्चये। युक्तमुक्तं भर्तृहरिणा—

यदा मेरुः श्रीमान्निपतति युगान्ताग्निदलितः, समुद्राः शुष्यन्ति मकरनिकरग्राहगलिताः।
धरा गच्छत्यन्तं धरणीधरपादैरपि धृता, शरीरे का वार्ता करिकरभकर्णाग्रचपले॥

भूतमहेश्वरः—४८९

भूतमहेश्वर इति—भूत-महत्-ईश्वर-शब्दाः पृथक्-पृथक् व्युत्पादितचराः। भूतानां भवनधर्मकाणां त्रिकालभावनां महान् प्रधान एक ईश्वरो नियामकः कर्मस्वाशु प्रेरयिता भूतमहेश्वरो विष्णुः।

लोके यथा—पृथिव्यामुप्तं बीजं यथाकालमाशु कार्यान्यित्वमापद्यतेऽङ्कुररू-

---

रूप से रहता हुआ भी सब का क्षारण-क्षय करता है, इसलिए उसका नाम सिंह है। लौकिक सिंह पशु भी इसी से सिंह है, क्योंकि वह साधारण और पशुओं की आयु को क्षीण करता है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार व्यक्त किया है—

भगवान् विष्णु का ही नाम है, क्योंकि वह विश्व का सर्जन करके विश्व को क्षार-क्षीणता रूप गुण से युक्त करता है और अपने आप एक रस अक्षर बना रहता है।

भर्तृहरि का पद्य इस अर्थ की पुष्टि करता है—

जहां युगान्त अग्नि से टुकड़े टुकड़े होकर, मेरु, सुवर्ण गिरि भी गिर जाता है। जल जन्तुओं सहित समुद्र भी शुष्क हो जाते हैं। धरणीधरों पर्वतों के पैरों से बन्धी हुई पृथिवी भी विनष्ट हो जाती है। वहां हाथी के बच्चे के कान के समान चञ्चल प्राणियों के शरीर का तो कहना ही क्या है अर्थात् इसका तो नाश होना ही है।

भूतमहेश्वरः—४८९ सम्पूर्ण प्राणियों के महान् ईश्वर।

भूत-महत्-ईश्वर शब्दों का पृथक् पृथक् रूप से प्रथम व्याख्यान किया जा चुका है। समानाधिकरण तत्पुरुषगर्भक षष्ठी तत्पुरुष समास करने से भूतमहेश्वर शब्द बनता है, जिसका अर्थ है जो तीनों कालों में होनेवाले भूतों को कर्मों में शीघ्र प्रेरणा करने वाला। जैसे लोक में देखा जाता है कि पृथिवी में बोया हुआ बीज अंकुर रूप में आकर शीघ्र अपने आप को प्रकट कर देता है। इस प्रकार भगवान् भूतमहेश्वर विश्व में सर्वत्र अपने भूतमहेश्वरत्व रूप

पतामाप्य च प्रकटयत्यात्मानम्। एवं सर्वत्र विश्वे व्याप्तो दृश्यते भूतमहेश्वरः। रजोवीर्ये प्राप्तसंयोगौ यथाकालं दशमे मासि प्रसवतामापद्येते। एवं सर्वत्रोहनीयम्।

भवति चात्रास्माकम्—

महेश्वरो भूतपदादिमोऽयं बिना विरामं त्वरया युनक्ति।
विश्वं समस्तं रसभावमायन्,[1] स्वयं स्थिरः[2] पश्यति हेमगात्रः[3] ॥३७१॥

१- षड्भावविकारानापादयन्, २- स्थिरः-कूटस्थः, ३- हेमगात्रः—हेमाङ्गो विष्णुः।

आदिदेवः—४९०

आदिदेव इति—आदिशब्दो जगतः प्राक्तनीं कैवल्यावस्थामाह, देवशब्दश्च ज्योतिःस्वरूपतामाह। एवञ्च यः सृष्टेः प्राक्काले कैवल्येन स्वरूपेणावतिष्ठते सः आदिदेवः। अत एवोक्तं "तमसः परस्तात्" इति। अथवा—आदत्ते ग्रसति जगत्प्रलयकाले स आदिः। दत्ते विसृजति च बहिः सर्गकाले स देवः। आदिश्चासौ देव इत्यादिदेवो विष्णुः। तस्यैष आदानप्रदानरूपो गुणश्च सर्वत्र जगति प्रसृतस्तं प्रतिपदमाचष्टे।

गुण से व्याप्त हो रहा है। स्त्री धर्म रज, पुरुष धर्म वीर्य दोनों मिलकर दसवें मास में प्रसवत्व को प्राप्त हो जाते हैं अर्थात् एक बच्चे के आकार में आजाते हैं। इसी प्रकार से सर्वत्र जान लेना चाहिये।

भाष्यकार ने श्लोक द्वारा भावार्थ कथन इस प्रकार किया है—

भगवान् विष्णु भूतमहेश्वर है क्योंकि वह इस समस्त विश्व को शीघ्र ही अपने २ कर्मों में प्रेरित करता है और स्वयं प्रकाशमय शरीर स्थिर कूटस्थ बनकर देखता रहता है।

आदिदेवः—४९० सब के आदि कारण और दिव्य स्वरूप।

आदि शब्द सृष्टि से पहिले की जो कैवल्य रूप से स्थिति है उसको कहता है और देव शब्द ज्योतिर्मय शुद्ध सत्त्वरूप को कहता है।

इस प्रकार से जो सृष्टि से प्रथम केवल ज्योतिर्मय रूप से स्थित रहता है वह आदिदेव है। इसीलिये वेद का वचन है "तमसः परस्ता"दिति अथवा जो प्रलय दशा में जगत् को ग्रहण कर अपने में समाविष्ट करलेता है, वह आदि है और जो सृष्टिकाल में फिर इस जगत् को अपने से बाहर कर देता है वह देव है। इस आदान प्रदान गुण रूप से उसका नाम आदिदेव है और उसका यह आदान प्रदान रूप गुण संसार में सब में व्याप्त है तथा उसकी अन्वर्थता

यथा सूर्यो रसानादत्ते, स एव पुना रसं सर्वत्र ददाति । अग्नीषोमीयं जगत्, आदिदैव्यं वा जगदित्यनर्थान्तरमिति ।

भवति चात्रास्माकम्—

स आदिदेवो भगवान् वरेण्यो विक्रीडयन्नेति' जगत्समस्तम् ।
आदानमादिर्निहितं हि यस्मिन्, ददाति चान्तं स उ देव एकः ।।३७२।।

विविधभावैः क्रीडयन् ।

महादेवः—४९१

महादेव—इति—महाँश्चासौ देवो महादेवः । महच्छब्दो देवशब्दश्च व्युत्पादित-चरौ । महच्छब्दः पूजार्थकः; मह पूजायां धातोर्निष्पन्नः । स च यथा विष्णोरभि-धानं तथा सूर्यस्यापि, द्वयोरेकरूपत्वात्केवलं नाममात्रं भिन्नमिति । यथा चेदं प्रात्यक्षिकं यत्, सर्वेषु विद्यमानेष्वपि ग्रहनक्षत्रादिषु रात्रौ, सूर्ये च गते दृष्टेरगोचरतां नैतन्नक्षत्रादिकं तथा पूज्यं लोकस्य, सूर्यो यथा जागरितस्य । लोके च शरीरे आत्मा महादेवो भवति, समनस्कानीन्द्रियाणि देवास्तेष्वयमेव पूज्यः । एवमेव सकले विश्वे विष्णुः सकलस्य चराचरस्य प्रवर्तयिता पूजार्हः । सर्वञ्चेदं जगत् परस्परं विजिगीपु-ताख्येन गुणेन युञ्जानो लोके महादेव उच्यते ।

को बतला रहा है । जैसे सूर्य देव रसों का आदान ग्रहण भी करता है और सब पदार्थों में रस का प्रदान अर्पण भी करता है । यह सकल जगत् अग्निसोममय या आदिदेवमय है ।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार व्यक्त किया है—

सब का वरणीय प्रार्थनीय भगवान् विष्णु आदिदेव है क्योंकि वह इस जगत् को जो सृष्टि से पहले अपने में निहित था, सर्जन करके विविध प्रकार के अनेक भावों से खिलाता हुआ इसका अन्त कर देता है ।

महादेवः—४९१ ज्ञानयोग और ऐश्वर्य आदि महिमाओं से युक्त ।

महत् और देव शब्द का व्याख्यान प्रथम हो चुका है । महत् शब्द पूजावाचक है, मह पूजायां धातु से सिद्ध होता है । वह महादेव नाम जैसे विष्णु का है वैसे ही सूर्य का भी है क्योंकि ये दोनों एकरूप हैं नाम ही केवल भिन्न है । यह प्रत्यक्ष में देखा जाता है रात्री में सब ग्रह नक्षत्रादि के रहते हुए भी सूर्य के अस्त हो जाने से इन में से किसी को पूजा या आदर नहीं मिलता, जैसा कि जगत् जागने पर सूर्य की पूजा करता है । शरीर में आत्मा महादेव होता है क्योंकि देव नाम, मन सहित इन्द्रियों का है । उन में आत्मा ही पूज्य है । इसी प्रकार भगवान् विष्णु सकल चराचर का प्रवर्तक पूजा के योग्य है । और उसका विजीगीपुत्व गुण समस्त लोक में व्याप्त है भगवान् के महादेवत्व में यह मन्त्र प्रमाण है "वण्महां असि सूर्य" इत्यादि यजुः

मन्त्रलिङ्गञ्च—

बण्महाँ२ असि सूर्य, बडादित्यमहाँ२ असि।
महस्ते सतो महिमा पनस्यते अद्धा देव महाँ२ असि ॥ यजुः ३३।३९ ॥

भवति चात्रास्माकम्—

विष्णुर्महादेवपदेन गीतः स दीप्यमानः स्तुतिमभ्युपैति।
तथा यथा भूषणभूषिताङ्गं वपुस्तमाख्याति च भूषणं स्वम् ॥३७३॥

देवेशः—४९२

देवेश इति—देवशब्दो व्युत्पादितचरः। ईशशब्दश्च, ईश ऐश्वर्ये, धातोः "इगुपधज्ञाप्रीकिरः कः" इति कः प्रत्ययः। ईष्ट इतीशः। देवानामीशो देवेशः।

देवशब्दस्य इन्द्रादयो देवाः समनस्कानीन्द्रियाणि च वाच्यार्थः। एवञ्च देवानामीशस्तत्तदधिकृतकर्मसु प्रेरको नियामको व्यवस्थापको वा देवेशो विष्णुः। आत्मापि मनसेन्द्रियाणां कर्मसु प्रवर्तकत्वाद्देवेशः, मनोऽपि तथा देवेशः।

एवं भगवान् देवेशत्वरूपस्वसामर्थ्येन सर्वत्र व्याप्तः।

भवति चात्रास्माकम्—

विष्णुः स देवेश इहास्ति बोध्यः, सूर्योऽपि देवेश इहास्ति सिद्धः।
मनोऽपि देवेशमुदाहरन्ति, देवेश आत्मा कथितः स देही॥ ३७४॥

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार व्यक्त किया है—

महादेव नाम भगवान् विष्णु का है क्योंकि वह भासमान चमकता हुआ पूजा को प्राप्त करता है। और जैसे भूषणों से भूषित अङ्गों वाला शरीर अपने भूषणों को स्पष्ट दिखाता रहता है। इसी प्रकार उस देदीप्यमान भगवान् से दीपित यह जगत् उस को सर्वत्र बतला रहा है, प्रकट कर रहा है।

देवेशः—४९२ समस्त देवों के स्वामी।

देव शब्द का व्याख्यान पहले किया जा चुका है। ईश शब्द "ईश ऐश्वर्ये" इस अदादि गण की धातु से कर्ता में 'क' प्रत्यय करने से बनता है। देवताओं का जो ईश-नियामक-व्यवस्था करनेवाला है वह 'देवेश' कहा जाता है। देव नाम इन्द्रादि देवों का तथा मन सहित इन्द्रियों का है। उस को जो अपने नियमों में व्यवस्थित रखता हुआ कर्मों में प्रवृत्त करता है, वह देवेश है। यह भगवान् विष्णु का नाम है। आत्मा भी मन के द्वारा इन्द्रियों को कर्मों में प्रवृत्त करता है, इसलिये देवेश है। मन भी इन्द्रियों का प्रवर्तक होने से देवेश है। इस प्रकार भगवान् अपने देवेशत्व रूप सामर्थ्य से सकल जगत् में व्याप्त है।

भाष्यकार ने श्लोक द्वारा भावार्थ प्रकाशन इस प्रकार किया है—

सर्वनियामक भगवान् विष्णु देवेश नाम से समझने चाहियें तथा सूर्य मन और शरीरी आत्मा भी देवेशत्व धर्मवाले होने से ये सब देवेश समझने चाहियें।

देवभृद्गुरुः—४९३

देवभृद्गुरुरिति—देवशब्दो गुरुशब्दश्च व्युत्पादितचरौ। भृच्छब्दः, पालन-पोषणार्थको डुभृञ् धातुर्जुहोत्यादिकस्तस्मात् क्विप्, तुक् च भृदिति।

देवान् बिभर्ति—देवभृच्चासौ गुरुश्चेति देवभृद्गुरुरिति। देवं रोचिष्णु विश्वं बिभर्ति, तत्र च स्वनिगूढस्वरूपं प्रत्यक्षमिव दर्शयति, द्रष्टुकामेभ्यस्तत्त्वज्ञानिभ्यः, संजनितव्यक्तिलक्षणैः। यथा—नियतकालमाम्रवृक्षेषु मञ्जर्युद्गमो, वसन्तागमं गृणाति शंसति उपदिशति वा। दिनानां वृद्धिह्रासौ—उत्तरायणं, दक्षिणायनञ्च व्यंक्तः। मयूराणां बर्हपातो बर्होदयो वा तं तं नियतं कालं व्यनक्ति। विष्णोरयमेवोपदेशनमार्गः। एवञ्च स विष्णुरेककाले, स्वोभयात्मकेन गुणेन विश्वं व्यश्नुवानः सन्, देवभृद्गुरुरित्युक्तो भवति।

भवन्ति चात्रास्माकम्—

स देवभृद् विष्णुरिदं विरच्य सहैव लोकेन च वक्ति कालम्।
भूतं भवन्तं बहुधा च भव्यं तच्छाकुनं शास्त्रमुदाहरन्ति ॥३७५॥

देवभृद्गुरुः—४९३ देवों का विशेष रूप से भरण-पोषण करनेवाले उनके परम गुरु।

देव और गुरु दोनों शब्दों का व्याख्यान पहिले किया जा चुका है। भृत् शब्द पालन पोषण अर्थ वाली जुहोत्यादि गण की 'डुभृञ्' धातु से 'क्विप् प्रत्यय तथा तुक् का आगम करने से सिद्ध होता है। इस प्रकार से 'देवभृद्गुरु' शब्द का अर्थ जो दोनों का धारण पोषण करे और सब का गुरु हो, यह होता है।

देव नाम रुचिकर भोग्य पदार्थों सहित विश्व का जो धारण पालन करता हुआ विश्व में छिपे हुए अपने रूप को सबके, विशेष करके जिज्ञासुओं के लिये जो प्रकट दिखलावे अर्थात् प्रत्येक वस्तु के उत्पन्न हुए चिन्हों से जो उपदेश करे वह है देवभृद्गुरु।

जैसे समय आने पर आम्र के वृक्षों में होने वाला जो मञ्जरियों का उदय-प्रादुर्भाव वसन्त ऋतु के आगमन का उपदेश करता है। दिनों का घटना तथा बढना-दक्षिणायन तथा उत्तरायण रूप सूर्य की गति को प्रकट करता है। इसी प्रकार मयूरों के पक्षों का पड़ना तथा उत्पन्न होना उस नियत काल को प्रकट करता है। यही भगवान् के उपदेश का मार्ग है।

इस प्रकार भगवान् विष्णु अपने देवभृत् तथा गुरुत्व रूप से समग्र संसार में व्यापक हो रहा है।

भाष्यकार ने श्लोकों द्वारा भावार्थ कथन इस प्रकार किया है—

वह भगवान् विष्णु देवभृद्गुरु है, क्योंकि वह इस सकल विश्व की रचना करके लोक के साथ या लोक के द्वारा काल का उपदेश करता है, जो काल भूत भविष्यत् तथा वर्तमान रूप तीन प्रकार का है। इस शकुनि (पक्षी) सम्बन्धी प्रतिपादक मार्ग को लोक में शाकुन-शास्त्र कहते हैं।

वृष्टिर्यदा सामयिकी न भूता, दुर्भिक्षतायाः कथनं तदेतत्।
रोगोदयो राष्ट्रविनाशकर्ता, पापेऽतिवृद्धे तदरिष्टमाहुः ॥३७७॥

अरिष्टलक्षणञ्च चरके—इन्द्रियविमाने (अ० १० श्लो० २६)—

क्रियापथमतिक्रान्ताः केवलं देहमाप्लुताः।
चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते ॥

स देवभृत् पक्षिमुखैर्बुवाणः, स्वं नाम सार्थं कुरुते मतं मे।
तथा यथा सर्वसमृद्धगात्रः क्रियाः समस्ताः कुरुते सनात्मा ॥३७८॥

सना=सदा, आत्मा=शरीरी। विकलाङ्गो न तथा प्रवर्तते यथा सकलाङ्गः।

उत्तरः—४६४

उत्तर इति—उत्पूर्वकः स्तृ प्लवनसन्तरणयोरिति भौवादिको धातुस्तस्मात् "अकर्तरि च कारके" इत्यधिकारे "ऋदोरप्" पा० ३ ३।५६। इति सूत्रेण—अप् प्रत्ययो गुणो रपरश्चत्त्वं दस्य तः।

यद्वा—उदिति—उत्कृष्टवाचिन उच्छब्दात् "द्विवचनविभज्योपपदे तरबीयसुनौ" पा० ५।३।५७ सूत्रेण द्वयोरेकस्यातिशये द्योत्ये तरप्प्रत्ययः। उत्तरो नाम विष्णुः। यतो हि स विश्वस्य तरणसाधनो विश्वस्मादूर्ध्वङ्गतश्च भवति।

मन्त्रलिङ्गञ्च—"विश्वस्मादिन्द्र उत्तरः। अथर्व० २०।१२६।१

वह भगवान् देवभृद्गुरु पक्षी आदि के मुख से स्वयं बोलता हुआ अपने नाम को सार्थक करता है, यह मेरा मत है। जैसे सब प्रकार से समृद्धि युक्त तथा पुष्ट शरीर वाला जीवात्मा अपनी सब क्रियायें सुचारु रूप से करता है।

समय पर वर्षा का न होना रूप से भगवान् का दुर्भिक्ष का उपदेश है। पाप के अधिक बढ़ जाने से जो राष्ट्र का विनाश करने वाले रोगों का प्रादुर्भाव होता है, वह अरिष्ट का लक्षण चरक के इन्द्रिय विमान में आया है।

उत्तरः—४६४ संसार-समुद्र से उद्धार करने वाला और सर्वश्रेष्ठ।

भ्वादिगण की 'तृ' धातु है, प्लवन तथा सन्तरण अर्थात् कूदकर किसी स्थान को पार करना या तिरकर जलादि को पार करना इसका अर्थ है। इससे कृत् 'अप्' प्रत्यय होने से तर शब्द सिद्ध होता है। उत् उपसर्ग है। अथवा उत्कर्ष अतिशय वाची उत् शब्द से 'तरप्' तद्धित प्रत्यय करने से उत्तर शब्द सिद्ध होता है। उत्तर नाम भगवान् विष्णु का है, क्योंकि वह सब के इस दुःख रूप संसार से पार होने का साधन है अर्थात् वह जीव भगवान् के आश्रित होकर ही दुःखों से मुक्त होता है। तथा वह सब विश्व से उत्कृष्ट ऊपर गया हुआ महत्त्वशाली है; इसलिए उत्तर है। इसमें "विश्वस्मादिन्द्र उत्तरः" यह मन्त्र प्रमाण है।

लोकेऽप्येवं विचार्यते—आत्मशरीरयोः श्रेष्ठत्वे विचार्यमाणे, विश्वेन्द्रियोपकरणयुताच्छरीरादात्मैव श्रेष्ठतरः। उत्तरः सूर्य उत्थिततर इति सर्वत्र योजनीयम्।

भवति चात्रास्माकम्—

स उत्तरो विष्णुरिदं समस्तं, वितत्य तत्रास्ति न तेन लिप्तः।
तथा यथात्मा कथितोऽस्ति देही, देहेन नाक्तस्तत उत्तरः सः ॥३७८॥

गोपतिः—४९५

गोपतिरिति—गम्लृ गतौ—भौवादिकाद्धातोः "गमेर्डोस्" इत्यौणादिको डोस् प्रत्ययो डित्त्वाट्टिलोपो गोरिति सिध्यति। पा रक्षणे—आदादिकाद्धातोः "पातेर्डतिः" इति डतिः प्रत्ययः टिलोपश्च, डित्यभस्यापीति नियमात् पतिः। गोशब्दस्य सर्वनामस्थाने "गोतो णित्" पा० ७।१।९० इति णिद्वद्भावविधानात् णिन्निमित्ताका वृद्धिः, तेन गौः, गावौ, गावः, गां, गावौ इत्यादीनि रूपाणि भवन्ति। गोशब्दः सास्नालांगूलवतः पशोर्वाचकः—वाग् भूमिश्चाप्यस्य वाच्यार्थः।

तत्र प्राञ्चः— "गावो घृतस्य मातरः"

एवञ्च, गावो वाचो, गावः पशवो, गौर्भूमिश्च, विश्वनिर्माणे कारणमिति भावार्थः। एवञ्च गोपतिः, चतुष्पदां गवां, वाचां, भूमेश्च रक्षक इत्यर्थः। अत एव विष्णुर्गोपतिः। अथवा सर्व एव पशवो गोशब्दाभिधाः, गच्छतीति गौरित्यर्थात्।

लोक में भी विचार करने से आत्मा और शरीर में आत्मा ही श्रेष्ठतर है। सूर्य भी उत्तर है, क्योंकि वह बहुत ऊंचा उठा हुआ है।

भाष्यकार ने श्लोक द्वारा भावार्थ कथन इस प्रकार किया है—

उत्तर नाम भगवान् विष्णु का है, क्योंकि वह विश्व की रचना करके उससे लिप्त नहीं होता, किन्तु उससे ऊपर उत्कृष्ट है। जैसे आत्मा शरीरी होकर भी शरीर से उत्तर श्रेष्ठ है।

गोपतिः—४९५ गोपाल रूप से गायों की रक्षा करने वाला।

गम्लृ गतौ धातु से उणादि, डोस् प्रत्यय तथा टिलोप करने से गो पद सिद्ध होता है। तथा पा रक्षणे अदादि धातु से उणादि 'डति' प्रत्यय और टिलोप करने से पति शब्द सिद्ध होता है। दोनों का षष्ठी समास करने से, गोपति एक पद बन जाता है। गो शब्द से गल कम्बल तथा पूंछ वाले पशु विशेष का बोध होता है। इसमें "गावो घृतस्य मातरः" यह प्राचीन प्रमाण है। गो नाम जैसे पशु का वाचक है, उसी प्रकार वाणी तथा भूमि का वाचक है। इस प्रकार से अर्थ होता है भगवान् विष्णु चतुष्पाद पशु विशेष गायों, वाणियों तथा भूमि की रक्षा करने वाला गोपति। अथवा गमन क्रिया की समानता से भी पशु गो नाम से बोले जाते हैं। उन सब की जातियां भिन्न हैं, इसलिए [illegible] में भेद है, जिससे व्यवहार

जातिभेदान्नामभेदः पशूनां, व्यवहारसौकर्याय। गौणेन नाम्नेन्द्रियाण्यपि गाव उच्यन्ते, यतो हि तानि विषयान् प्रति गच्छन्ति। मनोऽपि दूरं दूरतरञ्च गमनाद् गौरित्युक्तं भवति। आत्मापि देहाद्देहान्तरं गच्छतीति गौरुक्तो भवति। देहोऽपि गौर्देशाद् देशान्तरं गमनात्। इत्थं स गोपतिर्भगवान् विष्णुः सर्वत्र व्याप्तः प्रार्थ्यते गृह्यते वा। एवं कल्पनावैविध्ये चास्मदिमानि पद्यानि स्मर्तव्यानि—

दृश्यं काव्यं जगद् विष्णोः श्रव्यं वेद उदाहृतः।
जगद्वेदस्य व्याख्यानं वेदो विश्वप्रकाशकः ॥१॥

लोकज्ञो यश्च वेदज्ञो, वेदज्ञो यश्च लोकवित्।
वाक्यं तस्य प्रमाणं स्यादितरस्तत्रापराध्यति ॥२॥

लोकज्ञो न च वेदज्ञो, वेदज्ञो न च लोकवित्।
एकपक्षखगस्येव ज्ञानं तस्यावसीदति ॥३॥

एवं लोकवेदानुसारं विविधमूहितव्यम्—
भवतश्चात्रास्माकं गोपतिशब्दमधिकृत्य—

स गोपतिर्विष्णुरुदात्तवीर्यो, गां पाति भूमिं बत पाति वाचम्।
आत्मा मनः खानि वपुश्च सर्वं, गौस्तन्मिथः पाति जगत् प्रसिद्धम् ॥ ३७९ ॥

सुगमता से चलता है। इन्द्रियों का भी गुणकृत नाम गो है, क्योंकि वे विषयों की ओर जाती हैं। मन भी दूर तथा बहुत दूर तक जाने से गो नाम से कहा जाता है। आत्मा भी एक देह से दूसरी देह में जाता है, इसलिए गो नाम से बोला जाता है। देह का नाम भी गो है क्योंकि वह एक स्थान से दूसरे स्थान में जाता है। इस प्रकार से गोपति नाम भगवान् विष्णु सर्वत्र व्यापक, सब का प्रार्थनीय या जानने योग्य है। इस प्रकार नाना कल्पनाओं के विषय में हमारे इन पद्यों पर भी विद्वान् लोग दृष्टिपात करें। भगवान् विष्णु का जगत् दृश्य काव्य है, तथा वेद श्रव्य काव्य है। जगत् वेद का व्याख्यान रूप है, तथा वेद विश्व का प्रकाशक है, जो विद्वान् लोक के वास्तविक स्वरूप को जानता है, वह वेद के स्वरूप को जानता है तथा जो वेद को जानता है, वही लोक को जानता है अर्थात् ये दोनों वाच्य-वाचक रूप से सम्बद्ध हैं। इन दोनों के स्वरूप को जानने वाले का ही वाक्य प्रमाण होता है, दूसरा अनभिज्ञ जो इस विषय में बोलता है, वह भूल या अपराध करता है। लोक के स्वरूप को जानकर जो वेद को नहीं जानता अथवा जो वेदविद् है और उसको लोक का ज्ञान नहीं है, उसका ज्ञान एक पक्ष वाले पक्षी की तरह निष्फल है। इस प्रकार लोक तथा वेद के अनुसार कल्पनायें कर लेनी चाहियें।

भाष्यकार ने श्लोकों द्वारा भावार्थ इस प्रकार संकलित किया है—

वह उत्कृष्ट बलशाली भगवान् विष्णु गोपति है, क्योंकि गो पशु तथा सामान्य पशु, भूमि और वेद वाणी की रक्षा करता है। जो गोपति के इस वास्तविक स्वरूप को जानता है जो कि

एवं हि यो वेत्ति गवां पतिं तं विष्णुं जगत्यां विततं समन्तात् ।
स एव योगी स हि पण्डितो वा, स एव गोपालपदेन गीतः ॥३८०॥

मन्त्रलिङ्गञ्च—

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणि कर्मणि स्थिरः ।
वीडोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सखाय हवामहे ॥
(ऋक् १।१०१।४)

गोप्ता—४९६

गोप्तेति—गुपू रक्षणे भौवादिको धातुस्तस्मात्तृच्, तृन् वा औणादिकः । गुपूधूपेति सर्वत्र प्राप्त आयप्रत्यय "आयादय आर्धधातुके वा" पा० ३।१।३१ इत्यनेनार्धधातुके विकल्प्यते "स्वरतिसूतिसूयतिधूञूदितो वा" पा० ७।२।४ इति सूत्रेणोदित्त्वादिडपि विकल्प्यते । तत्रोभयाभावपक्षे सावनङादौ सति गोप्तेति । गोप्ता रक्षकः स च विष्णुरेव सर्वस्य जगतो गोप्तृत्वात् ।

अन्नं भुक्तं बहुधा विपरिणममानं, धातूपधातून् मलोपमलांश्च जनयति । गोप्त्रा विष्णुना कृतव्यवस्था वातपित्तकफाश्च पञ्चधा विभक्ताः सकलं विश्वं व्याप्नुवन्ति । इति दिङ्मात्रमुदाहृतम् ।

मन्त्रलिङ्गञ्च—

अग्ने! त्वं सुजागृहि, वयं सुमन्दिषीमहि ।
रक्षणोऽप्रयुच्छन् सुबुधे नः पुनस्कृधि ॥ यजु० ४।१४

समग्र विश्व में व्याप्त है । वही पण्डित तथा योगी है, भगवान् गोपति ही गोपाल पद से अभिहित है । इसमें यह मन्त्र भी प्रमाण है "यजमानस्य पशून् पाहि" यजु० ।

गोप्ता—४९६ समस्त प्राणियों का पालन और रक्षण करने वाला ।

गुप् भ्वादिगण की धातु है इससे कर्ता में तृच् प्रत्यय करने से गोप्ता शब्द सिद्ध होता है । गोप्ता नाम भगवान् विष्णु का है, क्योंकि वह सकल विश्व की रक्षा करने वाला है । और उसका यह गोप्तृत्व गुण सर्वत्र पदार्थों में व्याप्त है जैसे भक्षण किया हुआ अन्न अनेक रूपों में परिवर्तित होता हुआ धातु, उपधातु, मल और उपमलों को उत्पन्न करता है । तथा गोप्ता नामक भगवान् विष्णु के द्वारा नियमित किए हुए वात, पित्त, कफ पांच भेदों में विभक्त होकर सकल विश्व में व्याप्त हो रहे हैं । इस प्रकार वह सब की रक्षा करने वाला भगवान् गोप्ता है । 'अग्ने! त्वं सुजागृहीत्यादि' प्रमाण है ।

भवति चात्रास्माकम्—

गोप्ता स लोकस्य सनातनोऽजः, कर्तापि लोकस्य यतः स विष्णुः।
माता प्रसूते परिपाति सव्यं गोप्तारमाख्याति दिने दिने सा॥३८१॥

ज्ञानगम्यः—४९७

ज्ञानमिति—ज्ञानशब्दो ज्ञा अवबोधने धातुस्तस्मात् करणे ल्युट् प्रत्ययः। ज्ञायतेऽनेनेति ज्ञानम्।

गम्य इति—गम्लृ गतौ भौवादिकधातोः "पोरदुपधात्" पा० ३।१।९८ इति कर्मणि अर्हार्थे वा यत्प्रत्ययः। ज्ञानेन गम्यते, प्राप्यते प्राप्तुमर्हो वा ज्ञानगम्यो विष्णुः। लोके यथा शिल्पी किञ्चित्कार्यविषयकज्ञानवान् भवति पूर्वं पश्चाच्च तत्कार्यं कुरुते। तं दृष्ट्वा चापरस्तज्ज्ञानमधिगच्छति, तज्ज्ञानं परम्परया प्रसृतं भवति। ज्ञानिना च यथा ज्ञातुं शक्यते स्वविषयो न तथा मूढेन, अतो विष्णुर्ज्ञानगम्य इत्युच्यते।

भवति चात्रास्माकम्—

स ज्ञानगम्यः कथितः पुराणो ज्ञाने समाप्तिं लभते हि सर्वम्।
ज्ञानात्प्रसूतं सकलं हि दृश्यं तस्मिन् समायाति च बोधगम्ये॥३८२॥

बोधगम्ये=ज्ञानगम्ये भगवति विष्णौ।

भाष्यकार ने श्लोक द्वारा भावार्थ कथन इस प्रकार किया है :—

सर्वेश्वर भगवान् विष्णु का नाम गोप्ता है, क्योंकि वह सब जगत् का कर्ता तथा इसकी रक्षा करने वाला है। माता बच्चे को उत्पन्न करती है तथा अनुकूल बनकर उसकी रक्षा करती है अतः वह उस भगवान् के गोप्तृत्व धर्म को प्रकट करती है।

ज्ञानगम्यः – ४९७ ज्ञान के द्वारा जानने में आनेवाला।

ज्ञा धातु क्र्यादि गण की है इसका अर्थ है जानना, इस से करण अर्थ में ल्युट् करने से ज्ञान की सिद्धि होती है। गम्लृ गतौ भ्वादिगण की धातु से कर्म में या योग्यार्थ में यत्प्रत्य करने से गम्य शब्द सिद्ध होता है। जो ज्ञान के द्वारा प्राप्त किया जाये या प्राप्त करने योग्य हो उस का नाम ज्ञानगम्य है। जैसे लोक में कोई कारीगर अपने कार्य का जानकार होने के पश्चात् उस कार्य को करता है तथा उस को देखकर दूसरा जानकार होता है। इस प्रकार से वह ज्ञान विस्तृत हो जाता है। अपने विषय को जैसे ज्ञानी पुरुष जान सकता है, वैसे मूर्ख नहीं जान सकता। भगवान् ज्ञान से ही जाना जाता है। इसलिये ज्ञानगम्य है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार संकलित किया है—

वह पुरातन पुरुष ज्ञानगम्य है क्योंकि सब ज्ञान में ही समाप्त होता है। सम्पूर्ण संसार की ज्ञान से उत्पत्ति है तथा अन्त में ज्ञान में ही समा जाता है।

पुरातनः—४९८

पुराशब्दः "स्वरादिनिपातमव्ययम्" पा० १-१-३७ इत्यनेनाव्ययसंज्ञकः। तस्मात्कालवचनाद् भवार्थे "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यस्ट्युट्युलौ तुट् च" पा० ४।३।२३ सूत्रेण ट्यु: प्रत्ययः तुडागमश्च। पुरातनः पुराणः सदातनः सनातनः—इत्यादयः शब्दाः समनार्थका भगवन्तं विष्णुं ब्रुवन्ति। भगवति कालपरिच्छेदाभावात् स न नूतनत्वेन पुरातनंत्वेन वा परिच्छद्यते, स यथा पुरातनस्तथा नूतनोऽपि सर्वरूपः।

मन्त्रलिङ्गञ्च—

"अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति।" ऋक्० १-१-२

पुराभवतीति पुरातनः।

भवति चात्रास्माकम्—

पुरातनो विष्णुरिदं समस्तं, पुराततं सन्ततयन् सदावत्।
पुरातनस्तत्र पुरातनेऽस्मिन्, विश्वे सदाभाति पुरा च यद्वत्॥३८३॥

सदाभाति=सद् आभाति—सत उद्भूतम्—आभाति प्रकाशते। अथवा सत्त्वरूपमापन्नः प्रकाशते।

पुरातनः—४९८ सदा एकरस रहनेवाला सब का आदि पुराण पुरुष।

पुरा यह अव्यय शब्द है इससे भव अर्थ में 'ट्यु' प्रत्यय और तुड् का आगम करने से पुरातन शब्द सिद्ध होता है। पुरातन, सदातन, सनातन ये सब शब्द समान अर्थवाले हैं और भगवान् विष्णु के वाचक हैं। भगवान् काल से परिच्छिन्न परिमित नहीं हैं इसलिये वे केवल पुरातन या नूतन शब्द के वाच्य न होकर पुरातन भी हैं और नूतन भी। इसमें यह मन्त्र प्रमाण है 'अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत इत्यादि'। पुरातन नाम सबसे प्रथम होनेवाले का है। भगवान् विष्णु ही सब के प्रथम आदि में हैं इसलिये पुरातन नाम विष्णु का है।

भाष्यकार ने श्लोक द्वारा भावार्थ संकलन इस प्रकार किया है—

पुरातन नाम भगवान् विष्णु का है क्योंकि वह सनातन पहले के प्रथम कल्पों के समान इस विश्व का विस्तार सर्जन करता हुआ इसमें व्यापक होकर शोभित हो रहा है अथवा सद् रूप से प्रकट होकर प्रकाशमान है।

शरीरभूतभृत्—४६६

शरीरमिति—शॄ हिंसायां क्रैयादिको धातुस्तस्मादौणादिकः कॄशॄपॄकटिपटिशौटिभ्य ईरन्'' इतीरन् प्रत्ययः, रपरो गुणः, शरीरमिति। भूतमिति—भू सत्तायां धातोरकर्मकत्वात् कर्तरि क्तः ''श्रयुकः किति'' पा० ७।२।११ इतीण्निषेधः, भवतीति भूतमिति। भृदिति—डुभृञ् धारणपोषणयोरिति जौहोत्यादिको, भृञ् भरणे इति भौवादिको वा धातुस्तस्मात् क्विपि, तुकि, गुणाभावे च भृदिति। एवञ्च शरीरं शीर्णशीलं विनाशि विकारजातं भूतं सत्यात्मकं प्रकृतितत्त्वञ्च यो बिभर्त्ति धारयति, पोषयति वा स शरीरभूतभृदिति समुदितार्थः।

यद्वा—शरीरे स्थितानि भूतानि, शरीराधिष्ठातॄणि, शरीरस्वरूपनिष्पादयितॄणि, दैवतानि बिभर्तीति, शरीरभूतभृदिति।

तद्यथा—प्राणादिरूपा वायवः, कामसङ्कल्पादिरूपं मनः, चक्षुरादीनीन्द्रियाणि, बुद्धिः, अहङ्कारः सन्धयो वर्णः इत्येतत् सर्वं शरीरसम्भारमेकीभूय शरीरेति नाम्नोच्यते, केशाः स्नायवो मांसमज्जादयोऽप्यत्र सम्भारशब्देन ज्ञेयाः। तदेतान् सम्भारान् कस्कुतः सञ्चित्य आभरत्, कश्चैतान् समदधात्, सन्धिमकरोत्—अस्य प्रश्नस्योत्तरमथर्ववेद उक्तम्—

तथा हि—

संसिचो नाम ते देवा ये सम्भारान्त्समभरन्।
सर्वं संसिच्य मर्त्यं देवाः पुरुषमाविशन्। अथर्व० ११।८।१३

शरीरभूतभृत्—४६६ शरीर के उत्पादक पञ्चभूतों का प्राणरूप से पालन करनेवाला।

शरीर शब्द 'शृ' धातु हिंसा अर्थवाली जो क्र्यादिगण की है, उणादि 'ईरन्' प्रत्यय होकर बनता है भूत शब्द 'भू' सत्तायां धातु से कर्ता में 'क्त' प्रत्यय करने से बनता है तथा भृत् शब्द डुभृञ् जुहोत्यादि अथवा भृञ् धारणे भ्वादि से क्विप् प्रत्यय तथा तुगागम करने से बनता है। इसी प्रकार समस्त शरीरभूतभृत् शब्द का अर्थ शरीर शीर्णशील विनाशी विकार समूह, तथा भूत सत्य प्रकृतितत्त्व को जो धारण करता है अथवा पालन करता है वह 'शरीरभूतभृत्' है अथवा भूत नाम है शरीर में स्थित शरीर को बनानेवाले शरीर के अधिष्ठातृ देवताओं का, उनका जो धारण या पोषण करे उसका नाम शरीरभूतभृत् है। जैसे प्राणापानादि रूप वायु काम सङ्कल्पादि रूप मन, नेत्र आदि इन्द्रियां, बुद्धि अहंकार शरीर की सन्धियां तथा वर्ण केश, स्नायु, मज्जा मांस आदि शरीर के साधन हैं अर्थात् ये सब एकत्र होने पर शरीर नाम से कहे जाते हैं। अब प्रश्न यह होता है कि ये सब शरीर के सम्भार सामग्री कहां से और किसने एकत्र किये हैं? तथा किसने इसे जोड़ा है? इस प्रश्न का उत्तर अथर्व वेद देता है "संसिचो नाम ते देवाः" इत्यादि मन्त्रों का भावार्थ यह है संसिच नाम के देवों ने

शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसा।
त्वचा प्रावृत्य सर्वं तत् सन्धा समदधान्महो। अथर्व० ११।८।१५
सर्वे देवा उपाशिक्षन् तदजानाद् वधूः सती।
ईशा वशास्य या जाया सास्मिन् वर्णमाभरत्। अथर्व० ११।८।१७

एवञ्च शरीरस्थानां समनस्कानामिन्द्रियाणां, धातूनाञ्च सञ्चेतारो धातारः सन्धातारश्च देवाः शरीराधाराः शरीरधारका उच्यन्ते—यथा सूर्यश्चक्षुषः, चन्द्रमा मनसः, वातस्त्वच इत्यादि। तान् देवान् बिभर्त्ति इति शरीरभूतभृद् विष्णुः। तथा च—

या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः। अथर्व० ११।८।३०
सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य वि भेजिरे।
अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये। अथर्व० ११।८।३१
तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते। अथर्व० ११।८।३२

एतन्मूलकमेवेदं यदुच्यते सर्वं खल्विदं ब्रह्मेति। भवति चात्रास्माकम्—

शरीरभूतभृल्लोके, गीतः सोऽस्ति पुरातनः।
स बिभर्ति सदा सूर्यं, मृत्युं निद्रां श्रियं तथा ॥३८४॥
एवं वेत्ति च यो लोके व्याप्तं सत्यं सनातनम्।
स तमेवैति तत्त्वज्ञः सत्ये सत्यं प्रतिष्ठितम् ॥३८५॥

इस सम्भार का संचय किया, सन्धा नामक देव ने इन्हें जोड़ा संहित किया तथा ईशा नामक देवता ने वर्ण रूप का स्थापन किया। इसी प्रकार और २ भावों के देवताओं के भावों का वर्णन है सो वहीं पर देखना चाहिये।

इस प्रकार से शरीर में स्थित मन, इन्द्रिय, धातु, उपधातु आदिकों का संचय करनेवाले धारण करनेवाले तथा संधान करने वाले, जोड़नेवाले शरीर के आधारभूत देव शरीर के धारक कहे जाते हैं, जैसे चक्षु का सूर्य, मन का चन्द्र तथा त्वचा का वायु इत्यादि। उन देवों का जो धारण पोषण करता है, वह शरीरभूतभृत् विष्णु का नाम है "या आपो याश्च देवते'त्यादि मन्त्रों से उन देवों में ब्रह्म की सत्ता का वर्णन है इसलिये अथर्व में ब्रह्म को ज्येष्ठ कहा है तथा "सर्वं खल्विदं ब्रह्म" इस अर्थ की पुष्टि होती है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार कहा है—

भगवान् पुरातन विष्णु ही शरीरभूतभृत् नाम से लोक में कहा जाता है। वह सदा सूर्य, मृत्यु निद्रा तथा श्री आदि देवताओं को धारण करता है। इस प्रकार जो उस सत्य सनातन को लोक में व्याप्त देखता है वह तत्त्वज्ञ उस भगवान् को प्राप्त कर लेता है क्योंकि सत्य की सत्य में स्थिति है।

भोक्ता--५००

भोक्तेति—भुज पालनाभ्यवहारयोरिति रौधादिको धातुरनिट् तस्मात्कर्तरि तृच्; गुणः कुत्वं चर्त्वञ्च भोक्तेति। भुनक्ति भुंक्ते वा जगद्-भोक्ता रक्षको भक्षकश्च। उत्पादयिता, रक्षिता, भक्षिता च भवतीत्यर्थः।

यथा कृषीवलोऽन्नमुत्पादयति रक्षति लवनादिकं विधाय वितुषीकृत्य चात्ति। सर्वत्रैवं योजनीयम्। अमुथैव भगवान् विष्णुरिदं विश्वं लोकालोकात्मकं सृजति, रक्षति, भुंक्ते, संहरति च। संहरणमेव भक्षणम्। तस्माद्विष्णुर्भोक्ता।

भवति चात्रास्माकम्—

भोक्ता स विष्णुः कुरुते हि विश्वं, भुनक्ति तत् सर्वमिदं स एव।
स एव सर्गं कुरुते स्वगर्भे तथा यथा पाकमुपैति[1] पक्ता ॥३८६॥

१ उपैति=अत्ति।

प्रथमभागस्थास्मच्छ्लोकसंख्या ३३१+द्वितीयभागास्था ३८६=७१७

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४९) विष्णुसहस्र-नामस्तोत्रस्य सत्यभाष्ये

पञ्चमं नाम-शतकं सम्पूर्णम्।

भोक्ता—५०० निरतिशय आनन्दपुञ्ज को भोगनेवाला।

भुज धातु रुधादि गण की है पालन और भक्षण इसका अर्थ है कर्ता में तृच् प्रत्यय करने से भोक्ता शब्द सिद्ध होता है। भोक्ता नाम रक्षा करनेवाला तथा भक्षण कराने वाला दोनों का है। जो जिस वस्तु का उत्पादक होता है अर्थात् बनानेवाला होता है वह उस का भोक्ता भी होता है। जैसे कृषक अन्न बोता है, उसकी रक्षा करता है तथा पक जाने पर निकाल कर उसका भक्षण करता है। इसी प्रकार भगवान् जगत् का सर्जन, पालन तथा भक्षण करता है। प्रलय काल में जगत् का अपने में संहार ही उस का भक्षण है। इसलिये भगवान् विष्णु का नाम भोक्ता है।

भाष्यकार ने श्लोक द्वारा भावार्थ इस प्रकार दिया है—

भगवान् विष्णु का नाम भोक्ता है क्योंकि वह विश्व को बनाता है, पालन करता है तथा भक्षण करता है जैसे कोई पाचक पाक बनाकर उसे भक्षण कर लेता है।

भूताख्यमेतच्छतकं मदीयं मनोरमं विष्णुसहस्रनाम्नः।
अनूदितं राष्ट्रगिरा च भूयाद् भव्याय दिव्यं भुवि भावुकानाम्॥

महाभारत अनुशासन पर्व अन्तर्गत विष्णुसहस्रनाम स्तोत्र के सत्यभाष्य का पञ्चम शतक पूर्ण हुआ।

लेखक की अन्य रचनायें

१–नाडीतत्त्वदर्शनम्		१०-००
२–सत्याग्रह-नीतिकाव्यम्		२-५०
३–विष्णुसहस्रनाम-सत्यभाष्यम् भाग	१	१२-५०
४– ,, ,, ,,	२	१२-५०
५– ,, ,, ,,	३	१२-५०
६– ,, ,, ,,	४	१२-५०

****
******
****

प्राप्ति-स्थान

१—सत्यदेव वासिष्ठ, देवसदन, महममार्ग भिवानी,
जि॰ हिसार (हरयाणा)

२—दिव्यौषधि भण्डार, रेलवे रोड, भिवानी,
जि॰ हिसार (हरयाणा)

३—आचार्य प्रिंटिंग प्रेस, दयानन्दमठ गोहाना मार्ग, रोहतक।

४—नाथ पुस्तक भण्डार, रेलवे रोड, रोहतक।